This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...गुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

...ल क्र. M-2321 विषय

श्रीमद्भागवत महापुराण प्रथम, द्वितीय, तृतीय, दशम, द्वादश स्कंध

...खक / लिपीकार

पृष्ठ 544 काळ शके 1790 पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामचंद्राय॥ वागीशा य
स्य वदने लक्ष्मीर्यस्य च वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥१॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं॥ श्रीकृ
ष्णाख्यं परं धाम जगद्धाम नमामि तत्॥२॥ माधवोमाधवावीशौ सर्वसिद्धिप्रदायिनौ॥ वंदे परस्परात्मानौ परस्परनतिप्रियौ॥३॥
संप्रदायानुरोधेन पौर्वापर्यानुसारतः॥ श्रीभागवतभावार्थदीपिकेयं प्रतन्यते॥४॥ क्वाहं मंदमतिः क्वेदं मंथनं क्षीरवारिधेः॥ किं
तत्र परमाणुर्वै यत्र मज्जति मंदरः॥५॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं॥ यत्कृपा तमहं वंदे परमानंदमाधवं॥६॥ श्री
मद्भागवताभिधः सुरतरुस्तारांकुरः सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः॥ द्वात्रिंशत्त्रिशतं च यस्य वि
लसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्टदोतिसुलभो वर्वर्त्ति सर्वोपरि॥७॥ अथ नानापुराणशास्त्रप्रबंधैश्चित्तप्रसत्तिमल
भमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं श्रीभागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्य
परदेवतानुस्मरणलक्षणं मंगलमाचरति॥ जन्माद्यस्येति॥ परं परमेश्वरं धीमहीति॥ ध्यायतेर्लिङि छांदसं रूपं ध्या
येमेत्यर्थः॥ बहुवचनं शिष्याभिप्रायं॥ तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति॥ तत्र स्वरूपलक्षणं॥ सत्यमिति॥
सत्यत्वे हेतुः॥ यत्र यस्मिन्त्रयाणां मायागुणानां तमोरजःसत्त्वसर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः॥ यत्सत्यतया मि
थ्यासर्गोपि सत्यवत्प्रतीयते॥ तं परं सत्यमित्यर्थः॥ अत्र दृष्टांतः॥ तेजोवारिमृदां यथा विनिमय इति॥ विनिमयो व्यत्ययः॥ अन्यस्मिन्नन्या
वभासः॥ स यथाऽधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः॥ तत्र तेजसि वारिबुद्धिर्मरीचितोये प्रसिद्धा॥ मृदि काचादौ वारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुद्धिरबुद्धिरिति यथार्थमर्थं ध्यायं।। यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं।। यत्र मृषैवायं त्रिस
र्गो न वस्तुतः सन्निति।। यत्रैतस्येनेन प्रतीतमुपाधिसंबंधं वारयति स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं यस्य तं।। त
टस्थलक्षणमाह।। जन्मादीति।। अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति तं धीमहीति।। तत्र हेतुः।। अन्वया
दितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयादकार्येभ्यश्च खपुष्पादिभ्यस्तद्व्यतिरेकात्।। यद्वा अन्वय
शब्देन अनुवृत्तिः इतरशब्देन व्यावृत्तिः।। अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत्।। व्यावृत्तत्वाद्विश्वं कार्यं

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः।।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।।१।।

घटकुंडलादिवदित्यर्थः।। यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः।। तथा च श्रुतिः।। य
तो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति।। स्मृतिश्च।। यतः सर्वाणि भूता
नि भवंत्यादियुगागमे।। यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इति।। इत्याद्याः।। तर्हि किं प्रधानं जगत्कारणं स्यात्।। ध्ये
यमभिप्रेतं नेत्याह।। अभिज्ञो यः तं स ऐक्षत लोकान्नु सृजा इति।। स इमाँल्लोकानसृजतेति श्रुतेः।। ईक्षतेर्नाशब्दमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥

तिन्यायाच्च तर्हि जीवः स्यान्नेत्याह ॥ स्वराट् स्वेनैव राजते यः तं स्वतः सिद्धज्ञानमित्यर्थः । तर्हि किं ब्रह्मा हिरण्यगर्भः समवर्तता
ग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः । नेत्याह । तेने आदिकवये ब्रह्मणेऽपि वेदं यः तेन प्रकाशितवान् । यो ब्रह्माणं
विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः । ननु ब्रह्मणो वेदा
ध्ययनमप्रसिद्धं सत्यं । तत्तु हृदा मनसैव तेने अनेन बुद्धिप्रवृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः वक्ष्यति हि । प्रचोदिता येन पु
रा सरस्वती वितन्वता अजस्य सतीं हृदि स्मृतिं ॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति ॥ न
नु ब्रह्मा स्वयमेव सुप्तप्रबुद्धन्यायेन वेदमुपलभतां नेत्याह ॥ यद्यस्मिन्सूरयोऽपि मुह्यंतीति तस्माद्ब्रह्मणोऽपि पराधीनज्ञा
नत्वात् स्वतः सिद्धज्ञानेनेश्वरेण परमेश्वर एव जगत्कारणं अत एव सत्यः ॥ असतः सत्ताप्रदत्वाच्च सत्य इत्यर्थः ॥ सदा सर्वेश्व
तेन निरस्तकुहकं तं धीमहीति गायत्र्या प्रारंभेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं ॥ यथो
क्तं मत्स्यपुराणे पुराणदानप्रस्तावे । यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतमि
ष्यते ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं । प्रोष्ठपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्राणि पु
राणं तत्प्रकीर्तितं ॥ पुराणांतरे च । ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः । हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा
गायत्र्या च समारंभस्तद्वै भागवतं विदुः ॥ पद्मपुराणे अंबरीषं प्रति गौतमवचनं । अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति । अत एव भागवतं नामान्यदपि न शंकनीयं ॥ १ ॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य

× ...ञो पतितो नरो निरयं व्रजेत् ॥ ३

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र श्रीमति सुंदरे भागवते परमो धर्मः निरूप्यते ॥ परमत्वे हेतुः प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः
प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति अधिकारितोपि धर्मस्य परमत्वमाह ॥ निर्मत्स
राणां परोत्कर्षासहनं मत्सरः तद्रहितानां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ज्ञानकांडविषयेभ्यो
पि श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वेद्यं न तु वैशेषिकादिवत् द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनो अंशो जीवः वस्तुनः शक्ति
र्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं अयं तु नैव ज्ञातुं शक्यं ततः किं मत आह शिवदं परमसुखदं किंच आध्यात्मिका

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् २

दितापत्रयोन्मूलनं च अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं कृतेः तोपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः
कृतं देवताकांडविषयेभ्यो तंत्रेभ्यः श्रैष्ठ्यमाह परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते न तु इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्रा
ह कृतिभिरिति श्रवणेच्छा तु महत्पुण्यैर्विना नोत्पद्यत इत्यर्थः तस्मात् त्रिकांडार्थस्यापि यथावत्प्रतिपादनादिदं सर्वशास्त्रेभ्यः श्रैष्ठ्यं अतो नित्यमेव श्रो
दि तव्यमिति भावः २

इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह निगमेति निगमो वेदः स एव कल्प
तरुः सर्वपुरुषार्थोपायत्वात्तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकस्य मुखे निहितं तच्च तन्मुखाद्भुवि गलितं
शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः एतच्च भविष्यदपि भूतवन्निर्दिष्टं अनाग
तव्याख्यानेनैवास्य शास्त्रस्य प्रवृत्तेः अत एवामृतरूपेण द्रवेण संयुतं लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुकमु
निः अमृतं परमानंदः स एव द्रवो रसः रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः अतो हे रसिका रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाचतु
राः अहो भुवि गलितमित्यलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः पिबत ननु त्वगष्ठ्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पा

॥निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३ ॥

तव्यं तत्राह रसं रसरूपं अतस्त्वगष्ठ्यादेर्हेयस्याभावात्फलमेव कृत्स्नं पिबत ॥ अत्र न रसात्फलात्पृथग्विवक्षया रसवचनं तस्याविवक्षितत्वाद्गुणा
वचनेपि रसशब्देममृतशब्देन भावानेन विनैव रसं फलमिति सामानाधिकरण्यं तत्र फलमित्युक्ते पानासंभवो हि पानाप्रसक्तिश्च भवेदिति तन्निरस
र्थं रसमित्युक्तं रसमित्युक्तेपि गलितस्य रसस्य पानुमशक्यत्वात्फलमित्युक्तमिति द्रष्टव्यं न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह आ
लयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य न हीदं स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एवेति हि आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्य

स्य था

१२

तदेषमनेन श्लोकद्वयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिसंबंधाधिकारिणां वैशिष्ट्येन सुखसे
व्यत्वेन चक्षोतनाभिमुखीकृत्य शास्त्रमारभते नैमिषे इति ब्राह्मणाविसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठी भवति यत्र तन्नैमिशं नैमिशमे
व नैमिशं तथा च वायवीये एतन्मनोमयं चक्रं मया सृष्टं विशीर्यते यत्रास्य शीर्यते नेमिः स देशः तपसः शुभः इत्युक्त्वा सूर्यसंकाशं
चक्रं सृष्ट्वा मनोमयं प्रणिपत्य महादेवं विससर्ज पितामहः तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं प्रययुस्तस्य चक्रस्य यत्र नेमिर्वि
शीर्यते तद्वनं तेन विख्यातं नैमिशं मुनिपूजितमिति नैमिष इति पाठे वराहपुराणोक्तं द्रष्टव्यं तथाहि गौरमुखं मार्कंडेयं प्रति भगवद्वा

नैमिषेनिमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ५ ॥ श्रीरामकृष्ण

क्यं एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा उवाच निमिषेणेदं निहतं दानवं बलं अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं
भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति अनिमिषः श्रीविष्णुः अलुप्तदृष्टित्वात् तस्य क्षेत्रे तथा चाचैव शौन
कादिवचनं क्षेत्रेस्मिन्वैष्णवे वयमिति स्वर्गाय तद् इति स्वर्गो यो हरिः स एव लोको लोक्यते निवासस्थानं तं
स्मेतं प्राप्तये इत्यर्थः सहस्रसमाः संवत्सरान् अनुष्ठानेन कालोपस्थितं सत्रं सत्रसंज्ञिकं कर्मोद्दिश्य आसते
विविक्षुः यज्ञं आसत कुर्वते इत्यर्थः आलंभनेन निर्वपति उपयंती ॥ त्याग्दिवत्वस्य योच्चारणमात्रार्थं

गो॰

४॥

भा

प्रातःकालेहुतएवहुताग्नयोयेस्तेअनेननित्यनैमित्तिकहोमसांकल्यंदर्शितंइदंवक्ष्यमाणमादरात्पप्रच्छुः ५ किंविदिषितानर्थान्पृष्टंसूतस्यसर्व
शास्त्रलाभित्रायमाहुः त्वयेतित्रिभिःश्लोकैः इतिहासोमहाभारतादिस्तत्सहितानिनकेवलमधीतानि अपितुआख्यातान्यपिव्याख्यातानिच
उतअपियानिधर्मशास्त्राणितान्यपि ६ किंचयानीत्यादिवेदविदांविदुषांमध्येश्रेष्ठःव्यासःयानिवेदपरावरेसगुणनिर्गुणेब्रह्मणीये

तएकदातुमुनयःप्रातर्हुतहुताग्नयः सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ५ ऋषयऊचुः त्वयाखलुपुराणानिसेति
हासानिचानघ आख्यातान्यप्यधीतानिधर्मशास्त्राणियान्युत ६ यानिवेदविदांश्रेष्ठोभगवान्बादरायणः अन्येचमुन
यःसूतपरावरविदोविदुः ७ वेत्थत्वंसौम्यतत्सर्वंतत्त्वतस्तदनुग्रहात् ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ८
तत्रतत्रांजसायुष्मन्भवतायद्विनिश्चितं पुंसामेकांततःश्रेयस्तन्नःशंसितुमर्हसि ९ प्रायेणाल्पायुषःसभ्यकला
वस्मिन्युगेजनाः मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः १०

विदंतीतितथा ७ वेत्थजानासिहेसौम्यहेसाधोतेषांतेषामनुग्रहात्तत्वतोज्ञानेहेतुमाहब्रूयुरिति स्निग्धस्यप्रेमवतःउतएव
रहस्यमपिब्रूयुरेव ८ अंजसायथार्थयेनेएकांततःश्रेयःअव्यभिचारिश्रेयःसाधनं ९ अन्येपिबहुनाकालेनबहुशास्त्र
श्रवणादिभिःविनिश्चितंतत्संतुनेत्याहुःप्रायेणेतिहेसभ्यसाधोअस्मिन्युगेकलौअल्पायुषोजनाःतत्रापिमंदाःअलसास्तत्रापिसुमंदमतयस्तत्रापिमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचवकुशास्त्रश्रवणेपितावतैवफलसिद्धिरित्याहुः। भूरीणिकर्माण्यनुष्ठेयानियेषुतानिसमुद्धृत्ययथावदुपरत्ययेनउद्धृतवच
नेनआत्माबुद्धिःसुप्रसीदतिसम्यगुपशाम्यति॥११॥ प्रश्नांतरंसूतजानासीतिपंचभिः। भद्रंइसोस्तुवयनाशीर्वादः। भगवा
न्निरतिशयैश्वर्यादिगुणःसात्वतांसच्छुद्धेनसत्त्वेनलिर्भगवानेसउपास्यतयाविधतइति। सोत्वलोभक्ताःस्वार्थेणरा
क्षसवधायसादिवततस्यवाश्रवणमार्षतदेवसात्वतेइतिभवतितेषांपतिःपालकः। यस्यार्थविशेषचिकीर्षयावसुदेवस्य
भार्यायांदेवक्यांजातः॥१२॥ अंगहेसूततन्नोवर्णयितुमर्हसि। सामान्यतस्तावत्अस्यावतारोभूतानांक्षेमायपालनायभ

भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः॥ अतःसाधोत्रयत्सारंसमुद्धृत्यमनीषया॥ ब्रूहिनःश्रद्दधाना
नांयेनात्मासुप्रसीदति॥११॥ सूतजानासिभद्रंतेभगवान्सात्वतांपतिः॥ देवक्यांवसुदेवस्यजातोयस्यचिकीर्ष
या॥१२॥ तन्नःशुश्रूषमाणानामर्हस्यंगानुवर्णितुं॥ यस्यावतारोभूतानांक्षेमायचभवायच॥१३॥ आपन्नःसंसृ
तिंघोरांयन्नामविवशोगृणन्॥ ततःसद्योविमुच्येतयद्बिभेतिस्वयंभयं॥१४॥ यत्पा
दसंश्रयाःसूतमुनयःप्रशमायनाः॥ सद्यःपुनंत्युपस्पृष्टाःस्वर्धुन्यापोनुसेवया॥१५॥

वायसम्यक्क्षेमाय॥१३॥ यत्प्रभावमनुवर्णयंतस्तद्यशःश्रवणोत्सुक्यमाविःकुर्वंति। आपन्नइतित्रिभिःसंसृतिमापन्नःप्राप्तःवि
वशोपिगृणन्संसृतेःअत्रहेतुःयद्यतोनाम्नःभयमपिस्वयंबिभेति॥१४॥ यस्यपादःसंश्रयोयेषांअतएवप्रशमोयनंव
र्त्माश्रयोयेषांतेमुनयःउपस्पृष्टाःसन्निधिमात्रेणसेविताःसद्यःपुनंतिस्वर्धुनीगंगातस्याःआपस्तेसादान्निरसृताः
नेतुतत्रावतिष्ठंति। अंतस्तत्संबंधेनपुनंतिसेपिअनुसेवयापुनंति। नतुसद्यइति। मुनीनामुत्कर्षोक्तिः॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥

पुण्यश्लोकैरीड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः कलिमलापहं संसारदुःखोपशमनं॥१६॥ प्रश्नांतरं। तस्येति। उदाराणि महांति विश्वसृष्ट्यादीनि सूरिभिर्नारदादिभिः कला ब्रह्मरुद्रादिमूर्त्तीर्बिभ्रतः॥१७॥ अथेति प्रश्नांतरे॥ अवतारकथाः सृष्ट्यर्थमेव तत्तदवसरे ये मत्स्याद्यवतारास्तदाश्रयाः कथाः यथा लीलाः कुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैव तच्चरितप्रश्नोपि जात एवेति ज्ञातव्यं॥१८॥ एवमसौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छंतस्तत्रात्म

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं॥१६॥ त
प स्य कर्माण्युदाराणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥१७॥
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥१८॥
वयं तु न वितृप्याम उत्तमश्लोकविक्रमे॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे॥१९॥ स्वाव

नस्तृप्त्यभावमावेदयंति। वयं त्विति। योगयागादिषु तृप्ताः उद्गच्छति तमो यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः॥ अलमिति न मन्यामहे॥ तत्र हेतुः। यद्विक्रमं शृण्वतां यद्वा अन्ये तृप्यंतु नाम वयं तु नेति तुशब्दस्यान्वयः॥ अयमर्थः॥ त्रिधा हि तृप्तिर्भवति उदरादिभरणेन वा रसज्ञानेन वा स्वादुविशेषाभावाद्वा तत्र शृण्वतामपि सनेन श्रोत्रस्याकाशत्वान्न भरणमित्युक्तं॥ रसज्ञानामित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निराकृता॥ इक्षुभक्षणवद्रसांतराभावेन तृप्तिर्निराकरोति पदे पदे प्रतिक्षणं स्वादुतोपि स्वादु॥१९॥

त्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः कृष्णबलाख्यचरित्राणि कथयेत्याशयेनाहुः। कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रान्तानि गोवर्धनोद्धरणादीनि म
नुष्येष्वसंभावितानीत्यर्थः॥२०॥ नन्वनुयाजेनाध्ययनादिव्यग्राणां कुतस्तच्छ्रवणावकाशः स्यादत आहुः। कलिमागतं ज्ञात्वा
तद्भिया विष्णुपदं गन्तुकामाः दीर्घसत्रेण निमित्तेनासीनाः हरेः कथायां सक्षणाः लब्धावसराः॥२१॥ अस्मिंश्च सम

कृतवान्किलवीर्याणिसहरामेणकेशवः। अतिमर्त्यानिभगवान्गूढःकपटमानुषः॥२०॥ क
लिमागतमाज्ञायक्षेत्रेऽस्मिन्वैष्णवेवयं॥ आसीनादीर्घसत्रेणकथायांसक्षणाहरेः॥२१॥ त्वं
नः संदर्शितोधात्रादुस्तरंनिस्तितीर्षतां। कलिंसत्त्वहरंपुंसांकर्णधारइवार्णवं॥२२॥ ब्रूहियोगेश्वरेकृष्णे ३२
ब्रह्मण्येधर्मवर्मणि॥ स्वांकाष्ठामधुनोपेतेधर्मःकंशरणंगतः॥२३॥ इतिश्रीभागवतेमहापु
राणेपारमहंस्यांसंहितायांवैयासिक्यांप्रथमस्कन्धेनैमिषोपाख्यानेप्रथमोऽध्यायः॥ श्रीकृष्णार्पणमस्तु॥

यत्तु त्वद्दर्शनमीश्वरेणैव संपादितमिति अभिनन्दन्ति॥ त्वमिति कलिं निस्तरितुमिच्छतां अर्णवं तितीर्षतां कर्णधारो ना
विक इव॥२२॥ पुनः प्रश्नान्तरं ब्रूहीति धर्मस्य वर्मणि कवचे तद्रक्षके॥ स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः॥ अस्य चोत्तरं॥
कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सहेति अयं श्लोकः॥२३॥ इति प्रथमे प्रथमोऽध्यायः॥ श्रीसांबशिव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंप्रथमेध्यायेषट्प्रश्नामुनिभिःकृताः॥द्वितीयेतूत्तरंसूतश्चतुर्णामाहतेष्वथ॥१॥विप्राणामितिएवंकृतैःसम्यक्प्र
श्नैःसम्यक्हृष्टः॥रोमहर्षणस्यपुत्रउग्रश्रवाःतेषांवचःप्रतिपूज्यसत्कृत्यप्रवक्तुमुपक्रांतवान्प्रवचनेतस्योपक्रमोनम
स्तुदेवतानमस्कारइतितमाह॥त्रिभिः॥तत्रस्वगुरोःशुकस्यऐश्वर्येणतच्चरितेनैवद्योतयन्नाह॥यंप्रव्रजंतंसंगच्छंतंअनुप
तमामुपनयस्वेत्युपनयनार्थमनुपसन्नंयद्वाकेनाप्यनुगतंअननुगतमेकाकिनमित्यर्थःतत्रहेतुः॥अपेतकृत्यंकृत्यंयस्यश्रन्ये

व्यासोवाच॥इतिसंप्रश्नसंहृष्टोविप्राणांरोमहर्षणिः॥प्रतिपूज्यवचस्तेषांप्रवक्तुमुपचक्रमे॥१॥सूत
उवाच॥यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव॥पुत्रेतितन्मयतया
तरवोभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोस्मि॥२॥

कर्ममार्गेअप्रवर्तमानंनैष्ठिकत्वाद्वैपायनोव्यासःविरहात्कातरोभीतःपुत्रइतिप्लुतेनाजुहावआहूतवान्॥दूराद्दाह्वानेप्लु
तेसत्यपिसंधिरार्षः॥तदातन्मयतयाशुकरूपतयातरवोभिनेदुः॥प्रत्युत्तरमुक्तवंतः॥पितुःस्नेहानुबंधपरिहारायवृ
क्षरूपेणोत्तरंदत्तवानित्यर्थः॥तंमुनिमानतोस्मितन्मयतोपपादनायविशेषणं॥सर्वभूतानांहृन्मनःअयंतैर्योग

तत्कृपालुतांदर्शयन्नाह॥ यइति अंधंगाढंतमःसंसाराख्यंअतितितीर्षतांपुराणानांमध्येगुह्यंगोप्यंतत्रहेतुत्वेनच
त्वारिविशेषणानि स्वनिजःअसाधारणानुभवःप्रभावोयस्यतत्स्वानुभवंअखिलश्रुतीनांसारंएकमद्वितीयमनुपममित्य
र्थः॥ आत्मानंकार्यकारणसंघातमधिकृत्यवर्तमानंआत्मतत्वमध्यात्मंतस्यदीपंसाक्षात्प्रकाशकमुपयामिशरणंव्रजा
मि॥३॥ जयत्यनेनसंसारमितिजयोग्रंथःतमुदीरयेदितिस्वयंतथोदीरयन्‌॥ अन्यान्पौराणिकानपिशिक्षयतितेषां॥

यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतांतमोंधं॥ संसारिणांकरुणयाहपुराण
गुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनां॥३॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥ देवींसरस्वतींव्यासं
ततोजयमुदीरयेत्‌॥४॥ मुनयःसाधुपृष्टोहंभवद्भिर्लोकमंगलं॥ यत्कृतःकृष्णसंप्रश्नोयेनात्मासुप्रसीदति
॥५॥ सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे॥ अहैतुक्यप्रतिहतायया॒त्मासुप्रसीदति॥६॥ सोब॥

वचःप्रतिपूज्येति॥ यदुक्तंतत्प्रतिपूजनंकरोतिहेमुनयःसाधुयथाभवतितथाहंपृष्टःयतोलोकानांमंगलमेतत्‌॥ यतःकृ
ष्णविषयसंप्रश्नःकृतःसर्वशास्त्रसारोद्धारप्रश्नस्यापिकृष्णपर्यवसानादेवमुक्तं॥५॥ तत्रयत्प्रथमंपृष्टंसर्वशास्त्रेषुऐ
कांतिकंश्रेयोब्रूहीतितत्रोत्तरंसवैपुंसामिति॥ अयमर्थःधर्मोद्विविधःप्रवृत्तिनिवृत्तिलक्षणश्चनिवृत्तिलक्षणोभक्तिभाव
तिसपरोधर्मः॥ सएवैकांतिकंश्रेयइतिकथनंकथंभूताअहेतुकीफलानुसंधानरहिताअप्रतिहताविघ्नैरनभिभूता॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

ननु तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञानाङ्गत्वं प्रसिद्धं तत्कुतोऽहे
तुकत्वमुच्यते सत्यं तत्तु भक्तिद्वारेणेत्याह वासुदेव इति। अहेतुकं शुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः। व्यतिरेकमाह यो धर्म इति प्र
सिद्धः स यदि विष्वक्सेनकथासु रतिं नोत्पादयेत् तर्हि स्वनुष्ठितोपि सन् अयं श्रम एव। श्रमः केवलमित्यन्वयः। ननु मोक्षार्थस्यापि धर्मस्य श्रमत्वं स्वर्गस्य तर्हि
ह। केवलं विफलः श्रम इत्यर्थः। नन्वस्ति तत्रापि स्वर्गादिफलमित्याशङ्क्य एवकारेण निराकरोति। क्षयिष्णुत्वान्न तत्फलमित्यर्थः। नन्वक्षय्यं ह वै चातुर्मास्य

वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम्॥७॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः। नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्॥८॥ धर्म
स्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते। नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः॥९॥

२२

याजिनः सुकृतं भवतीति श्रुतेः न तत्फलस्य क्षयिष्णुत्वमित्याशङ्क्याह शब्देन साध्यमित्यत्र यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पु ण्यजितो लोकः क्षीयत इति ५
गृहीतया श्रुत्या क्षयिष्णुत्वप्रतिपादनात्॥८॥ तदेवं हरिभक्तिद्वारा तदितरस्या ज्ञानपर्यन्तः परो धर्म इत्युक्तं इदानीमन्य
ते धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः पुनरपि धर्मार्थादि सिः परम्परेति यथाहुः धर्मादर्थश्च कामश्च स कि
मर्थं न सेव्यत इत्यादि तन्निराकरोति धर्मस्येति द्वाभ्याम् आपवर्ग्यस्य उक्तन्यायेनापवर्गपर्यन्तस्यार्थाय फलत्वाय अर्थो
नोपकल्पते योग्यो न भवति यथार्थस्यापि एवम्भूतधर्मार्थस्य सिवारिणः कामो लाभाय फलत्वाय न हि स्मृतो मुनिभिः॥९॥

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामस्य विषयभोगस्य इंद्रियप्रीतिर्लाभः फलं न भवति किंतु यावता जीवेत तावानेव कामस्य लाभः जीवनपर्याप्त एव कामः से-
व्य इत्यर्थः ॥ जीवस्य जीवनस्य पुनः फलं कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः स्वर्गादिभिः सोऽर्थो न भति किंतु तत्त्वजिज्ञासै-
वेति ॥१०॥ ननु केवलतत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित्तत्राह ॥ तत्त्वविदस्तु तदेव तत्त्वं वदंति किंतत्
यज्ज्ञानं नामाद्वयमिति क्षणिकविज्ञानपक्षं व्यावर्तयति ॥ ननु तत्त्वविदोपि विगीतवचना एवं नैव तस्यैव तत्त्वस्य नामां-

कामस्येंद्रियप्रीतिर्लाभो जीवेत यावता । जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥१०॥
वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥११॥ तच्छ्रद्द-
धाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥१२॥ अ-
तः पुंभिर्द्विजश्रेष्ठाः वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥१३॥

तरैरभिधानैरित्याह । औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानित्यभिधीयते ॥११॥ तच्च तत्त्वं स-
परिकरया भक्त्यैवाप्यत इत्याह सर्वैरन्वयः ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानं परोक्षं तच्च तत्त्वं आत्मनि क्षेत्रज्ञे पश्यंति किं-
तत् आत्मानं परमात्मानं श्रुतेन वेदांतश्रवणेन गृहीतया प्राप्तयेति ॥१२॥ भक्तेर्दार्ढ्यमुक्तं धर्मस्य फलं मुक्तिः नार्थ-
कामादिर्धर्मेति समर्थमुपपाद्योपसंहरति । अत इति हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनं संसिद्धिः फलं ॥१२॥ सा च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्माच्च भक्तिविहीनो धर्मः केवलं श्रम एव ॥ तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह तस्मादिति ॥ एकेन एकाग्रेण मनसा
क्तिरहितो धर्मः केवलं श्रम इति प्रपंचितं ॥१४॥ इदानीं तु भक्तेः फलं एवं प्रपंचयति यदिति ॥ यस्यानुध्या अनुध्यानं से
वं असिः खड्गः तेन युक्ता विविक्तिन ग्रंथिमहंकारं निबध्नाति यत्कर्म तत्तु छिंदंति तस्य कथायां रतिं को नु कुर्यात् ॥१५॥
ननु सत्यमेवं कर्मनिर्मूलनी हरिकथारतिस्तथापि तस्यां रुचिर्नोत्पद्यते ॥ किं कुर्मस्तत्राह शुश्रूषोरिति पुण्यतीर्थनि

तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥१४॥ यदनुध्यासि
ना युक्ताः कर्मग्रंथिनिबंधनं ॥ छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं ॥१५॥ शुश्रूषोः श्रद्दधानस्य वासुदे
वकथारुचिः ॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥१६॥ शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥
हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ॥१७॥

षेवणादिभिर्निःपापस्य महत्सेवा स्यात् ॥ तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥१६॥ ततश्च
शृण्वतामिति पुण्ये श्रवणकीर्तने यस्य सः ॥ सतां सुहृत् कृष्णः हृदि यान्यभद्राणि कामादिवासनाः तानि अंत
स्थः हृद्यस्थः सन् ॥१७॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समतो२

तनश्च नष्टप्रायेष्विति ॥ सर्वाभद्रनाशनस्य ततोनंतरकालत्वात् ॥ प्रायग्रहणं भागवती भागवतशास्त्रस्य सेवया नैष्ठिकी निश्च ग२
ला विक्षेपकाभावात् ॥१८॥ रजस्तमश्च ये च तेभ्यो भावाः कामादय एतैरनाविद्धं अनभिभूतं प्रसीदति उपशाम्यति ॥१९॥ भगवद्भक्तियोगतः प्रस
न्नमनसः ॥२०॥ अत एव मुक्तसंगस्य तत्त्वज्ञानं फलमाह भिद्यंत इति ॥ हृदयमेव ग्रंथिः चिज्जडग्रंथिरूपोऽहंकारः अत एव सर्वे संशयाः असंभाव

लाद्धू व२

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥१८॥ तदा रजस्तमोभावाः कामलोभादय
श्च ये ॥ चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति ॥१९॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्वविज्ञानं मुक्तसंगस्य जायते ॥२०॥
भ२ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥२१॥ अतो वै कवयो नित्यं भक्तिं परया मुदा ॥ वासुदेवे
म
भगवति कुर्वंत्यात्मप्रसादनीं ॥२२॥ वीन

नादिरूपाः कर्माण्यनारब्धफलानि आत्मस्वरूपभूते ईश्वरे ॥ दृष्ट एव तत्त्वकारणेन तानीं तरमेवेति दर्शयति ॥ अत्र
सदाचारं दर्शयन्नुपसंहरति ॥ आत्मप्रसादिनीं मनःशोधिनीं ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषो दर्शितः॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मत्वेपि वासुदेवे
स्याधिक्यमाह॥ सत्त्वमिति द्वाभ्यां इहैक एक परः पुमान्॥ अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं संज्ञाः
केवलं भिन्ना धत्ते हरिविरंचिहरेति विवक्त्वं संधिरार्षः तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः॥ त
॥२३॥ उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह पार्थिवात्स्वप्रतिप्रकाशरहितत्वात्॥ दारुणः काष्ठात्

दा२ पा१

॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते॥ स्थित्यादये हरिविरंचिहरेति संज्ञाः श्रेयांसि
तत्र खलु सत्त्वतनोर्नृणां स्युः॥२३॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं॥२४॥

स

सकाशात् धूमस्ततः उत्कृष्टः प्रवृत्तिस्वभावत्त्र यीमयः वेदोक्तकर्मप्रचुरः एषक्रमप्रत्या सत्वेस्तस्मादग्निस्त्रयीमयसा
क्षात्कर्मसाधनत्वादेवं तमसः सकाशाद्रजो दर्शनं ब्रह्मकोप्रकाशकं तु शब्देन रूपात्मकं तमसः सकाशाद्रज सत्त्वो
विकृतानर्हेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विशेषकत्वात् यत्सत्त्वं तत्साक्षाद्ब्रह्म
दर्शनं॥ अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः॥२४॥ श्री रामचरणाय नमः॥ श्री राम॥ ॥१२॥

प

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवभक्तोऽपरर्वीचारं प्रमाणयति भेजिर इति [redacted] अथो हेतोः अग्रे पुराणं विशुद्धसत्वमूर्तिं भगवंतं अधोक्षजं अ
तोऽएतान् अनु अनुवर्त्तंते इह संसारे क्षेमाय कल्पंते॥२५॥ ननु अन्यानपि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु
अन्यान्न भजंति किंतु सकामा एवेत्याह॥ मुमुक्षव इति द्वाभ्यां॥ भूतपतीनिति पितृप्रजेशादीनामु

भेजिरे मुनयोथाग्रे भगवंतमधोक्षजं। सत्वं विशुद्धं क्षेमाय कल्पंते येनु तानिह॥२५॥
मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ। नारायणकलाः शांता भजंति ह्यनसूयवः॥२६॥
रजस्तमः प्रकृतयः समशीला भजंति वै। पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः॥२७॥

२५
पलक्षणं अनसूयवः देवतांतरनिंदकाः संतः॥ रजस्तमः स्वभावो येषां ते अतएव पितृभूतादिभिः समं शीलं ये
षां ते श्रिया सह ऐश्वर्यं प्रजाश्च तथा ते॥२६॥ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रार्थतात्पर्यगोच
रत्वादपीत्याह॥ द्वाभ्यां॥ वासुदेवः परः तात्पर्यगोचरो येषां ते॥ ननु वेदा मखपरा दृश्यंते॥२७॥ श्रीसांबशिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु वेदाः मखपराः दृश्यंते इत्याशंक्य तेपि तदाराधनार्थत्वात्तत्परा एवेत्युक्तं। योगशास्त्राणि तेषामासनप्राणायामादिक्रियाप
रत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं॥२८॥ ज्ञानं ज्ञानशास्त्रं ननु च तत्र ज्ञानं परमे[illegible]त्याशंक्य ज्ञानस्या
पि तत्परत्वमुक्तं। तपो ज्ञानं धर्मो धर्मशास्त्रं दानव्रतादिविषयः॥ ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं सोपि
तदानंदांशरूपत्वात्तत्पर एवेत्युक्तं॥ यद्वा वेद इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तं तत्र ननु तेषां मखयोगक्रि

वासुदेवपरा वेदा वासुदेवपरा मखाः॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः॥२८॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः॥२९॥
स एवेदं ससर्जाग्रे भगवानात्ममायया॥ सदसद्रूपया चासौ गुणमय्यागुणो विभुः॥३०॥

याणां नानार्थपरत्वात्कथं तदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यं॥२९॥ ननु जगतः सर्गप्रवेशनियम
नादिविलासयुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते॥ कथं वासुदेवपरत्वं सर्वस्य तत्राह स एवेति चतुर्भिः। तत्र श्लोकैः त
स्य कर्माण्युदाहरणिष्यन्नुहितिप्रश्नस्योत्तरं सदसद्रूपया कार्यकारणात्मिकया गुणमय्या अगुणोपि स्वेच्छान्वयः। यतो निर्गुणोपि सन्निसर्थः॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ

प्रवेशनियमलक्षणां लीलामाह ॥ तयेति ॥ विलसितेषु भूतेषु गुणेषु आकाशादिषु अंतः प्रविष्टः सन् गुणवानिव मंदधीनां एते गुणा इत्यभि
मानवानिव न तु वस्तुतस्तथा यतो विज्ञानेनचित्स्वत्त्या विजृंभितोस्फूर्जितः ॥ ३१ ॥ बहुरूपत्वलीलामाह यथेति ॥ स्वयोनिषु स्वाभि
व्यंजकेषु अवहितो निहितः विश्वात्मा पुमान् परमेश्वरो भूतेषु प्राणिषु अंतर्यामिणापि प्रतियोगि नानात्वेन नाना सन्निवोच्यते ॥ क्षेत्र
रूपेणच ॥ ३२ ॥ भोगरूपां लीलामाह ॥ असौ हरिर्भूतसूक्ष्माणि चेंद्रियाणि आत्मा मनश्च यैस्तैः स्वयं निर्मितेषु चतुर्विधेषु भोगेषु स्व

तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अंतः प्रविष्ट आभाति विज्ञानेन विजृंभितः ॥ ३१ ॥ यथा ह्यवहि
तो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२ ॥ असौ गुणमयैर्भावैर्भूत
सूक्ष्मेंद्रियात्मभिः ॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ॥ ३३ ॥ भावयत्येष सत्त्वेन लोकान्वै लोकभा
वनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयोध्यायः ॥ छ ॥

तंत्रं धोस्यते तद्गुणान् तत्तदनुरूपान् विषयान् निघ्याप्तुं भुंक्ते भोजयतीति जीवमेवेति श्रेयः पालयतीति वा तदा सत्त्वेन पदसार्बल
भ्रमयोजनवने इति स्मरणात् ॥ इदानीं स्वतु आनासीति प्रश्नस्योत्तरमाह ॥ भावयतीति ॥ ३३ ॥ एतत्तु सर्वावतारसाधारणप्र
योजनविशेषतः ॥ कृष्णावतारस्य कुंतीस्तुतौ वक्ष्यति ॥ लोकभावनः लोकप्रवर्ती देवादिषु लीलावतारास्तेष्वनुरक्तः
॥ ३४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे टीकायां द्वितीयोध्यायः ॥ छ ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीसांब ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥

अवतारकथाप्रश्नेन तृतीये तु तदभिधा पुरुषाद्यवतारोत्थाख्यानत्वाविर्भाववर्णनैः १ यदुक्तं अथाख्याहि हरेर्धीमन्नवतारकथाः
शुभा इति तदुत्तरत्वेन नानावतारान् अनुक्रमिष्यन् प्रथमं पुरुषावतारमाह जगृहे इति पंचभिः महदादिभिः महदहंकारपंचतन्मात्रैः
एकादशेंद्रियाणि पंचमहाभूतानीति षोडशकलाः अंशा यस्मिंस्तत् ननु यद्यपि भगवद्विग्रहो नैवंभूतस्तथापि विराड्जी
वांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति विशिनष्टि यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तत्र च योगः

सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया १
यस्यांभसि शयानस्य योगनिद्रां वितन्वतः नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३

समाधिस्तद्रूपां निद्रां विस्तारयतः नाभिरेव ह्रदस्तस्मिन् यदंबुजं तस्मात् स्वकाराद्ब्रह्मा आसीत् अभूत् प्रथमे कल्पे स पौरुषं
रूपं जगृहे २ कीदृशं रूपं तदाह यस्येति ननु कीदृशो विग्रहस्तस्य योंभसि शेते तस्य तदाह तत्तस्य भगवतो रूपं
तु विशुद्धं रजआद्यसंभिन्नं अत एवोर्जितं निरतिशयं सत्त्वं ३ श्रीरामजय रामजय रामजय जय राम

॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतच्च योगिनां प्रत्यक्षमित्याह पश्यंतीति। अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुस्तेन सहस्र परिमितानि यानि पदादीनि तैरद्भुतं सहस्र
मूर्धादयो यस्मिन्न् तत् सहस्रं यानि मौल्यादीनि तैरुल्लसत् शोभमानं ॥४॥ एतत्तु कूटस्थं नत्वन्यावतारवदाविर्भावतिरोभाव
वदित्याह एतदिति नानावताराणां निधीयते यस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजमुद्भवस्थानं न बीजांतरेणा
न्यबीजं तुल्यं किंत्वव्ययं न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामित्याह यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥५॥

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत्
एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ॥५॥ स एव प्रथमं देवः
कौमारं सर्गमाश्रितः ॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ॥६॥ द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः ॥७॥

गौणावतारं तच्चरितं चाह स एवेति कौमारः आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि यः पौरुषं रूपं जगृहे स एव देवः
कौमारं ब्राह्मसर्गमास्थितः ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया ॥६॥ अस्य विश्वस्य भवा
य महीं उद्धरिष्यन्निति कूर्मोक्तिः एवं सर्वत्रावतारक्रमश्चोक्तिमित्यनुसंधेयं ॥७॥ श्रीरामचंद्राय नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११२॥

ता२

नारदावतारमाह तृतीयमिति ऋषिसर्गमुपेत्य तत्र च देवर्षित्वमुपेत्येत्यर्थः सात्वतं तंत्रं पंचरात्रागमम् आचष्ट उक्तवान् यतस्तंत्रात् निर्गतं कर्मबंधहेतुत्वं येभ्यस्तानि निःकर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः ८ तुर्ये धर्मस्य कला अंशः भार्येत्यर्थः अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः तस्यां सर्गे ऋषीभूत्वेत्येकावतारतां दर्शयति ९ कपिलावतारमाह आसुर

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ११ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं १२ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं १३

ये तन्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन् तत् सांख्यं १० दत्तात्रेयावतारमाह षष्ठमिति अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षित आह तुष्टो इति वक्ष्यमाणत्वात् कथं प्राप्तः अनसूयया मत्सदृशापत्याभिलाषेण मामेव प्रार्थयत् तन्मा नीतिदोषदृष्टिमकुर्वन्नित्यर्थः अन्वीक्षिकीं आत्मविद्यां प्रह्लादादिभ्य ऊचिवान् ११ यज्ञावतारमाह सप्तमः स यामाद्यैः स्वस्यैव पुत्रा यामा नाम देवास्तैः तदा सहितः स्वायंभुवमन्वंतरं पालितवान् तथा स्वयमिंद्रोऽभूदित्यर्थः १२ ऋषभावतारमाह सर्वाश्रमनमस्कृतं अत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन्नाभेराग्नीध्रपुत्रात् ऋषभो जातः १३ नं॥

११२।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्ववतारमाह ॥ पार्थिवं वपुः ॥ राजदेहे पृथुरूपं पाठांतरे पृथोरिदं पार्थिवं ॥ ओषधीरिति तत्स्वरूपलक्षणं ॥ इमां पृथिवीं सर्वाणि व
स्तूनि दुग्ध अदोग्ध मा नाव स्यार्थः ॥ हे विप्राः तेन पृथिदोहनेन सोयमवतार उशत्तमः कमनीयतमः वराकां त्या विवस्य
म्मात् ॥ ९८ ॥ मत्स्यावतारमाह चाक्षुष मन्वंतरे य उदधि संप्लवस्तस्मिं यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि के
नचित्कौतुकेन सत्यव्रताय मत्स्या दर्शितो यथा आ(का)लेमा र्कंडेयायेति द्रष्टव्यं ॥ महीमय्यां नावि नौकारूपायां मत्स्या मिसर्थः

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं ॥ १५ ॥ सुरासुराणामुदधिं मथ्नतां मन्दराचलं ॥ दध्रे कमठरूपेण पृष्ठ एकादशो विभुः ॥ १६ ॥ धान्वंतरं द्वादशमं त्रयोदशममेव च ॥ आपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया ॥ १७ ॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितं ॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥ १८ ॥ पंचदशं वामनकं कृत्वागादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥ १९ ॥

अपाद्रक्षितवान् वैवस्वतमिति भाविनी संज्ञा श्राद्धदेवस्य ॥ कमठः कूर्मः तद्रूपेण एकादशावतारे विभुर्दध्रे दधार ॥ १६ ॥ धान्वंतरं धन्वंत
रीरूपं द्वादशमादि प्रयोगस्त्वार्षः ॥ त्रयोदशमे रूपं तत्र स्त्रियेत्येनसह दर्शयति ॥ आपाययदित्यत्र सुधामिति अध्याहारः ॥ मोहिन्या
स्त्रियारूपेण अन्यांसुरान् मोहयन् धन्वंतरिरूपावतारमाह ॥ धन्वंतरिरूपेणामृतमानीय मोहिन्या पाययदित्यर्थः ॥ नृसिंहावतारमाह ॥

नारसिंहं स्वरूपं बिभ्रत् एरकां निर्ग्रथितां ... ॥ १० वामनावतारमाह ॥ दुष्टानां मदं वामयतीति वामनं रूपं ॥ ... सादित्सु तस्मादाच्छिद्य गृहीतुमिच्छुः ॥ १९ ॥

॥१३॥

दे२

परशुरामावतारमाह ॥ अवतार इति त्रिगुणं यथा भवति तथा सप्तकृत्वः स प्रवरान् एकविंशतिवारानित्यर्थः ॥२०॥ व्यासावतारमाह
अल्पमेधसः अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥२१॥ रामावतारमाह ॥ नरदेवत्वं राघवरूपेण प्राप्तस्त
अतः परम् अष्टादशे ॥२२॥ रामकृष्णावतारमाह ॥ विंशतिमे इति वक्तव्ये तकारलोपः ॥ छंदोनुरोधेन रामकृष्णाविति एवं नाम

तम१ तू२

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥२०॥ ततः सप्तदशे
जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमेधसः ॥२१॥ नरदेवत्वमापन्नः सुरकार्यचि
कीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यनेकशः ॥२२॥ एकोनविंशे विंशतिमे वृष्णीषु प्राप्य जन्मनी
रामकृष्णाविति भुवो भगवानहरद्भरं ॥२३॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्ना जिन
सुतः कीकटेषु भविष्यति ॥२४॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्की जग
त्पतिः ॥२५॥ अवताराह्यसंख्याता हरेः सत्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥२६॥

वृष्णिषु जन्मनी प्राप ॥२३॥ अजनस्य जिनस्य सुतः जिनसुत इति पाठे जिनः स एव कीकटे मध्ये गयाप्रदेशे ॥२४॥ कल्क्य[illegible]वतारमाह ॥ युगसंध्यायां कलेरंते विष्णुयशसो ब्रा
ह्मणात्तस्य कारणात् जनिता जनिष्यति ॥२५॥ अनुक्तसर्वसंग्रहार्थमाह ॥ अवतारा इति असंख्येयत्वेन दृष्टान्तः य[illegible]थेति ॥ अविदासिनः ॥

न्वयि२

अपक्षयस्ते स्यान् दसु उपक्षय इत्यस्मात् सरसः ॥ शाकारात्
कुल्याः क्षुद्रप्रवाहाः ॥२६॥ श्रीरामार्पणमस्तु ॥ ६१ ॥

रामसमर्थ ॥

नु२ रा

विभूती॥ ऋषय इति॥२६॥ तत्र विशेषमाह एते चेति॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च तत्र मत्स्यादी
२ म नामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वे स्वरूपोपयोगमेव ज्ञानक्रियाशक्त्योराविःकरणं कुमारनारदादिषु यथोपयो
गमंशकलावेशाः॥ पृथ्वादिषु तस्यावेशाः कृष्णस्तु भगवान्साक्षान्नारायण एव आविर्भूतः सर्वशक्तिमत्त्वात्॥ सर्वेषां प्रयोजनमा
ह इंद्रारयो दैत्यास्तैर्व्याकुलं लोकं मृडयंति सुखिनं कुर्वंति॥२८॥ एवं कीर्तनफलमाह॥ जन्मेति गुह्यं मतिरहस्यं जन्म प्रयतः शु
तत्

ऋषयो मनवो देवा मनुपुत्रा महौजसः॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा॥२७॥ एते चांशकलाः पुंसः कृष्णस्तु
भगवान्स्वयं॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे॥२८॥ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः॥ सायं प्रातर्गृ
णन्भक्त्या दुःखग्रामाद्विमुच्यते॥२९॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः॥ मायागुणैर्विरचितं महदादिभिरात्मनि॥
॥३०॥ णै

चिः सन्दुःखग्रामात्संसाराद्विमुच्यते इत्यर्थः॥२९॥ तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिः स्यात् अतो देहसंबंध
स्य भगवन्मायोपाधिजनितत्वाद्भगवज्ज्ञानादिजनितविद्यायां तन्निवृत्तिरुपपद्यत इत्याशयेनाह एतदिति पंचभिः अ
रूपस्य चिदेकरसस्यात्मनो जीवस्य एतत्स्थूलं रूपं शरीरं भगवतो मायायाः गुणैर्महदादिरूपैर्विरचितं क आत्मनि आत्मास्थानेय
हे

बो भ

कथमित्यपेक्षायांस्वतत्पावरणेनतद्धासरूतिसदृष्टांतमाह॥यथावोघाश्रितोमेघौनंसिआकारोअवबुद्धिभिरज्ञैरारोपितः॥यथावापा
र्थिवोरेणुतमूर्तंधूसरत्वादिअनिले॥एवंद्रष्टरिआत्मनिदृश्यत्वादिधर्मकंशरीरमारोपितमित्यर्थः॥२१॥किंचिअतंस्थूलरू
पात्परमन्यदपि[illegible]मारोपितमित्यनुषंगः॥कथंभूतंतच्चद्रव्यक्तंसूक्ष्मंतत्रहेतु॥अव्यूढगुणबृंहितं॥व्यूहः॥करचरणादिप
रिणामः॥तथाअपरिणताअव्यूढायेयेगुणाः॥तैर्गुणैर्बृंहितंरचितं॥अकारविशेषरहितत्वात्अव्यक्तमित्यर्थः॥एतदेवकुतत्राह॥
त

॥यथानभसिमेघौघोरेणुर्वापार्थिवोनिले॥एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः॥३१॥श्रीरामायनमः॥
॥अतःपरंयदव्यक्तमव्यूढगुणबृंहितं॥अदृष्टाश्रुतवस्तुत्वात्सजीवोयत्पुनर्भवः॥३२॥श्रीवक्रतुंडायनमः॥

(सा॰ १)

अदृष्टाश्रुतवस्तुत्वात्॥य[illegible]कोविशेषवद्वस्तुतंदृश्यदादिवदृश्यतेश्रूयतेवाइंद्रादिवदिदंतुनतथातर्हितस्यसत्वेकिंप्रमा
णंतत्राह॥सजीवंजीपैवोपाधितयाकल्पितइत्यर्थः॥ननुस्थूलमेवभोगायतनत्वात्जीवस्योपाधिरस्तुकिमन्यकल्पनयेत्य
त्रआह॥यद्यस्मात्सूक्ष्मात्पुनर्भवः॥पुनर्जन्मउत्क्रांतिगत्यागतीनांतेनविनासंभवादितिभावः॥जीवोजीवेननिर्मु
क्तः॥जीवोजीवंविहायेत्यादौजीवोपाधौलिंगदेहेजीवशब्दप्रयोगाजीवोपाधिः॥३२॥श्रीरामजयराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवोपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मत्वमाह ॥ यत्रयत्र इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यक्ज्ञानेन प्रतिषिद्धे भवतः ज्ञा
नेन प्रतिषेधार्हत्वे तत्त्वमेव हेतुमाह ॥ अविद्यया आत्मनि कल्पिते इति हेतोः सद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः ॥ कथं … तद्दर्शनं
ज्ञानेन स्वस्वरूपे ॥ ३३ ॥ तथापि भगवन्मायायाः संसृतिकारणभूतायाः विद्यमानत्वात् कथं ब्रह्मत्वात्त्राह यदीति । असंदेहे संदेहव
चनं यदि देवीः प्रमाणं स्युरिति वचने वैशारदी विद्यादिः सर्वज्ञ ईश्वरः ॥ तदीयादेवी संसारचक्रेण क्रीडति एषा माया यायद्युपरता भवति वि

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ॥ ३३ ॥ यद्ये
षोपरता देवी माया वैशारदी मतिः । संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥
एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च । वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥

मिस्युपरता भवेत् । तत्राह यदीति । विद्या अयं भावः यावदविद्यात्मना आवरणविक्षेपौ करोति तावन्नोपरमति । यदा तु सैव वि
द्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत् स्वयमेवोपरमेत् तदा संपन्नः ब्रह्मस्वरूपं प्राप्त
एवेति विदुस्तत्त्वज्ञाः विमतो यद्येवं स्वे महिम्नि परमानंदरूपे महीयते पूज्यते विराजत इत्यर्थः ॥ यथा जीवस्य जन्मादि माया
एवमीश्वरस्यापि जन्मकर्मादि मायैवेत्याह । एवमिति अकर्तुः कर्माणि अजनस्य जन्मानि हृत्पतेः अंतर्यामिणः ॥ ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हिजीवादीश्वरस्यकोविशेषःस्वातंत्र्यमेवविशेषइत्याह॥सवाइतिषाड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रतिदूरादेवगंधवद्गृ
हणातिनतुतत्रसज्जतइत्यर्थः॥कुतःषड्गुणेशःषडिंद्रियनियंता॥३६॥ननुकिमीश्वरस्यसृष्ट्यादिकर्मभिर्विषयभोगैर्वातत्रा
ह॥नचेति।धातुर्जगद्विधातुरीश्वरस्यऊतीःजगल्लीलाः।कुमनीषःकुबुद्धिर्निपुणेनतर्कादिकौशलेननअवैतिनजानातिम
नसारूपाणिवचसानामानिसंतन्वतःविस्तारयतः।वाचोभिरितिबहुत्वंश्रुत्यपिप्रायेणमनोवचोभिःसहेतिवा॥३७॥

सवाइदंविश्वममोघलीलःसृजत्यवत्यत्तिनसज्जतेस्मिन्॥भूतेषुचांतर्हितआत्मतंत्रःषाड्वर्गिकंजिघ्रतिषड्गुणेशः॥३६॥
नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतीः॥नामानिरूपाणिमनोवचोभिःसंतन्वतोनटचर्यामिवाज्ञः॥३७॥
सवेदधातुःपदवींपरस्यदुरंतवीर्यस्यरथांगपाणेः॥योमाययासंततयानुवृत्त्याभजेततत्पादसरोजगंधं॥३८॥
अथेहधन्याभगवंतइत्थंयद्वासुदेवेखिललोकनाथे॥कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयःपरिवर्तउग्रः॥३९॥

भक्तस्तुकथंचिज्जानातीत्याह॥सवेदइति।अमाययाअकुटिलभावेनसंततयाविरतया॥अनुवृत्त्यासेवयाआनुकूल्ये
नभजेत्॥३८॥भक्तिमार्गप्रवृत्तानृषीनभिनंदति॥अथेतियतोयूयमेवंभगवत्तत्त्वंजानीतअथातःभगवं
तःसर्वज्ञाभवंतोधन्याः॥कृतार्थाः॥कुतःयद्यस्मादिदंप्रश्नेवासुदेवेआत्मभावंमनोवृत्तिंकुर्वंतिसर्वात्म
कमैकांतिकंयत्रयस्मिन्भावेसतिभूयःपरिवर्तोजन्ममरणावर्तोनभवति॥३९॥श्रीकृष्णार्पणमस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तत्किमेतच्छास्त्रमपूर्वं कथयसि तत्राह॥ इदमिति। ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिन् त
त्॥ ऋषिर्व्यासः॥४०॥ तत्संप्रदायप्रवृत्तिमाह॥ तदिदमिति सुतं शुकं॥४१॥ प्रायेण मत्युपर्यंतानाशाद्भोजनोपविष्टं
मिति परमवैराग्योक्तिः॥ हे विप्राः॥४४॥ विप्रर्षेः सकाशात् अध्यगमं ज्ञातवान् तस्मिन् तत्र कीर्तयति सति त

इदं भागवतं नाम पुराणं ब्रह्मसंमितं॥ उत्तमश्लोकचरितं चकार भगवानृषिः॥४०॥ निःश्रेयसाय लोकस्य
धन्यं स्वस्त्ययनं महत्॥ तदिदं ग्राहयामास सुतमात्मवतां वरं॥४१॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतं॥ स
तु संश्रावयामास महाराजं परीक्षितं॥४२॥ प्रायोपविष्टं गंगायां परीतं परमर्षिभिः॥ कृष्णे स्वधामोपगते धर्मज्ञाना
दिभिः सह॥४३॥ कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः॥४४॥ अहं
२१ चाध्यगमं तत्र निविष्टस्तदनुग्रहात्॥ सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति॥४५॥ इति श्रीभा
गवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः॥३॥ श्रीराम जय राम जय जय राम॥ सांब॥

निविष्ट इति वान्वयभेदात्त्रयदा वृत्तिर्दोषः॥ यथाधीतं न तु स्वमतिविलसितं तत्र तु यथामति स्वमत्यनुसारेण संक्षे
पतः कथितं विस्तरतः श्रावयिष्यामि॥४५॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः॥३॥ श्रीसांब॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टो२ ४

तस्यैभागवतारंभःकारणत्वेनवर्ण्यते।।व्यासस्यापरितोषस्तुतपःप्रवचनादिभिः।।१।।इत्येवंप्रसन्नतयाश्रावयिष्यामीतिब्रुवाणं
मुनीनांबहूनांमध्येएकेनवक्तव्यं।योवृद्धेष्वपिबहुश्रःकुलपतिर्गणमुख्यः।।तेष्वपिबहुश्रुयोबह्वृचऋग्वेदीतेनवक्तव्यं।अत
एवंभूतत्वात्।शौनकोब्रवीत्।।२।।पृच्छत्कथामाह।।कस्मिन्वास्थानेकेनहेतुनेतिमहाभारतादिधर्मशास्त्राणिकृतवतःपुन
रेतत्संहिताकरणेकिंकारणमित्यर्थः।।कुतइतिसार्वविभक्तिकस्तसिः।केनप्रवर्तितइत्यर्थः।।कृष्णोव्यासः।।३।।

व्यासउवाच।।इतिब्रुवाणंसंस्तूयमुनीनांदीर्घसत्रिणां।।वृद्धःकुलपतिःसूतंबह्वृचःशौनकोब्रवीत्।१।।शौनकउ
वाच।।सूतसूतमहाभागवदनोवदतांवर।।कथांभागवतींपुण्यांयदाहभगवान्शुकः।।२।।कस्मिन्युगेप्र
वृत्तेयंस्थानेवाकेनहेतुना।।कुतःसंचोदितःकृष्णःकृतवान्संहितांमुनिः।।३।।तस्यपुत्रोमहायो
गीसमदृङ्निर्विकल्पकः।।एकांतमतिरुन्निद्रोगूढोमूढइवेयते।।४।।श्रीसांबद्विव।।

यदुक्तंसतुसंश्रावयामासेतितच्छुकस्यव्याख्यानाधिकंकथंघटतेमितिपृच्छंतस्यासंगोदासीनतामाहतुभ्यां।।तस्येतिसमदृ
कूसमंब्रह्मपश्यतीतियतः।उन्निद्रः।।मायाशयानादुद्बुद्धः।अतोनिर्विकल्पःस्वार्थद्वैःनिरस्तभेदविचएवकस्मिन्नेवअंतः
समाप्तिर्यस्यसः।यानिशासर्वभूतानांतस्यांजागर्तिसंयमीतिस्मृतेः।अतएवगूढःअप्रेरोमूढइवप्रतीयते।।४।।श्रीसांब

यतःउन्निद्रः।मायाशयानादुद्बुद्धः।१

कृ१

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विकल्पत्वंप्रपंचयति॥आसन्नंश्वेतंवस्त्रंतंअनुयांतंमनुगच्छंतंऋषिंव्यासंजनंनग्नमपिदृष्ट्वाजलक्रीडांयादेव्यःअप्सरसःस्त्रि
यावस्त्रपरिधानंकृतवत्यःअनग्नमपिपुत्रेणनार्थालितहेतुतोनग्नइत्युक्तं॥नग्नस्यपुरतोगच्छतःसुतस्यतुस्त्रियानपरिधदे
तच्चित्रं।धीदृष्यइयंस्त्रीअयंपुमान्इतिभेदाभेदत्ववास्ति॥५॥१पंचरत्नोसकथमालक्षितःशालःकुरवोजांगलोश्चदेशविदि
षात्।संप्राप्तःप्रथमंततोगजसाह्वयंविचरन्गजेनसहितआह्वयोनामयस्यतस्मिन्तस्मिन्पुरेहस्तिनापुरेहस्तीनामराजातो

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नंदेव्योह्रियापरिदधुर्नसुतस्यचित्रं॥तद्वीक्ष्यपृच्छतिमुनौजगदुस्तवास्तिस्त्रीपुंभिदा
रवि नतुसुतस्यविविक्तदृष्टेः॥५॥कथमालक्षितःपौरैःसंप्राप्तःकुरुजांगलान्।उन्मत्तमूकजडवद्विचरन्गजसाह्वये॥६॥कथं
वापांडवेयस्यराजर्षेर्मुनिनासह।संवादःसमभूत्तातयत्रैषासात्वतीश्रुतिः॥७॥सगोदोहनमात्रंहिगृहेषुगृहमे
धिनां।अवेक्षतेमहाभागस्तीर्थीकुर्वंस्तदाश्रमं॥८॥अभिमन्युसुतंसूतप्राहुर्भागवतोत्तमं।तस्यजन्ममहाश्चर्यं
कर्माणिचगृणीहिनः॥९॥ससंभ्राट्कस्यवाहेतोःपांडूनांमानवर्धनः।प्रायोपविष्टोगंगायामनादृत्याधिराट्श्रियं॥१०॥

ननिर्मितत्वात्॥एवंभूतेनमुनिनासहयत्रसंवादेएषासात्वतीश्रुतिःसंहिता।एतद्व्याख्यानंबहुकालावस्थानापेक्षं।तस्यतेवत्रा
वस्थानंदुर्लभमित्याह।सइति।गोदोहनमात्रंप्रतीक्षतेतदपिनभिक्षार्थं।किंतुतेषामाश्रमं।गृहं।तीर्थीकुर्वन्।तस्मादेवतो
नवतेसोभिप्रायेश्रोतुस्तुचरितंअतीवाश्चर्यंअतःपृच्छतिइत्याह॥अभिमन्युसुतमितिपंचभिः।गृणीहि।कथय।सम्राट्चक्र
वर्तीवेतिवितर्के।कस्यवाहेतोः।कस्मात्कारणात्।अधिराट्श्रियंअधिराजश्रियंपरमनादृत्य॥७॥श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८

यस्यपादनिकेतं चरणपीठं हस्तकुरंगधनान्यानीय शात्रवो नमंति । अंग हे सूत लयुवा तरुण एव ते रक्षस्तु आर्षमासेनेपदं असुभिः प्राणैः सह ॥११॥
विरक्तस्य किं प्रयोजनमिति त्रिभिश्चेतनं त्राह । लोकस्य शिवाय सुखाय भवाय समृद्धये भूतये ऐश्वर्याय ते जीवंति न तु स्वार्थं एवं सति । असौ दोषा
निर्विण्णविरक्तोपि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच । नहि परोपजीवनं स्वयं सत्कुत्सितमित्यर्थः ॥१२॥ यत्किंचन पृष्टोसि तत्सर्वं नोस्मि

नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शात्रवः ॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥११॥
शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं ॥१२॥
तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् ॥१३॥ सूत उवाच
द्वापरे समनुप्राप्ते तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः ॥१४॥ श्री सांबशिव ॥

॥१३॥

भ्यं समाचक्ष्व यद्यस्माद्वाचां विषये गिरां गोचरार्थे स्नातं पारंगतं त्वां मन्ये । छांदसादन्यत्र वेदव्यतिरेकेण त्रैवर्णिकत्वात् तस्मिन्युग
रत्वादिप्रश्नानां व्यासजन्मकथनपूर्वकं उत्तरमाह ॥ द्वापरे समनुप्राप्ते वेदस्यापेक्षायामाह । तृतीये युगस्य पर्यये परिवर्ते ॥ वा
सव्यां उपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥१४॥ श्रीराम जय राम जय जय राम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलमुपस्पृश्य जलेस्नानादिकं कृत्वेत्यर्थः ॥ आसीनो बभूवेति शेषः ॥ विविक्तदेश इत्यादि चित्तैकाग्र्यार्थमुक्तं ॥ अनेनैव बदरिकाश्रा
नमुचितं ॥ तत्र च ऋषिर्युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां च यद्धितं तद्ध्यात्वा किंचित्तत्रोपायेनान्वयः परावरज्ञ
१५ ॥ अतीतानागतवित् अव्यक्तरंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं प्राप्तं वीक्ष्य ॥ १६ ॥ तथा भुवि युगे युगे ॥ भौ

स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ॥ विविक्त एक आसीन उदिते रविमंडले ॥ १५ ॥ परावरज्ञः स ऋषिः कालेनाव्य
क्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ १६ ॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं ॥ अश्रद्दधानान्नि
सत्वान्दुर्मेधान्ह्रसितायुषः ॥ १७ ॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्ववर्णाश्रमाणां यद्दध्यौ हितममो
घदृक् ॥ १८ ॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं ॥ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ॥ १९ ॥ ऋग्यजुःसामा
थर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पंचमो वेद उच्यते ॥ २० ॥ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ॥
वैशंपायन एवैको निष्णातो यजुषामुत ॥ २१ ॥ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ॥ इतिहासपुराणानां पि
~~[illegible]~~ तामे रोमहर्षणः ॥ २२ ॥

लिकानां शरीरादीनां तत्कृतं कालकृतं ॥ निःसत्वान् धैर्यशून्यान् दुर्मेधान् मंदमतीन् ॥ ततश्चातुर्होत्रोपलक्षि
ताश्चत्वार ऋत्विजश्चतुर्होतारः ॥ तैरनुष्ठेयं शुद्धं [illegible] यज्ञसंतत्यै यज्ञानामविच्छेदाय ॥ चातुर्विध्यमे
वाह ॥ ऋगिति उद्धृताः पृथक्कृताः दारुणः अथर्वोक्ताभिचारादिप्रवक्ता ॥ २२ ॥ श्रीसांबशिव ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

व्यस्यन्नविभक्तवंतः ॥२३॥ वेदविभागप्रयोजनमाह । तएवेति ॥ ये पूर्वमतिमेधादिभिर्धार्यंते तएव ॥२४॥ किंच स्त्रीशूद्रेति
द्विजबंधवः त्रैवर्णिकेष्वधमास्तेषां कर्मणि श्रेयसि श्रेयःसाधने एवं भवेत् ॥२५॥ अतएव तेषां कृपया भारताख्या ।

तएव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥२३॥ तएव वेदा दुर्मेधै
र्धार्यंते पुरुषैर्यथा ॥ एवं चकार भगवान् व्यासः कृपणवत्सलः ॥२४॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा ॥
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥२५॥ इति भारतमाख्यानं कृपया मुनिना कृतं ॥ एवं प्रवृत्तस्य यदा भूतानां
श्रेयसि द्विजाः ॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥२६॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥ वितर्कय
न्विविक्तस्थ इदं प्रोवाच धर्मवित् ॥२७॥ धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः ॥ मानिता निर्व्यलीकेन गृ
हीतं चानुशासनं ॥२८॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥२९॥

ख्यानं मुनिना कृतं । अनेन एवंप्रकारेण भवत्विति ॥ भारतानां श्रेयसि हिते ॥ सर्वात्मकेनापि कर्मणि नातिप्रसीदद्धृ
दयस्य सतः ॥२७॥ चित्तप्रसन्नोहेतुं वितर्कयन्निदमुवाच ॥ व्यागतं मानिताः पूजिताः ॥२९॥ श्रीसांबशिव ।

॥१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ२

देह्यः देहे भवः ॥ आत्मा जीवः वस्तुतो विभुः परिपूर्ण एव स्व ॥ आत्मा नात्मेन रूपेण असंपन्नः ॥ तदात्स्यम प्राप्त इवाभाति ब्रह्मवर्च्च
सं श्रवणाध्ययमनो लेर्षी तेजः तत्र साध्यो ब्रह्मवर्चस्यातेषु सत्तमः ॥ अतिश्रेष्ठोपि न केवलम संपन्न इवाभाति ॥ प्रस्तुत
ब्रह्मवर्चस्वी ब्रह्मवर्चस्वानपि सत्तम इवाभाति ॥ पाठांतरे दमनीयतमः पीति ॥ असंपन्नो हेतुं स्वयमेव शंकते ॥ किं

स्यस

आत्मापि बलमैर्देह्यो ह्यात्मा चैवात्मना विभुः ॥ असंपन्न इवाभाति ब्रह्मवर्चस्युसत्तमः ४ ॥ ३० ॥ किं वा भाग
वता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३१ ॥ तस्यैवं खिलमात्मा
नं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोभ्यागाद् आश्रमं प्रागुदाहृतं ॥ ३२ ॥ तमभिज्ञाय स
हसा प्रत्युत्थायागतं मुनिं ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥ ३३ ॥ इति श्रीभागव
ते महापुराणे प्रथमस्कंधे नारदागमनं नाम चतुर्थोध्यायः ४ ॥ ४ ॥ श्रीसांबार्पणमस्तु ॥

चेति प्रायेण भूयस्त्वेन हि यस्मात्त एव धर्माः अच्युतस्य प्रियाः ॥ खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः ॥
कृष्णस्यं व्यासस्य प्रागुदाहृतं ॥ नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामासेति ॥
॥ ३३ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे टीकायां चतुर्थोध्यायः ४ ॥ ४ ॥ श्रीकृष्णार्पणमस्तु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९॥

पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवं॥ व्यासचित्तप्रसादाय नारदेनोपदिश्यते॥१॥ उपसमीपे आसीनं विप्रर्षिं बृहच्छ्रवाः महायशाः
स्मयन् ईषद्धसन्निवेति अनेन सुखप्रसत्तिर्द्योत्यते॥ यद्वा इवेत्यनेनाधिकारार्थं आहो महानपि मुह्यतीति स्मयमानः॥ शारीरः
शरीराभिमानी केवलं जीव आत्मा आत्मना तेन शरीरेण कच्चित्किं परितुष्यति मानस आत्मा मनोभिमानी तेन मनसा परि
तुष्यति कश्चिन्नो वा॥२॥ ते जिज्ञासितं शास्तुमिष्टं धर्मादि यत्तत्सर्वं सुसम्पन्नं सम्यक् ज्ञातं॥ अपिशब्दादनुष्ठितं चेत्यर्थः॥ अपीति

सूत उवाच॥ अथ तं सुखमासीनमुपासीनं बृहच्छ्रवाः॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव॥१॥ नारद उवाच॥ पाराशर्य
महाभाग भवतः कच्चिदात्मना॥ परितुष्यति शारीर आत्मा मानस एव वा॥२॥ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं॥
कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितं॥३॥ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं॥ तथापि शोचस्यात्मा
नमकृतार्थ इव प्रभो॥४॥ व्यास उवाच॥ अस्त्येवमे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे॥ त
न्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं॥५॥ श्रीराम जय राम जय जय राम॥

पाठांतरे संबोधनं॥ सुसंपन्नत्वे हेतुः॥ महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं॥३॥ किंच यत्सनातनं नित्यं परं
ब्रह्म तच्च त्वया जिज्ञासितं विचारितं॥ अधीतं अधिगतं प्राप्तं चेत्यर्थः॥ अथापि शोचसि तत्किमर्थमिति शेषः॥४॥ आत्मा श
रीरो मानसश्च तन्मूलं तस्यापरितोषस्य कारणं अव्यक्तं अस्फुटं हे नारद त्वां सांप्रतं पृच्छाम॥ आत्मभवो ब्रह्मा
तस्यात्मनो देहादुद्भूतं अत एवमगाधो अतिगंभीरो बोधो यस्य तं त्वां॥५॥ श्रीसांबाय नमः॥ ॥छ॥

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रगाधबोधतांप्रपंचयन्नाहसवाइति द्वाभ्यां ॥ सर्वंगुह्यज्ञाने हेतुः ॥ यद्यस्मात्पुराणउपासितःत्वया ॥ यतस्त्वं परावरेशः ॥ कार्यकारणनियंता
मनसैवसंकल्पमात्रेणगुणैः त्वंविश्वंसृजसीत्यादि ॥ ६ ॥ किंचत्वंत्रिलोकींपर्यटन्नर्कइवसर्वयोगईश्वरीयोगबलेनप्राणवायुरिवसर्वप्राणि
नामंतःस्थः सन्नात्मसाक्षीबुद्धिवृत्तिसाक्षी अतःपरेब्रह्मणि धर्मतःयोगेनतिष्ठतःतस्यतदुत्तयाहबलेन ॥ इत्याचारदर्शितःसाधनस्याध्यायस्य
पूर्णं ॥ त्वंतुपरमेधर्मोपायोगेनात्महृत्वातितिष्ठ ॥ अवरेचब्रह्मणिवरदर्शितेब्रतेःस्वाध्यायनियमैःनिष्ठातस्यमेऽङ्गाजन्मसर्वंयतूत्तंतद्विनस्य २६
स्वदुःखं वितापपन्नाहदेहीति अमदेहाविवेमातुरुदरकुहरे यो सविणामन्त्रकूपे तस्मिन् मतितः तत्र जठरानिलाभसंतप्तो देहोपम अतएवकृप
नधाः इत्योविवगातविवृमित्तुनिर्गन्तुं इच्छन् तत्र मासान् गणयन् असौ कहा नु अहं बहिर्विवासमेते १७ ततकृतमुपकारं स्मरन्नाह ये नेदृशीं गतिर्ता
नेभवाहशोमेति रूपमेनेसमर्थः स्वकृतेनैवस्वेपं नु पतु अमलिमाचे विनातकृता पकारमप्नुपकारकः कृपोहिसमर्थः १८ इदृशीं गतिमितान्मेनन्ना
स्यतदाविलेकरुणाहानेमाधितवानिसुकृतं तदेवकेवलरूपं माहप्पसतीति चपपमपदः पश्चाद्दिः समस्तवधिजीवः स्वदेहेशाराकेशवंभवेमुखदुः

देस्वमदेहविवरे जठराग्निनाः सविणमूत्रकूपपतितो मन्दशतमदेहः इच्छन् वितोविवस्मितुं गणापत्मासान्निविर्णमप्तेकृपणा धीमगावन
कमनु १८ येनेदृशीं गतिमसौ दशमास ईशसंयाहितः पुरूपेनमवादृशेन स्वेनेवतुष्यतु कृतेन सदीनवाथः को नाम तत्प्रतिविनाञ्जा
लिमस्यकुर्यात् १८ पश्यत्स्वधिषणापानतुसमवाक्षिः शारीरकेदमशरीर्यपरः स्वदेहे यत्रस्थपासतमहं पुरुषं पुराणं पश्ये बहिर्हृ
वि दि च चैत्तमिवप्रतीतं १९ सोहं वसन्नपिसभो वहदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे यत्रोपयातमुपसर्पित देवमाययामिथ्यामातिर्य
दनुसंसृतिचक्रमेतत् २०
विवेके बलंनतु पश्यति अहं प्रजनपेत्सह पाधिषणां पदन्ते नविवेकता नेद्मशारीहमस्तु पलहृणां श्
मदमाहिपुत्रं शरीरवान् आसअमवंतमेवप्रताताम् अनादिपुरुषं पुराणं बहिः हृदि च पश्ये परमात्मानं सपुः कथं अपरोज्ञमपाम्प्रतीतं चैत्तमिव
अहंकारास्पदे भोक्तारमिवेसमर्थः १९ विवेकता नष्टतत्संसारात् देवगमनुभवेदमाच्च मार्गमेवाधावस्यतिसोहमितिछामोहेविभोवदुःखवा
वासपश्चामवतितत्थागर्भे वसन्नपि सोहं गर्भाद्बहिर्न निर्गन्तुमिच्छामि तत्र हेतुः अंधकूपप्राप्येपत्र बहिः हृपेयातं मायाता न देवदेवमतवमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ त॰ तस्माद्वेव स्मितो पविगत विक्लव: अव्याकुल: सासुहृत् आत्मनामात् अपि रूपया बुद्ध्यैव आत्मानं तमस: संसारादुद्धरिष्यामि अने करिष्यं नानागर्भवा
११० सरूपे मातृ मनेऽ: त्वं यथा मेमा भवि ष्यत न भवि ष्यति यो कात्र तत्व साधन सामग्री तत्राऽह उपमा हितो ऽहं यं मा प्राप्तो विष्णो: पाहि पेन मपास: २१ हरि
मामा: पारं छि है का पस्पीति प्रसं नि पूर्व हृणो पल हृणां ऋषि जीव: संघ: तत त्त्वानि वक्ष्य वाचा नमवा स्कृत्वे मा नि है तु मा हृत: त्रि पत्तिर दति २२ अव

तस्माद्धविगत विक्लव उद्धरिष्य आत्मानमासुतमस: सुहृत्साक्षात्नेव मे यो यथा यमनमे तदनेक कर्त्तुं मामेभवि [illegible] माहित विष्णुपाद:
२१ कपिल उवाच एवं कृतमति र्गर्भे दशमास: स्तुवन् ऋषि: सद्य: क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुत: २२ तेनावसृष्ट: सहसा
कृत्वावाक् शिर आतुर: विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृति: २३ पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते रोरूयति गते ज्ञाने वि
परीतां गतिंगत: २४ परच्छन्दं न विदुषा पुष्यमाणो जनेन स: अनभिप्रेतमापन्न: प्रत्याख्यातुमनीश्वर: २५ शायितोऽशुचि पर्यङ्के ज
न्तु: स्वेदजदूषिते नेश: कण्डूयनेऽङ्गानामासनोत्थानचेष्टने २६ तुदन्त्यामत्वचं दंशा मशका मत्कुणादय: रुदन्तं विगतज्ञानं कृ
मय: कृमिकं यथा इत्येवं शैशवं भुक्त्वा दु:खं पौगण्डमेव च २७ ॥ ॥ ॥ ॥ ॥ ॥

सृष्ट: अध: क्षिप्त: सन् २३ रोरूयति रोदिति २४ परस्य छन्दं अभिप्रायमविदुषा अनभिप्रेतं तत्तत्प्राप्तोऽपि रुदन्नेव इत्यस्य प्रत्याख्याने सक्तत्वमविवक्षेऽपा
नं उद्धूय अपरावृत्ते न तत्र नाभिसाहि २५ आसनोत्थानचेष्टने चानीश: सन्नरोदिति इत्यनुषङ्ग: २६ आमा कोमलात्वक् उपसृत त्राम:
विगतगर्भे पात ज्ञान प्रसृत शैशवं पञ्चवर्षाणि तत: पौगण्डं यौवनात् अर्वाक् कृतवचाध्ययनादि दु:खम् ॥ २ ० ० ११०

यौवनदुःखमाह सार्द्धैस्त्रिभिः अलब्धाभीप्सितत्वेन शुचार्पितः व्याप्तः अतोऽज्ञानादिद्धो दीप्तो मन्युर्यस्य सः देहेन सहैव वर्द्धमानेन मन्युना च विग्रहं विरोधं क
रोति आत्मनोऽतापनाशाय २८ अतो नानापञ्चभूतारब्धे देहे असद्ग्राहो अहं ममेति कुमतिं करोति २९ तदर्थं देहाद्यर्थं तत्पीन कर्म येनावद्धः यो देहः अनु
याति पुनः पुनः याति अनुवर्तनं दत्तिषा कुतः अविद्याकर्मभ्यां बन्धनं यस्य तथा ३० यद्यसद्भिरास्थितः अधिष्ठितः पथि तेषां पथि रमते पथि सन्मार्गे आ

अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः सह देहेन मानेन वर्द्धमानेन मन्युना करोति विग्रहं कामी कामिष्वंताय चात्मनः २८ भूतैः पंच
भिरारब्धे देहे देह्यबुधोऽसकृत् अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं २९ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं योऽनुयाति ददत्क्लेशम
विद्याकर्मबंधनः ३० यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ३१ सत्यं शौचं
दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ३२ तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु संग
न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३३ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३४

स्थितोऽपि यद्यसद्भिः सह रमते तर्हि तदा तेन देहेनाहं ममेत्यादि पूर्वोक्तप्रकारेण नरकं प्रविशति ३१ असत्संगं निंदति सत्यमिति त्रिभिः ३२
खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ३३ यथा च योषित्संगिनां संगतो बंधः तथान्यप्रसंगतो न भवेत् ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ तृ॰ १११

योषितां संगस्यानर्थहेतुतां प्रपंचयति प्रजापतिरिति सार्द्धाभ्यां रोहिद्रूपां मृगीरूपां स्वसुतां ऋक्षरूपी मृगाकारः हतत्रपो निर्लज्जः ३५ तेन ब्रह्मणा सृष्टा
मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनुष्यादयः तेषु को न पुमान् अखंडितधीः अनाकृष्टमनाः ३६ दिशां जयिनः स्मरानपि ३७ प्रति
लब्ध आत्मरूपो लाभो येन अस्मत्सुमुक्षुः प्रमदाः निरयद्वारं वदंति योगिनः ३८ शनैः शुश्रूषादिभिः उपयाति योषिद्रूपा माया यामेसु प्रति

प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३५ तत्सृष्टसृष्टसृष्टेषु कोऽन्वखंडितधीः पुमान् ऋ-
षिं नारायणमृते योषिन्मय्येह मायया ३६ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करोति पदाक्रांतान् भ्रूविजृंभेन केवलं ३७
संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदंति यां निरयद्वारमस्य ३८ योपयाति शनैर्
माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ३९ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्री-सं
गतः प्राप्तो वित्तापत्यगृहप्रदं ४० तामात्मनो विजानीयात्पत्यपत्यगृहात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४१ ॥

तुल्यमीक्षेत ३९ मुमुक्षुं स्त्रियं प्रत्येतद्देवाह यामिति द्वाभ्यां ऋषभायतीं पुरुषवदाचरंतीं यां मम मायां वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतकाले
स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४० तापत्यादिरूपं प्रसंगु विजानीयात् मृगयोर्लुब्धकस्य गायनं यथा तत्तेन प्रतीयमानमपि प्रियं यथा मृगस्य मृत्युः
४१ ॥। राम॰ १११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं ज्ञाऽवस्य संसृतिः प्रसंचितानन्तस्वकर्मवशेन लोकाल्लोकान्तरगमनं जन्मसहस्रेष्वेवोक्तं तेनैवं शक्तेन तद्व्यापकस्य कस्यचिल्लोकान्तरगमनं निरस्य
च कथं जन्ममरणाभोगेन कर्मकरणे च सति जन्ममरणे च भवेतां तत्कृतः पुनरपि तत्स्वकर्मसंभवति तत्र लोकान्तरगमनेन कर्म च संभवतीत्याशा ॥
ह देहेनेति जीवस्योपाधिभूतेन जीवेन लिङ्गदेहेन लोकाल्लोकमनुव्रजन्नविरतं कर्माणि करोतीति कर्मणामसमाप्तिरुक्ता ४१ जन्म मरणाम ॥
मेवमाह जीवो ह्युपाधिर्लिङ्गदेहः अस्यात्मनः अनुगः अनुवर्ती भूतेन्द्रियमनोमयः स्थूलभूतादिविकारः भोगायतनं तस्य निरोधः कार्यायोग्यता तदस्य जी

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् भुंजान एव कर्माणि करोत्यविरतं पुमान् ४२ जीवो ह्यस्यानुगो देहो भूतेन्द्रियमनोमयः तन्निरोधोऽस्य मर
णमाविर्भावस्तु संभवः ४३ द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा तत्पञ्चत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ४४ यथाक्ष्णोर्द्रव्यावयवद
र्शनायोग्यता यदा तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४५ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह
४६

वस्य मरणमुच्यते आविर्भावस्तु संभवो जन्मोच्यते ४३ एतदेव दृष्टान्तेन स्पष्टयति द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येक्षायोग्यता रूपादिदर्शने का
र्यकामलादिदोषग्रस्तत्वाद्योग्यता भवति तदैव चक्षुर्द्रष्टुर्दीपस्याप्ययोग्यता अनयोः स्थानं च चक्षुषो योग्यता द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता वस्थूल
देहे वैकल्ये लिङ्गस्य वैकल्यं तदेव जीवस्य मरणं न स्वतन्त्रतया ४४ कश्चिदेकस्मिन् कोऽप्यधिकः प्रपाते तत्राप्यभयः द्रव्योपलब्धिस्थानस्य स्थूलशरीर
स्य द्रव्येक्षायोग्यता तत्पञ्चत्वं मरणं अहंमानात्तदेहमेवाहमिति अभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः अक्ष्णोर्गोलकयोर्द्रव्याव
यवस्य रूपादेर्दर्शने योग्यता शेषं समानं ४५ यस्मादेवं तस्माज्जीवस्य जन्ममरणादिकं तस्माज्जन्ममरणात्संत्रासो न कार्यः जीवनेन च कार्पण्यं दैन्यं

ननु सर्वथा मुक्तसंगत्वे कथं जीवितं अत आह सम्यक् पश्यतीति वा बाह्यप्रतीतिः सम्यग्दर्शनात्तया बुद्ध्या मायाविरचिते लोके कलेवरं न्यस्य विसृज्य तस्मिन्न
सक्तिः सन्नात्मबुद्धिरहितः सन्नित्यर्थः ४७ इति तृतीये एकत्रिंशः द्वात्रिंशे सात्विकी धर्मे भूयो गतिरुदीर्यते तत्र ज्ञानविहीनस्य तत्वज्ञस्य पुनः गतिः १ तद्दे
वं पापकर्मणो गतिरुक्ता इदानीं काम्यकर्मणो गतिमाह अथेति चतुर्भिः योऽसौ गृहमेवावसन्नास्ते न धर्मान्दोग्धि तत्त्वमाह कामम् अर्थं तानद्वा

सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया मायाविरचिते लोके चरेन्न्यस्य कलेवरं ४७ इ श्री ग ते ह रा तृ पु धे का लेपे एवा
देव ति वा एक शो यः क ल वा अथ यो गृहमेधीयान् धर्मानेवावसन्गृहे काममर्थं च धर्मं च दोग्धि भूयः पिपर्ति ता
न् १ स चापि भगवद्धर्मात्काममूढः पराङ्मुखः यजते क्रतुभिर्देवान्पितॄंश्च श्रद्धयान्वितः २ तच्छ्रद्धयाक्रान्तमतिः पितृदेव
व्रतः पुमान् गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ३ यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः तदा लोका लयं यान्ति त
एते गृहमेधिनां ४ ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे निःसंगा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ५ निवृत्तिधर्म
निरता निर्ममा निरहंकृताः स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ६ ॥ ॥ ॥ ॥ ॥ ॥

र्धर्मान् भूयः पिपर्त्ति पूरयतीत्यनुतिष्ठति १ सोऽपि भगवतो धर्मान् परान् पराङ्मुखः सकामः कृतानपि देवान् पितॄंश्च यजते २ ततः किं त
दाह तेषां श्रद्धया आक्रान्ता व्याप्ता मतिर्यस्य पितृपर्यं च देवा यस्य व्रतं नियमो यस्य सोमपाः तत्र सोमपानेत्यर्थः ३ लोकेति एतस्यापि पुनराप
रूपतां आत्ममुक्तात्लोकानामपि लयमाह यदा चाहीन्द्रशय्यायां प्रलये ४ भगवद्धर्मनिष्ठानां तत्र आपिरेव गतिमाह त्रिभिः येतु कामार्थप्रयोजनाय स्व
धर्मान्न दुहन्ति निःसंगाः अनासक्ताः न्यस्तानि ईश्वरे समर्पितानि कर्माणि यैः ६ इत्यादिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वतोमुखं पूर्णं पुरुषं प्राप्नुवन्ति यावच्छ्रुतिः सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मेति प्रकृतिं उपादानकारणं उत्पत्त्यन्तभावनं
निमित्तकारणं ७ परमेश्वरदृष्ट्या हिरण्यगर्भोपासकानामपि क्रमेणात्मप्राप्तिमाह द्विपरार्धावसाने इति त्रिभिः परस्य हिरण्यगर्भस्य पर-
चिन्तकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपासकाः ८ क्ष्मादीनि पञ्चभूतानि मन इन्द्रियाणि अर्थाश्च शब्दादयः भूतादिश्चाहंकारः एवमादि-

सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनं ७ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते तावदध्यासते
लोकं परस्य परचिन्तकाः ८ क्ष्माम्भोऽनलानिलवियन्मन इन्द्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा
कालं पराख्यमनुभूय परः स्वयंभूः ९ एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः तेनैव साकममृतं पु-
रुषं पुराणं ब्रह्म प्रधानमुपयान्त्यगताभिमानाः १० अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं श्रुतानुभावं शरणं व्रज भावेन भामिनि ११ ॥

भिः परिवृतं ब्रह्माण्डं प्रतिसंहर्तुमिच्छुः सन् अव्याकृतमीश्वरं परार्द्धलक्षणं कालं ९ परेत्य देहं त्यक्त्वा भगवन्तं हिरण्यगर्भमनुप्रविष्टा ये यो-
गिनः अमृतं पुरुषमात्मानं तद्रूपं प्रतिधानं ऊर्ध्वं ब्रह्मलं तेनैव सह उपयान्ति न तु पूर्वं पृथक्तस्य हि अगताभिमानाः तथा च श्रुतिः ब्रह्मणा स-
ह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति १० भगवद्रूपस्य ब्रह्मणः साक्षादेव तत्प्राप्तिर्न तु क्रमेण
अतस्त्वमपि तमेव भजेत्याह अथ तस्माद्भावेन प्रेम्णा ११ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावद्भक्तानां मोक्षनिरूपणे वृत्तैस्त्रिभिः सगुणब्रह्मोपासनाहिरण्यगर्भोपासकानां नानुक्रमेण मुक्तिर्भेदेनोपासकेषु ब्रह्मणा सह प्रत्यावर्त्तन्ते किमुतान्य
इत्याह ॥ आद्य इति चतुर्भिः यो वेदगर्भः सोऽपि गुणव्यतिकरे जाते पूर्वं यथा ब्रह्मपदमपि लभते सह प्रजापतेन केवलं स एव केवलः किंतु
ऋषिभिर्योगेश्वराद्यैश्चापि सह १२ जन्मनिहेतुमाह भेददृष्ट्याभिमानेन कर्तृत्वाभिमानेन यथा पूर्वं तेषु निःसंगेनापि निष्कामेन कर्मणा तोषिते १३ किं कृत्वा
प्रजापतेः प्रथमं पारमेष्ठ्यमैश्वर्यं निषेव्य पश्चात्तल्लयसमये गुणाधिष्ठातारं प्रथमावतारं पुरुषं संसृत्य प्राप्य १४ तेऽपि ऋषयोऽमुना स्वकर्मनिर्मि

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः १२ भेददृष्ट्याभिमानेन निःसंगेनापि कर्मणा कर्तृ-
त्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभः १३ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना जाते गुणव्यतिकरे यथापूर्वं प्रजापतेः १४ ऐश्वर्यं
पारमेष्ठ्यं च तेऽपि धर्मविनिर्मितं निषेव्य पुनरायान्ति गुणव्यतिकरे सति १५ ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः कु-
र्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १६ रजसा कुंठमनसः कामात्मानोऽजितेन्द्रियाः पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशया
: २६ त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः कथायां कथनीयोरुविक्रमस्य मधुद्विषः १७ ॥ ॥ ॥ ॥ ॥

तमैश्वर्यं निषेव्य पुरुषं च संसृत्य प्राप्य पूर्वं स्वस्वाधिकारेण पुनरायान्तीत्यन्वयः १५ एवं ब्रह्मोपासकानामपि भेददर्शनाभिमानाभ्यामेवमावृत्तिः त
दा कामकर्मिणां किं वक्तव्यमिति तानाह षड्भिः ये त्विह कर्मस्वासक्तमनसः सन्तः अप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि कृ
त्स्नानि कुर्वन्ति ते अपि अमत्ता हरिमेधसा न यथा धर्ममार्गेणापि पितृलोकं व्रजंतीति पंचभिरन्वयः यद्येतन्नित्यमादरेणाहिना १६ हरतीति हरिः मेधा यस्य
कथनीय उरुविक्रमो यस्य तस्य मधुद्विषः कथायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पेचाच्युतसत्कथासुधां हित्वा असत्कथाः शृण्वंति तेन नं देवेन विहिताः इत्यन्वयः १९ पितृलोकान् अवः प्रजामनुपुत्रादिरूपप्रजा पतिंतां गर्भाधानादारभ्य
श्मशानांताः क्रियाः कृतवंतः पयोक्ता कालिता इत्यर्थः २० कथंप्रजापतेः नंदादि ततः केपुनरिमंलोकं प्रतिपतंति विमृशितं तद् हर्षोभोगमात्रमनेपणा २१
परमेष्ठिनं परमेश्वरं प्रोमातसमुगत्तानाश्रयया भक्त्या २२ भजनेच सा नर्वं तापतेत्वनत एवभवत इत्याह वासुदेव इति २३ ततदेवोपपादयति

नतं देवेन विहिता ये चाच्युतकथासुधां हित्वासच्छृण्वंत सत्कथाः पुरीषमिव विड्भुजः १९ दक्षिणेन पथार्यम्णः पितृलोकं व्रजंति ते प्रजामनुप्र
जायंते श्मशानांतक्रियाकृताः २० ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति पतंति विवशा देवैः सद्योविभ्रंशितोदयाः २१ तस्मात्त्वम
र्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं २२ वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञा
नं यत् ब्रह्मदर्शनं २३ यदास्य चित्तमर्थेषु समेष्विंद्रियवृत्तिभिः न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २४ स तदैवात्मनात्मानं
निःसंगं समदर्शनं हेयोपादेयरहितमारूढपदमीक्षते २५ ज्ञानमात्रं परंब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भगवानेक
ईयते २६

यदास्य भक्तस्य चित्तं भगवद्रूपानुरागेण तस्मिन्नेव निश्चलं सदिंद्रियवृत्तिभिर्वैषम्यमर्थेषु न गृह्णाति तदैवात्मनात्मानं स्वप्रकाशं मीक्षते
कथंभूतं समं च तद्दर्शनं च तत्र कुतः निःसंगत्वात् विषमप्रवृत्तिनिःसंगत्वे हेतुः हेयोपादेयरहितं तत्कुतः प्रहृष्टवासितमारूढं परमानंदोहमि
तिनिश्चयं प्राप्तमित्यर्थः २५ समेष्वर्थेष्विंद्रियसक्तं तद्देवसाम्यं दर्शयति ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः द्रष्टृदृश्यदर्शनकरणाद्रूपे

ताद्रूप्यकृप्रतीयते तानमात्रत्वेनममोक्षितमर्थः २६

भा॰तृ॰ ननु ज्ञानमात्रमात्मनः स्वरूपं त्वयाभिहितं प्राप्तमेवेति किमनेकसाधनसाध्येन योगेन प्रापणेनेत्याशङ्क्याह एतावानिति पुमर्थः प्राप्यते प्रपंचसंगत्याग एव योगफलमित्य
११४ र्थः २७ ननु कथमसंगत्वं प्रतीतः प्रपंचो बहुविधस्तु शक्यतेऽभिमतो ऽसंगस्ताद्रूपत्वादित्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिधर्मोपसर्जितेनार्थरूपेण ज्ञानान
रूपमेव निर्गुणं ब्रह्मैव भाति न त्वर्थः पृथगस्तीत्यर्थः २८ अर्थरूपत्वमेवाह यथेति अहंरूपः अहंकारः स च त्रिवृत् त्रिगुणात्मकः पुन
श्च भूतरूपेण पंचविधः इंद्रियरूपेण एकादशविधः स्वराट् जीवरूपः तस्य कर्तुः वपुः ब्रह्माण्डं जगद्यतो येभ्यो महदादिभ्यस्तथा च भाति २९ ननु

एतावानेव योगेन समग्रेणेह योगिनः युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः २७ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभा
त्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २८ यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्ध
या भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृ
तेः पुरुषस्य च ३१ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ ॥ ॥ ॥

तर्हि संतु किमित्येतित्तत्राह एतद्वैत्त ३० उक्तमेवार्थं सुखप्रतिपत्त्यर्थं संक्षेपेणानुवदति इत्येतदिति हे गुर्वि पूज्ये ३१ अनेन च ज्ञानयोगेन भगवाने
व प्राप्यो यथा भक्तियोगेनेत्याह नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणो योगः तयोर्द्वयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दो लक्ष्योता राम:
एकोपस्मत उक्तं गीतासु ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति ३२ ॥ ॥ ॥ ॥ ॥ ११४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ज्ञानयोगस्य आत्मलाभः फलं शास्त्रेषु श्रूयते भक्तियोगस्य तु भगवत्प्राप्तिः कुतस्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति यथेति द्वाभ्यां रूपरसादीनां
गुणानामाश्रयो यः क्षीरादिरेक एवार्थो मार्गभेदभिन्नैरिंद्रियैर्नानेयते चक्षुषा शुक्लमिति रसनेन मधुरमिति स्पर्शेन शीतमित्यादि तथा भगवानेव तत्तदुपायो
वागम्यते ३३ शास्त्रमार्गानेव प्रपंचयति क्रियपेति त्रिभिः क्रियया पूर्त्तेन कृतुभिर्यागैः मर्शनं मीमांसा आत्मेंद्रियजयो निषिद्धवर्जनं ३४ उभयचिह्नेन स

यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ३३ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेंद्रियजये
नापि संन्यासेन च कर्मणां ३४ योगेन विविधांगेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३५ आत्मतत्त्वावबोधेन वैराग्येण दृढेन
चेयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्योंतर्धावति जंतुषु ३७ । जीव
स्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ३८ नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित् न स्तब्धाय न
भिन्नाय नैव धर्मध्वजाय च ३९ न लोलुपायोपदिशेन्न गृहारूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ४० श्रद्दधानाय भक्ताय विनीताया
नसूयवे भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ४१ बहिर्जातविरक्ताय शांतचित्ताय दीयतां निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ४१ ॥

कामनिष्कामलक्षणेन तमेवाह यः प्रवृत्तीति ३५ सकामधर्मप्राप्यं स्वर्गाद्यपि भगवत एव सगुणं स्वरूपमिति भावः एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः ३६ तदे
वं ज्ञानयोगमुपसंहृत्य तस्य भक्तियोगेन समानार्थत्वमुक्तं भक्तियोगमुपसंहरति प्रावोचमिति चतुर्विधं सगुणनिर्गुणभेदेन यो धावति उत्पत्तिनिधनादि
करोति ३७ अंगहे मातः ३८ उपदेशेनधिकारिणो दर्शयति नैतदिति द्वाभ्यां खलाय दुष्टाय स्तब्धाय अविनीताय भिन्नाय दुराचाराय धर्मध्वजाय दांभिकाय अनधिकारिणा

श्रीभा० टी० स्कं० ३ ४८

भा॰ त॰ एतच्छ्रवणकीर्तनपरस्यापि मत्प्राप्तिरेव फलमित्याह परमिति अपवर्गश्चकारः सोपि मत्सङ्गेनमेतीति हि निश्चितं ४२ इति तृतीये द्वाविंशः त्रयस्त्रिंशे तु तत्सेवक
११५ पिलस्योपदेशतः ज्ञानभावेन तन्मातुः जीवन्मुक्तिरुदीर्यते १ विस्रस्तमोहपटलम्भावरणं यस्याः सा तत्त्वविषयः तेनाङ्किता सिद्धिः साङ्ख्यं तान भूमि
मुत्पत्तिक्षेत्रं प्रवर्तकं २ अथेति वाक्यान्तरे अजोपि तव वपुः केवलं दध्यौ न तु दृष्टवान् तत्र सयपक्षा स्रुतव जठराब्जात् जातः स एव भवानेव विश्वस्य सर्गादि विधत्ते
न तु तव सर्गादिकं तत्र काश्चिद्दस्ति एवं भूतस्त्वमीश्वरः कथं जठरेणाधृत इति तत्र परग्रामान्वयः कथंभूतं वपुः सत् वाक्ये तन्नहेतुः अन्तःसलिले शयानं कीदृश

सह्रुत योवाभिधत्ते मुच्चिन्त्यः सत्वेतिपद्वीं चमे ४३ इति श्री ग ते हा रा त प धेद्वात्रि त ध्याय
मै प वा एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयाङ्कि
तसिद्धभूमिं १ देवहूतिरुवाच अथाप्यजो ऽन्तःसलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्ज
जातः २ स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहोऽवितथाभिसन्धिरात्मेश्वरो ऽतर्क्यसहस्रशक्तिः ३ अथ

भूतानि इन्द्रियाणि च अर्थाश्च शब्दादयः आत्मा च मनः एतन्मयं गुणैर्वा प्रमितमित्यर्थः कुतः गुणानां प्रवाहो यस्मिन् तत्तु कुतः अशेषस्य कार्यकारण
स्य बीजं कारणं २ कथंभूतो भगवान् सर्गादि विधत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन शः शक्तिद्वारेणापि धत्ते न साक्षादित्यर्थः यतः अनीहो निः राम॰
क्रियः तर्हि कथं शक्तिद्वारेणापि सर्गादि विधत्ते अवितथ अभिसन्धिः सङ्कल्पः किमर्थं विधत्ते आत्मनां जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः ननु ११५
कथं विचित्रान्यकर्ता एव विदध्यात् अतर्क्याः सहस्रपरिमिताः शक्तयो यस्य सः ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच प्रलयपयोधेरेपताद्दृश्यमासीत्तु सत्तमप्रशांतवैरोक एव पिहवः ननु शिशोमपि किं सततुष्यतितत्राह वटपत्र इति अंघ्रिपा संगुष्ठं पिबतीसं घ्रिपानः मुद्रमापाशि
शुतं तद्देवमापाद् इतिभावः ४ अथ वा नतम शाश्वपमांतत्वजुठरेभूत किंतु वा सहन्छवतानवदृष्टिपेवाविर्भूतामासा हत्वेदेहतंत्रोदेहधरिकः सीकृत
मर्त्तिरासे पाप्मकोद्दश्यनोनिदेशभाजांविमुक्तपेत्तमदृपेत्र आत्मपयोपलब्धये सान मार्गमदर्शनाय ५ अनत्तदर्शनादेहकृतार्थास्मीति केमुसमा
येनाहयन्नामधेयस्य श्रवणामनकीर्त्तनचतस्मात् कश्चित्कदाचिद्दिश्वानमत्तीतिस्वादः श्वपचः सोपिसवनायसोमयागायकल्पते योग्योभवति

सतं दृष्ट्वातोमेजनदेशानाथक एव मयसोहृदयतदासीत् विश्वंयुगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ४ तंदेहतंत्रोसि
नि शमायपापमनांदिशभाजां चाविभोविमुक्तये पथावतारास्तव भूकता हृयस्त्यायमयात्मपयोपलब्धये ५ यन्नामधेयं श्रव
णानुकीर्त्तनाद्यत्समृत्या च स्मरतो हि कश्चित् सोहोपि सद्यः सवनायकल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ६ अहो वत
श्वपचोतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ७ ॥ ॥
स्त

अनेन श्लोकत्रयं लक्ष्यते ६ तदुपपादयति अहो वत ते सा श्वपचोपि त्वहो येन वनाम वर्तते तस्य श्वपचोपि अतः अस्मात् स्वहितो गरीयान् यस्माद्वर्तते अत इति
वा कुत इत्यत आह तप एव तपस्तेपुः कृतवंतः जुहुवुः होमं कृतवंतः सस्नुः तीर्थेषु स्नाता आर्याः च त एव सदाचाराः ब्रह्म वेदं अनूचुः अधीतवंतः
तन्नामकीर्त्तनेन तप आद्यंते भूतमनकेसृगणतमात्स्यर्थः यद्वा जन्मांतरे तैस्तपो होमादि सर्वं कृतमिति तन्नामकीर्त्तनेन महाभाग्योदयो ज्ञायत इत्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰त॰ ११६ प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिंत्यं वेदगर्भं प्रसूतः ८ अविक्लवया गंभीरया वाचा ९ तेन कष्टं सुसेव्येन सुसेवेन मे मया अनुदितेन
आस्थितेन अनुष्ठितेन परां काष्ठां मोक्षं अमृतं अवरोत्स्यसि प्राप्स्यसि १० याया प्राप्स्यसि अतद्विदः मन्मतमविद्वांसः ११ अनुमतः अनुज्ञातः
१२ सरस्वत्या आपीडे पुष्पमुकुटतुल्ये सरस्वत्यापीडे मुकुटे नेत्यपि विषयस्थिते विडसर सिंसि समाहिता बभूव १३ कथं भूता समाहिता तदाह अभीक्ष्णां

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भं ८ मैत्रेय उवाच ईडितो
भगवानेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ कपिल उवाच मार्गेणानेन मातस्ते सुसेव्येनोदि
तेन मे आस्थितेन परां काष्ठामचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभयं याया मृत्युमृच्छं २
त्यतद्विदः ११ मैत्रेय उवाच इति प्रदर्श्य भगवान्सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या कपिलोनुमतो ययौ १२ सा चा
पि तनयोक्तेन योगादेशेन योगयुक् तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता १३ अभीक्ष्णावगाहकपिशान् जटिलान् कुटिला
लकान् आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं १४ प्रजापतेः कर्दमस्य तपोयोगविजृंभितं स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिके राम
रपि १५ ११६

त्रिसवनमवगाहः स्नानं तेन कपिशान् पिशंगान् स्वतएव कुटिलान् तथा आत्मानं देहं बाढं धारितां कृशं बिभ्रती सती १४ प्रजापतेः क
र्दमस्य तपो योगाभ्यां विजृंभितं प्रवृद्धं स्वगार्हस्थ्यं हित्वा पुत्रभूतेश्वरविरहातुरा सती इव इत्येवं किंचिद्दूषितमहति शोकव्याकुलं च कारेति षष्ठेनान्वयः १५

यत्र गार्हस्थ्ये क्षीरफेननिभाः मृदुशय्याः आस्तरणानि भान्ति दंतघटितामंचकाः स्वर्णमयाः पादपीठाः आसनानि पीठादीनि सुस्पर्शान्यास्तरणानि येषु ॥
१६ ॥ बहुभिरमरकुसुमैः रम्यं ॥ १८ ॥ यत्रोद्यानप्रदेशे मालतीनदेव दुर्लभं तिरति ॥ १९ ॥ आखंडलइन्द्रः तस्य पर्याये ॥ विलस्तासाम पीड्य जलमंथमा ...
तमं सर्वहितालयाभिमानिस्पृहा ॥ २० ॥ सुहृद्वियोगस्य दुःसहमाहवनमिति ॥ न रुव से न सन्तोगो रिवापरा ॥ २१ ॥ चिरहवत ध्यान ... माह ॥

पयःफेननिभाः शय्या दांतारक्तपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥ १६ ॥ स्वच्छस्फटिककुड्येषु माहामारक
तेषु च ॥ रत्नप्रदीपा ज्वलिता ललनारत्नसंयुताः ॥ १७ ॥ गेहोद्याने कुसुमिते रम्यं बहुमरकुमैः ॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्र
तं ॥ १८ ॥ यत्र प्रविश्य मात्मानं विबुधानुचराजगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपनन्दितं ॥ हित्वा तदीप्सिततमम प्याखंडलस्यापि
तो ॥ किंचिच्चकारवदने पुत्रविश्लेषणातुरा ॥ वनं प्रव्रजिते पत्यापसारपर्स विरहातुरा ॥ ज्ञातात्मा नो वैराग्ये रिवल्लक्ना ॥ २१ ॥ तमे
वध्यायती देवमप्रसादं पिलहरिं ॥ बभूवचिरतो वत्सनि स्पृहा नादोगृहे ॥ २२ ॥ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं ॥ सुतंप्रसन्न
वदनं समस्तव्यस्तचिंतया ॥ २३ ॥ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा ॥ युक्तानुष्ठानज्ञानेन ब्रह्महेतुना ॥ २४ ॥

वै

निस्पृहा निवासनायस्य वसनविदुरा ॥ २३ ॥ ततः स्वसुतोक्तप्रियनाय दाहत ... रूपं ध्यायति जिज्ञासानं चापि स्वयमेव सर्वगतं ध्यायता ब्रह्मणस्प
स्थितमपि बभूवेति पर्वैस्येवानुषंगः केन ध्यायती चित्तशुद्धेन मनसा ॥ २३ ॥ चित्तशुद्धौ कारणान्याह ॥ भक्तिप्रवाहरूपेण योगेन वैराग्येण युक्तानुष्ठानेन ब्र
लं ज्ञानेन च ॥ युक्तानुष्ठानं च तेद्गीतायां उक्तं ॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ ब्रह्महेतुना
ब्रह्मसाक्षात्कारेण ॥ २४ ॥

तत४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वतोमुखत्वेहेतुः।। स्वानुभवस्यस्वरूपप्रकाशेनतिरोभूतंमायागुणैर्विशेषणंपरिच्छेदोयस्य।। ब्रह्मभूतेब्रह्मणिआत्मानंजीयमानोसंश्रयेभगवतिस्थितःजीवन्मुक्तिमा
ह।। सोऽहंत्रिभिः।। तदाचनिर्वृतःजीवायतिजीवभावोयस्यास्तस्याभावः।। ततस्तस्मात्विगतकोकृशामाप्तनिर्वृतिर्यशतो आत्मानंदेहनसस्मारस्मरते
णान्वयः।।२५।। ननुतथापिगुणानांविद्यमानत्वात्कथमस्मरणंतत्राह।। निसारूढोध्यानप्रवेशसमाधिर्यस्मात्तस्याभावः।। तत्तस्मात्परोहतः

विशुद्धतदात्मानंमा सनाविश्वतोमुखं।। स्वानुभवतिरोभूतमायागुणविशेषणं।।२५।। ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये।।
निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः।। निसारूढसमाधित्वात्सगगुणसंभ्रमः।। नसस्मारतदात्मानंस्वप्नदृष्टमिवोत्थितः।।
तद्देहःपरपोषितयोव्रताःस्वाध्यायसंभवात्।। बभौमलैरविच्छिन्नःसधूमइवपावकः।।२८।। स्वांगतपोयोगमयंमुक्तकेशंगतं
बरं।। दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः।।२८।। एवंसाकपिलोक्तेनमार्गेणाचिरतःपरं।। आत्मानंब्रह्मनिर्वाणंभगवंतमवापह।।
तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं।। नाम्नासिद्धपदंयत्रसासंसिद्धिमुपेयुषी।।३०।। तस्यास्तद्योगविधुतमात्र्यमर्त्यमभवत्
सरित्।। स्रोतसांप्रवरासौम्यसिद्धिदासिद्धसेविता।।३२।।

तोगुणनिमित्तोभ्रमोयस्यासा।।२८।। परतःपराविदर्दमस्यपरिपोषपोषणंयस्यप्रतिधर्मलोकरूपमात्मनिरस्तसंभवात्स्वतः।
तःजेरवघूतन्नेपिबभौरेवकुसुमतारविघ्नकमेपालितो।।३१।। निर्वाणंनिसमुल्लहेवीरविदुरउपेयुषीप्राप्तं।।२०।। हेसौम्यतस्यास्तत्रसंस्कारीरं
संसरित्सारत।। द्रव्यंफलं।। योगेःविधूतानाविलिनामर्त्यौरैहिकंभाभतुमस्यस्याः।।२२।। ११८

भा·टी· कपिलोपयाथित्युक्तं न देवहूत्यैव पत्यपि कपिलोपीति त्रिभिः समनुज्ञाप्य अनुज्ञां संप्रार्थ्य ३३ इतस्मर्हणमर्ह्यनिकेतनं चपसि ३४ उपशांतश्च संमाहितश्चास्ते
११८ ३५ प्रकरणार्थमुपसंहरति एतदिति तवतपा ३६ एतच्छ्रवणकीर्तनफलमाह यइति सुपर्णकेतो गरुडध्वजे उपलभ्यते प्राप्नोति ३७ इति श्रीभाग

कपिलोऽपि महायोगी भगवान् पितुराश्रमात् मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ३३ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानः
समुद्रेणदत्तार्हणनिकेतनः ३४ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानामुपशांत्यै समाहितः ३५ ए
तन्निगदितं तात यत्पृष्टोहं तवानघ कपिलस्य च संवादो देवहूत्याश्च पावनः ३६ य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्म
योगगुह्यं भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ३७ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये त्र
यस्त्रिंशत्तमोऽध्यायः ३३ समाप्तस्तृतीयस्कंधः संख्या ४५०० संवत् ॥ ॥ छ ॥ ॥ ॥

वते भावार्थदीपिकायां श्रीधरस्वामिविरचितायां तृतीयस्कंधे त्रयस्त्रिंशोऽध्यायः ३३ ॥ छ छ ॥ श्री छ ॥ श्री ॥ राम०
११८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णाय नमः ।। द्वितीयेतुस्कशाखापैं श्रीमद्भागवतमादितः उद्देशलक्षणोक्तिश्च संक्षेपेणोपवर्ण्यते ॥ १ ॥ तत्रतुप्रथमेध्याये कीर्तनश्रवणादिभिः ।। स्थविष्ठे भगवद्रूपे मनसो धा
रणोच्यते ।। पञ्चमकीर्तनंदानतपोयोगादिसत्फलं नंनिसपरमानंदं हरिं नरनमस्मर २ अथद्वितीयस्कंधव्याख्यो उक्तः पूर्वमुपोद्घातः समंसगः शुकागः राज्ञो प्रष्टं नसां
त्रुपमथाह शुकस्तन्मुनिः ।। ७ ।। राज्ञः प्रश्नमभिनं दतिवरीयानिति ।। नेवं यपृसांश्रोतव्यादिषुमध्ये परः श्रेष्ठं गोचरः प्रश्नः कृतः एषवरीयान् यतो लोकहितमेतत्

ॐनमोभगवतेश्रीवासुदेवाय श्रीशुकउवाच वरीयानेषतेप्रश्नः कृतोलोकहितंनृप आत्मवित्संमतः पुंसांश्रोतव्यादिषुयःपरः १ श्रो
तव्यादीनिराजेंद्रनृणांसंतिसहस्रशः अपश्यतामात्मतत्वंगृहेषुगृहमेधिनां २ निद्रयाह्रियतेनक्तंव्यवाये न चावावयः दिवा
चार्थेहयाराजन्कुटुंबभरणेनवा ॥ ३ ॥

मोक्षहेतुत्वात् ।। आत्मविदांमुक्तानांच संमतोयतः १ तत्रतावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन् बुद्धिमद्यविपर्यमित्याशयस्योत्तरमाह ।। श्रोत
व्यादीनीति त्रिभिः ।। गृहेषु सक्तानां अत एव गृहमेधिनां नकृतपंचसूनापहाराणामेव निर्हिंसार्थः २ तेश्चायुष्यैवापुर्व्ययोभवतीत्याह ।। नक्तं रात्रौ आ
युषः आयुः तन्निद्रया व्यवायेन रत्या वाक्षिप्यते । दिवा क्षिप्यद्वयः तद् अर्थेहया अर्थार्थमुद्यमेन सिद्धे अर्थे कुटुंबपोषणेन वा चकारो वा तृक्त समुच्च
यार्थौ ।। ३ ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु स्वकुटुंबाद्यर्थं प्रयत्नमाकुर्वन्कथं कुर्यात तत्राह। देहादिषु आत्मनः सैन्येषु परिकरेष्वसत्सु मिथ्याभूतेष्वपि प्रमत्तः॥ प्रसक्तः॥ तेषां पित्रादि दृष्टांतेन नाशं पश्य
न्नपि नानुसंधत्ते॥ ४॥ एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादि प्रश्नस्योत्तरमाह तस्मादिति हे भारत हे भरत सर्वस्य सर्वात्मेति निस्त्रैगुण्यत्वमाह भगवानिति। सौं
दर्यं ईश्वर इत्यावश्यकत्वं हरिरिति बंधहारित्वं। अभयं मोक्षमिच्छता॥ ५॥ अतः परमन्यछ्रेयो नास्तीत्याह। एतावानेव जन्मनो लाभः फलं तमाह नारायण
प ४ णस्मृतिरिति सांख्यादिभिः साध्यं तु तिते षां साक्षात् अंतकाले स्मृत्वेवार्पयति। सांख्यमात्मनात्मविवेकः योगोऽष्टांगः॥ अंते तु स्मृतिः परो लाभः न तत्र हि

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ४ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः श्रो
तव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयं ५ एतावान्सांख्ययोगाभ्यां स्वधर्म्मपरिनिष्ठया जन्मलाभः परः पुंसामंते नाराय
णस्मृतिः ६ प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ७ इदं भागवतं नाम
पुराणं ब्रह्मसंमितं अधीतवान् द्वापरादौ पितुर्द्वैपायनादहं ८ परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया गृहीतचेता
राजर्षे आख्यानं यदधीतवान् ९ ॥

ला १ मात्रं कुशकारोऽल्पः ६ तत्र सदाचारं प्रमाणयति प्रायेणेति विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म प्रसिद्धं ७॥ किमिदम रमंते ७
पूर्वकथ्यपसि। सत्यं॥ अतः पूर्वमेवेदमित्याह॥ इदं भागवतमोक्तं। तन्नामैक प्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यं यद्वा ब्रह्मसाम्यकृ नि
तयेनकुतत्त्वपांस मत आह॥ अधीतवानिति॥ ८॥ सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिः तत्राह परिनिष्ठितोऽपीति गृहीतचेताः आकृष्टचित्तः ९
श्री

भीटि

महापुरुषो विष्णुः तदीयः यत्र यस्मिन् श्रद्धां कुर्वतां सती अहैतुकी ९ साधकानां सिद्धानां च नातः परमन्यत् श्रेयोस्तीत्याह एतदिति निरस्ततां कमिनां तत्तत्फलसा

२ ध्य २ धनमेतदेव निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव योगिनां सिद्धानां फलं चैतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः ११ अल्पमेवायुरवशिष्टं कि

मुहं साधयेयमिति मा भून्चिरत्याह किमिति विविधैः परोक्षैरज्ञातैर्हायनैर्वर्षैः विदितं वृथा यातीति तावत् यत्नोपेन ज्ञातेन घटेत फलं कुर्मोनिकं १२ ए

ख्यातो हि देवयज्ञे स्थित्वा दैत्यान् जघ्नतः ततः प्रसन्नैर्देवैर्वरं वरयस्वेत्युक्ते कोयं तस्मिल्लोके प्रथमं तावन्ममायुः कथ्यतामिति तैर्देवैरुक्तं तत्र मुहूर्तं

तदहं तेभिधास्यामि महापौरुषिको भवान् यत्र श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती १० एतन्निर्विद्यमानानामिच्छतामकुतोभयं योगिनां नृ
प निर्णीतं हरेर्नामानुकीर्त्तनं ११ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह वरं मुहूर्त्तं विदितं घटते श्रेयसे यतः १२ खट्वांगो नाम राज
र्षिर्ज्ञात्वेयत्तामिहायुषः मुहूर्त्तात्सर्वमुत्सृज्य गतवानभयं हरिं १३ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः उपकल्पय तत्सर्वं
तावद्यत्सांपरायिकं १४ अंतकाले तु पुरुष आगते गतसाध्वसः छिंद्यादसंगशस्त्रेण स्पृहां देहेनु ये च तं १५

मात्रमस्तीति ततो झटिति स्वविमानेन भुवमागत्य हरिं शरणं गत इत्यर्थः तद्युक्तं भूमी रजोधिका कर्मभूमिः पृथ्वी १३ तव तु एतर्हि इदानीमपि तावदवशिष्टे राम

तावता कालेन सांपरायिकं पारलौकिकं साधनं संपादय ॥ तत्र वैराग्यं तावदाहांतकाल इति गतसाध्वसः मृत्युभयशून्यः असंगो नाम अनास्था २

क्तिः तेन शस्त्रेण स्पृहां सुखेच्छां तं देहमनु ये पुत्रकलत्रादयः तेषु पि स्पृहां छिंद्यात् १५

न २ सन्न: ११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं च ग्रहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनः प्रव्रास किं संभवात् तत्र प्रत्यांगयोगमाह धीर इति प्रस्त्वर्याद्यिमोपलक्षणं उपतीर्थे इति त्यागात् इति यमोपलक्षणं आसनमाह शुचावि इति विविक्त एकांते विधिवत्कुशाजिनचेलैः क्रमेणानिर्मिते १६ जपप्राणायामप्रत्याहारमाह अभ्यसेदिति त्रिभिरकारादिभिर्वर्णितं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् आवर्तयेत् मनसा इति प्रत्याहारः कुंभकं प्राणायामेन मनो नियमनमाह मनोयच्छेत् वशीकुर्यात् ब्रह्मबीजं प्रणवमविस्मरन्

निग्रहीयात ४ त्रैवं जितश्वासः सन् वश्यासनः सन् १ प्रत्याहारमाह नियच्छेत् अक्षान् इंद्रियाणि विषयेभ्यः सात्विकाबुद्धिः सारथिर्यस्य सः धारणामाह पुनः कर्मभिः

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ विविक्त आसीनो विधिवत्कल्पितासने १६ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया १८ तत्रैकावयवं ध्यायेद् अव्युच्छिन्नेन चेतसा मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् १९ पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलं २०

स्थि १ सनाभिराक्षिप्तं शुभार्थे भगवद्रूपे १८ ध्यानमाह तत्रैकैकमेकपादाद्यवयवं अव्युच्छिन्नेन समग्ररूपानुसंधानयुक्तेन आत्मप्रविशेषैः सामान्यतश्चिंतनं धारणा अवयवविशेषभावनं तद्ध्यानमिति भेदः समाधिमाह निर्विषयं मनो युक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वा स्थि १ ...र्थः १९ प्रसीदति उपशाम्यति गुणावसीलतु न रपिस्तो चे सति धारणामेव स्थिरीकुर्यादित्याह रजस्तमोभ्यामाक्षिप्तं तमसा विमूढं सीर्यमनोनिर्धार्यमो तत्कृतं रजस्तमोभ्यां कृतं २०

१२

भा दि॰
३

यतः यस्यां क्रियमाणायां भद्रं सुखात्मकं आश्रयं विषयं पश्यतः तत्रैव प्रीतिर्भवति २१ यथा पथाप्रकारः यादृशीति चेति कर्त्तव्यता विशेषयुक्तं तद्विशेषणानां प्रश्नः २२ यथे
त्यस्योत्तरं। जितासन इति विषयमाह स्थूल इति सार्द्धेन २३ विशेषो विराड्देहः अतिस्थूलानामपि स्थूलतरः सत्कार्यमात्रं २४ असत्त्वोपलक्षणा स
त्त्वेन विषयत्वं वस्तुतस्तु विराड्जीवनियंता भगवानेव विषय इत्याह अंडकोश इति नवभिः निकटाह एव पृथिव्यावरणं ततः अप्तेजोवाय्वाकाशाहंकारमह त्वा॰

यतः संधार्यमाणायां योगिनो भक्तिलक्षणः आशु संपद्यते योग आश्रयं भद्रमीक्षतः २१ श्रीराजोवाच यथा संधार्यते ब्रह्मन्धार
णा यत्र संमता यादृशी वा हरेदाशु पुरुषस्य मनोमलं २२ श्रीशुक उवाच जितासनो जितश्वासो जितसंगो [illegible] जितेंद्रियः
स्थूले भगवतो रूपे मनः संधारयेद्धिया २३ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां यत्रेदं दृश्यते विश्वं भूतं भव्य ४
भवच्च सत् २४ अंडकोशे शरीरेस्मिन् सप्तावरणसंयुते वैराजः पुरुषो योसौ भगवान्धारणाश्रयः २५ पातालमेतस्य हि राम
पादमूलं पठंति पार्ष्णिप्रपदे रसातलं महातलं विश्वसृजो। पगुल्फौ तलातलं वै पुरुषस्य जंघे २६ द्वे जानुनी सुतलं विश्वमूर्त्ते ३
तलानीति सप्त २५ विराड्देहजीवतदंतर्यामिणामभेदेन मा ॥ गैरूरुद्वयं वितलं चातलं च महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो
रोपयोपासनं कर्त्तव्यमित्याशयेनाह पातालमिति पादमूलं पादस्याधोभागं पातालादीनां तदवयवत्वा विधीयते। पातालांतानि अधस्तनानि सप्त भू
मिविवराणि पठंति गृणंति इत्यादि प्रमाणप्रदर्शनं पार्ष्णिप्रपदे पादस्य पश्चादग्रभागौ २६ ऊरुद्वयं तस्य अधोभागे वितलं उत्तरभागे अतल
मिति द्वयं नाभिरेव सरः २७

दीन्यतलं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योतिरनीकं ज्योतिश्चक्रं स्वर्गं महर्लोकं ग्रीवे जनः ज्योतिषां तत्र लोकं रराटीं ललाटं सत्यं सत्यलोकं २८ उस्रा देवा ते मम शरीरत्वात् ते बाहव उस्रा आहुः दिशः कर्ण,
दादिश्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रं तस्याधिष्ठानं शब्दस्तत् श्रोत्रविषयः सनस्य श्रोत्रेन्द्रियं नासिकादि च पिण्डमध्यस्थौ अश्विनौ नासे नासापुटे इद्धो दीप्तः २९
द्यौरन्तरिक्षं अक्षिणी नेत्रगोलके चक्षुरिन्द्रियं पतङ्गः सूर्यः अहनी रात्र्यहनी परमेष्ठि धिष्ण्यं ब्रह्मपदं तालु आधिष्ठानं जिह्वेन्द्रियं ३० छन्दांसि वेदाः शि

उरः स्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य॥ तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः २८ इन्द्रादयो बाहव आ
हुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः २९ द्यौरक्षिणी चक्षुरभूत्पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च॥ तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ३० छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला
द्विजानि हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ३१ व्रीडोत्तरौष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः कस्तस्य मेढ्रं
वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ३२ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र अनन्तवीर्य श्वसितं मा
बध
तरिश्वा गतिर्वयः कर्म गुणप्रवाहः ३३

कलाः पुत्रादि स्नेहः २ रोषस्तं दंष्ट्रोऽहं क्लेशाः द्विजानि दन्ताः यद् दुरन्तमार्गं दुरन्तं अपारः सर्गः निपातः सतस्य कटाक्षः ३१ अधर्ममार्गोऽस्य पृष्ठं मार्गः कः प्रजापतिः मित्रो मित्रावरुणौ ३२
अनन्तवीर्य इत्यसौ संबोधनं कर्मत्वस्य गमनं गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ३३

भा॰ दि॰ ४

भूम्नः विभोः अव्यक्तं प्रधानं तत्प्रसिद्धं चंद्रमाः तदीयं मनः सर्वेषां विकाराणां कोशरूपं स्थानभूतं ३४ विज्ञानशक्तिं चित्तं महिमहत्त्वं अंतःकरणं अहंकारं गिरित्रं श्रीरुद्रं आ
दयो वा पामुत्पत्ना अश्वतरी ३५ वयांसि पक्षिणः तस्य व्याकरणं नामरूपेण व्याकरणानि मध्यमानि कंशिल्पिन पुराणं च वा मनुः येन मनुः कृता हस्ताः मुकाश्च हरितो कृतोः
मपूराः चित्रिता येन समये यत्किं विधास्यतीति मनुः स्वायंभुवः मनीषा बुद्धिः मनुजः पुरुषः निवासः आश्रयः पुरुषे श्रेया विस्तरा मात्मेति स्पष्टेनैः गंधर्वादीनां द्वंद्वे कर्मप
गंधर्वादयः स्वरस्मृतीः षड्जादिस्वरस्मृतयः रतार्थः असुरानीकं वीर्यं यस्य सः स्वरः स्मृतिरसुरानीकवीर्य इति पाठे गंधर्वादयः स्वरः आसुरसमूहश्चेष्टः मकारादः स्म

शस्पकेशान्विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य भूम्नः अव्यक्तमाहुर्हृदयं मनश्च सचंद्रमाः सर्वविकारकोशः ३४ विज्ञानशक्तिं महिमा
मनंति सर्वात्मनोंतःकरणं गिरित्रं अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ३५ वयांसि तद्व्याकरणं विचित्रं म
नुर्मनीषा मनुजो निवासः गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ३६ ब्रह्माननं क्षत्रभुजो महात्मा विडूरुरंघ्रि
श्रितकृष्णवर्णः नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ३७ राम ४

निस्तस्येति ३६ ब्रह्मा विप्रास्तस्याननं मुखं क्षत्रियो भुजायस्य विट् वैश्यः ऊरुरस्य अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधानानामानि येषां तेच ते अग्निष्टोमादयो देवास्तेषां ग
णैर्वसुरुद्रादिभिरुपपन्नो युक्तः द्रव्यात्मको हविः साध्यवितानयोगः यज्ञप्रयोगः तस्य कर्म कार्यं आवश्यकोभिप्रेत इत्यर्थः ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भे २

इयान् एव तावान् संनिवेशः अवयवसंस्थानं अस्मिन् स्ववुध्या मनः संधार्यते मुमुक्षुभिर्यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् ३८ नरेद्वं चित्तस्थैर्यार्थं विराट्देहमी
श्वराणां मर्त्यैर्नोपासनमुक्तं तत्र तु देहमीवातीश्वरैरपि विज्ञाप्यत एव ध्येय इति निर्धारयति स एति सर्वधी वृत्त्यनुभूतसर्वस्वेन स एक एव सर्वात्मा रमात्मनेस
वुसत्यं न जेत अन्यत्रोपलक्ष्यतोनैवसज्जेत यतः आत्मनः पानः संसारो भवति एकस्य तत्र दिदृक्षैः सर्वानभूतौ दृष्टान्तः स्वप्रजना नामौ स्थिता यथैतिस्व प्रेहिक्रमा
त्रिनवहून्देहान्प्रकल्प्य जीव स्तत्र दिदृक्षैः सर्वं पश्यति तद्वत् ईश्वरस्य तु विद्याशक्तिज्ञानेर्बंधः ३९ द्वितीये प्रथमः द्वितीये तु ततः स्थूलधारणातो जितं

रेयानस्यावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया तं संधार्यते स्मिन्नपुषि स्थविष्ठे मनः स्ववुध्या नयतोस्ति किंचित् ३८ स सर्वधीवृत्त्यनु
भूतसर्वआत्मा यथा स्वप्नजनेक्षितैकः तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ३९ इति श्री भागवते महापु
राणे द्वितीयस्कंधे महापुरुषसंस्थानवर्णने प्रथमोध्यायः ॥ श्रीशुक उ० एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् तया
ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राक्व्यवसायवुद्धिः ॥ १ ॥

मनः सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमिती र्यते १ इत्थालंबनरूपैव ~~स्के~~ सैव मुक्ताविराजधारणाविहोच्यते नु तत्स्याध्यासर्वातस्यामिधारणाशक्तं चतावत्पूर्वो
क्तधारणाया अवांतरफलमाह एवंविधारणात्यानुष्टानादेः पुराप्रलयसमयेन ष्टांस्मृतिं स्मृतिमत्यवरुध्य लब्ध्वा अप्ययात्प्राग्यदं विश्वं यथा सर्वतेन
यास ससर्ज व्यवसायात्मिका वुद्धिर्यस्य स एवामोघा दृष्टिर्यस्येति अतस्तया धारणया ~~भक्तस्य~~ अविश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥

स: घा व्या २

पार्थैः १

भा॰ द्वि ५ उपासनाफलादपि विरक्तस्य मुमुक्षोर्धारणायामधिकारः अतो वैराग्यार्थं सर्वं कर्मफलं निंदति। शाब्दं शब्दमयं ब्रह्म वेदः तस्य एष पंथाः। कर्मफलबोधनप्रकारः कोसौ अर्थैः स्व-
र्गादिनामभिः साधकस्य धीर्ध्यायति तत्तदिच्छां करोतीति यत्। अपार्थैः तुच्छैः मायामये स्वप्नवत् सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिभ्रमन्
अर्थान् न विंदति न तत्र सुखं लभते इत्यर्थः १ तर्हि सर्वथा कर्मफलत्यागे सद्यस्तद्देहपातः स्यादित्याशंक्याह अतः कविर्नाममात्रे
सुखोपेषु यावतार्थेन अर्थः। देहनिर्वाहो यस्तत्प्रभूतः स्यात् अप्रमत्तः तावन्मात्रेपि नासक्तः व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान् दृष्टापितत्तस्मि न४

शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः परिभ्रमंस्तत्र न विंदतेर्थान् मायामये वासनया शयानः १ अतः कविर्नामसु या-
वदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः सिद्धेन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः २ सत्यां क्षितौ किं कशिपोः प्रयासैर्बा-
हौ स्वसिद्धे ह्युपबर्हणैः किं सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ३ चीराणि किं पथि न संति दिशंति भिक्षां
नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन् रुद्धा गुहाः किमजितोवति नोपसन्नान् कस्माद्भजंति कवयो धनदुर्मदांधान् ४ राम ५

न्नर्थे अन्यथैव सिद्धे सति तत्र यत्ने परिश्रमं पश्यन्न यतेत २ अन्यथा सिद्धिमाह द्वाभ्यां सत्यामिति कशिपोः शय्यायाः प्रयासैः सिद्धे बाहौ सति उपबर्हणैः उपधा-
नैः पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण ३ ननु दिक्कूलस्य वा वोनाम परस्पामेव वल्कलमस्तु तौ पुंवासस्यान्नं च याच्या प्राप्स्यंते न ताकर्यं प्राप्स्येत तत्रा-
ह चीराणि वस्त्रखंडानि। परान्बिभ्रति पुष्णंति फलादिभिर्ये गुहाः गिरिदर्यः ननु कदाचित् परिरक्षाप्रत्यभे किं कार्यं तत्राह अजितो हरिः उपसन्नान् शरणा-
गतान् किं न अवति न रक्षति किं शब्दस्य पूर्वत्रापि संबंधः धनेन यो दुर्मदस्तेन अंधान्॥ ५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा तेन किं कर्त्तव्यं हरिरेव सेव्य इत्याह एवं विरक्तः सन्तं भजेत् भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः यतः आत्मा अत एव प्रियः प्रियस्य च सेवा सुखरूपैव अर्थः सत्यः नन्तुना
त्मवन्मिथ्या भगवान् भजनीयगुणो ऽस्य अनंतश्च नित्यः एवंभूतं तं भजेत निवृतार्थः निश्चलस्वरूपः तदनुभवानंदेन निर्वृतः सन् निवृत्तिः स्वतः सुखात्मकत्वं दर्शितं किं च यन्नपमि
ज न्भजने सति संसारहेतोरविद्यायाः उपरमो नाशो भवति ६ एतदेवाह अविचिंतानिंदया हृदयानिक इति तां तथाभूतां परस्य हरेरनुचिंतां धारणामनादृत्य पशून् ऋते कर्म्मज्ञानवि
ना य पापशुरेवं स देवानामिति श्रुतेः असतीं विषयचिंतां को नाम कुर्यात् तया चिंतया वैतरण्यां पतितं तत्र च स्वकर्मजान् आध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन्नपि वे

लि२

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ६ कस्तां त्वना
दृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात् पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापान् जुषाणं ॥ ७ ॥ केचित्स्व
देहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ८ प्रसन्नवक्त्रं नलिनाय
तेक्षणं कदंबकिंजल्कपिशंगवाससं लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं ॥ ९ ॥

ठु२

तरणीं यमद्वारस्थां नदीं तत्तुल्यत्वात् संसृतिं वैतरणीं ७ तामेव धारणां सविशेषणामाह केचिदिति द्वाभ्यां स्वदेहस्यांतर्मध्ये यत् हृदयं तत्र योऽवकाशस्तस्मिन् वसंतं प्रादेशमात्रं अंगुष्ठ
योर्विस्तारः स एव मात्रं प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्यते कंजं पद्मं रथांगं चक्रं ८ नलिने इवांतःप्रसन्ने आयते दीर्घे ईक्षणे यस्य कदंबकुसुमस्य किंजल्काः केसराः तद्वत् पिशंगे
पीते वाससी यस्य लसंति महारत्नानि येषु तानि हिरण्मयान्यंगदानि यस्य स्फुरंति च तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य ॥ ९ ॥

प२ ठल२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उन्निद्रं विकसितं यत् हृत्पंकजं तस्य कर्णिकैकैव आलयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य श्रीरेव लक्ष्म चिह्नं तद्युक्तं वा मातृविहितो मत्वार्थीयो नप्रत्ययः ॥
कौस्तुभरत्नकंधरायां यस्य अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं व्याप्तं १० स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आनने यो हासः तेन पेशलं सुंदरं ११ रा॰२
अदीनं उदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन् उल्लसन् संतोषेण भ्रूभंगः तेन सूचितोपात्तेः संसूचितो भूरिरनुग्रहो येन ~ चिंतामयमपि चिंतामयं चिंतया आविर्भावितं १२ अस्य

ध

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं
१० विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं
ला॰ ११ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते १२ ए
कैकशोंगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः जितंजितं स्थानमपोह्य धारयेत्परंपरं शुध्यति धीर्यथा यथा १३ या
वन्नजायेत परावरेस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत १४ ॥

ग॥

वृध्यतीति तस्मिन्नमाहैव ंगकैकश इति॥ अनुभावयेत् ध्यायेत् प्रहसितं अपयत्नतः स्फुरितं पादे गुल्फादिस्थानं अवयवं तत्र हृद्योह्य त्यक्त्वा परं परं धारणा चादि धारयेत् शुध्यतीति तस्मि
न्निश्चलं भवति १३ एवं क्रमेण धारणापाण्ड्युरणां गत्वमाहृ पावदिति परे ब्रह्मादयोऽवरे यस्मात् कुतः विश्वेश्वरे द्रष्टरि न तु द्रष्टव्ये चैतन्यघनत्वात् भक्तियोगः प्रेमलक्ष राम॰
णः ॥ क्रियावसाने आवश्यककर्मानुष्ठानानंतरं ॥ अनेनकर्मादिभिर्भक्तियोगपर्यंतमेवेत्युक्तं १४ ॥ २८ ॥ ४४ ॥ ७७ ॥ श्री ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजन्

एवंतावदासन्नमृत्योः पुंसांकृत्यमुक्तं इदानींतस्यैववस्तुयदेहत्यागप्रकारंपृच्छतःकृत्यमाहस्थिरमितिसार्द्धैस्त्रिभिः अंगहेराजन् एवंभूतोयतिर्यदाइमंलोकंदेहंजिहासुःत्यक्तुमिच्छतितदा
देशेपुण्यदेशेचकालेचतत्त्वज्ञानप्राप्तियोग्येमनोनसज्जयेत संगंनप्रापयेत नदेशकालौयोगिनःसिद्धिहेतुकिंतर्हियोगएवेतिहृदिनिश्चयोभूत्वासुस्थिरंसुखकरंचासनमास्थितःप्राणां
नियच्छेदित्यन्वयः १५ एवंबुद्धिंदत्तेक्षेत्रज्ञोबुद्ध्यादिद्रष्टरिनिनयेत्प्रविलापयेत् तंचक्षेत्रज्ञंआत्मनिशुद्धे तंचशुद्धमात्मानंआत्मनिवाहंइति आत्मनिशुद्धेब्रह्मणिअवरुध्यएकी

स्थिरंसुखंचासनमास्थितोयतिर्यदाजिहासुरिमम‍ंगलोकं कालेचदेशेचमनोनसज्जयेत्प्राणान्नियच्छेन्मनसाजितासुः =
१५ मनःस्वबुद्ध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि आत्मानमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्या २
त् १६ नयत्रकालोऽनिमिषांपरःप्रभुःकुतोनुदेवाजगतांयईशिरे नयत्रसत्त्वंनरजस्तमश्चनवैविकारोनमहान्प्रधा ८

कृत्यलब्धोपशांतिःप्राप्तनिर्वृतिःसन्कृत्याद्विरमेत् ततःपरंप्राप्याभावात् १६ तदेवाह नयत्रेति यत्रात्मास्वरूपेकालोनप्रभुःकिमपिकर्तुंनसमर्थः अतएवदेवाःनप्रभवंतीत्या
ह अनिमिषादेवानांपरःप्रभुःकालोपियत्रनप्रभुःतत्रकुतोनुदेवाःप्रभवेयुः देवान्नियम्यानांतज्जगतांप्राणिनांकावार्तेत्याहजगतामिति कुतोनुप्रभवंतीत्ययेत्रीणिनिरुपाधित्वा
दित्याहनयत्रेति यद्वाजगत्कारणान्यपिनयस्यस्वरूपादौप्रभवंतीत्याहनयत्रेति विकारोअहंकारः १७ ॥ या २

भा॰ द्वि॰ निरुपाधित्वं कुतः इत्यत आह परमिति। यद्यस्मात् अतत् आत्मव्यतिरिक्तं नेति नेतीत्येवमुत्सिसृक्षवः त्यक्तुमिच्छवो दौरात्म्यं देहाद्यात्मतां विसृज्य अर्हस्य पूज्यस्य श्रीविष्णोः पदं पदे पदे
७ हृदोपगुह्य हृदा उपगुह्य आश्लिष्य अनन्यस्मिन् सौहृदं येषां ते भजन्ते तत् पदं वैष्णवं प्राहुः अत एव परमं सर्वतः श्रेष्ठम् आमनन्तीत्यन्वयः॥१८॥ एवं स्थानादि जित्वा ब्रह्मत्वे नयवास्य
टि॰ १ तो मुनिरुपरमेत् देहं त्यजेत् व्यवस्थितः पाप्मनिर्वृत्तः विज्ञानदृग्वीर्येण सुरन्धितः तमाहुः विज्ञानेति विज्ञानं दृग्वीर्यं तेन नानाहृत्तोऽन्तरं स्थित्वा वीर्यबलं तेन सुरन्धिताः वि
हिंसिताः आशयाः विषयवासना यस्य सः इदानीं तस्य देहत्यागप्रकारमाह स्वपार्ष्णिनापीड्य गुदं मूलाधारं आपीड्य अनिलं प्राणं उन्नमयेत् ऊर्ध्वं नयेत्

पदं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे १८ इत्थं
श्लो मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः। स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः १९ ना
भ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः। ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत २० तस्माद्भ्रुवोरंतरमु रु॰ ७
न्नयेत निरुद्धसप्तायतनोऽनपेक्षः। स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः २१ ॥श्री॥ ॥ ॥ ॥ ॥ ॥

तत्क्रमो येनाह षट्सु स्थानेषु नाभ्यादिषु १९ नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य उरसि कंठदेशे विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्य
चक्रस्याग्रदेशं ततो ब्रह्मरंध्रं गमनं तस्य भवाहुः नयेदित्युक्तं २० तस्माद्भ्रुवोरंतरं आज्ञाचक्रं निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन सः अनपेक्षः राम:
भोगेष्वपि निरपेक्षः ततः मुहूर्तार्धं स्थित्वा अकुंठदृष्टिः ब्रह्मरंध्रं निर्भिद्य देहमिंद्रियाणि च विसृजेत २१ ॥ ॥ ४ ४ ४ ७ ७ ७७ ७ ७ ७ ७ ७ ७ ७
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु १ सद्योमुक्तिमुक्त्वा क्रममुक्तिप्रकारमाह यदीति दशभिः यदि नृप पारमेष्ठ्यं प्रयास्यन् भवति वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं कीदृशं अष्टाधिपत्यानि अणि-
माद्यैश्वर्याणि यस्मिन् तदपि प्रयास्यन् गुणानां सन्निवायो गुणसमुदायरूपो येन लिंगदेहः सर्वत्रान्वयः तर्हि देहत्यागावसरे मन इंद्रियाणि च न त्यजेत् किंतु तैः सहैव तत्तल्लोकभो-
गाय गच्छेत् २२ यतः कर्मगतिर्यत्र योगगतिः परिशिष्टेत्याह योगेश्वराणां त्रिलोक्या अंतर्बहिश्चेह लोकादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः अंतर्बहिस्तु पवनस्यांतः

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च २२
योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां न कर्मभिस्तां गतिमाप्नुवंति विद्यातपोयोगसमाधि-
भाजां २३ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं
नृप शैशुमारं २४ ॥

आत्मा लिंगशरीरं येषामिति विद्योपासना तपो भगवद्धर्मः योगोऽष्टांगः समाधिर्ज्ञानं तानि ये भजंति तेषां या गतिस्तां २३ तामाह वैश्वानरमित्यष्टभिः विहायसा आकाशेन तत्र ब-
ब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केन पथा येन सुषुम्णया नाड्या सा च देहाद्बहिः प्रवितता नाडी तया हि शोचिषा ज्योतिर्मय्या विधूतः त्यक्तः
कल्को मललेपो येन सः ह्यस्य सज्ज्ञामात्र इत्यर्थः तत्रापि उदस्तात् उपरिष्टाद्वर्तमानं हरेः संबंधितारकरूपेण नारायणाधिष्ठितमित्यर्थः शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणशिशुमाराकृतिं
ज्योतिश्चक्रं चक्रस्थानि आदित्यादिज्योतींषि पराणि प्रयातीत्यर्थः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
८

देक १

तद्विष्णोश्चक्रं विश्वस्य नाभिं सर्पाद्याश्रयभूतं आविशच्छिंगत्वा तत्रापि शाहस्यनषेंद्धत्वं अतिवर्त्य अतिक्रम्य परतः स्वर्गांशान्तरभागं एव निर्मलेन लिंगशरीरेणावशिष्टेन सविदां
स्थानं अनेनैव नमस्कृतं महर्लोकमुपैति। यद्यस्मिन्विबुधा मता कल्पायुषो भृग्वादयः २५ अथो अनन्तरं कल्पान्ते सर्वविश्वं त्रैलोक्यं अतिशयेन दंदह्यमानं निरीक्ष्य तत्राप्य-
प्रांशतेः यत्तु द्विपरार्द्धं स्थायि तत्पारमेष्ठ्यं पदं प्रतिनिर्याति सिद्धेश्वरैर्युष्टानि धिष्ण्यानि विमानानि यस्मिन्नु तत् उ इति प्रसिद्धं सत्यसंवितं २६ तदेवाह न यत्रेति। आर्तिः दुःखं न उद्वे-

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते
२५ अथो अनन्तस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वरयुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पा-
रमेष्ठ्यं २६ न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् यच्चित्ततोऽदः कृपयानिदंविदां दुरन्तदुःखप्र-
भवानुदर्शनात् २७

गो भयं किं तु चित्ततो हेतोर्यत्तु दुःखं अदः अतोऽनन्तदेकं विना तत्कुतो भवति आनिदंविदां इदं भगवतो ध्यानमजानतां प्राणिनां दुरन्तदुःखोपः प्रभवो जन्म तस्यानुदर्शनात् तेषां कृपया
यद्वा चित्तेन तो हो मनःपीडेति यत्तु हि विनाकृतस्य इदपि यत्र शोकादयो न संतीति तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः ये पुण्योत्कर्षेण गताः ते कल्पान्तरे पुण्यतारतम्येनाधिका-
भवंति ये तु हिरण्यगर्भोपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यन्ते ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्माण्डं भित्वा वैष्णवं पदं आरोहंति २७ ॥ ॥ ॥ ॥ ॥

रामः
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र प्रकृतेस्तस्य भगवन्मूर्त्तस्य ब्रह्माण्डभेदेन प्रकारमाह ततः इत्यादिना तत्त्वे पञ्चक्रियायां अधिष्ठितायाः प्रकृतेः केन चिदंशेन महत्तत्त्वं भवति तस्यांशेनाहंकारः तस्यांशेन शब्दत
न्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः तस्यांशेन रूपतन्मात्रद्वारा तेजः तस्यांशेन रसतन्मात्रद्वारा आपः तदंशेन गंधतन्मात्रद्वारा पृथ्वी तैः मिलितैः चतुर्दशभुवना
त्मकं विराट्शरीरं तस्य च पंचाशत्कोटियोजनविशालस्य पृथिव्यां तु कदाचिद् विशेषशब्दवाच्या कोटियोजनविशाले सप्तसमावरणं पंचाशत्कोटियोजनविशालमित्येके। तत
श्चावाहीनोर्ध्वपरिमाणता अग्रभागः तान्येवोत्तरोत्तरं दशगुणान्यावरणानि अष्टमं तु प्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते। ततो विशेषं प्र

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्त्तिरत्वरन् ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गं २८ घ्राणेन गंधं
रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी २९ ॥ ॥ ॥ ॥

तिपद्य लिङ्गदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः एवमुत्तरत्रापि द्रष्टव्यं निर्भय इति कथं पास्यामीति शंकाशून्यः तेनात्मनापः पृथिव्युपाधिकेनात्मना तन्निरंतरा अपः प्रतिपद्य अत्वरन् त्वराम कुर्वन्
तत्तदात्मत्वेन तत्र तत्र हसादिशंकाभावाद्यथेष्टं भोगान्भुंजान इत्यर्थः एवं ज्योतिर्मयः सन् काले भोगावसाने वायुं उपेत्य आत्मनो लिंगं परमात्मनः अभिव्यक्तिस्थानत्वेनोपाधिभूतं बृहदाकाशमात्म
मूर्त्तिना तत्प्रमापकमिति २८ इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह घ्राणेनाधिष्ठितेन गन्धमुपैत्युपेत्य श्वसनं नभोगुणत्वं शब्दात्मतां प्राणेन तत्तत्कर्मेन्द्रियेण आकू
तिं तत्क्रियां २९

CC-0. In Public Domain.Kayikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
९

तदेवं स्थूलसमष्ट्यमतातिक्रम्य सूक्ष्मातदावरणाभ्यानाहंकारप्राप्य महदादिप्राप्तिमाह स योगीति विकार्यं संसाध्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्योऽहंकारः स त्रिविधः ता
मसो राजसः सात्विक इति तत्र तामसाहंकारात्सूक्ष्माणि जायंते राजसाद्बहिर्मुखानींद्रियाणि सात्विकान्मन इंद्रियदेवाश्च तेषां लयप्रवर्तकत्वेनाहंकारे तत्र भूतसूक्ष्माणामिं
द्रियाणां च संनिकर्षलयस्थानेन तामसं राजसं च मनोमयं देवमयं च सात्विकं प्राप्य गत्या एवं नामनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति ततः गुणानां संनिरो
धो लयो यस्मिन् तत्प्रधानं याति ३० तेनात्मना प्रधानरूपेणानंदमयः सन्नुपाधीनामवसाने शांतमविकृतमानंदं परमात्मानमुपैति ॥ न विषज्जते नावर्तते इत्यर्थः ३१ ए

स भूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं संसाध्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं ३० तेनात्म
नात्मानमुपैति शांतमानंदमानंदमयोऽवसाने एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग ३१ एते सृती ते नृप वे
दगीते त्वयाभिपृष्टे च सनातने च ये वै पुरा ब्रह्मण आह तुष्ट आराधितो भगवान्वासुदेवः ३२ ॥ ॥ ॥ ॥ ॥ ॥

तामार्गौ प्रकारावित्यर्थः हे नृप अत्र पक्षो निर्भिद्य महं त्विमुक्तेऽसंगतः इति या सद्योमुक्तिः सैका सृतिः यदि संप्रयास्यन्नित्यादिना क्रममुक्तिः सा द्वितीया सृतिः एते सृती वेदेन गीते केनोक्ते न तस्योत्क्रांति
तत्र यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः तेऽर्चिषमभिसंभवंतीत्यादिना क्रममुक्तिश्च वेदेनोक्ता अहानकममभिलांगति माम्नुवंतीति
द्विविधमार्गस्यापि सविस्तरवादे ते सृती इति द्विवचनं त्वयाभिपृष्टे च कृतत्वमित्यादिप्रश्नेनार्थान्मुक्तिविषये द्वे अपि सृती पृष्टे ॥ श्रुति द्वाविपर्ययमिति द्विसंसारमार्गोऽपि पृष्टः न तु एवं वेदेव याव
ये पृष्टे ते एते सृती इत्यन्वयः ३२ श्रीगणेशाय नमः ॥

राम
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतिसंसरतः पुंसोबहवोमोक्षमार्गास्तत्पोयोगादयः समीचीनस्त्वयमेवेत्याहनहीति। यतोनुष्ठिताद्भक्तियोगोभवेत् अतोन्यः शिवः सुखरूपोनिर्विघ्नश्चनास्त्येव ३३ कृत्
एतदत्रश्रुतुमाह भगवान्ब्रह्मकूटस्थः निर्विकारः एकाग्रचित्तः सन्त्रित्वर्थः त्रिविधान्वीक्षा कार्त्स्न्येन साकल्येन ब्रह्मवेदं अन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत् तदेवमनी
षयाध्यवस्यत् निश्चितवान् ३४ ननु नभक्तेर्ग्रतिर्भवति अन्तर्भक्तेरभगवति कथं रतिः स्यात्तत्राह भगवान् लक्षितः द्रष्टा कथं स्वात्मनाहं द्रष्टात्वयामिति याके

नह्यतोन्यः शिवः पंथा विशतः संसृताविह वासुदेवे भगवति भक्तियोगोयतोभवेत् ३३ भगवान्ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनी
षया तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणै
रनुमापकैः ३५ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ पिबंति ये भगवत आ
त्मनः सतां कथामृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं ३७ इति श्रीभागवते ता
टी द्वितीयोध्यायः ॥ २

दृश्यैर्बुद्ध्यादिभिः तदेवद्वेधा दर्शयति दृश्यत्वाजडानां दर्शनं स्वप्रकाशं द्रष्टारं विनानघटत इत्यर्थापत्तिमुखेन लक्षितः स्वप्रकाशांतर्यामिलक्षणैः तथा बुद्ध्यादीनि करणानि प्रयोक्त्र
निकरणत्वाद्वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्तृत्वेन पीश्वरसिद्धिः ३५ यस्मात्तत्वमित्यादिविप्रश्नोत्तरमुपसंहरतितस्मादिति ३६ श्रवणादिफल
माहपिबन्त्येनाहपिबंतीति सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतं विषयैर्विदूषितं मलिनीकृतं आशयं पुनंति शोधयंति तस्य चरणयोरंतिकं आविष्टप

॥ २ ॥ द्वि २८

३ कामफलप्राप्त्यर्थमन्येषां देवानां भजनमाह॥ ब्रह्मेति॥ ७

भा॰ द्वि॰ नतो पि विस्मृमनो लोके वैशिष्ट्यं प्रयावतो मुनेः भक्तत्वे केवलं तत्कामं प्रवणाद रड्वैर्यते। इदानीमन्यदेवताभजनस्यापि पुत्रादिभजनवदेव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वो

१० क्तमनुवदति एवमिति। मम मति मां कदाचित देवयोगेन मनुष्यत्वं प्राप्तेषु ज्ञानीष्वेषु ये मनीषिणस्तेषां तत्रापि ये म्रियमाणाः तेषां विशेषतः एवमेतद्धरिकथा श्रवणादि

कं निगदितं विहितमित्यर्थः १ ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं इंद्रियपाटवकामस्त्विंद्रं प्रजापतीन् ॥ दक्षादीन् १ मायां दुर्गां विभावसुं अग्निं वसुकामः धनार्थी

श्री कृ० च एवमेतन्निगदितं पृष्टवान्यद्भवान्मम नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां १ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मण

स्पतिं इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् २ देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं वसुकामो वसून् रुद्रान्वीर्यकामो

थवीर्यवान् ३ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् विश्वान् देवान् राज्यकामः साध्यान्संसाधको विशां ४ आयुःकामो

श्विनौ देवौ पुष्टिकाम इलां यजेत प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ५ रूपाभिकामो गंधर्वान् स्त्रीकामोप्सर उर्वशीं आधिपत्य

कामः सर्वेषां यजेत परमेष्ठिनं ६ ॥

वीर्यं प्रभावः तत्कामो वीर्यवान् सन् रुद्रान्यजेत ३ अन्नाद्यं भोज्यमन्नं च अदितेः सुतान् द्वादशादित्यान् विशां देशस्थप्रजानां स्वाधीनतामिच्छन्साध्यान्यजेत राम:

४ इलां पृथ्वीं प्रतिष्ठास्थानादप्रच्युतिः रोदसी द्यावाभूमी ५ अप्सरसः स्त्रियस्ता उर्वशी च ता ६ ॥ ॥ ॥ ॥ ॥ ॥ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञं यज्ञोपाधिविशिष्टं कोशो धनसंचयः वसुकामः स्यात् धनमात्रमिति भेदः दांपत्यं दम्पत्योः प्रीतिः तदेवार्थो यस्य सः ७ धर्मार्थः धर्मकामः उत्तमश्लोकं कोपाधिविशिष्टं तं
तुं तन्वन् संतानं वृद्धिमिच्छन् रक्षा बाधानिवृत्तिः तत्कामः पुण्यजनान् यक्षान् ओजो बलं तत्कामः मरुद्गणान् देवान् ८ राज्यं राज्यत्वं तत्कामो मनून् देवान् मन्वंतराधिपा
लान्नृपतेः कर्मराज्यं तत्कामो विश्वान् देवानिति विशेषः अभिचारान् शत्रुमारणमिच्छन् निर्ऋतिं राक्षसं कामकामः भोगेच्छुः अकामः वैराग्यकामः पुरुषं परं

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ७ धर्मार्थ उत्तमश्लोकं तंतुं तन्वन्पितॄन्यजे
त रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ८ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् कामकामो यजेत्सोममकामः
पुरुषं परं ९ अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परं १० एतावानेव यजतामिह निःश्रेय
सोदयः भगवत्यचलो भावो यद्भागवतसंगतः ११ ॥

प्रकृतिव्यतिरेकोपाधिमीश्वरं ९ अकामः एकांतभक्तः उक्तान्युक्तसर्वकामो वा पुरुषं पूर्णं निरुपाधिं १० पूर्वोक्तनानादेवतायजनस्यापि सद्योगप्रयुक्तत्वेन भ
क्तियोगफलत्वमाह एतावानिति इंद्रादीनामपि यजतां इह तत्तद्यजने भागवतानां संगतो भगवति यो भावो भक्तिर्भवति तावानेव निःश्रेयसस्य परमपुरुषा
र्थस्योदयः लाभः अन्यत्तु सर्वं तद्विमर्षः ११ ॥

अच१

भा॰ द्वि॰ भागवतसंगतः रत्पनेन नस्त्र वित्तं हरिकथारतिं स्तौति ज्ञानमिति यत्र यासु कथासु ज्ञानं भवति कीदृशं आ सर्वतः प्रतिनिरुद्धं ॰ गुणोर्मीणां रागादीनां चक्रं समूहो यस्मा
११ त् तत उत अनंतरं तेष्वेव रागात्म प्रसादश्च यत्र यासु मनःप्रसादहेतुः गुणेषु विषयेष्वसंगो वैराग्यं च अथ यत्रेति पाठे इहामुत्र गुणेष्वसंगः कैवल्यमित्येवं सम्मताः पंथानो यो
भक्तियोगः निर्वृतः श्रवणसुखेन अन्यत्रातिहृष्ट इति वा तासु हरिकथासु कोरतिं न कुर्यात् १२ अभिव्याहृतं उक्तं ऋषिं परब्रह्मदर्शिनं कविं शब्दब्रह्मणि स्नातं १३

ज्ञानं यदा प्रतिनिरुद्धगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न
कुर्यात् १२ शौनक उवाच इत्यभिव्याहृतं राजा निशम्य भरतर्षभः किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविं १३ एतच्छुश्रूषतां विद्व
न् सूत नोऽर्हसि भाषितुं कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै भागवतो राजा पांडवेयो महारथः बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आद क्रीडन्कृष्ण ३
दे १५ वैयासकिश्च भगवान् वासुदेवपरायणः उरुगायगुणोदाराः सतां स्युर्हि समागमे १६ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ तस्यर्ते य चस्तंचयन्न२
त्क्षणो नीत उत्तमश्लोकवार्तया १७ ॥

श्रवणेच्छायां हेतुः हरिकथा एव उदर्कः उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि समाजेषु स्युः १४ एतत्प्रपंचयति स वा इति द्वाभ्यां कृष्णपूजादिरूपां क्रीडां यः
स्वीकृतवान् १५ उरुगायस्य गुणैः उदाराः महान्तः स्युः १६ किंच इत्थमेव कालोपमानं मा आयुः हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः आयुरिति असौ सूर्य उद्यन्
उद्यंग उद्गच्छन् अस्तं च अदर्शनं च यन् यत्पदेन क्षणो नीतः तस्मात् आयुः ऋते वर्ज्जयित्वा हरत्येव हरति १७ ॥ एमः ११

गध्न्१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वजीवत्सेमे वतेषामापुषःफलमजितत्राहतस्वइजितनुतेषांस्वामोनास्ति॥ तर्हिमब्राह्मर्मकोशाः ननतामामाशादिकंनाजितत्राह्ननाबादंतिनास्त्रीतिनमेवंति
रेतःसेकंमेपुनंन्कुर्वतिकिं उतश्रविनाकोरपश्चुमत्वात्त्रप्ररइति १८ तदेवाहस्मादिभिःसक्तः सहशोनि फपितःपसकुर्वापथ्यंकदाविदपिनागतःसःश्रेवक्ता
स्वादत्वाहतस्वभिःकपमनविषयासक्तनाद्विहुरेर्मामस्मकरैः॥ केरकवतुःखदविषयासक्तनात्रशुःभारवाहितात्रवरेणापइत्पर्थः १९ तस्मांगानिचनिःफ

तरवःकिंनजीवंतिमस्त्राःकिंनश्वसंत्युत नखादंतिमेहंतिकिंग्रामपशवोऽपरे २० श्वविड्वराहोष्ट्रखरैःसंस्तुतःपुरुषःपशुः न
यत्कर्णपथोपेतोजातुनामगदाग्रजः १९ बिलेबतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्य जिह्वासतीदार्दुरिकेवसूतनचो
पगायत्युरुगायगाथाः २० भारःपरंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदं शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौ
वा २१ बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ २२ जी
वञ्छवोभागवतांघ्रिरेणुंनजातुमर्त्योऽभिलभेतयस्तु श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसञ्छवोयस्तुनवेदगंधं २३ ॥

ठानीसात्वबिले इतिपंचभिःबतेतिखेदेनश्रुण्वतःश्रृण्वतोनरस्यपेकर्णपुटेतेबिलेइत्यारंध्रेनबेहुवाग्यपतितस्यजिह्वा असतीदुष्टा दर्दुरीभेकस्त्रदीयाजिह्वेव २० प
ट्टबद्धोष्णीषेणकिरीटेनचजुष्टमपिशिरोयदिननमेत्तर्हिकेवलंभारएव शावौमतकःतत्करौसतीलसंती कांचनककंणोपयौतौ अप्पर्थेवाशब्दः २१ येनपश्यतौविष्णोर्ह
मैत्रौननिरीक्षेतेतौतेवर्हायितेमयूरपिच्छनेत्रतुल्योद्रुमवज्जन्मभाजौइतितयावृत्तम् लेनस्यादित्यर्थः २२ नाभिलभेतग्रभितोनस्पृशेतनधारयेत। श्रीविष्णु वि
ययाःश्रीविष्णुपदलग्नायानवेत्तिश्रवंघ्रावंझापनोमिनदेदित्यर्थः २३

CC-0. In Public Domain.Kayikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
११

अश्मवत्सारो बलं कादिर्यस्यार्विक पालनन्तामाह अथेति तामाह हेतुरोमहर्षः न भ्रमः एव यस्मात् भक्तस्य सर्वमेतत् धर्मं मनसोनुकूलं च प्रियं ब्रुवे अथ अतः साधुप
टः सन् वैयासकिः नृपतिं प्रति प्रत्याह तत् अभिधेहीति १५ द्विः पञ्चतीयः ते यं परिष्ठिता एवं संस्मारितहरिविष्टिते शुकेन ब्रह्मतं सुत्रसं वादेनोपबृंहयते १ इत्यतः अश्मक
पिंतं तस्य आकृतं नीत्यिति माह च त्रिभिः वैयासकेः शुकस्य इति एवं मतः आत्मनः तत्त्वस्य निश्चयो यस्मात् तद्वचः नृपधार्यं आकलय्य सतीं हे समयं वसिष्ठ इत्यन्यहत्ये

तद् अश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः २४ अथाभिधेह्यङ्ग मनो
नुकूलं प्रभाषसे भागवतप्रधानः यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः २५ ६ आ ग ते हा ग द्वि प धे
ताये प स्कन्ध च वैयासकेरितिवचत्वनिश्चयमात्मनः नृपधार्यमतिं हृस्मेत्रौ त्रेप सतीं व्यधात् १ आत्मजायाः सती
गारवः सुप्रविगावेषु पुरामेच्या विकलेनित्यनिहृयं मतोज्झो २ यत्पृष्ठोच्यमानवार्थं यन्मां पृच्छ यसन्नमाः कस्मानुभाव अवपे
श्रद्धानो महामनाः ३ संस्थां वैत्तस्य संन्यस्य कर्म त्रैवर्गिकं च यत् वासुदेवे भगवति आत्मभावं दृढं गतः ४ राजोवाच समीचीनं
वचो ब्रह्मन् सर्वज्ञस्य तवानघ तमो विशीर्यते मह्यं हरेः कथयतः कथां ५ भूय एव विवित्सामि भगवानात्ममायया यथेदं सृजते विश्वं
दुर्विभाव्यमधीश्वरैः ६
वंभूतां १ आत्मादिरूपशाखोगजादयः २ इममेवार्थं हरिलीलामृतां ३ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं संन्यस्य त्यक्त्वा आत्मभावं परमप्रेमाभाव दात्मलग्नं
तः प्राप्तः सन् पृच्छ ४ मह्यं मम तमोऽज्ञानं न श्यति तत् व कथयतः सतः अतः समाचीनं ५ पुनरपि वेदितुमिच्छामि इदं दुर्विभाव्यं अवितर्क्यं विश्वं यथा सृजति ६ राम॰
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपाय्यति पाळयति संपद्यते संहरते पुरुशक्तिः बहुशक्तिमान् आक्रीडमानः क्रीडन् यथा करोति आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकरोति विविधं करोति ७ ८ एकः पु
रुषरूपेण गुणान् जन्मभिः ब्रह्माद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ९ विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि वेदे निष्णातः परस्मिंश्च अनुभवेन १० उपा

यथा गोपायति विश्वं यथा संपद्यते पुनः यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ७
नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ८ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोपि वा बिभ
र्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ९ विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् ख
लु १० सू उ च इत्युपामंत्रितो राज्ञा गुणानुकथने हरिः हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ११ श्रीशुक उ नमः परस्मै पुरुषाय भूय
से सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने १२ ॥ राम ॥ ४४ ॥ श्री ॥ ७२ ॥

मंत्रितः पृष्टः प्रचक्रमे दिवतायुक्तनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ११ तदेवाह त्रयोदशभिः परस्मै सर्वोत्तमाय तत्र हेतुः भूयसे अपरिमितमहिम्ने आह हर्शयति सतः प्रपंचस्य
उद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदि शक्तित्रितयं येन तस्मै अंतर्भवाय अंतर्यामिणे अत एव सर्वांतरत्वादनुपलक्ष्यवर्त्मने तस्य १२ ॥ श्री

CC-0. In Public Domain.Kayikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टि॰ १३ विविक्तफलदातृत्वमेव सम्यगनुगुणमति भूफद्भुत नमः सततां धर्मवर्तिनां हृजिनच्छिदे दुःखहंत्रे असतां अधर्मशीलानां असंमदाय अनभ्रुहेतवे अखिलसत्वमूर्तये केवलं दे
वादिरूपेणानन्तफलदायेत्यर्थः समग्रसत्वमूर्तये इति वा पुनरपि पूर्वोक्तो भयवैतत्त्वापेमाह पारमहंस्ये प्रकृतिनिष्ठारूपे आश्रमे अवस्थितानां पुंसां अनुरूपाय आत्मत
त्वेन न पुनः पुनः भगवदात्मतत्वलस्यदाशुपेदात्रे १३ सात्वतां भक्तानां ऋषभाय पालकाय कुयोगिनां भक्तिहीनानां विहृतकाष्ठादिशाय यस्मात्तेभ्यो यत्स्वयं तद्वेवे

नमो नमः सह्वृजिनच्छिदेऽसतामसंभवायाखिलसत्वमूर्तये पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे १३ न
श्री मो नमस्ते स्व ऋषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः १४ यत्कीर्तनं
यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः १५ विचक्षणा यच्चरणोप
सादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः १६ ॥ ॥ ॥ १७ ॥

न्यप्रतीतावपिनिर्देषत्वाय गुणवैशिष्ट्यं मात्। निरस्तं साम्यं अतिशयश्च यस्य पदे यया अनन्यसाम्यातिशयश्च नास्तितेन राधसा ऐश्वर्येणात्मधामनि स्वस्वरूपे ब्रह्म
वि रममाणाय १४ सर्वसाधनेभ्यो भक्तेः श्रेष्ठत्वं अनुस्मरन्नुपगमतिभिः मत्कीर्तनमिति द्वाभ्यां ॥ अर्हणं पूजनं सुभद्रं मंगलं श्रवः कीर्तिर्यस्य तस्मै १५ विचक्षणाः विवेकिनः राम॰
ना यच्चरणोपसादनात् उपसेवनात् अन्तरात्मनो मनसः उभयत इह च परत्र च सङ्गं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः १६ ॥ ॥ ॥ ॥ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिं विनान्यानां सर्वसाधनवैफल्यं दर्शयन्नमति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिन्नर्पणं श्राचर्यतां विना क्षेमद्र श्रवस इति सुष्ठु भद्रा कीर्तिर्यशः श्रवणादेः प्रा
धान्यज्ञापनाय १७ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपास्ते यदपाश्रयाः भागवताः तदाश्रयाः सन्तः शुध्यन्ति । अत्र संभाव
नाशंकां परिहरति प्रभविष्णवे प्रभवनशीलायेति १८ सर्वोपास्यत्वमनुस्मरन्प्रार्थयते स एष आत्मवतां धीराणामात्मा आत्मत्वेनोपास्य इत्यर्थः त्रयीमयत्वादि

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षेमं न विंदंति विना यदर्प्पणं तस्मै सुभद्रश्रवसे नमो नमः १७ किरातहूणां
ध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः १८ स एष आत्मात्मवतां
मधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १९ श्रियः पतिर्यज्ञपतिः प्रजापतिर्धि
यां पतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः २० यदंघ्र्यभिध्यानसमाधिधौतया धियान
पश्यंति हि तत्त्वमात्मनः वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां २१ ॥

विशेषणैः तत्तन्मार्गैरुपास्यत्वं विवक्षितं गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यं अतएवमपि धीवृत्तिरूपं लिंगं मूर्त्तिर्यस्य स प्रसीदतु १९ सर्वपालकत्वमनुस्मरन्नाह श्रियः इति गतिश्च
सर्वापत्सु रक्षकः २० ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्र्योरभिध्यानं ध्यानमेव समाधिस्तेन धौतया शोधितया धिया यथारुचं स्वस्वानुसारेण सगुणनिर्गुणादिभेदैः प्रकाशयन्ति मायया
मतीत्यर्थः २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰ किंच पुराकल्पादौ अस्य हृदि संतीं स्मृतिं विषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता ताः खिलकृतानि निशि ब्राह्मीनि अस्य स्वाम्यं ऋषीणां
१४ स्तान प्रदानां ऋषभः श्रेष्ठः ११ इदानीं स्ववाचं श्रोतृजनान् हृदि नीरंगा रक्षका प्रादुर्भिशो भांप्रार्थयते मत्तैरिति सः मे वचांसि अलंकृषीष्ट अलंकरोतु अस्य स्ववचसाम
तस्यां॰ स्विनाउं कालसंभवमार्षं कुर्वते यांमिता माविष्करोतिस्मे महद्विभूतिरिमाः पुरः पारगा त्रिसत्यू अस्य पृष्ठतपामितया शेते वसति अत्र पुच्छ समाध्योपमानायतिः पद्य

प२

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणाम् ऋषभः प्रसीदतां २२ भूतैर्मह
द्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः भुंक्ते गुणान् षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे २३ नमस्तस्मै भगव
ते वासुदेवाय वेधसे पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवं २४ एतदेवात्मभू राजन्नारदाय विपृच्छते वेदगर्भोऽभ्यधात्साक्षाद्यदा
ह हरिरात्मनः २५ इ श्री भा ते हा सो ता स्कं च पो पः ॥ ॥ ४ ४ ४ ४ ४

स्मात्पुरुष इति अत एव यः एकादशेंद्रियपंचभूतात्मकपानुषोडशत्वानुकलाः भुंक्ते प्रकाशयति पालयतीति वा तदात्मत्वेनैव परमार्थं अत्र हेतुः फलं षोडशानां मात्मा चेत् पितास्वा
र्थकः नत्वत्र जीवत्वमुच्यते परार्थं नाविरोधात् २३ आद्यो संनमस्करोति सौम्या भक्ताः यस्य मुखांबुरुहे आसवो मकरंदः तं २४ इदानीं प्रश्नस्योत्तरतया ब्रह्मनारदसंवादे प्रस्तौ ताप॰
ति एतदिति आत्मनि समन्वय एव वेदगर्भ यत्समाह यदाह हरिर्यदाह २५ इ श्री भा ते हा रा द्वि पे च र्थः ० ० २ ७७ ४४ आताप ४४ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वं नि

पंचमे नारदेनाथ पृष्टः सृष्ट्यादिवर्णनं हरेर्लीलां विराट्सृष्टिं कालकर्मादिशक्तिभिः १ नारदस्याविपृछते वैयासकेर्यथादित्युक्तं तत्र नारदप्रश्नमाह देवेति हे भूत भावन अग्रज
व सर्वेषां पूर्वजे अनादेः ज्ञायतेऽनेनेति ज्ञानं तत्साधनं यत्तत्त्वं द्विजानीहि विशेषेण ज्ञापय यत्तत्त्वं कथंभूतं आत्मतत्त्वं दृश्यते येन तत्तथा ॥ एतदुपलक्षणमात्मतत्त्वविशेषमेवात्मज्ञानसाधनं अ
तस्तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्यते । यदधिष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन्नु लीयते । यत्परं यदधीनं यच्चेति यदात्मकं स्वतः स्वाकार ज्ञातो वेत्यै
र्थः तत्त्वं तत्त्वं यथा पाथोयं तत्त्वतो वद २ न जानामीति न वक्तव्यमित्याह सर्वमिति भूतं जातं भव्यं जनिष्यमाणं भवत् जायमानं तेषां प्रभुर्यतः अतः विशिष्टेन ज्ञानेनावसितं

श्रीनारद उवाच । देवदेव नमस्तेऽस्तु भूतभावन पूर्वज तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो
यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः २ सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं तव ३ यद्विज्ञानो यदा
धारो यत्परस्त्वं यदात्मकः एकः सृजसि भूतानि भूतैरेवात्ममायया ४ आत्मन् भावयसे तानि न पराभावयन्स्वयं आत्मशक्तिमवष्टभ्यो
र्णनाभिरिवाक्लमः ५ ॥

निश्चितं ३ आत्मानमित्थं आदौ तावत्त्वामेव कथयेत्याह यतो विज्ञानं यस्य कस्त्वं विज्ञानदृश्यर्थं यदाधारः कस्त्वाश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः मम तु
त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिः तत्र कारणमाह नत्वपरांशे कथं पृच्छामीत्याह सोऽहं भवतोऽपि एकः आत्मसहायः ४ आत्मनि भावयसे पालयसि त्वयमेव पराभवमप्रा
यवान् अक्लमः श्रमरहितः यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य जालं तनुते ॥५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं म

तस्मादहं तु अस्मिन्नविद्धवास्मिनु परमुत्तमं अपरमर्थं संमंध्यमं च तच्चापि नाममनुष्यादिरूपं द्विपदत्वादिगुणाः शुक्लत्वादि तैर्भाव्यं साध्यं तत्रापि सदसत् स्थूलं सूक्ष्मं च
किंचिदप्यमतो न वेद किं तु त्वमेव सर्वं भवतीति मन्ये । ही सत्यपि विधोपि भवान्तरपोऽचरादि जिपत् । तेनतो स्मानु विस्यसे मोहयसि । यतः परां शंकां ईश्वरांतरां शंकां प्रपृच्छसि
७ यथैवाहं त्वया अनुशासितः शिक्षितः सन् बुध्ये तथा विशेषणाविज्ञाप्य ॥ प्रश्नमभिनंदति । हे वत्स सुव्रत वेदे विचिकित्सितं संदेहं तत्स्वर्वकः प्रश्नो यं सम्यगित्यर्थः यतः

व्यं

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ६ स भवानचरद्घोरं यत्तपः सुसमाहितः तेन खेद
यसे नस्त्वं पराशंकां प्रपृच्छसि ७ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर विजानीहि यथैवेदमहं बुध्येऽनुशासितः ८ ब्रह्मोवाच ॥ स
क म्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ९ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो अवि
ज्ञाय परं मत्त एतावत्त्वं यतो हि मे १० ॥

सं२

कारुणिकस्य तवायं प्रश्नः अत्र हेतुः यतः परमधर्मं भगवद्वीर्यप्रकाशने प्रवर्तितोस्मि । अतस्त्वं जिज्ञासुरपि मयि पितृमपि मामेव कृतवानित्यर्थः ९ नन्वनृतमेवं भगवानि सुक्तं त्व
या एकः सृजसि भूतानी त्यादिना ॥ सत्यं यथा मामीश्वरत्वेन प्रमाणं सिद्धवितथमाषणं नानृतं मत्तः परं कारणात् एतावत प्रभावस्य भावः एतावत्त्वं मे अन्यत् किं तु मत्तः पर
मीश्वरमविज्ञाय बुद्धे अतः स्याद्वयाप्तं वेषं भ्रांतिः नन्वबुद्धिपूर्वमनृतमित्यर्थः यतः ईश्वरात्मनः एतावत्त्वं तमविज्ञायेति वाक्यः १० ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि कोसावीश्वरं तत्स्वरूपे द्वाभ्यां मन्त्राभ्यां नमस्कुर्वन्नेव तत्कथयति त्रिभिः येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयाम्यहं स्पष्टमभिव्यक्तं करोमि यथार्कोदयः एवं तं स्वप्रकाशस्य मे
व प्रकाशयन्ति तथा च श्रुतिः न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति ११ तस्मै नमो धीमहि
यस्य मायया मोहिताः सन्तो दुष्प्रदाख्यया मां जगद्गुरुं जगत्कर्तारं वदन्ति तस्मै १२ यन्माययेति मायायाः सम्बन्धोऽस्य स्यादुक्तं यत्तोक्ते च तस्या विकिमस्ति संसारः नैवेत्याह ॥ म
त्कृतमसौ न जानातीति यस्य हृषिपथे स्थातुं विलज्जमानया एवं तस्मिन् तत्कार्यं कुर्वत्या अमुया मायया विमोहिता अस्मदादयो दुर्बुद्धयः अविद्याकृतज्ञाना एवं केवलं विक

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं यथार्कोऽग्निर्यथा सोमो यथार्क्षग्रहतारकाः ११ तस्मै नमो भगवते वासुदेवाय धीमहि यन्मा
यया दुर्जयया मां ब्रुवंति जगद्गुरुं १२ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया विमोहिता विकत्थंते ममाहमिति दुर्धियः १३ द्रव्यं क
र्म च कालश्च स्वभावो जीव एव च वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वतः १४ ॥ ।

स्यंते ह्यास्यंते अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति १३ तदेवं ब्रह्मणस्त्वत्तः परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादिना प्रश्नानां स एवाधिष्ठानादिकं सर्वमित्युत्तरं
वक्तुं तद्व्यतिरेकेणान्यस्याभावमाह द्रव्यमिति द्रव्यं महाभूतानि उपादानरूपाणि कर्म जन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवो भोक्ता वासुदे
वात्परोऽन्योऽर्थो नास्ति कारणव्यतिरेकात्कार्यस्य १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वार   धत्रं

तत्र प्रपंचयति द्वाभ्यां नारायणपरा इति नारायणः परो येषां ते अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तं देवास्तदंगजाताः अतो न तद्व्यतिरिक्ताः लोकाः स्व
र्गादयस्तत्प्रदानेनांशाः मखास्तत्साधनभूताः १५ योगः प्राणायामादिः तपः स्वधर्मो ध्यानं विवेकाख्यं ज्ञानं तत्साध्या गतिस्तत्फलं अनेनैव सर्वं तदधीनमित्युक्तं १६ तर्हि त्वं किं क
रोषीत्यपेक्षायामाह तस्यापि सृज्यमपि तेन सृष्टोहं सृजामि ईक्षयाकटाक्षेणैव नात्र हेतवः द्रष्टुरित्यादयः १७ ननु कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स चेश्वरः स्यादि
त्यपेक्षायां जीवेश्वरविभागहेतुमाह त्रिभिः सत्त्वमिति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नंतीत्युत्तरेणान्वयः कथंभूताः तेनैव स्वातंत्र्येण गृहीताः स्थित्याद्यर्थं मायया गृहीताः

नारायणपरा वेदा देवा नारायणांगजाः नारायणपरा लोका नारायणपरा मखाः १५ नारायणपरो योगो नारायणपरं तपः नारायणप
रं ज्ञानं नारायणपरा गतिः १६ तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः १७ स
त्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभोः १८ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्र
याः बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः १९ स एष भगवान् लिंगैस्त्रिभिरेभिरधोक्षजः स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः २०

१८ बध्नंति सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नंतीत्यर्थः कार्यमधिभूतं कारणमध्यात्मं कर्त्राधिदैवतं तेषां भावस्तत्त्वं तस्मिन् ३ द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रि
याः इंद्रियाणि तदाश्रयाः तेषां कारणभूताः तत्तदभिमानेन बध्नंति १९ अतः स एष भगवानेभिर्गुणैर्लिंगैः जीवानामावरकैरुपाधिभिः हे ब्रह्मन्नलक्षितागतिस्तत्त्वं यस्य
सः स्वभक्तैरेव लक्षितागतिर्यस्येति वा २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य सृष्टिप्रकारमाह कालमिति कर्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छन् २१ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपान्तरापत्तिः पुरुषः ईश्वरस्तेनाधिष्ठितत्वं त्रया
णां विशेषणं महतः महत्तत्त्वस्य २२ विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वं अहंकारस्य तामसत्वात् तमःप्रधा
नत्वं अत एवाहंकारकार्यभूतानां समाकाशादिकं बहुतरं सात्त्विकं वाल्पं एवं तदुपाधिकेषु जीवेष्वपि तथैव नामसाधिकं २३ स च विकुर्वन् रूपान्तरं गच्छन् त्रैविध्यमे
वाह वैकारिकः ॥ सात्त्विकः तैजसो राजसः यद्भिदा यस्य भेदाः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्यं महाभूतास्तेषु शक्तिर्यस्य क्रियासु इंद्रियेषु शक्तिर्यस्य

स्वया

कालं कर्म स्वभावं च मायेशो मायया आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे २१ कालाद्गुणव्यतिकरः परिणामः स्वभावतः कर्मणो जन्म
महतः पुरुषाधिष्ठितादभूत् २२ महतस्तु विकुर्वाणात् रजःसत्त्वोपबृंहितात् तमःप्रधानस्त्वभवत् द्रव्यज्ञानक्रियात्मकः २३ सोऽहंकार
इति प्रोक्तो विकुर्वन् समभूत्त्रिधा वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो २४ तामसा
दपि भूतादेर्विकुर्वाणादभून्नभः तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः ॥२५॥ ॥ ॥ ॥ ॥ ॥

ज्ञानेषु देवेषु शक्तिर्यस्य हे प्रभो बोद्धुं शक्त २४ भूतादेरिति तामसस्य विशेषणं नन्वेतामसाद्गुणौ नैन्वयं शब्दो भवतीति शंकित्वं सत्यं सत्तु तस्य नभसो मात्रा सूक्ष्मं रूपं गुणाश्च असाधा
रणः व्यावर्त्तको धर्मः शब्दः शब्दस्य नभस्त्वघटस्पर्शः एव नैस्य स्पर्शादिष्वपि दृष्टत्वं शब्दस्य लक्षणं लिंगमिति कुत आघातेति तेनैन केनचिद्दृष्टो ज्ञातो गज इत्युक्ते यो गजो दृष्टः स एवानेन दृष्टो
गजः तयोर्लिंगबोधकं लिंगविशेषणात्वात् । यद्द्रष्टृदृश्ययोः त्वं २५ ॥

५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰ २१

७म

परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः तस्यैव लक्षणं प्राणो देहधारणं ओजः सहो बलानि इंद्रियमनःशरीराणां पाटवानीति धांहेतवरित्यर्थः २६ स्वतो रूपवत्तेजः वायुन
भसोः कारणभूतयोरन्वयात्स्पर्शशब्दवच्च एवं पंचभसः पृथिव्याश्च परान्वयाधिक्यात् गुणाधिक्यं २७ घोषः शब्दः २८ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यं २९
मनःशब्दे नैव तदधिष्ठाता चंद्रोपि द्रष्टव्यः अन्ये च दश देवा वैकारिकाः सात्विकाहंकारकार्याः तानाह दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पंच श्रोत्रत्वक्चक्षुर्जि

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः परान्वयाच्छब्दवांश्च प्राणं ओजः सहो बलं २६ वायोरपि विकुर्वाणात् कालकर्मस्वभावतः
उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् २७ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् २८
विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः २९ वैकारिकान्मनो जज्ञे देवा वैकारिका दश दिग्वा
तार्कप्रचेतोऽश्विवह्नींद्रोपेंद्रमित्रकाः ३० तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ
श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ३१ ॥ ४४

ह्वाघ्राणानामधिष्ठातारः वह्निश्च इंद्रश्च उपेंद्रश्च मित्रश्च कश्च प्रजापतिः एते पंच वाक्पाणिपादपायूपस्थानां अधिष्ठातारः ३० यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहं
कारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः तान्याह श्रोत्रमिति दोः पाणिः मेढ्रः उपस्थः क्रमस्त्वत्र न विवक्षितः ३१ ॥४॥ ४४ ६६ श्री रामः १०

एवंकारणसृष्टिमुक्त्वा कार्यसृष्टिमाह यदा एतेऽसंहताः अमिलिताः आसन् अतएव यदा आयतनस्य शरीरस्य निर्माणे न शेकुः ३२ तदा सत्त्वप्रधानगुणभावं उपादाय
स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ३३ कालकर्मस्वभावानधिष्ठाय स्थितः जीवस्तत्त्वेभ्यो जीवः परमात्मा अजीवमचेतनं अजीवयत् चेतयति स्म ३४ निर्भिद्य
कृत्वा स्थित इत्यर्थः ३५ तदवयवैर्लोकरचनामाह यस्येति कटिरिति ऊरुजङ्घयोः पश्चाद्भागः जघनं पुरोभागः अधः सप्तलोकान् अतलादीन् ऊर्ध्वं भूरादीन् सप्त

यदैतेऽसंहता भावा भूतेंद्रियमनोगुणाः यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ३२ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः सदस-
त्त्वमुपादाय चोभयं ससृजुर्ह्यदः ३३ वर्षपूगसहस्रांते तदंडमुदके शयं कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ३४ स एव पुरुषस्तस्मा-
दंडं निर्भिद्य निर्गतः सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ३५ यस्येहावयवैर्लोकान् कल्पयंति मनीषिणः कट्यादिभिरधः सप्त सप्त-
ोर्ध्वं जघनादिभिः ३६ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ३७ भूर्लोकः कल्पितः पद्भ्यां
भुवर्लोकोऽस्य नाभितः हृदा स्वर्लोक उरसा महर्लोको महात्मनः ३८ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् मूर्द्धभिः सत्यलोकस्तु
ब्रह्मलोकः सनातनः ३९

त्रि ३६ वर्णानां तत्तदुत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्मणाः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तं बाहव इति च क्षत्रं क्षत्रियः ३७ इदानीमुपासनार्थं लोककल्पना-
भेदानाह पर्यवसाने लोकपद्ममात्र पद्भ्यामारभ्य कट्यां पातालमारभ्य पद्भ्यां कटिपर्यंतात्पा ३८ स्तनद्वयादिति उपासनार्थं कल्पनाद्‌र्ध्वाधोभावोऽपि विपरीतं न दोषः पद्मालनत्व-
हं कुर्वत्यदोषुद्वयं तस्मादित्यर्थः ब्रह्मलोको वैकुंठाख्यः सनातनः नित्यः न तु सृष्टप्रपंचांतर्वर्तीत्यर्थः ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰
१८

इदानीं चतुर्दशलोकात्मकं दर्शयति तत्र जघनादिभिर्मह आदय ऊर्ध्वलोकाः एवं सप्तकं पादादिभिरधः सप्तलोकानाह तत इति द्वाभ्यां शुद्धं हरिभक्तानिवासत्वात् ४० त्रिलोकप
क्षे माहभूर्लोकः पातालादिसहितः ४२ द्वितीये च षष्ठे विराड्विभूतिरत्र योगाध्यात्मादिभेदतः ह्युच्यते च पर्वोक्तं सर्वपुरुषसूक्ततः इदानीं वैराजस्य विभूतीः सप्रपंचु
मनुवर्णयति वाचामिति वाचां वह्नेश्च मुखं क्षेत्रं अधिष्ठानमित्यर्थः तस्य सप्तधातवः छंदसां गायत्र्यादीनां सप्तानां तस्य सप्तधातवः त्वगादयः स्थानं हव्यं देवानाम

ततः कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ४० महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं
पादतलतः इति लोकमयः पुमान् ४१ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ४२
इति श्रीभाग॰ महापु॰ द्वितीयस्कंधे पंचमोऽध्यायः ब्रह्मोवाच वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्तधातवः हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च
१ सर्वासूनां च वायोश्च तन्नासे परमायने अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः २ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी क
र्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनं ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न्नं कव्यं पितृणां अमृतं तदुभयशेषो मनुष्याणां तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारणस्य रसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य च एतस्य जिह्वा ह्येतं तदुत्पत्ति
स्थानं एवं सर्वत्रानुक्रमः १ सर्वासूनां प्राणानां तस्य नासे नासारंध्रे परमायने अत्र मद्ये त्रे मोदप्रमोदयोः सामान्यविशेषगंधयोः घ्राणेंद्रियं परमायनं
२ रूपाणां तेजसां रूपप्रकाशानां चक्षुरिंद्रियं। अश्विनौ नेत्रगोलके सर्वत्र पूर्वतानां प्रथमां तेषां तेषां कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं तस्य गात्रं शरीरं वस्तूनां ये सा
रांशाः तेषां भाजनं स्थानं ॥३॥

दयो

रामः
१८

अस्य त्वक् स्पर्शस्य वायोश्चेत्यर्थः सर्वस्य मेधस्य यज्ञस्य उद्भिज्जजातीनां सर्ववृक्षाणां यैर्वृक्षैर्यज्ञः सम्यक् साधितः तेषामेव वा ४ केशा मेघानां श्मश्रु विद्युतां पर्वतानां नखाः श्मश्रूणि वि
द्युतां पाषाणरत्नानि शिलालोहाभ्राणामिति सारूप्यार्हस्य क्षेमकर्मणां पालनकर्तॄणां ५ विक्रमः पादन्यासो भूरादिलोकानां आस्पदं आश्रयः भूरादिशब्दानां मध्ये यत्वात् ...
लुक् हे ... सर्वेषां कामानां वरस्य वरणस्यापि हरेरंघ्रिरास्पदं ६ वीर्यस्य शुक्रस्यापि शिश्नः अधिष्ठानं उपस्थस्त्विंद्रियं प्रजात्यानंदः संतानोर्थसं

त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ४ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युतां बा
हवो लोकपालानां प्रायशः क्षेमकर्मणां ५ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च सर्वकामवरस्यापि हरेश्चरण आस्पदं ६ अपां वी
र्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः ७ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद हिंसाया निरृतेर्मृत्यो
र्निरयस्य गुदः स्मृतः ८ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ९ अव्यक्तरससिंधूनां भूतानां नि
धनस्य च उदरं विदितं पुंसो हृदयं मनसः पदं १० धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च विज्ञानस्य च सत्वस्य परस्यात्मा परायणं ११ ॥

भोगस्तेन निर्वृत्तिः सुखप्राप्तिर्हानिस्तस्याः ७ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं गुदः स्थानं निरृतेरलक्ष्म्याः ८ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां गिरीणां अस्थिसं
घातः ९ अव्यक्तं प्रधानं रसः सत्त्वादिसारः सिंधवः समुद्रास्तेषां निधनस्य लयस्य उदरं परं स्थानं विदितं ज्ञानिभिः मनसः अस्माद्दृष्टिलिंगशरीरस्य १० तुभ्यं त्वत्कुमाराणां
सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमाश्रयः ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा· द्वि· १९ एवं तावत्परमेश्वरात्जातं विश्वं ततो न भिन्नं यथा कुंडलं सुवर्णात् न पृथक् स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यपर्या[illegible]डुतं शत देवपुरुषस्य ज्ञापकत्वेनेन दृश्यति तत्र
सहस्रशीर्षेत्यादेर्थस्य ब्राह्मणोस्य मुखमासीदित्यादेश्चार्थस्य कचतुष्टयस्यार्थः पूर्वाध्याय एव दर्शितः पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्धैस्त्रिभिः ते अग्रजा
हमे सनकाद्यः मरीच्यादयश्च १२ १३ जलेचरस्थलेचरनभश्चरौकांसि येषां ते नभौकसः इति संधिरार्षः १४ सर्वं पुरुष एव ननु ततः पृथगित्यर्थः प्रपंचेन तस्यापरिच्छेदं च कुंतस्य
मिमित्यस्यार्थमाह तेन पुरुषेणावृतमिति भूमिपदस्यार्थः वितस्तिमिति दशांगुलपदस्य अधितिष्ठतीति शब्दस्य च वितस्तिमधिकं व्याप्य तिष्ठतीति आधिक्यमात्रे विवक्षि

अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः सुरासुरनरा नागाः खगा मृगसरीसृपाः १२ गंधर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः
पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः १३ अन्ये च विविधा जीवा जलस्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितः स्त
नयित्नवः १४ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति १५ स्वधिष्ण्यं प्रतपन् प्राणो
बहिश्च प्रतपत्यसौ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् १६ सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् १७ ॥

तेन समाणां अनुपयोगात् परिच्छिन्नत्वाच्च १५ एतत्सदृष्टांतमाह असौ प्राणः आदित्य असौ वा आदित्यः प्राण इति श्रुतेः स्वधिष्ण्यं मंडलं प्रकाशयन् यथा बहिश्च प्रकाश रामः १९
यति एवं विराड्देहं प्रकाशयन् अंतर्बहिश्च प्रकाशयति १६ नित्यमुक्तत्वं दर्शयितुं अमृतत्वस्येत्यस्यार्थमाह स इति अभयस्येति मंत्रगतामृतपदस्याख्या
अन्नेनेति पदं विभक्तिव्यत्ययेन व्याचष्टे मर्त्यं मरणधर्मकं अन्नं कर्मफलं यस्मात् अत्यगात् अतिक्रांतवान् अतो न केवलं संसारकः किंतु अमृतत्वस्य निजानंदस्यापी
वी
श्वर इत्यर्थः १७

प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति प्रपंचात्मकस्याप्यसंक्लेशत्वमित्येष महिमा दुरत्ययः अपारः प्रपंचानिमित्तत्वा
दिति भावः मंत्रे च एतावानस्य महिमा विभूतिः अतश्च ज्यायान् महत्तर इति वदतायमेवार्थः उक्तः तदेवं पीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थेति दर्शय
न् पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति तिष्ठन्त्यत्रेति स्थितयो भूरादिलोकाः ते पादा इव पादाः अंशा यस्य पुंसः स्थितिपादास्तस्य पादेष्वंशभूतेषु लोकेषु सर्वाणि जीवा
न् विदुः मंत्रे तु पादोस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति १७ भूतेषु फलवैचि
त्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह अस्येश्वरस्य संबंधि त्रिपादमृतं नित्यसुखं दिवि किं भूर्लोकेषु न त्रिलोक्यामित्यर्थः तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह त्रया

महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः १८ अमृतं क्षेममभ
यं त्रिमूर्ध्नोधायि मूर्धसु पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः १९ ॥ ॥ ॥ ॥

णां लोकानां मूर्द्धा महर्लोकः तस्य मूर्द्धानस्तदुपरितनलोकास्तेषु यथाक्रमं अमृतादिकं अधायि निहितं तत्र त्रिलोक्यां नश्वरमेव सुखं महर्लोकस्य क्रममुक्तिस्थानत्वेपि क
ल्पांते तत्रत्यानां स्थानस्यानां स्थानत्यागात् विनाशित्वं जनलोके त्वमृतं अविनाशित्वं स्थावज्जीवं स्वस्थानापरित्यागात् किंतु महर्लोकवासिनां कल्पांते त्रिलोकदाहे
ष्मपीडितानां तदा तत्रागमनात् हे मद्दर्शनमपि तत्र तपोलोके तस्याभावात् क्षेममेव च स्यादिति हि त्रिलोक्यां दुःखमानापायात् संकर्षणाग्निना ध्यानानुषंगात् महर्लोकादुद्गमनं भ
याद्दयोर्दिता इति सत्यलोके त्वभयं मोहः तत्स्थानात्ततः एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह अप्रजानां यतेषु ब्रह्मादिलोकेषु गत्या प्रजाः नैष्ठिकब्रह्म
चारिवानप्रस्थयतयस्तेषामाश्रमाः त्रिलोक्या बहिरासन् १९

भा॰द्वि॰
२०

गृहमेधस्त्वंतर्यस्माद्बहिर्भूतःब्रह्मचर्यव्रतरहितः १८ अयं चाधिकारभेद एकस्यैवावस्थाभेदेन नानात्वं न तु भिन्नविषय इति दर्शयंस्ततो विभूतिं त्वस्यार्थमाह विविधं सृतु अञ्चतीति
विष्वङ् पुरुषः द्वे वर्त्मनी सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चलति स्म कथंभूते सृती साशनानशने भोगापवर्गप्राप्तिसाधनभूते अत्र हेतुत्वेन पुनर्विशेषणं यतः अविद्याक
र्मरूपा एका विद्या च तत्साधनोपासनारूपान्या १९ तदेवं विराडुत्तरवर्तिना फलं वै चित्रमुक्तं तत्कारणेश्वरोऽप्यीश्वरस्य नतत्वं तेन रूपं दर्शितं तस्माद्धि राड्जायते तस्यार्थ
माह यस्मादण्डं जज्ञे तत्र च भूतेन्द्रियगुणात्मको विराड्जज्ञे स ईश्वरः तत्तु विश्वं विराड्देहं द्रव्यं अण्डं च अतिक्रान्तवान् सूर्य इवेति एवं तेन एवं दर्शितः २० नत्वेवं पुरुष एव चेत्सर्वं

अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः १८ सृती विचक्रमे विष्वङ् साशनानशने उभे यदविद्या च विद्या च पुरुषस्तूभयाश्रयः १९ यस्मादण्डं वि
राड्जज्ञे भूतेन्द्रियगुणात्मकः तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् २० यदास्य नाभ्यान्नलिनादहमासं महात्मनः नाविदं यज्ञसंभारान्पुरुषा
वयवादृते २१ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः इदं च देवयजनं कालश्चोरुगुणान्वितः २२ वस्तून्योषधयः स्नेहा रसलोहमृदो जलं २३ ॥

तर्हि यज्ञस्य तत्साधनानां च पृथक्त्वाभावात् यज्ञैः पुरुषाराधनं न सिध्येदित्याशंक्य तत्परिहाराय यज्ञपुरुषेणाह विचित्यादिकं ... संगृह्य दर्शयति यदेत्यादिना । अस्येति वि
राड्देहप्रविष्टस्यैव स्रष्टृत्वात् नाभौ भवेन नाभ्यं तस्मात् यज्ञस्य संभारान् साधनानि नाविदं २१ तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैः एते संभाराः संभृता इति च वक्ष्य गापः
नान्युपयः वनस्पतयोऽरण्याः देवयजनं यज्ञभूमिः इदं चेति वचनात् यज्ञार्हस्थानं पवित्रः कपयतीति गम्यते बहुगुणान्वितो वसन्तादिकालः २२ वस्तूनि पात्रादीनि ओषधयो २०
व्रीह्यादयः स्नेहा घृतादयः रसा मधुरादयः सुवर्णादीनि लोहानि मृत्स्ना २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चातुर्होत्रं हौत्रादिकं कर्म २३ नामधेयानि ज्योतिष्टोमादीनि आग्नेयादीनामुक्तत्वात् मंत्रा इति स्वाहाकारादयः देवतानामनुक्रमस्तु देशः कल्पो बौधायनादिकर्मपद्धतिग्रंथः अग्निना
हं यक्ष्य इति संकल्पः तंत्रमनुष्ठानप्रकारः २४ गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि कृतस्य भगवति समर्पणं २५ संभृताः संपादिताः संभारा येन सोऽहं तेनैव यज्ञेनैव अने

म२

ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम २३ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च देवतानुक्रमः कल्पः संकल्पस्तंत्र
मेव च २४ गतयो मतयश्चैव प्रायश्चित्तं समर्पणं पुरुषावयवैरेते संभाराः संभृता मया २५ इति संभृतसंभारः पुरुषावयवै
रहं तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं २६ ततस्ते भ्रातर इमे प्रजानां पतयो नव अयजन्व्यक्तमव्यक्तं पुरुषं सुसमा
हिताः २७ ततश्च मनवः काले ईजिरे ऋषयोऽपरे पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं २८ नारायणे भगवति तदिदं
विश्वमाहितं गृहीतमायोरुगुणः सर्गादावगुणः स्वतः २९ ॥

न यज्ञेन यज्ञमयजंतेति मंत्रार्थः स्फुटितः २६ तेन देवा अयजंतेत्यस्यार्थं सप्रपंचं दर्शयति तत इति द्वाभ्यां व्यक्तं इंद्रादिरूपेण अव्यक्तं स्वतः अनेन पुरुषं जातमग्रत इत्यस्यार्थो
दर्शितः २७ काले स्वस्वावसरे २८ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति नारायणे इति आहितं अधिष्ठितं भगवत्त्वे हेतुः स्वतोऽगुणः सर्गादौ गृहीता मायया उरवो गु
णाः येन तस्मिन् २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि०
२१

यस्मात्त्वमित्येतस्य श्लोकान्तरं यदुक्तं स एष भगवान् सर्वेषां मम चेश्वर इति तदुपसंहरति सृजामीति पालनं तु स्वयमेव करोतीत्याह विश्वमिति पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्मायातां
धरतीति तथा सः ३० यच्चेदं विश्वं सदसदात्मकं स त्वमित्येवमादिसर्वप्रश्नानां सामान्योत्तरं यदुक्तं वा सदेवात्परो ब्रह्मन्न तु तत्त्वान्योऽप्यस्ति तत्त्वत इति पुरुष एवेदं सर्वमिति श्रुत्या च प्रदर्शि
कृतं तदुपसंहरति इतीति कार्यकारणात्मकं भाव्यं स्वरूपं भगवतः सकाशादन्यत एव पृथक् न वर्ततीत्यभिहितं ३१ यदुक्तं एतावद्वत्त्वयतो हि मे तेन विज्ञायमामीत्युत्तरं तत्र ब्रवीमि तदुपपाद्यि

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३० इति तेऽभिहितं तात यथेदमनुपृच्छसि नान्यद्भगवतः
किंचिद्भाव्यं सदसदात्मकं ३१ न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कं
ठ्यवता धृतो हरिः ३२ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आ
त्मसंभवः ३३ ॥

पसंहरति न भारतीति । यत एवमतो मे मया श्रीत्वं ह्यं मृषोपलक्ष्यते औत्कण्ठ्यवता हृदा हरिर्धृतो ध्यातः अङ्ग हे नारद अतः मे वाङ्मनइन्द्रियाणां हृत्पथः असत्पथः न च मत्स्वभावेनेत्यर्थः ३२ अत्र त्वा
नुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां सोऽहं समाम्नायादिभिः सर्वोत्कर्षो विधिना गमाश्रित्याधिपत आत्मनो मम संभवो जन्म यतस्तमेव न ज्ञातवान् कुतोऽन्यस्य वार्ता एतेन त्वत्प्रा
यत्क्वं ध्येय मोऽस्त्वेव ह्यते ३३ ॥ रामः
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि २ भु ३

तदा समीयुषां शरणागतानां संसारनिवर्तकं मंगलावहं सुसेव्यं च तस्य चरणं नतोऽस्मि ततोऽचिंत्यमहिमत्वेन स्तुतवानस्मीति किं कैमुत्यन्यायेनाह यो ह्यात्मेति स्वमायाविस्तारं यः स्वयमपि
पर्यगात् परिशङ्कोनिषेध्ये एतावानिति न ज्ञातवानित्यर्थः अपरे कुतोऽन्ये नीसुः तस्य चरणं नतोऽस्मीति पूर्वेणास्य संबंधः न चाहं सर्वज्ञः कथं न जानाति अन्तताभावादिति दृष्टान्तेनाह यथा स्व
स्यान्तं नभो नाप्नोतीति तद्वत् न हि खपुष्पादिशीनं साधितं विहंतीति भावः तथा च वह्निमति पुंपत्य एवतेन यथा श्रुतेनमनंतं तत्पान्तमपि पद्धतेन तां उनिरयाणनवसावरमानाद्यापाहिरिति निरस्त। यो ह्यात्म्य

नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं यो ह्यात्ममायाविभवं स्व पर्यगाद्यथा नभः स्वांतमथापरे कुतः ३४ नाहं न यूयं यदृतां
गतिं विदुर्न वामदेवः किमुतापरे सुराः तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ३५ यस्यावतारकर्माणि गायंति ह्यस्मदा
दयः न यं विदंति तत्त्वेन तस्मै भगवते नमः ३६ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च ३७ ॥

स्कं २

न्तः परमे व्योमन् सो अंग वेद यदि वा न वेदेति ३४ एतत्प्रपंचयति नाहमिति द्वाभ्यां ॥ वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थं स्वरूपं किं विदुः इदं प्रपंचरूपं तस्य मायया विनिर्मितं विचक्ष्महे विश्वः
तद्यथात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहितबुद्धय इत्यपेतद्ज्ञाने च हेतुः ३५ ननु सर्वैरपि तद्वर्ण्यते तत्राह यस्येति ३६ अवतारकर्माणि संक्षेपतो दर्शयति स एष आ
द्यो भगवान् पुरुषावतारः सन् सृष्ट्यादिकरोति आत्मात्मन्यात्मनात्मानमिति। कर्ता अधिकरणं साधनं कर्म च स्वयमेवेत्यर्थः पुरुषावतारः स्वस्याद्यनि कर्माणीति संक्षेपोक्तिः

३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰ ११

नपंविदंतितत्त्वेनेत्युक्तं किंतत्तत्त्वमित्यपेक्षायामाह ज्ञानेकेवलंसत्यंतत्त्वं य यदाघाकारवृत्तिज्ञानस्यावच्छेदसंयं विशेषणानिविशुद्धं विषयाकारस्पर्शं यतः अयंकस्मिंश्चितसंस्थितए
वतत्पकसंदेहादिरहितं अवस्थितं स्थिरं यतोनिर्गुणं गुणकार्याद्विगुणाख्यतिकरणत्वंचलंभवति यद्यपिवृत्तिज्ञानमपिब्रह्मज्ञानमेवेतितन्नवाच्यं द्विदोषयुक्तं तथाप्येतत्
करणावृत्तिदोषेणयातयामभवतीतिव्यवच्छिद्यते स्मृतिरेवविशेषणैः सत्यंज्ञानमपिसमर्थ्यंतंकिंचयद्विकारवत्तत्तदसत्यंदृष्टंनचास्यतन्माद्यः षड्विकाराः संतीत्याह अनाद्यं

ज्ञान

विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितं सत्यं सूक्ष्ममनाद्यंतं निर्गुणं नित्यमद्वयं ३८ ऋषेविदंतिमु
नयः प्रशांतात्मेंद्रियाशयाः यदातदेवासत्तर्कैस्तिरोधीयेतविप्लुतं ३९ ॥ ॥ ॥ ॥ ॥ ॥

तंजन्मनाशरहितं अतएवजन्मानंतरमस्तिवर्द्धतेविपरिणमतेअपक्षीयतेविनश्यतीतियदेतत्षड्भावविकारेनास्ति वृद्धिविपरिणामापक्षयाभावानमसंतियतः सूक्ष्मंसर्वत्रहेतुः अनित्यमद्वयंनित्यंसर्वद्वाद्वैतप्रतीतिसमयेपि
यत्पुर्वनोःद्वयमिति ३८ अत्रविद्वदनुभवप्रमाणमपिहेतुरूषेणाह प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसोयदाभवंतितदाविदंति अन्यदातदज्ञानेकारणमाह यदा तदा
तदेवप्रकाशमानमेव असत्तर्कैर्विप्लुतंस्यात्तदातिरोधीयेतेति ३९ ॥ २२ २२ ११ २२ ११ २२ ॥ ११ २२ २२ ११ २२ ११ २२ २२ ११ २२ २२ ११ २२ २२ ११

पा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारान्विभूतीश्चाह आद्य इत्यादि यावत्समाप्ति परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योवतारः वक्ष्यति हि भूतैर्यदापंचभिरात्मसृष्टैः पुरंविराजं
विरचय्यतस्मिन् स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः इत्योक्तं विष्णोस्तुत्रीणिरूपाणिपुरुषाख्यान्यथो विदुः प्रथमंमहतःस्रष्टृ द्वितीयंत्वंडसंस्थितं तृतीयं सर्व
भूतस्थंतानिज्ञात्वाविमुच्यत इति यद्यपिसर्वेषामविशेषेणावतारत्वमुच्यते तथापि [illegible]कालःस्वभावश्चसदसदितिकार्यकारणात्मिकाप्रकृतिश्च एताःशक्तयःमनश्च

आद्योवतारःपुरुषःपरस्यकालःस्वभावःसदसन्मनश्च द्रव्यंविकारोगुणइंद्रियाणिविराट्स्वराट्स्थास्नुचरिष्णुभूम्नः ४० अहंभवोयज्ञइ
मेप्रजेशादक्षादयोयेभवदादयश्च स्वर्लोकपालाःखगलोकपालान्नृलोकपालास्तललोकपालाः ४१ गंधर्वविद्याधरचारणेशायेय
क्षरक्षोरगनागनाथाः येवऋषीणामृषभाःपितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ४२ अन्येचयेप्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधी
शाः ४३

ईनिकार्याणिब्रह्मादयोगुणावताराः दक्षादयोविभूतय इतिविवेकः द्रव्यंमनःमहत्तत्वं वा द्रव्यंमहाभूतानिक्रमोऽत्रनविवक्षितः विकारो अहंकारः गुणाःसत्वादयः विराट्समष्टिशरीरंस्वरा
ट्वैराजः स्थाणुस्थावरं चरिष्णुजंगमंच व्यष्टिशरीरं ४० अहंब्रह्मा भवोरुद्रः यज्ञोविष्णुः दक्षादयइमेप्रजेशाः तललोकपालाः पातालाधिपतयः ४१ गंधर्वादीनामीशाः यक्षादी
नांनाथाः रक्षोरगेतिसंधिरार्षः। ऋषीणांपितॄणांच श्रेष्ठाः ४२ प्रेतादीनामधीशाः ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि १ प तं १

भा॰द्वि॰ २३ किंबहुना यत्किंचिद्विभूतिमद्वस्तु तत्सर्वं ममैव तत्त्वमित्याह यत्किमिति भगवत ऐश्वर्ययुक्तं महस्वत् तेजोयुक्तं ओजः सत्त्वमिंद्रियमनः शक्तीत्युक्तं बलं हांसंश्रीः शोभा ह्रीः कर्मजुगुप्सा विभूतिः सं-
पत्तिः आत्मा बुद्धिः तद्युक्तं अद्भुतार्णं अद्भुतवर्णमित्यर्थः रूपमेव स्वरूपमेव स्वरूपं रूपवत् अरूपं च तत्तत्सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः ४४ शुद्धसत्त्वावतारान्व-
क्तुमाह प्राधान्यत इति अस्य कथाश्रवणीये कर्णयोः कषायाः मलास्तान् शोषयंतीति यानान् सुपेशान् सुंदरान् सकारलोप आर्षः हे ऋषे तेन भवं अनुक्रमिष्ये तदनुक्रमणम्

यत्किंचिल्लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं ४४ प्राधान्यतो यानृष आ-
मनंति लीलावतारान्पुरुषस्य भूम्नः आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ४५ इ श्री भा ते हा पु द्वि य ष
ष्ठो ऽध्यायः ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रया-
द्रिमिव वज्रधरो ददार १ ॥

तं त्वया पीयतामित्यर्थः यद्वा पीयतामिति शत्रंतं आपिबतां कर्णकषायशोषानित्यर्थः ४५ द्वि ये षः सप्तमे प्रभवच्चीलावतारा ब्रह्मणोदिताः नारदाय तत्तत्कर्मप्रयोजनगुणाः राम॰
सह यत्र यदा क्षितितलोद्धरणाय वाराहीं तनुं बिभ्रत् सन्नुद्यतो ऽनंतः तदा तं प्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार दंष्ट्रया क्षितिजस्तोद्धरणायेत्युद्यत इत्यन्वयः ११ ॥ ॥ ॥ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याः वर ए

यज्ञावतारमाह रुचेः प्रजापतेः सकाशात्स्वार्या आकूतेः सुतः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमान्देवानजनयत स एवेन्द्रः सन्त्रयाणां आर्त्तिं महतीमहरत्तदा एवं सुयज्ञ
ज्ञोऽपि स्वानुपश्यान्मनुना मातामहेन हरिरित्युक्तः अनेन देवो यावनं लोकत्रयार्त्तिं हरतीति चतुष्कर्मदर्शितं एवं सर्वत्रावतारे तात्पर्यं अवगन्तव्यं १ कपिलावतारमाह कर्दमस्य प्रजापतेर्गृहे त
त्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह स च स्वमात्रे आत्मगतिं ब्रह्मविद्यामुक्तवान् यया आत्मगत्या सा आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेव ज
न्मनि विधूय कैवल्यगतिं मुक्तिं प्राप्तवती २ दत्तात्रेयावतारमाह मया अहमेव तव मया दत्त इति यद्यतस्त्राह ततः स नाम्ना दत्तो जातः स्वभक्तेभ्यो योगैश्वर्यदानं तत्स्वभक्तेषु दर्शयति स्म प४

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः २ जज्ञे च कर्द
मगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ३ अत्रेरपत्यम
भिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४ तप्तं तपो विवि
धलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् प्राक्कल्पसंप्लवविनष्टमिहात्मतत्वं सम्यक्जगाद मुनयो यदचक्षतात्मन् ५ ॥

स ह

पादपंकजयोः परागः तेन पवित्रा देहा येषां ते उभयीं ऐहिकामुष्मिकां च भुक्तिमुक्तिरूपां च ४ कुमारावतारमाह मे मया आदौ पद्मकल्पे स तस्मात्स्वतपसः मत्तपसो हेतोः
सः हरिः चतुः सनोऽभूत् सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनत्शब्दा नाम्नि यस्य सः कथंभूतात्स्वतपसः सनात् अखंडितात् यद्वा स्वतपसः सनात् दानात् सदा नाम
सनं यस्मात् दिरूपः एवं दानेन स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं उच्छिन्नसंप्रदायं आत्मतत्वं इह अस्मिन्कल्पे सम्यक् जगाद उक्तवान् सम्यक्त्वं दर्शयति यदुद्दिष्टमात्मतत्वं
मुनयः आत्मन् आत्मनि मनसि अचक्षत साक्षाददपश्यन् ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टि॰
२४

नरनारायणावतारमाह। धर्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन जातः कथंभूतः स्वतः असाधारणात्तपःप्रभावो यस्मात् तदेवाह दृष्ट्वेति आत्मन एतन्नाद्देव्यो रा
ऽप्सरसः भगवतः सकाशादात्मनः स्वभूतिरूपाः नर्त्तक्यापायाः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटितुं साधयितुं न शेकुः पद्मात्रात्मनः स्वरूपेणा नियमस्तपो नानरूपः तस्य च
लोपं तेन दृष्ट्वा भगवतो घटयितुं न शेकुरिति एतच्चास्यानमेकादशे भविष्यति ६ यत्र कामविजयी क्रोधोपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यं इत्याह कामभिति क

श्री

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ६
कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत ते न दहंत्यसह्यं सोयं यदंतरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ७ विघ्नैः
सपत्नुदितपाविभिरंतिगतो वालोपि संभ्रमगतस्तपसेवनानि तस्माच्छ्रदात् ध्रुवगानि गतानि परस्त्रीदिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ८
न्यासः

तिनः श्रीलद्वप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति रोषं त्वात्मानं दहंतमपि ते न दहंति क्रोधेनाभिभूयंत इत्यर्थः ननु अहो सोयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति यद्ध
स्यान्तो मनः कथंभूतं अमलं निर्मलं प्रवेशान्निति ७ चरित्रे तेव कमप्यवतारं स्तवयति मान्तः स्पर्द्धावैः सुरकृत्यान्तरहितानि नन्तानि वाक्यान्येव पात्राणि वाणाः तैर्विघ्नो ध्रुवं
गतन्न्नानयदीति समीपेन पसेन पलम्ब ध्रुवगाति ध्रुवपदं यत् परि स्थितास्तिनिं धन्मात्प्यता दिविभवा दिव्याः स्तुवंति। यद्वा परिस्थिता भगवादयः अधस्तात्
समर्षयद्ति ८ ॥

रामः
२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्ववतारमाह यद्यदा ऋषिभिरर्थितः तदा वेनं त्रात्वा अत्रं अर्थितस्य त्र इति पदं नाम्नो मे पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदव्युत्पत्तिः क थंभूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगं ऐश्वर्यं च यस्य तं चरित्रांतरमाह येन च गां क्षितिं जगदर्थं वसूनि अन्नादिद्रव्याणि दुग्ध्वा ९ ऋषभावतारमाह असौ हरिः ऋषभो नाभेः पुत्रः सुदेव्याः सूनुरास सुदेवी नाम मे भार्यायां मरुदेव्यामेव सुदेवीत्यपि संज्ञा जडयोगो नित्यसमाधिना चर्यां यः स्थितिर्यां तत्र हेतुः समदृक् तेनापि हेतुः स्वस्थः स्वरूपेस्थितः यतः प्रशांतेंद्रि यः तत्र हेतुः यतः परितो मुक्तसंगः १० हयग्रीवावतारमाह सत्रे इति अथो इत्यर्थांतरे स एव साक्षाद्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षः आस तपनीयं हेमवर्णोस्य तपस्य छं

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतं त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्ध्वा वसूनि वसुधा सकलानि येन ९ नाभेरसा वृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयोगचर्यां यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः १० सत्रे मम स भगवान् हयशीरषाथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः छंदोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः ११ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् १२

दोग्रघ्रंयः वेदमयः तद्विधिप्रायेमावाः तन्मयः अन्मखमय इति वा पाठः मखैर्यजनीयाः अखिलादेवतास्तदात्मा च अस्य श्वसतः श्वासं मुंचतः नस्तः नासापुटात् उशतीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ११ मत्स्यावतारमाह मत्स्यो भाविनि वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीप्रधानः तदा आश्रयत्वार्थः अतएव निखिलजीवनिकायानामाश्रयः मे मुखाद्विस्रं सितान् गलितान् वेदरूपमार्गान् वेदानादाय तत्र युगांतसलिले विजहार हर्षेण १२ ॥

भा·द्वि·
१५

कूर्मावतारमाह क्षीरोदधौ कछपवपुः सन् गोत्रं मपतार्यं मंदरगिरिं पृष्ठेन विधृतवान् कदा अमृतलब्धये क्षीरोदधिमन्थ तां सतां निद्रापाः स्मरणः अवसरं तस्य वोवायस्य सः निद्रावसरः कुतस्त
हा अतः परं अस्य कारणभूतं सूक्ष्मं अतीन्द्रियं यतः अव्यक्तं न कुतः यतो निर्विशेषणं तत्कुतः अनादिमध्यनिधनं उत्पत्तिस्थितिलयशून्यं
सदैकरूपं अपक्षयादिशून्यमित्यर्थः अत एव वाङ्मनश्चेतिद्वंद्वैकं तस्मात्परं ३४ उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति। अ
मुनी इति न गृह्णन्ति। वस्तुतो नाङ्गीकुर्वन्ति। यतो मायासृष्टे ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰दि॰ पहपगुणकर्म्मकः इति पठुलंच्चगवतांब्रह्मणंप्रभितत्सपंचपितृब्रह्मादिन् पापिणिनकर्माणिभ्वा हासरस्मादिनाद्रूहेश्वरं तेसतः प्राकृतेनं ग्रपेत सभगवान् । ब्रह्मरू
४१ पश्चकृसन्त्वाच्यवाचकतया वाचकतया नामानि । वामनं पानूपापिणिक्रियापाश्च धत्ते । स तत्तीत्यर्थः मायया सर्वधर्मविव्यापारः सन्त्वस्तुतत्त्वकर्म्मकृः ३२ ए
तत्पपंचपति । प्रजापतीनिसार्द्धेह्निर्भिद्दितीयानानो धन्त्रइत्यते नाचपूः तत्र प्रजापसाद्दीनिनामानि तदचानि नूपाणिनत्तकर्माणिभ्वतेष्वानि । एपकृ
तत्रद्वीनरभेदेन ३८ गिरीन्नित्यस्थानतंरवपेनिसंवोचनं ३९ द्विविधश्च स्थावरजंगमरूपेण चतुर्विधः जरायुजाण्डजस्वेदजोद्भिज्जरूपेणान्तस्य

सवाच्यवाचकतया भगवान्ब्रह्मस्वरूपधृक् ॥ नामरूपक्रियाधत्ते सकर्म्माकर्म्मकः परः ३६ प्रजापतीन् मनून् देवान् ऋषीन् पितृगणांश्च
एपकृमिद्वाराणगंधर्वान् विद्याधरसुरगुह्यकान् ३७ किंनराप्सरसो नागान्सर्प्पान्वै किंपुरुषोरगान् मातृरक्षःपिशाचांश्च भेन भूतवि
नायकान् कूर्म्मीन्मत्स्यान्वैतालान् स्वपानुधानान् ग्रहान् पिखगान् मृगान् पशून् वृक्षान् गिरीन्पसरीसृपान् ३८ द्विविधाश्चतुर्वि
धायेस्मैतज्जस्थलजमोकसः कुशलाकुशलामिश्रकर्म्मणां गतयस्त्रिमाः ४० सत्वरजस्तम इति त्रिस्वः सुरेनाक्रान्तं त्राध्येकेक
जनभांसिश्लोकांसिपेघांतानपिधन्न इति पूर्वेणान्वयः यस्य ताच्चापि (शोरात्मभिघ्नेनागतयस्त्रिधाम्य एकैकनरोत्मा प्यांस्तत्वावृउपहन्यते ४१
चपावस्थः कर्म्मगतयो यादृशीद्विजसत्तमेति तस्यापि प्रसंगात्तेनैवोत्तमाहा । कुशलाजांउत्तमः अकुशलः नीचा मिश्रा इति पदान्तां मिश्रा मध्य
माः कर्म्मणां पुण्यपुण्यमिश्राणां गतयः फलानि ४० सत्वादिभेदेन कर्म्मगतिवैचित्र्यं प्रपंचयति । सत्वमिति सार्द्धेन । सत्वादयस्तिस्रो गतयस्तु
रादिशब्दाःत्र्यष्यादीनां सपञ्चत्वाणार्थः आत्मा आगुणाभ्यां । स्वभावो गुणाः उपहन्यते त्रस्तु विधानैः ४१

राम
४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दे२

ब्रह्मरूपेण त्वष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह। स एव भगवान्। तिर्यङ्मानवदेवैरिदं विश्वं स्थापयन्पालयन्धर्म्मरूपेण प्रत्युत्पत्तिभोगैः संवर्धयति ४२ रु-
द्ररूपेण संहर्तृत्वमाह। तत इति। आत्मनः सकाशादुत्पादितं यत्सृष्टं। तत्संनियच्छति। संहरति ४३ कर्तृत्वाद्यपवादेन दशमस्य शुद्धिमाहात्म्यमाह इत्थंभावेन सृष्ट्यादिरू-
पेण। तस्माद्वा एतस्मादात्मनः आकाशः संभूतः सोकामयत बहुस्यां प्रजायेयेत्यादिश्रुत्या कथितः स्वपरस्वरूपं केवलमेवं रूपेणैव द्रष्टुं नार्हन्ति ४४ नहि

स एवेदं जगद्धर्त्ता भगवान्धर्म्मरूपधृक्। पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ४२ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः स-
नियच्छति कालेन घनानीकमिवानिलः ४३ इत्थंभावेन कथितो भगवान्भगवत्तमः नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ४४ ना-
स्य कर्म्मणि जन्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ४५

यतः अस्य विश्वस्य जन्मादौ कर्म्मणि परस्येश्वरस्य स्वातंत्र्येण कर्तृत्वं नास्ति। कृतापि तत्स्वेच्छया न प्रतिपाद्यते। किंतु अनुविधीयते अनुवर्त्यते। किम-
र्थं कर्तृत्वप्रतिषेधार्थं हि यतो मायया तदारोपितं प्रकाशितं। तथा च श्रुतिः। निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं। इन्द्रो मायाभिः पुरुरूप ईयत इत्याद्यः ४५

जंनिक्ष्यपं१

भा॰द्वि॰ उ[illegible]र्थमुपसंहरति एषइति। ब्रह्मणः संबंधी कल्पो महाकल्पः विकल्पोवांतरः तत्सहितः उदाहृतः उदाहरणत्वेन संक्षेपत उक्तः कथं यतः अत्र महाकल्पे प्राकृता म
४२ हदादिसर्गाः अवांतरकल्पे वैकृताः स्थावरादिसर्गाः तत्संविधिः प्रकारः अन्येर्महाकल्पादि[illegible] साधारणः ४६ वक्ष्यमाणं विस्तारं प्रतिजानीते। परि[illegible]
स्थूलं सूक्ष्मं च। कल्पस्य लक्षणं स्यादेवं रूपमिति। तद्विग्रहं अवांतरकल्पमन्वंतरादिस्वरूपविभागं च यथावद्विस्तरेण। पुरस्तात्तृतीयस्कंधे व्याख्यास्यामि। त

एषं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ४६ परिमाणं च कालस्य कल्पलक्षणविग्रहं यथा
पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ४७ शौनक उ॰ यदाह भगवान् सूत क्षत्ता भागवतोत्तमः चचार तीर्थानि भुवस्त्य
क्त्वा बंधून् सुदुस्त्यजान् ४८ कुत्र कौषारवेस्तस्य संवादोध्यात्मसंश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ४९ ब्रूहि नस्त
दिदं सौम्य विदुरस्य विचेष्टितं। बंधुत्यागनिमित्तं च यथैवागतवान् पुनः ५० राम

पाद्मं कल्पं। अथो इति कार्त्स्न्येन व्याख्यास्यामीति शृणु ४७ यदर्थं सूर्यादिनिरूपणं तदेव साक्षात् श्रोतुकामः कथांतरेण पृच्छति यदाहेति। भुवः सर्वतीर्थानीति ४२
यानि। यद्वा भुवः तीर्थानि चेति ४८ कौषारवेर्मैत्रेयस्य। तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः ४९ पुनरागतवान् तच्च निमित्तं ब्रूहि ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि ४३ ॥ राज्ञापृष्टः १ विशेषमपश्यन्यद्यत्संक्षेपतः पृष्टमेव राज्ञापि शुकं पृष्टवान्। शुकोपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये पूर्वं राज्ञा ३ ल तान् प्रश्नान् तदनुसारेणैव
पुराणार्थमवोचत्। तदेवाह द्वाभिः स्वामि। तथैवमपृच्छदिति ५१ इति श्रीभागवतटीकायां श्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्वितीयस्कंधे दशमोध्याय
य श्रीमद्भागवतरूपेण स्वतन्त्र समुखतो। पितामहाय नारदाय श्रीरङ्गं नवहेतुं परमेश्वरं पञ्चत्रयं जितं विश्वनरीश्वरं जितजगत्त्रयं। संततमपेवपएफंनुपदच सवुलि

सूत उवाच राज्ञा परिक्षिता पृष्टो यदवोचन्महामुनिः तद्वोभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ५१ इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे दशमोध्यायः ॥ ॥

राम ४३

ते मम ३ द्वितीयस्कंधसंबंधि परभावार्थदीपिका। उरीकृतामियं सद्भिर्यथा स्याज्जगद्दीपकं २ रघुतामिष्यासंतः सुमतां ममसाहसं। मया हि स्वीय
बोधाय कृतमेतत्सर्वतः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीभागवतदशमउत्तरार्धप्रारंभ॥श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श्री०उ०
१

श्रीगणेशायनमः॥ यत्रा दरादमरदानववृन्दयष्ट्या नीतेक्षीरां बुधोयमरतसाधनमंथनाद्रिः॥ मग्नोभिरीक्ष्य हरिणा सहतैरुर्जेयाय संपूजितो जयति विघ्नविघातदक्षः॥१॥ योनादतो विधिपुरैरवि विबुधैर्गणेशो वाक्कृताय तः सम भवन् स कलोजलोयाः॥ सर्वे सपंजसमपमृत्रपना त्रनो स्यसो यप्रतुर्जयति विघ्नविघातदक्षः॥२॥ शोकमोहभयात्व्यो हप्लंका लाहिनापुनः॥ मामुज्जहार तं वंदे गोविंदा श्रपसहुरं॥३॥ अस्फूर्जविषवीर्यमुन्नत फणामंडलं कालनागं विछिं नाखिले गात्र मानसमहं कृता फणी द्रहरिः॥ नत्संतोडवउंबरेण विधिनागंधर्वगीतैस्तनयप्रवासयदा श्रुसानुगकुलं तं गोकुलेशं भजे॥४॥ विश्वेश्वरं विश्वभवं विश्वनाथं जगत्पतिं॥ नमामि शिरसा देवं किं मेमत्स्य करिष्य

श्रीशुक उवाच॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ॥ मृते भर्तरि दुःखार्ते ईयतुः स्मपितुर्गृहान्॥१॥ पित्रेमगधराजाय जरासंधाय दुःखिते॥ वेदयांचक्रतुः सर्वमात्मवैधव्यकारणं॥२॥ स तदाप्रियमाकर्ण्य शोकामर्षयुतो नृप॥ अयादवीं महीं कर्तुं चक्रे परममुद्यमं॥३॥ अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः॥ यदुराजधानीं मथुरां न्यरूणत्सर्वतो दिशं॥४॥ निरीक्ष्य तद्बलं कृष्ण उद्वेलमीव सागरं॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलं॥५॥ चिंतयामास भगवान्हरिः कारणमानुषः॥ तद्देशकालानुगुणं स्वावतारप्रयोजनं॥६॥ हनिष्यामि बलं ह्येतद्भुवि भारं समाहितं॥ मागधेन समानीतं वश्यानां सर्वभुभुजां॥७॥

णांन

ति॥५॥ ॐ नमो भगवते वासुदेवाय॥ ॥ ततः पंचाशत्तमे तु जरासंधभयादिवा॥ कारयित्वा बुधौ दुर्गं तस्मिन्नायतिजं जनं॥१॥ कृपटानु कपटैरेव हत्वा देत्यान्यलतः॥ अजयच्च जरासंधं धर्मेणैव तु धार्मिकं॥२॥ अस्तिप्राप्तिसंज्ञके द्वे यतु जग्मतुः॥१॥२॥ कंसेशोकः॥ कृष्णे आमर्षः॥ तोभ्यां युतः॥३॥ न्यरूणत् एव॥४॥ उद्वेलं लंघितमर्यादं सागरमिवातेन तस्य बलेन संरुद्धं॥५॥ किंबलमेव हन्मि नमागधं मागधं। मागधं वा हत्वा बलं गृह्णामि॥ यद्वा स मागधं सर्वं हन्मीति चिंतयामास॥ ननु प्रथमं केर्थं जेष्यामीत्येवं चिंतयितुं युक्तं तत्राह कारणमानुष इति॥ भूभारावतारकारणे नमानुषो न तु स्वतः इति॥६॥ एवं त्रेधा विचिंत्य प्रथमं पक्षं तिद्दोरितवानतदाह्नतु

१

बालायोघमं कर्त्ता करिष्यति॥८॥ कृष्णकृष्णेन कृष्णाय कृष्ण एभि कृष्णस्य कृष्णनः॥ कृष्णं त्वामेव सकलं नान्यं तद्देपि किंचन॥१॥ नन्वत एव हंतव्यस्तत्रा
हाए तदर्थ इति एतच्छब्दार्थं स्पष्ट्यनि भूभारहरणायेति॥९॥ अयमेतदर्थो वतार इत्यपलक्षणमित्याह॥ अन्योपीति। प्रभवत उद्भवतः॥१०॥
ससूतौ सारथिसहितौ॥ परिछेद परिकर ध्वजकवचादि तत्सहितौ॥११॥१२॥ त्वं अव नूरक्षकः नाथो विद्यते येषां ते त्वावंतः तेषां॥१३॥१४॥१५॥

अक्षौहिणीभिः संख्यानं भटाश्वरथकुंजरैः॥ मागधस्तु न हंतव्यो भूयः कर्त्ता बलोद्यमं॥८॥ एतदर्थोवतारोहि भूभारहरणाय मे॥
संरक्षणाय साधूनां कृतोन्येषां वधाय च॥९॥ अन्योपि धर्मरक्षायै देहः संभ्रियते मया॥ विरामायाप्यधर्मस्य काले प्रभवतः क्वचित्॥
॥१०॥ एवं ध्यायति गोविंद आकाशात्सूर्यवर्चसौ॥ रथा उपस्थितौ सद्य ससूतौ सपरिछदौ॥११॥ आयुधानि च दिव्यानि पुराणानि य
नं दृछया॥ दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत्॥१२॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो॥ एषते रथ आयातो दयितान्या
युधानि च॥१३॥ यानमास्थाय जह्येतद्व्यसनात्स्वान्समुद्धर॥ एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत्॥१४॥ त्रयोविंशत्यनी
काख्यं भूमेर्भारमपाकुरु॥ एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात्॥ निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसा वृतौ॥१६॥ शं दयो
खं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः॥ ततोभूत्परसैन्यानां हृदि वित्रासवेपथुः॥१७॥ तावाह मागधो वीक्ष्य हे कृष्ण पुरुषा
धम॥ न त्वया योद्धुमिछामि बालेनैकेन लज्जया॥१८॥ गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन्॥१९॥ तव राम यदि श्र
सं द्धा युध्यस्व धैर्यमुद्वह॥ हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि॥१९॥ श्रीभगवानुवाच॥ नैव शूरा विकत्थंते दर्शयंत्येव पौ
रुषं॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः॥२०॥ ॥ ॥ ॥ ॥

दंशितौ बद्धकवचौ स्वायुधाढ्यौ शोभनायुधसंपन्नौ॥१६॥१७॥ पुरुषा अधमा यस्मादिति वा स्त्रीवार्था हि पुरुषा न मे तिष्ठति तेन सवितरत्वाद
र्शनानर्हेणाहं अमंदावध्यातीति बंधुरविद्यानां हंतीति तथाहे अविद्यानिरसनेति। याहि पापमुहि॥१८॥ अबुद्धं देहो सा वितिस्वर्ये मव
मत्वा परितोषां यत्सा तस्माहाय शप्तं जहीति॥१९॥ यथाश्रुतार्थग्रहणेन भगवत उत्तरां नैव शूरा इति। विकत्थंते श्लाघंते॥२०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री०उ०
२

माधवो पृथुवंशाभवो महतासैन्यसमूहेनारतवान्। वायुरश्वैः सूर्यो रेणभिश्चाग्निंयथेत्यर्थः नभात्रमेवावरणमितिसूचितं॥२१॥२२॥ पर
स्यानीकानि सैन्यानि। तान्येवपयोमुचो मेघास्तेषां शिलीमुखा बाणाः तेषामस्फलं वर्णवर्षं तेन पीडितं व्यस्फूर्जयत उज्जृंभितवान्॥२३॥
तदा हरन्निति। निषंगा दिषुधेः शरानुद्धरन् । अथ तान् गुणे संदधत। गुणमाकृष्य निशितबाणसमूहान् मुंचन् प्रहरन्। पतत्रिपदातिः।
निरंतरमिति ग्रहणादिक्रियाविशेषणं॥ ज्वलत्क्रोधभ्रमेण यथा चक्रवद्भवति तद्वद्विस्फूर्जयादिति॥२४॥ हताश्वाध्वजाः सूतानाय
जरास्तुतस्मात्वमिसमाधवो महाबलौघेन वलीयसारणोत। ससैन्यया नद्ध्वजवाजिसारथीसूर्यान् लौवायुरिवाभ्ररेणु
भिः॥२१॥ सुपर्णतालध्वजचिह्नितौ रथाव लक्ष्यं यो हरिराम योर्मृधे॥ त्रिपः पुराद्दालकहर्म्यगोपुरं समाश्रिताः संमुमु
हुः सुवार्दिताः॥२२॥ हरिपरानीकपयोमुचां मुहुः शिलीमुखास्फलं वर्षपीडितं॥ स्वसैन्यमालोक्य सुरासुरार्चितं व्यस्फु
र्जयच्छार्ङ्गशरासनोत्तमं॥२३॥ गृहन्निषंगाद्दथसंदधन् शरान्विकृष्य मुंचन् निशितबाणपूगान्॥ निघ्नन् रथान्कुंजर
वाजिपत्तीन्निरंतरं यद्वदलातचक्रं॥२४॥ निर्भिन्नकुंभाः करिणो निपेतुरश्वाः शराद्वाः शरवृक्णकंधराः॥ रथाहताश्वध्वजे
सूतनायकाः पदातयः छिन्नभुजोरुकंधराः॥२५॥ संछिद्यमानाद्विपदेभवाजिनां भंगप्रसूताः शतशोऽसृगापगाः॥
भुजाहयप्ररूढशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः॥२६॥ ॥ ॥ ॥ ॥

कारथिनश्वयेषुते॥२५॥ संछिद्यमानाः द्विपदा इभा वाजिनश्चेतषां भंगेभ्यः प्रसूता असृगापगा रुधिरनद्यः परस्परं प्रवर्त्ति ॥२
ताइति तृतीयेनान्वयः। प्रसिद्धनदीरूपकमाह। भुजा एव ग्रहयो यासु ताः। पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः। हतद्वी
पा एव द्वीपा अंतर्वर्त्तितटानि। हया एव ग्रहा ग्राहास्तैश्चाकुला व्यामाः॥२६॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करातुरवश्चभीना यासुता॥ नराणां केशा एव शैवलं यासु ताः। धनूंष्येव तरंगा॥ आयुधान्येव गुल्माः। तैश्च तैश्च संकुलाः॥ अघूरिका श्चर्माणि वा
नान्येवावर्त्ता तैर्भया नकाः महामणीनां प्रवेकाउत्तमाः। आभारनिचाय थायथं अस्मान शार्करा श्चैयासुताः॥२७॥ भीरूणां भया वहाः। मन
स्विनां हर्षकर्यः। किंच। संकर्षणेनाषित द्बलं क्षयं प्रणितं॥२८॥ अगं हे राजन् अर्णवनूं दुर्गं गंभीरं वंभयंकरं चायतः दुरंतपारं अनोअ
त्र लोपा पारमवधिः। दुःशब्दो निषेधे। विक्रमेण गाधां देशान्श्च निरवाधिकमिस्पर्धः। किंच। मगधेंद्रेण च पालितं बलं यदेवं भूतं रामलक्ष्मणयो

करोरुभीना नरकेशशैवला धनुस्तरंगा फधगुल्मसंकुलाः॥ अघूरिकावर्त्तभयानका महामणिप्रवेकाभरणा रमशार्कराः॥२७॥
प्रवर्त्तिता भीरुभयावहा मृधेमनास्विनां हर्षकरीः परस्परं॥ विनिघ्नता रीन्मुशलेन दुर्मदा संकर्षणेनापरिमेयतेजसा॥२८॥
म बलं तदंगार्णवदुर्गभैरवं दुरंतपारं मगधेंद्रपालितं॥ क्षयं प्रणीतं वसुदेवपुत्रयो र्विक्रीडितं तज्जगदीशयोः परं॥२९॥ स्थित्युद्भव
दुर्णीतं भुवनत्रयस्य यः समीहते नंतगुणः स्वलीलया॥ न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते॥३०॥ जग्राह वि
रथं रामो जरासंधं महाबलं॥ हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा॥३१॥ बध्यमानं हतारातिं पाशैर्वारुणमानुषैः॥ वा
रयामास गोविंदस्तेन कार्यचिकीर्षया॥३२॥ समुक्तो लोकनाथाभ्यां वीडितो वीरसंमतः॥ तपसे कृतसंकल्पो वारितः पथि राज
भिः॥३३॥

कर्मोत्कं न परं केवलं तयोर्विक्रीडितं। न तु पराक्रमः॥२९॥ नचैतदाश्चर्यमपि साहास्थित्यफद्भवांतमिति तर्हि किमपि साश्चर्य्यामिव वर्ण्यितं त
त्राह। तथापीति मर्त्यानुविधत्ते अनुकरोतीति मर्त्यानुविधस्तस्य॥३०॥ किंच। जग्राहेति। हतान्यनीकानि यस्य। अवशिष्टा असवएव अ
स्यतं च तं॥३१॥ हताबहुशत्रवा तयो येन तथाभूतं मपि जरासंधं बध्यमानं वारयामानं वारयामासेति॥३२॥३३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वा० उ०
२

पवित्रार्थानि। धर्म्योपदेशपराण्यपदानि येषु तैर्वाक्यैः। नयनैर्नीतिभिः। प्राज्ञैस्तैर्लौकिकैः। तत्र लौकिकन्यायमाह। स्वकर्मेति। यदुभिरल्पैः
हतत्वात् महतः। पराभवके बले कर्मबंधे नैव प्राप्तः त्वया न लज्जितव्यमिति॥३४॥ बार्हद्रथो जरासंधः॥३५॥ मुकुंदोपि यया वित्यनुषंगः। न
क्षतं बलं यस्य सः। तस्यै वाग्रतहस्त्याक्षत प्रातिसंधोनादिति भावः। निस्तीर्णः अनायासेनैवतीर्णो ऽरिबलार्णवो येना साधु साध्वित्यनुमो

वाक्यैः पवित्रार्थपदैर्नयनैः प्राज्ञैस्तैरपि॥ स्वकर्मबंधप्राप्तोयं यदुभिस्तेपराजयः॥३४॥ हतेषु सर्वानीकेषु नृपो बार्हद्रथस्त
दा॥ उपेक्षितो भगवता मगधान् दुर्मनाययौ॥३५॥ मुकुंदोप्यक्षतबलो निस्तीर्णारिबलार्णवः॥ विकीर्यमाणकुसुमै
स्त्रिदशैरनुमोदितः॥३६॥ माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः॥ उपगीयमानविजयः सूतमागधबंदिभिः॥३७॥
शंखदुंदुभयो नेदुर्भेरीतूर्याण्यनेकशः॥ वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ॥३८॥ सिक्तमार्गां हृष्टजनां पताका
भिरलंकृतां॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां॥३९॥ विकीर्यमाणो नारीभिर्माल्यदध्यक्षतांकुरैः॥ निरीक्ष्य
माणः सस्नेहं प्रीत्युत्कलितलोचनैः॥४०॥ आयोधनगतं वित्तमनंतं वीरभूषणं॥ यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्र
भुः॥४१॥ एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः॥ युयुधे मागधो राजा यदुभिः कृष्णपालितैः॥४२॥ ॥ ॥

दितश्च॥३६॥ प्रत्येकं यतैर्माथुरवासिभिर्जनैरभिसंगम्य मिलित्वा॥३७॥ तदा च प्रभौ पुरं प्रविशति सति शंखवाद्यो नेदुः॥३८॥ कथंभू
तां पुरीं तदाह। सिक्तमार्गामिति॥ ब्रह्मघोषेण निर्घुष्टां निनादितां कौतुकेनोत्सवेना सर्वतो बद्धानि तोरणानि यस्यां तां॥३९॥ नि
चीयमान विकीर्यमाणः प्रविवेशेति विपरिणामेनानुषंगः॥४०॥ आयोधनं रणभूमिस्तत्रस्थं विभवं वीराणां भूषणं॥४१॥ तावति इति छे
दः॥ तावति पराजये वर्त्तमानेपि अक्षौहिण्या बलं यस्य सः सप्तदश कृत्वः सप्तदशवारान् युयुधे॥४२॥ ॥ ॥ २

.CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आक्षिप एव नक्षत्रपंक्तिन्मुः ॥४३॥ आप्लादश्शपेअष्टादशो संग्रामेभाव्यो तन्मध्ये अकस्मात्कालयवन आगतः ॥४४॥ आलसंमिता न स्वतुल्यान्॥
॥४५॥ रजितं दुरवा उभयत यवनाज्जरासंधाश्च॥४६॥ तदाहद्वयेना निरूध्येति निरूपणक्रि॥४७॥ अस्य अनेन॥४८॥४९॥ समुद्रमध्ये को
रोलसैनाद्भुतं सर्वैश्वर्यमयां अवीकूरक्लोरयामास॥५०॥ त्वष्टा विश्वकर्मा तदीयं शिल्पनैपुणं यस्मि यां कोशलां तदाह सार्द्धं स्त्रिभिरथ्या
राजमार्गा पुरतः। वीथ्य उपमार्गा पश्चिमतः। उभयतोपि च त्वराएयं गणानि तन्मध्ये कोष्ठाः। तया योग्यं तस्तु वर्णभवनानि तदुपरि स्फाटि
आक्षिप एवं स्वाद्बलं सर्वं वहमयः कृष्णतेजसां॥ हतेषु स्तेषु नीकेषु सत्कोगादरिभिर्नृपः॥४३॥ अष्टादशम संग्रामे आगामिनि तत्
दंतरा॥ नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत॥४४॥ क्रूरोह मथुरामेत्य तिस्त्रभिर्म्लेच्छकोटिभिः॥ त्रैलोक्ये चाप्रति द्वंद्वो रथीन्
अक्लास्मसंमितान्॥४५॥ तं दृष्ट्वा चिंतयत् कृष्णः संकर्षण सहायवान्॥ अहो यदूनां रजिनं प्राप्तं ह्युभयतो महत्॥४६॥ यवनो
ऽयं निरुंधेस्मान् अद्य तावन्महाबलः॥ मागधोप्यद्य वा श्वो वा परश्वो वागमिष्यति॥४७॥ आवयोर्युध्यतो रस्य यद्यागं
श्री॥ ताजरासुतः॥ बंधून्वधिष्यत्यथवा नेष्यते स्वपुरं बली॥४८॥ तस्माद् घवि धीमो दुर्गं द्विपदद्दुर्गमं॥ तत्र ज्ञातीन्समाधाय यव
नं घातयामहे॥४९॥ इति संमन्त्र्य भगवान्दुर्गं द्वादशयोजनं॥ अंतः समुद्रे नगरं कृत्स्नाद्भुतमचीकरन्॥५०॥ दृश्यते यत्र हि
त्वाष्ट्रं विज्ञानं शिल्पनैपुणं॥ रथ्याश्च वर वीथीभिर्यथा वास्तु विनिर्मितं॥५१॥ सुरद्रुमलतोद्यानं विचित्रोपवनान्वितं॥ हेम
शृंगैर्दिविस्पृग्भिः स्फटिकाट्टालगोपुरैः॥५२॥
काट्टालिकाः। तदुपरि हेमकुंभाः। इति बहुभूमिकाः यथा वास्तु गृहादि निर्माणस्थानं तमनतिक्रम्य विनिर्मितं॥५१॥ सुराणां द्रुमा लता
श्च येषु तान्युद्यानानि विचित्रोपवनानि वतैरन्वितां हेममयानि शृंगाणि येषां तैः। दिवस्पृग्भिरभ्रंकषैः स्फाटिकाट्टालका उपरिभूमिकाः।
गोपुराणि च द्वाराणि तैर्निर्मिकतोरणान्वयः॥५२॥

राजतारकुटैः। रजतं च पीतलोहं ताभ्यां निर्मितैः कोष्ठैः। अत्र ढ्वरशालका त्र शालादिभिः कथंभूतैः हेमकुंभैरलंकृतैः। तथा रत्नकूटैः पद्मरागा
दि शिखरैः हेमैः सौवर्णैः। महामरकतमया निस्थला नियेषु तैर्गृहैश्च॥५३॥ किंच नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्वल्लभीभि
श्चंद्रशालिकाभिश्च निर्मितां यदुदेवगृहैः राजगृहैरुल्लसत् शोभमानं॥५४॥ पारिजातं च प्राहिणोत् प्रस्थापयामासेन्द्रःकप
रि। क्षितिसंवादात्पूर्वभावित्वात् भूतनिर्देशः। मर्त्यधर्मैः क्षुत्पिपासादिषु ड्रुडूर्मिभिः॥५५॥ निधिपतिः कुबेरः अष्टौ कोशान्निधींश्च॥प

राजतारकुटैः कोष्ठैर्हेमकुंभैरलंकृतैः॥ रत्नकूटैर्गृहैर्हेमैर्महामरकतस्थलैः॥५३॥ वास्तोष्पतीनां च गृहैर्वल्लभीभिश्च नि
र्मितं॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत्॥५४॥ सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः॥ यत्र चावस्थितो मर्त्यो मर्त्य
धर्मैर्न युज्यते॥५५॥ श्यामैककर्णान्वरुणो हयान् शुक्लान्मनोजवान्॥ अष्टौ निधिपतिः कोशान् लोकपालो निजोदयान्॥५६॥
यद्यद्भगवता दत्तमाँधिं माधिपत्यं स्वसिद्धये॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप॥५७॥ तत्र योगप्रभावेन नीत्वा सर्व
जनं हरिः॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः॥ निर्जगाम पुरद्वारात् पद्ममाली निरायुधः॥५८॥ इति श्रीभागवते महा
पुराणे दशमस्कंधे नारद एपंचाशत्तमोध्यायः॥५०॥ श्रीकृष्णार्पणमस्तु॥ छ॥ छ॥ छ॥ छ॥

पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथोदकः॥ नीलो मुकुंदः शंखश्च निधयोष्टौ प्रकीर्त्तिताः॥ इति प्रसिद्धान्॥ निजोदयान् निजविभूतीः॥५६॥ अ ४
न्ये च सिद्धयो भगवतोस्याधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति॥५७॥ यथा कालयवनो न वेत्ति न च
सो जनः तथा योगप्रभावेन नीत्वा तत्रास्थितः प्रजापालेन रामेण अहं पलायिष्ये इति समनुमंत्रितः कृतानुमंत्रः इत्यर्थः॥५८॥ इति दशमे पंचा
शत्तमः॥५०॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकपंचाशत्तमे हन्मुचुकुंददृशा हरिः ॥ यवनं तु मुचुकुंदेन हत्वा तत्सत्क्रान्वकंपनः ॥१॥ यवनेंद्रसुतात्कालयवनाद्यदुभीषणात् ॥ हरिहरगिरस्वैरं
पालनायापलायत ॥२॥ यदा गार्ग्यः स्यालेन षंढ इत्युक्तः सत्स रायादवैरुपहासितः क्रुद्धोसौ श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रवरं लब्धवान् ततः
श्च यवनेंद्रेण अपुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिद्धं ॥ पुरद्वाराद्विनिष्क्रांतं उज्जिहानं उडुपं

श्रीशुक उवाच ॥ तं विलोक्य विनिष्क्रांतमुज्जिहानमिवोडुपं ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससं ॥१॥ श्रीवत्सवक्षसं भ्राज
त्कौस्तुभामुक्तकंधरं ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ॥२॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं ॥ मुखारविंदं
बिभ्राणं स्फुरन्मकरकुंडलं ॥३॥ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलांछनः ॥ चतुर्भुजोरविंदाक्षो वनमाल्यतिसुंदरः ॥४॥
लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः ॥५॥ इति निश्चित्य यवनः प्राद्रवंतं प
राङ्मुखं ॥ अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनां ॥६॥ हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं य
वनेद्रोद्रिकंदरं ॥७॥ पलायनं यदुकुले जातस्य तव नोचितं ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥८॥ एवं क्षिप्तोपि
भगवान्प्राविशद्गिरिकंदरं ॥ सोपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं ॥९॥ ॥ ॥ ॥ ॥

नं ॥१॥२॥ नित्यप्रमुदितं प्रियादिमुखारविंदविशेषणं ॥३॥४॥ नारदोक्तैरेतैर्लक्षणैरयं पुमान्वासुदेवो नान्यो भवितुमर्हति । अपं
च निरायुधश्चातोऽनेन पद्भ्यामेव चलन्निरायुधो हं योत्स्यामि ॥५॥ इति निश्चित्य तं पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ॥६॥ आ
त्मानं हस्तप्राप्तमिव दर्शयता दूरं नीतः इत्यन्वयः ॥७॥ अहताशुभः अक्षीणकर्मा ॥८॥९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰शा॰उ॰
५

तं शय्या नमच्युतं तमत्वा ताडयदिति ॥१०॥ तस्य कुद्धस्य दृष्टिपातेन संदीप्तोयः स्वदेहजोऽग्निस्तेन ॥११॥१२॥ यवनमर्दयति निहिनस्ती ति यवनार्दनः ॥ तथा सकस्य वंश्यः किंवीर्यः कीदृक्प्रभाववान् किंतेजः कस्य वीर्य्यं पुत्र इत्यर्थः । शिश्ये असयिष्ट ॥१३॥ सत्यसंगरो युद्धं प्रतिज्ञा वा सस्य ॥१४॥१५॥ गुहं कार्त्तिकेयास्वः पालं स्वर्गपालकं सेनान्यं ॥१६॥ उज्झिता स्त्यक्ता गता इत्यर्थः ॥१७॥ किंच

नन्वसौ दूरमानीय शेते मामिह साधुवत् ॥ इति मत्वाच्युतं मूढस्तं पदा समताडयत् ॥१०॥ स उत्थाय चिरं सुप्तः शनैरु न्मील्य लोचने ॥ दिशो विलोकयन्पार्श्वे तमद्राक्षीदवस्थितं ॥११॥ स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजेनाग्नि ना दग्धो भस्मसादभवत्क्षणात् ॥१२॥ राजोवाच ॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य एव च ॥ कस्माद्गुहां गतः शिश्ये किंते जो यवनार्दनः ॥१३॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मान्धातृतनयो महान् ॥ मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्य संगरः ॥१४॥ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरं ॥१५॥ लब्ध्वा गुहं ते स्वःपा लं मुचुकुंदमथाब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥१६॥ नरलोके परित्यज्य राज्यं निहतकंटकं ॥ अ स्मान्पालयतो वीर कामास्ते सर्व उज्झिताः ॥१७॥ सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीया ना धुना संति कालिताः ॥१८॥ कालो बलीयान्बलिनां भगवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन्पशुपालो यथा पशून् ॥१९॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥२०॥ ॥ ॥ ५

सुता इति तुल्यकालीयाः त्वत्समानकालीनाः । कालिता विचालिताः ॥१८॥ पशुजातं स्वकालयेदिति चेदत आहुः । काल इति । कालयाते इतस्ततश्चालयति ॥१९॥ तस्य कैवल्यस्य ॥२०॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुहायां प्रविष्ट शेते स्म ॥२१।२२।२३।२४।२५।२६॥ धर्षितः अभिभूतः। दुर्धर्षमिव धर्षयं। ॥२७॥ विपिने अरण्ये। तत्रापि गिरेर्गह्वरे दुःप्रवेशास्था
नो तत्रापि उरुकंटके पद्मपलाशासदृशाभ्यां पद्भ्यां क्विचरसीति ॥२८॥ तेजोमूर्त्तिः प्रभावो दीप्तिर्वा ॥२९॥ सर्वत्रापरितो धीदोहा। मन्यइति।

एवमुक्तः स वै देवानभिवंद्य महायशाः॥ अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥२१॥ स्वापयंतं यस्तु मध्ये बोधयेत्वामचेतनः
स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणात् ॥२२॥ यवने भस्मसान्नीते भगवान्सात्वतर्षभः॥ आत्मानं दर्शयामास मुचुकुंदाय धी
मते ॥२३॥ तमालोक्य घनःश्यामं पीतकौशेयवाससं॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितं ॥२४॥ चतुर्भुजं रोचमानं वैज
यंत्या च मालया॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥२५॥ प्रेक्षणीयं नृलोकस्य सानुरागस्मितेक्षणं॥ अपीच्यवयसं मत्तमृ
गेंद्रोदारविक्रमं ॥२६॥ पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः॥ शंकितः शनकै राजा दुर्धर्षमिव तेजसा ॥२७॥ मुचुकुंद उवाच॥
को भवानिह संप्राप्तो विपिने गिरिगह्वरे॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके ॥२८॥ किंस्वित्तेजस्विनां तेजो भगवान्वा विभा
वसुः॥ सूर्यः सोमो महेंद्रो वा लोकपालो परोपि वा ॥२९॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभं॥ यद्बाधसे गुहाध्वांतं प्रदीपः प्रभ
या यथा ॥३०॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव॥ स्वजन्मकर्मगोत्रं वा कथ्यतां यदि रोचते ॥३१॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः
क्षत्रबंधवः॥ मुचुकुंद इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥३२॥ चिरप्रजागरश्रांतो निद्रयापहतेंद्रियः॥ शये स्मिन्विपिने कामं केना
प्युत्थापितोधुना ॥३३॥ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना॥ अनंतरं भवान् श्रीमान् लक्षितोमित्रशातनः ॥३४॥ तेज
न सा तेविषह्येण भूरि द्रष्टुं न शक्नुमः॥ हतौजसो महाभाग माननीयोसि देहिनां ॥३५॥ एवं संभाषितो राज्ञा भगवान्भूतभा
वनः॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥३६॥

पुरुषर्षभं विष्णुं। गुहाध्वांतमंतस्तमः ॥३०।३१॥ वयं त्विति वंशाभिप्रायेण बहुवचनं तेषहं मुचुकुंद इति प्रोक्तः। युवनाश्वो मांधातुपिता ॥३२।३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श्री॰३०
६

॥३७॥ क्वचित्कदाचित्कश्चिद्यद्यपि रजांसि विममे गणितवान् । तथापि न जन्मानि कर्माणि विनिमिते ॥३८॥३९॥४०॥४१॥४२॥ तेनिगमचक्षुषाग्नि
मित्तेन मयैव दग्धः ॥४३॥ अपूर्णोहमिति शेषाचितुं यद्यान्यैर्दत्तेषु यथा शोचति । नैवं मां प्राप्तः । मद्दत्तवराणामक्षयत्वादिति भावः ॥४४॥
अष्टाविंशतिमे युगे भगवानवतरिष्यतीति वृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ॥४५॥ त्वद्भक्तिरेक केवलं दुर्लभो का पास्तु तु न वरणीया

श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग सहस्रशः ॥ न शक्यंते नुसंख्यातुमनंतत्वान्मयापि हि ॥३७॥ क्वचिद्रजां
सि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥३८॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृ
प ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ॥३९॥ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम ॥ विज्ञापितो विरिंचेन पुराहं धर्म
गुप्तये ॥४०॥ भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥४१॥ वदंति वासुदेवेति वसुदे
वसुतं हि मां ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च ये द्विषः ॥४२॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोहं तवानुग्र
हार्थं गुहामेतामुपागतः ॥४३॥ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सल ॥ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥४४॥
मां प्रपन्नो जनः कश्चिन्न भूयोर्हति शोचितुं ॥४४॥ श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वितः ॥ ज्ञात्वाना
रायणं देवं गर्गवाक्यमनुस्मरन् ॥४५॥ मुचुकुंद उवाच ॥ विमोहितोयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ६
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ॥४६॥ ॥ ॥ ॥

न्या इत्याशयेन अभक्तानां संसारमष्टभिः प्रपंचयंस्तौति । विमोहित इति । हे ईश । योषित्पुरुषश्चेति द्विविधोप्ययं जनः त्वदीयया मा
यया विमोहितः । अतएव अनर्थं परमार्थसुखरूपं त्वां न पश्यतीति तथा । अतस्त्वां न भजति । किंतु परस्परं वंचितः सन् सुखेच्छया
दुःखानामेव प्रभवो येषु ॥ तेषु गृहेष्वेव सज्जत इति ॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच कामसुखे संस्कारादिद्वारापि संभवतीति भगवद्भजनं तु न मानुषव्यतिरेकेणेति मानुषत्वं प्राप्य तावद्भजनं तत्रेति स्पष्टं स्याह । लब्ध्वेति । अत्र कर्मभूमौ । अव्यंगं अविकलांगं । किंच । सति विषयसुखे मतिर्यस्य सः गृहमेवांधकूपस्तस्मिन्पततीति । यथा पशुस्तृणलुब्धोंऽधकूपे पततीति ॥४७॥ न केवलमस्य जनस्येयं गतिः । किं तु ममापि तथैवेत्याह । ममेति मर्त्यशरीरेऽस्मिन्नात्मबुद्धिर्यस्य तस्य मम । अत एव सुता दिष्वासज्जमानस्य ॥४८॥ उन्नद्धमदत्वं प्रपंचयति । कलेवर इति । घटकुड्यादिसदृशे दृश्ये मानिनि यत एवं तु दुर्मदोऽभवं

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोनघ । पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ॥४७॥ ममैष कालोऽजितनिष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः । मर्त्यात्मबुद्धेः सुतदारकोशभूष्वा सज्जमानस्य दुरंतचिंतया ॥४८॥ कलेवरेऽस्मिन्घटकुड्यसंनिभे निरूढमानो नरदेव इत्यहं । वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वागणयन्सुदुर्मदः ॥४९॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं । त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः ॥५०॥ ॥ ॥ ॥

अतो ममैष कालो निःफलो गत इति ॥४९॥ त्वं त्वागणयं तं त्वमाक्रमसीत्याह । प्रमत्तमिति । प्रमत्तमनवहितं लाभं तत्कर्म विगणय्य देहादिष्वासक्तमिति यावत् । कुतः प्रमत्तो इति कृत्यचिंतया एवमेव करणीयमिति मनोरथपरंपरया । मनोरथे भग्नेऽपि विषयेषु लालसं उत्सुकं प्राप्तौ विपुलप्रवृद्धो भस्तत्स्मायस्यतं । अंतकस्त्वमाक्रमसि यथा क्षुधा सृक्विणी लेलिहानोऽहिराखुं मूषकं भक्षयतीति ॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०उ०
७

किंच कालात्मना त्वयाऽभिपन्नो देह एवं भवतीत्याह। पुरेति। स एव गालादिभिर्भक्षितो विट् संज्ञितः स्तेरभक्षितः कृमिसंज्ञितः दग्धो भस्मसंज्ञितो भवति। इतिबुद्ध्या विचार्यैवंभूते शरीरे ममतां कुर्वतो जना हरिं नाराधयंतीति ये ते आत्मनि द्रोग्धारः आत्मघातिनः अतस्तेषां सततं तोयानेसहस्राणि बहूनि गर्भवासदुःखेन लब्ध्वापि च मानुषं लोकं सुखार्थं हि ये न भजंति विष्णुं ते वै मनुष्याः आत्मनि शत्रुभूता इति॥५१॥

किंचानंतकप्रभेदभोगा पिदिवि जपितो राज्ञो पि पारतंत्र्यदुःखं तदवस्थमेवेत्याह। निर्जित्येति। अभूतविग्रहः। अविद्यमानसंग्रामः। पूर्वं ये समास्तै राजभिर्वंदितोपि। मिथुनी भाव सुखे मैथुनपरं ये पुत्रेषु योषितां गृहेषु क्रीडामृग इत्यस्ततो नीयते॥५२॥ किं

पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नरदेवसंज्ञितः॥ स एव कालेन दुरत्ययेन ते कलेवरो विड्कृमिभस्मसंज्ञितः॥५१॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः॥ गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते॥५२॥ करोति कर्माणि तपःसुनिष्ठितो निवृत्तभोगस्तदपेक्षया ददत्॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते॥५३॥ भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः॥ सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः॥५४॥ ॥ ॥ ॥ ॥

च तत्रापि तत्साकुलस्य न भोगक्षण कश्चिदस्तीत्याह। करोतीति। तपस्यध्ययनब्रह्मचर्यादौ सुनिष्ठितः। पुनश्च स्वराडिंद्रः स्यामिति। यद्वा जन्मांतरेप्येवमेव चक्रवर्ती स्यामिति॥५३॥ तदेवमष्टभिः श्लोकैरीश्वरबहिर्मुखानां संसारं प्रपंच्य भक्त्या तंत्रिरुक्तिक्रममाह। भवापवर्ग इति भो अच्युत भ्रमतः संसरतो जनस्य यदा त्वदनुग्रहेण भवस्य बंधस्य अपवर्गः अंतो भवेत्। प्राप्तकालः स्यात्। तदा सतां संगमो भवेत्। यदा च सत्संगमो भवत्। तदा सर्वसंगनिवृत्त्या कार्यकारणनियंतरि त्वयि भक्तिर्भवति।

७

मम तु सत्संगात्सर्वमेव राज्यादिसंगविच्छेदो जातः सोयं त्वया महाननुग्रहः कृत इत्याह। मन्य इति। ते त्वया साधुभिर्विवेकिभिः। तपसेवनं
प्रवेष्टुमिच्छद्भिः। स्वयं सकृदुपलभ्यमाने प्रार्थ्यत इति॥५५॥ तदेवं विषयसेवामार्गं भवत्सेवामार्गं च विविच्य वरान्वृणीष्वेति यदुक्तं तत्रो
त्तरमाह। नकाम्य इति। अकिंचना निवृत्ताभिमानाः। आर्यो विवेकी॥५६॥ रजस्तमसत्वगुणैरनुबध्यन्त इति तथा ताराश्वरीयादि रामानु
मरणादिधर्मादिरूपा॥ विसृष्टः सपरं पुरुषमीश्वरं ज्ञप्तिमात्रं त्वानघनं कुतः निरंजनो त्वत्कृत निर्गुणं। तदपि कुत अद्वयो। अत एवाक्षरं त्वां

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबंधापगमो यदृच्छया॥ यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षुद्भिरखंडभूमिपैः॥
मये ॥५५॥ न कामयेन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो॥ आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबंध
धनं॥५६॥ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमः सत्वगुणानुबंधनाः॥ निरंजनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पु
रुषं व्रजाम्यहं॥५७॥ चिरमिह वृजिनार्तस्तप्यमानोनुतापैरवितृषषडमित्रोऽलब्धशांतिः कथंचित्। शरणद समुपेत
स्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश॥५८॥

शरणं व्रजामीति॥५७॥ भुंक्ष्व तावद्भोगान्कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते चिरमि
ति। वृजिनैः। कर्मफलैः। आर्तः। पुनस्तादृशसनादिभिस्तप्यमानः। तथापि अवितृप्तषडमित्रः। तृषा तृष्णा न विगता तृषाः षडमित्री
शत्रव इंद्रियाणि यस्य सः। अत एवालब्धशांतिः। कथंचिद्दैववशेन लब्धशांतिरिति वा॥ शरणं त्वत्कृतानं तद्ददातीति तथा॥ हे
शरणद समुपेतप्राप्तोहं। अशोकत्वे हेतुः। अभयं तत्रापि हेतुः। अमृतं। आपन्नं आपदा या संपाहीति॥५८॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग० उ०
८

॥५९॥ अप्रमादाय प्रमादाय न भवसे वा कुत इत्यत आह । न धीरिति । एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भिद्यते नासज्जते इत्य
र्थः ॥६०॥ अतिरेकमाहायुंजानानामिति उत्थितं विषयाभिमुखं ॥६१॥ तुभ्यं तव ॥६२॥ युक्तो भासि न भीषयं तपसि लोकसंग्रहे प्रवर्त्तये

श्रीभगवानुवाच ॥ सार्वभौम महाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥५९॥ प्रलोभितो व
रैर्यत्त्वमप्रमादाय विद्धि तत् ॥ न धीरेकांतभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥६०॥ युंजानानामभक्तानां प्राणायामादि
भिर्मनः ॥ अक्षीणवासनं राजन् दृश्यते पुनरुत्थितं ॥६१॥ विचरस्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेवं नित्य
दा तुभ्यं भक्तिर्मय्यनपायिनी ॥६२॥ क्षात्रधर्मस्थितो जंतून् न्यवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसा जह्यघं म
दुपाश्रितः ॥६३॥ जन्मन्यनंतरे राजन् सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलं ॥६४॥ इति श्रीभा
गवते महापुराणे दशमस्कंधे एकपंचाशत्तमोऽध्यायः ॥५१॥ ॥छ॥ ॥ श्रीशुक उवाच ॥ इत्थं सोऽनुग्रहीतोंग कृष्णेने
क्ष्वाकुनंदनः ॥ तं परिक्रम्य संनम्य निश्चक्राम गुहामुखात् ॥१॥ संवीक्ष्य क्षुल्लकान्मर्त्यान् पशून्वीरुद्वनस्पतीन् ॥ म
त्वा कलियुगं प्राप्तं जगाम दिशमुत्तरां ॥२॥ तपःश्रद्धायुतो धीरो निःसंगो मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गं
धमादनं ॥३॥ बदर्याश्रममासाद्य नरनारायणालयं ॥ सर्वद्वंद्वसहः शांतस्तपसाराधयद्धरिं ॥४॥ ॥ ॥ ८

तिष्ठ क्षात्रधर्मेति ॥६३॥६४॥ इति दशमे एकपंचाशत्तमः ॥५१॥ ॥ द्विपंचाशत्तमे धावन् भयादिव गतां पुरीं ॥ आनयोदत संदेशं रु
क्मिण्या द्विजवर्णितं ॥१॥ क्षुल्लकानल्पप्रमाणान् ॥२॥ तपसि श्रद्धायुतः ॥३॥ तत्र बदर्याश्रमं ॥४॥ ॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

निन्येऽनयन्मार्गे चलति स्म ॥५॥६॥ वेगरभसं वेगोद्रेकं ॥७॥ भीरुभीतवत् भीरोरपि भीतवत् अतिभीतवदित्यर्थः ॥ चेरतुः पलायेतां बहुयोज
नं देशं ॥८॥ अप्रमाणवित् प्रमाणं प्रियत्ततां तत्र वेत्तीति तथा ॥९॥ तुंगं एकादशयोजनोच्छ्रितां प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षण इत्याख्या
यस्य तौ तदाह । भगवन्निंद्रः ॥१०॥ तत्र विचिन्वन्नपि तयोः पदं निलीनयोः स्थानमनधिगम्य ॥११॥ ततो गिरेः दशाच एकं च पादानि योजना

भगवान्पुनराव्रज्य पुरीं यवनवेष्टितां ॥ हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनं ॥५॥ नीयमाने धने गोभिर्नृभिश्चाच्यु
तचोदितैः ॥ आजगाम जरासंधस्त्रयोविंशत्यनीकपः ॥६॥ विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ ॥ मनुष्यचेष्टामाप
न्नौ राजन्दुद्रुवतुर्द्रुतं ॥७॥ विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् ॥ पद्भ्यां पद्मपलाशाभ्यां चेरतुर्बहुयोजनं ॥८॥ प
लायमानौ तौ दृष्ट्वा मागधः प्रहसन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥ प्रद्रुत्य दूरं संश्रांतौ तुंगमारु
हतां गिरिं ॥ प्रवर्षणाख्यं भगवान्नित्यदा यत्र वर्षति ॥१०॥ गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप ॥ ददाह गिरिमेधोभिः
समंतादग्निमुत्सृजन् ॥११॥ तत उत्पत्य तरसा दह्यमानतटादुभौ ॥ दशैकयोजनात्तुंगान्निपेततुरधो भुवि ॥१२॥
अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ॥ स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥१३॥ सोऽपि दग्धाविति मृषा मन्वानो बल
केशवौ ॥ बलमाकृष्य सुमहन्मगधान्मागधो ययौ ॥१४॥ आनर्ताधिपतिः श्रीमान् रैवतो रेवतीं सुतां ॥ ब्रह्मणा चो
दितः प्रादाद्बलायेति पुरोदितं ॥१५॥ भगवानपि गोविंद उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥१६॥
प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥१७॥ ॥ ॥

नितावदुत्तुंगान्मागधसंरोधदेशात् अतिक्रम्य परतोऽधो निपेततुः ॥१२॥१३॥१४॥ श्रीकृष्णस्य विवाहं निरूपयितुं बलदेवविवाहं नव
मस्कंधोक्तमनुस्मारयति । आनर्तेति ॥१५॥ मात्रां कलां ॥१६॥ गरुडो यथा देवान्मथ्य सुधामहरत्तथेति । ॥१७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०३० राक्षसोक्तद्वहरणादिति स्मृतेः। राक्षसमध्येति चलद्वुत्तया राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं॥१८॥ विरोचं श्रोतुमिच्छा
९ मः॥१९॥ श्रवणो सुखस्यमाविकर्णत ब्रह्मन्निति। पुरायो माहात्मा फलाः॥ माधवी श्रुति सुखवालोकस्य मलापहा श्वाश्रृण्वानः श्रुए एवान्निस
र्थः। श्रुतं श्रुतसारवान्। श्रुएव त्रिय र्थः श्रुतं श्रुतसारवित्। नित्यनूतना प्रतिक्षणमपाश्रयत्वव प्रतीयमानाः॥२०॥२१॥
राजोवाच॥ भगवान् भीष्मकसुतां रुक्मिणीं रुचिराननां॥ राक्षसेन विधानेन उपयेम इति श्रुतं॥१८॥ भगवन् श्रोतुमि
च्छामि कृष्णस्यामिततेजसो। यथा मागधशाल्वादीन् जित्वा कन्यामुपाहरत्॥१९॥ ब्रह्मन् कृष्णकथाः पुण्या माध्वीर्लो
ण्व कमलापहाः॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः॥२०॥ श्रीशुक उवाच॥ राजासीद्भीष्मको नाम विदर्भाधिपति
र्महान्॥ तस्य पंचाभवन्पुत्राः कन्यैका च वराननाः॥२१॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः॥ रुक्मकेशो रुक्ममाली रुक्मिण्ये ग्रि
रुक्मि षां स्वसा सती॥२२॥ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रियः॥ गृहागतैर्गीयमानास्तं मेने सदृशं पतिं॥२३॥ तां
बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे॥२४॥ बंधूनामिच्छतां दातुं कृष्णा
य भगिनीं नृप॥ ततो निर्वार्य कृष्णद्विड्रुक्मी चैद्यममन्यत॥२५॥ तदवेत्यासितापांगी वैदर्भी दुर्मना भृशं॥ विचिंत्या
प्तं द्विजं कंचित्कृष्णाय प्राहिणोद्द्रुतं॥२६॥ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः॥ अपश्यदाद्यं पुरुषमासीनं कांचना
सने॥२७॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात्॥ उपवेश्यार्हणैश्चक्रे यथात्मानं दिवौकसः॥२८॥ तं भुक्तवं
तं विश्रांतमुपगम्य सतां गतिः॥ पाणिनाभिमृशन्पादावव्यग्रस्तमपृच्छत॥२९॥ ॥ ॥ ॥ ९
॥२२॥२३॥२४॥ चैद्यममन्यत तत्स्यावरमित्यर्थः॥२५॥ अवेत्य ज्ञात्वा। असितापांगी सुनीलकटाक्षी। कृष्णाय कृष्णमाने
तुं प्रेषयामास॥२६॥ प्रतीहारैः द्वारपालैः॥२७॥ आत्मानं श्रीकृष्णं॥२८॥ अभिमृशन् शनैः संमर्दयन्॥२९॥ ॥ ॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स धर्मोस्य ब्राह्मणस्याखिलकामदोग्ध्री। यद्वा स ब्राह्मणोस्य विश्वस्याखिलकामधुगिति॥३०॥३१॥ लोकान्नाप्नोति लोकात् लोकां
तरं पर्यटति। नैकत्र निर्वृत्तास्ति वर्ततीत्यर्थः। नाप्नोतीति पाठे सुरेश्वरोपि भूत्वा लोकान्नाप्नोति। उत्तमलोकान्नाप्नोपि अप्राप्त इव क्लिश्य
तीत्यर्थः॥ शेते सुखमास्ते इत्यर्थः। तदेवाह सर्वांगेषु वाक्पाण्यादिषु। विज्वरस्तापरहितः॥३२॥ स्वलाभसंतएव प्राप्तो लाभः। आ

कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः॥ वर्त्तते नातिकृच्छ्रेण संतुष्टमनसः सदा॥३०॥ संतुष्टो यर्हि वर्त्तेत ब्राह्म
णो येन केनचित्॥ अहीयमानस्त्वात् धर्मात्स ह्यस्याखिलकामधुक्॥३१॥ असंतुष्टो सकृल्लोकानाप्नोत्यपि सुरे
श्वरः॥ अकिंचनोपि संतुष्टः शेते सर्वांगविज्वरः॥३२॥ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान्॥ निरहंका
रिणः शांतान्नमस्ये शिरसाऽसकृत्॥३३॥ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः॥ सुखं वसंति विषये पा
ल्यमानाः स मे प्रियः॥३४॥ यतस्त्वमागतो दुर्गं निस्तीर्य हयच्छया॥ सर्वं नो ब्रूहि गुह्यं चेत्किं कार्यं करवाम ते॥३५
एवं संपृष्टसंप्रश्नो ब्राह्मणः परमेष्ठिना॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत्॥३६॥ ॥ ॥

त्मलाभो वातो वा तोनसंतुष्टान् पूर्णान्। साधून्स्वधर्मनिष्ठान्॥३३॥ यस्य राज्ञो विषये देशे॥३४॥ यतस्थानात्। यदृच्छया यस्य
कार्यस्येच्छया। दुर्गं समुद्रं॥३५॥ संपृष्टसंप्रश्नः पृष्टव्योर्थो येन सः। परमेष्ठिना परमेश्वरेण कृष्णेनाभिप्रेतं रुक्मिण्या प्रोषितमित्यादि स
र्वं॥३६॥ रुक्मिण्या स्वयमेकांते लिखितां दत्तपत्रिकां॥ मुद्रामुन्मुच्य कृष्णाय प्रेमपत्रिं न्यदर्शयत्॥१॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰शं॰उ॰ १० ब्राह्मणः श्रीरुक्मिण्यानुज्ञया वाचयति। श्रुत्वेति। अयमर्थः। हे अच्युत। हे भुवनसुंदर ये सौंदर्यं दर्शयति। क्व तव महिमा क्व चाहं रूपकुलशी
लादियुक्तापि। तथापि त्वय्यपगतत्रपायस्मान्मे चित्तं त्वय्याविशति आसज्जते॥ तत्कुत इत्यत्राह। शृण्वतां कर्णविवरैरंतः प्रविश्यांगतापं
अंगेति पृथक् संबोधनं वा हरतस्तव गुणान् श्रुत्वा तथा दृशिमतां चक्षुष्मतां दृशां अखिलार्थलाभात्मकं रूपं च श्रुत्वेति। ॥३७॥ अहो कुल
कन्या नाम इदमतिधार्ष्ट्यमिति मा शंकीः यतः हे का त्वेति हे मुकुंद हे नृसिंह नरश्रेष्ठ का नाम कन्या कुलवती। तथा महती पुरुगुणोदारा त
था धीरा धीमती॥ त्वां पतिं न वृणीत अपि त्वेवं कैयं दोषशंकेति भावः। कथंभूतं गुणशीलादिभिरात्मनैव तुल्यं निरुपममपि सर्वथा॥
श्रीरुक्मिण्युवाच॥ श्रुत्वा गुणान् भुवनसुंदर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतोंगतापं॥ रूपं दृशां दृशिमतामखिलार्थला
भं त्वय्यच्युताविशति चित्तमपत्रपं मे॥ ३७॥ का त्वा मुकुंद महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यं॥ धी
रा पतिं कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोभिरामं॥ ३८॥ तन्मे भवान् खलु वृतः पतिरंग जायामात्मार्पित
श्च भवतोत्र विभो विधेहि॥ मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष॥ ३९॥ पूर्तेष्टदत्त
नियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः॥ आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुता॥
द्रविणं द्रव्यसंपत् धाम प्रभावः। तथा नरलोकस्य मनसोऽभिरामो अभिरमणं यस्मात्। किंच। काले विवाहावसरे॥ ३८॥ हे विभो तत्तस्मा
न्मे मया भवान् खलु पतिर्वृत॥ आत्मा च भवतोर्पितः। अतस्त्वमत्रागत्य मां भवतो जायां विधेहि। विपक्षबाधकं द्योतयंस्त्वाह। मा वी १०
रभागमिति। वीरस्य तव भागं आरात् शीघ्रं एत्य आगत्य चैद्यो माभिमर्शतु मास्पृशतु मृगपतेर्बलिं गोमायुः शृगाल इवेति। ॥३९॥
अनेन जन्मकृतैः सुकृतैरिदमेव फलमिति प्रार्थयते पूर्तेति। पूर्तं कूपादि। इष्टं अग्निहोत्रादि। दत्तं हिरण्यादि नियमस्तीर्थस्नानादि। व्रते

चैद्याय बंधुभिरर्पितायां त्वयि किमधुना करणीयं इत्यपेक्षायामाह। श्वोभाविनीति हे अजित। श्वोभाविनि उद्वहने। प्रथमं गुप्त अलक्षि
त एवागत्याय श्वोस्तनायतिभिरपि वृतस सन्। चैद्यादिबलं निर्मथ्य प्रसह्य हठात्। त्वद्वीर्यं प्रभावदर्शी न पुनर्वेत्तुशुल्कं वैवाहिकं देयं य
स्यास्तां मां मनैन राक्षसविधिना उद्वह इति उपदेशरहस्यं॥४१॥ ननु भवतु चैद्यादिबलप्रमथनं अंतःपुरमध्यगतां त्वां कथमुद्वह
रणे त्वद्बंधुवधोपि प्रसज्येतेत्यत आह। न पुरे निपुराद्बहिर्वर्तमानां गिरिजामंबिकां। अंबिकागृहादेवयात्राहरणं सुकरमिति भावः॥४२
ननु किममनेनानर्थकारिणा निर्बंधेन चैद्योपि तावत्प्रख्यातगुणकर्मा योग्य एव वर इति तत्राह। यस्येति। हे अंबुजाक्ष यस्य भ

श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य पृतनापतिभिः परीतः॥ निर्मथ्य चैद्यमगधेंद्रबलं प्रसह्य मां राक्षसे
न विधिनोद्वह वीर्यशुल्कां॥४१॥ अंतःपुरांतरचरीमनिहत्य बंधून् त्वामुद्वहे कथमिति प्रवदाम्युपायं॥ पूर्वेद्युरस्ति महती
कुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात्॥४२॥ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्युमापतिरिवात्मतमो
पहत्यै॥ यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्॥४३॥ ब्राह्मण उवाच॥ इत्येते गुह्यसं
न देशा यदुदेव मया हृताः॥ विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरं॥[illegible]॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिणीसं
देशो नाम द्विपंचाशत्तमोध्यायः॥५२॥

यतोंघ्रिपंकजरजोभिः स्नपनमात्मनस्तमोपहत्यै उमापतिरिव महांतो वांछंति। तस्य भवतः प्रसादं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवा
सादिभिः कृशानसून् प्राणान् जह्यां त्यजेयां ततः किं स्यादत आह। शतजन्मभिरिति। एवमेव वारं वारं यावच्छतजन्मभिः स्यात् तव प्रसादः स्या
दिति॥४३॥ अत्र यत्कर्तुं करणीयं तद्विमृश्य क्रियतां तदनंतरमेव क्रियतामिति॥४४॥ इति दशमस्कंधे टीकायां द्विपंचाशत्तमोध्यायः॥५२॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श्री॰ उ॰
११

त्रिपंचाशत्तमे गत्वा विदर्भान्द्रुतेहितः॥ रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां बलात्॥१॥१॥ निद्रायास्त्वलाभे कारणांतरं वेदेति मयाऽ
कथितमप्यहं जानामीति॥२॥ आनायिष्ये आनेष्यामि। राजन्यापसदान्राजसु हीनान्। उन्मथ्यानयने दृष्टांतः एधवदिति॥३॥ उद्वाह
र्क्षमितिपरश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय तस्यां रात्र्यां प्रस्थाय प्रातर्विदर्भदेशानगमत्। शेषो भाविनि वपाजितो द्वहे ने विदर्भानामः
समयेस्येतिक्रविपणी संदेशात्॥४॥ सैन्यइत्यादीनि चत्वारि अश्वनामानि॥५॥ पुत्रस्य रुक्मिणः स्नेहेन तद्वशमनुगच्छतीति तथा।
श्रीशुक उवाच॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः॥ प्रगृह्य पाणिना पाणिं प्रहसन्निदमब्रवीत्॥१॥ श्रीभगवानुवाच॥ तथा
हमपि तच्चित्तो निद्रां च न लभे निशि॥ वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः॥२॥ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे
मत्परामनवद्यांगीमेधसोग्निशिखामिव॥३॥ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः॥ रथः संयुज्यतामाशु दारुकेत्याह सार
थिं॥४॥ स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः॥ युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः॥५॥ आरुह्य स्यंदनं शौरिर्द्विजमा
रोप्य तूर्णगैः॥ आनर्तादेकरात्रेण विदर्भानगमद्धयैः॥६॥ राजा स कुंडिनपतिः पुत्रस्नेहवशं गतः॥ शिशुपालाय स्वां कन्यां दास्य
न् कर्माण्यकारयत्॥७॥ पुरं संमृष्टसंसिक्तमार्गरथ्याचतुष्पथं॥ चित्रध्वजपताकाभिस्तोरणैः समलंकृतं॥८॥ स्रग्गंधमाल्या
भरणैर्विरजोंबरभूषितैः॥ जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः॥९॥ पितॄन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप॥ भोजयि
त्वा यथान्यायं वाचयामास मंगलं॥१०॥
अनेन शिशुपालेन मिरुविंद्योनयति। कर्माणि पुरालंकारपितृदेवार्चनादीनि॥७॥ तान्येवाह पुरमित्यादिचतुर्भिः। संमृष्टाः संसिक्ताश्च ११
मार्गादयो यस्मिन्। तच्चित्रध्वजेषु पताकाताभिः समलंकृतमाकारयत्॥८॥ स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थो द्रष्टव्यः। यद्वा स्रग्गं
धमाल्याभरणानि बिभ्रतीति तथाभूतैः॥ तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टं तथा श्रीमद्भिर्गृहैश्च जुष्टं॥९॥ यथान्यायं अन्यांश्चकन्यां प्रतिमं

भवीता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतं कौतुके नवविवाहसूत्रेण मंगलं यस्यास्तां । अहतं नवीनं भूषणोत्तमैश्च भूषितां ॥ ११ ॥ वध्वास्तस्याः कन्यायाः अथर्ववित् अथर्वणमंत्रवि
त् ॥ १२ ॥ १३ ॥ अभ्युदये उचितं ॥ १४ ॥ ततश्च तुरंगसैन्यैः परीतः परिवृतः । कुंडिनं भीष्मकस्य पुरं ययौ मदं व्यवंते मदच्युतः तैः स्यंदनैः रथैः हेम

सुस्नातां तां सुदतीं कन्यां कृतकौतुकमंगलां ॥ अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ॥ ११ ॥ चक्रुः सामर्ग्यजुर्मंत्रैर्वध्वा धु
रक्षां द्विजोत्तमाः ॥ पुरोहितोथर्वविद्वै जुहाव ग्रहशांतये ॥ १२ ॥ हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ॥ प्रादाद्धे
नूश्च विप्रेभ्यो राजा विधिविदां वरः ॥ १३ ॥ एवं चेदिपती राजा दमघोषसुताय वै ॥ कारयामास मंत्रज्ञैः सर्वमभ्युदयोचि
तं ॥ १४ ॥ मदच्युद्भिर्गजानीकैः स्यंदनैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ ॥ १५ ॥ तं वै विदर्भाधिप
तिः समभ्येत्याभिपूज्य च ॥ निवेशयामास मुदा कल्पितान्यनिवेशने ॥ १६ ॥ तत्र शाल्वो जरासंधो दंतवक्त्रो विदूरथः ॥ आ
जग्मुश्चैद्यपक्षीयाः पौंड्रकाद्याः सहस्रशः ॥ १७ ॥ कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुं ॥ यद्यागत्य हरेल्लक्ष्मी
रे रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥ योत्स्यामः संहतास्तेन इति निश्चितमानसाः ॥ आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः
॥ १९ ॥ श्रुत्वैतद्भगवान्रामो विपक्षीयनृपोद्यमं ॥ कृष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः ॥ २० ॥ बलेन महता सार्द्धं भ्रातृ
स्नेहपरिप्लुतः ॥ त्वरितः कुंडिनं प्रागाद्गजाश्वरथपत्तिभिः ॥ २१ ॥ भीष्मकन्या वरारोहा कांक्षंत्यागमनं हरेः ॥ प्रत्यापत्तिम
पश्यंती द्विजस्याचिंतयत्तदा ॥ २२ ॥

रचिता माला विद्यंते येषु तैः ॥ कल्पितं निर्मितं यदन्यन्निवेशनं तस्मिन् ॥ १६ ॥ १७ ॥ यदि श्रीलक्ष्मीं हरेदिति शंकिता कन्यां साधयितुमि
त्यर्थः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ सूर्योदये सर्वमेवोत्सुकत्वेन रुक्मिण्यचिंतयदि याह भीष्मकन्येति । प्रत्यापत्तिं प्रत्यागमनं ॥ २२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ०
१२

त्रियामाशाविस्तावन्मात्रेणां तरितः। अल्पराधसमंदभाग्यायाः॥२३॥ जुगुप्सितं धार्ष्ट्यादि। अपीति शंकायां नायातीति हि हेतोर्धाम इति॥
अस्यार्थः॥ आदौ कृतो धामतात्तं न प्रस्थापितवान्। प्रस्थानावसरे चाकिंचिन्मयि जगुप्सितं मत्वा प्रस्थानं च अतः सोपि द्विजो नूनं नायाती
ति॥२४॥ यद्वा ततो निर्गतोपि श्रीकृष्णेन मद्देववैमुख्यात्कुत्चिन्मात बद्धो भवेदित्याह। दुर्भगाया इति॥२५॥ कालज्ञो नाधुनापि गोविंदागम
नकाल इति मन्वाना किंचिद्दास्तता चिंतासती चिंतास्तत्र्वे लोचने निमीलितवतीत्यर्थः॥२६॥ प्रियभाषिणा प्रियस्य वक्ता॥२७॥ पुरोपव

अहो त्रियामांतरित उद्वाहो मेल्पराधसः॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणं॥२३॥ सोपि नावर्तते द्यापि मत्संदेशहरो द्वि
जः॥ अपि मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितं॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः॥२४॥ दुर्भगाया न मे धाता
नानुकूलो महेश्वरः॥ देवी वा विमुखा गौरी रुद्राणी गिरिजा सती॥२५॥ एवं चिंतयती बाला गोविंदहृतमानसा॥ न्यमी
लयत कालज्ञा नेत्रे चाश्रुकुलाकुले॥२६॥ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप॥ वाम ऊरुर्भुजो नेत्रमस्फुरन्प्रि
यभाषिणः॥२७॥ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः॥ अंतःपुरचरीं देवीं राजपुत्रीं ददर्श ह॥२८॥ सा तं प्रहृष्ट
वदनमव्यग्रात्मगतिं सती॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छत् शुचिस्मिता॥२९॥ तस्या आवेदयत्प्राप्तं शशंस यदुनंदनं॥ भा०सं ६
उक्तं च सत्यवचनमात्मोपनयनं प्रति॥३०॥ १२

नं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्रापितः पां कथयेत्यादिनेष्टः॥२८॥ न व्यग्रा आत्मनो देहस्य गतिर्यस्य तं दूतस्य लक्षणं तत्कार्यसूच
कमभिजानातीति तथा॥२९॥ तस्यै प्राप्तं यदुनंदनं आवेदितवान्॥ तच्छशंस सा आत्मोपनयनं प्रति॥ आत्मनां स्वयं कृष्णस्यान
यनं प्रति। तेनाद्विजेन सत्यवचनं प्रोक्तमिति। आत्मनः प्राणेश्वरस्येति वा यद्वा आत्मनस्तस्या उपनयनं प्रति श्रीकृष्णेन यदुक्तं स
त्यवचनं। तां मान्य इत्यादि तच्छशंस अवर्त्तयदित्यर्थः॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं श्रीकृष्णं। अस्मिन्कार्ये सर्वस्वार्पणमपि अपर्याप्तमिति तदुचितं प्रियमपरं नपश्यंती तदा केवलं तं नाम पश्चाद्बुद्धुदिवसर्थः। यद्वा मां
प्रियं ये नमंति ते तावत्सर्वसंपदामास्पदं भवंति किंपुनर्मेपि प्रणतायामिति ततो धिकमन्यत्प्रियं नपश्यंती ननामेति॥२१॥२२॥२३॥प
ह्लपतिरिसनेन श्रीकृष्णोवाटकन्या मे ह्वो दुमेवागतः स्यादिति वरोचितेन विधिना सपपूज्य दिति सचितं। यथा यथावत्॥२४॥समे
तानां राज्ञां मध्ये वीर्य्यादानतिक्रम्य तं तं समर्हितवानित्यर्थः॥२५॥ श्रीकृष्णेमाविकर्मस्वेचर्कं जनानुरागादर्शयति॥ कृष्णमागत

कृष्णौ सम — तमागतं समाज्ञाय वैदर्भी हृष्टमानसा॥ नपश्यंती ब्राह्मणाय प्रियमन्यं ननाम सा॥२१॥ प्राप्तो श्रुत्वा स्वदुहितुरुद्वाहप्रेक्ष — न ना
रामकृष्णौ — णोत्सुकौ॥ अभ्ययात्तूर्यघोषेण रामकृष्णौ॥२२॥ मधुपर्कमुपानीय वासांसि विरजांसि सः॥ उपायनान्यभीष्टानि विधि — र्च
वत्समपूजयत्॥२३॥ तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः॥ ससैन्ययोः सानुगयो रातिथ्यं विदधे यथा॥२४॥ एवं
राज्ञां समेतानां यथावीर्यं यथावयः॥ यथाबलं यथावित्तं सर्वैः कामैः समर्हयत्॥२५॥ कृष्णमागतमाकर्ण्य विदर्भपुरवा
सिनः॥ आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपंकजं॥२६॥ अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा॥ असावप्यनव — यै
नरा भुवा — द्यात्मा भैष्म्याः समुचितः पतिः॥२७॥ किंचित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत्॥ अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिम
च्युतः॥२८॥ एवं प्रेमकलाबद्धा वदंति स्म पुरौकसः॥ कन्या चांतःपुरात्प्रागाद्भटैर्गुप्तांबिकालयं॥२९॥ ॥ ॥

मिति त्रिभिः॥२६॥ अस्यैव रुक्मिण्यैव अर्हयोग्या असावेव भैष्म्या एव समुचित एवेति षडवधारणानि। तत्रैकस्मिन् व्यतिरेकप्रदर्शी
नमुपलक्षणार्थं नापरेति न चावाक्यभेददोषः। अनूद्यविधेयभेदे न विधित्रानामेव वाक्यानां सहप्रयोगात्। अहं संभार्थं इत्यादि
वदिति॥२७॥ अयमेवानुग्रह इति निर्दिशति। गृह्णातिति॥२८॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इशी०उ १२

तस्यागमनं विशिनष्टि द्वयेनपद्भ्यामिति॥४०॥४१॥ अपिच मृदंगेत्यादि। जघ्निरे आहता इत्यर्थः। वारमुख्यागणिकोत्तमाः॥४२॥४३॥ उप
स्पृश्य आचम्य॥४४॥ प्रवयसो वृद्धाः। भवान्वितामिति भवस्यापसर्जनं न त्वं स्त्रीकर्मान्वितमुक्तं॥४५॥ तस्य इति रुक्मिण्यातदेवदर्शयेत्

पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवं॥ साचानुध्यायती सम्यक् मुकुंद चरणांबुजं॥४०॥ यतवाङ्मातृभिः सार्द्धं स
खीभिः परिवारिता॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः॥४१॥ मृदंगशंखपणवास्तूर्यभेर्यश्च जघ्निरे॥ नानोप
पत्न्यः हारबलिभिर्वारमुख्याः सहस्रशः॥४२॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यश्च लंकृताः। गायंतश्च स्तुवंतश्च गायकावाद्यवा
दकाः॥ परिवार्य वधूं जग्मुः सूतमागधबंदिनः॥४३॥ आसाद्य देवसदनं धौतपादकरांबुजा॥ उपस्पृश्य शुचिः शांता
प्रविवेशांबिकांतिकं॥४४॥ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः॥ भवानीं वंदयांचक्रुर्भवपत्नीं भवान्वितां॥४५॥
नमस्ये त्वां बिके भीक्ष्णं स्वसंतानयुतां शिवां॥ भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदतां॥४६॥ अद्भिर्गंधाक्षतैर्धूपै
र्वासस्रग्माल्यभूषणैः॥ नानोपहारबलिभिः प्रदीपावलिभिः पृथक्॥४७॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपू
जयत्॥ लवणापूपतांबूलकंठसूत्रफलेक्षुभिः॥४८॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः॥ ताभ्यो देव्यै नमश्
चक्रे शेषां च जगृहे वधूः॥४९॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात्॥ प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना

मंत्रः। स्वसंतानयुतां गणेशादिसहितं॥ आत्माराम सौकथं वसतिर्भवेदिति चेदत आह। तदनुमोदतामिति भवती श्रीरूपा एव वा १२
॥४६॥ स्रग्गंधादिभिरंबिकां समपूजयत्॥४७॥ तथा विप्रस्त्रियोपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति॥४८॥ शेषां निर्माल्यं॥४९॥
मुनिव्रतं मौनं भृत्यां सखीं॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां॥ विलोक्य वीरा मुमुहुरिति तृतीय श्लोके नान्वयः॥ श्यामां॥ अजातरजस्कं॥ कुंतलेभ्यः शंकिते इव चपले ईक्षणे यस्यास्तां॥ ५१॥ द्विजा एव कुंदानां कुड्मलानि मुकुलानि बिंबफलवत् यो अधरस्तस्य द्युतिभिः शोणायमानानि यस्यास्तां कलहंसगामिनी॥ भात इत्यर्थः नूपुरं सिंजत्कला नूपुरं च तस्य धामदीप्तिः तेन शोभितुं शीलमस्य ते न पदा चलंतीं॥ न केवलं मुमुहुः पेतुश्चेत्याह॥ यात्राभिषेण हरये

तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां॥ श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणां॥ ५१॥ शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां॥ पदा चलंतीं कलहंसगामिनीं सिंजत्कलानूपुरधामशोभिना॥ विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः॥ ५२॥ यां वीक्ष्य ते नृपतयस्तदुदारहाससव्रीडवीक्षहृतचेतस उज्झितास्त्राः॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभां॥ ५३॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा॥ उत्सार्य वामकरजैरलकानपांगैः प्राप्तान् ह्रियैक्षत नृपान् ददृशेऽच्युतं सा॥ ५४॥ तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षतां॥ रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः॥ ५५॥ ततो ययौ रामपुरोगमैः शनैः शृगालमध्यादिव भागहृद्धरिः॥ तं मानिनः स्वाभिभवं यशःक्षयं परे जरासंधवशा न सेहिरे॥ ५६॥ अहो धिगस्मान् यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव॥ ॥५७॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिणीहरणे त्रिपंचाशत्तमोध्यायः॥ ५३॥ ॥छ॥ ॥छ॥ ॥छ॥

स्वलावण्यं समर्पयंतीं वीक्ष्य क्षितौ पेतुः॥ ५३॥ सा तान् प्राप्तान् ह्रिया ऐक्षत तदैवाच्युतं च ददर्श इत्युत्तरेणान्वयः॥ चलपद्मकोशतुल्यौ चरणौ चालयंती॥ ५४॥ सुपर्णलक्षणं गरुडध्वजं॥ ५५॥ हरिः सिंहः॥ ५६॥ असहमानानां तेषां क्रोशमाह॥ अहो धिगस्मानात्तधन्वनां यतोस्माकं यशो गोपैर्हृतमिति॥ ५७॥ दशमे त्रिपंचाशत्तमः॥ ५३॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं० उ० चतुःपंचाशत्तमे तु जिताशाल्वो ऽपि संगरात्॥ रुक्मिणं च विरूप्याथ भैष्म्याः पाणिं पुरे ग्रहीत्॥१॥ तती यहो धिगस्मान्निस्ये वं वदं तः सु
१४ संरब्धोक्रोधाविष्टाः दंशिता ह्ल तसन्नाहाः परिक्रांताः परिवेताः अन्वीतुः अचधावन्॥१॥ विस्फूर्ज्य टंकारयित्वा॥२॥ परेषां शरणं
बाहुल्ये यादवानामचलत्वे दृष्टांतः मेघ इति॥३॥ ऐक्षत ऐक्षत॥४॥ मास्म भैः माभयं कुकुरु॥ हे वामलोचने वराक्षि॥ तावकैः॥ त्व
श्रीशुक उवाच॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः॥ स्वैः स्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः॥१॥ तान्नाप
तत आलोक्य यादवानीकयूथपाः॥ तस्थुस्तांस्तेमुखा राजन् विस्फूर्ज्य स्वधनूंषि ते॥२॥ अश्वपृष्ठे गजस्कंधे रथो
पस्थे च कोविदाः॥ मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा॥३॥ पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा॥ सव्री
डमैक्षत्तद्वक्त्रं भयविह्वललोचना॥४॥ प्रहस्य भगवानाह मास्म भैर्वामलोचने॥ विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवं ब
लं॥५॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान् रथान्॥६॥ पेतुः शिरांसि रिर
थिनामश्विनां गजिनां भुवि॥ सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः॥७॥ हस्ताः सासिगदेष्वासाः करभा ऊरवों
घ्रयः॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च॥८॥ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः॥ राजानो
विमुखा जग्मुर्जरासंधपुरःसराः॥९॥ शिशुपालं समभ्येत्य हृतदारमिवातुरं॥ नष्टत्विषं गतोत्साहं शुष्यद्वदन
मब्रुवन्॥१०॥ भो भो पुरुषशार्दूल दौर्मनस्यमिदं त्यज॥ न प्रियाप्रिययो राजन् निष्ठा देहिषु दृश्यते॥११॥(१४
दीयैर्बलैः॥५॥ स च असौ विक्रमश्च तं॥६॥ उष्णीषाणि शिरोवतंसवस्त्राणि तत्संहितानि शिरांसि॥७॥ करभाः प्रकोष्ठाः॥
ऊरुविशेषणं वा॥८॥९॥ अप्राप्तदारमेव तां हृतदारमिवातुरं॥१०॥ निष्ठा स्थैर्यं॥११॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुहकेन नर्तयिता तस्येछया। दुःखेष्वहं मानं तेन पारवश्यं व्यक्तं दर्शितं ॥१२॥ तत्र चाहमेव दृष्टांत इत्याह राजा जरासंधः। शौरेरिति सप्तसा
संग्रामात्। एकं संयुगं परं केवलं त्रयोविंशतिभिः (?) वा जिग्ये जितवानहं ॥१३॥ दैवमदृष्टं तद्युक्तेन ॥१४॥ फल्गुतंत्रैरल्पसैन्यैः ॥१५॥ प्रदक्षिणे

यथा दारुमयी योषिन्नृत्यते कुहकेछया॥ एवमीश्वरतंत्रोयमीहते सुखदुःखयोः॥१२॥ शौरेः सप्तदशाहं वै संयुगानि प
राजितः॥ त्रयोविंशतिभिः सैन्यैर्जिग्ये एकमहं परं॥१३॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित्॥ कालेन दैवयु
ग क्तेन जानन्विद्रावितं जगत्॥१४॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालि प
तैः॥१५॥ रिपवो जिग्युरधुना काल आत्मानुसारिणि॥ तदा वयं विजेष्यामो यदा दैवं प्रदक्षिणं॥१६॥ एवं प्रबोधितो
मित्रैश्चैद्योगात्सानुगः पुरं॥ हतशेषाः पुनस्तेपि ययुः स्वं स्वं पुरं नृपाः॥१७॥ रुक्मी तु राक्षसोद्वाहं कृष्णद्विड् असहन्स्व
सुः॥ पृष्ठतोन्वगमत्कृष्णमक्षौहिण्या वृतो बली॥१८॥ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजां॥ प्रतिजज्ञे महाबाहु तं
र्दंशितः सशरासनः॥१९॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं॥ कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः॥२०॥ इ
त्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः॥ चोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत्॥२१॥ अद्याहं निशितैर्बाणैर्गोपा
लस्य सुदुर्मतेः॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता॥२२॥ विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित्॥ रथेनैकेन
गोविंदं तिष्ठ तिष्ठेत्यथाह्वयत्॥२३॥

अनुकूलं स्यात् ॥१६॥१७॥१८॥१९॥२०॥२१॥ गोपालस्य वेदपालकस्येति वास्तवोर्थः। तथ सुदुर्मतेरिति ॥ शोभना अनुग्र
हवती दुष्टेष्वपि मतिर्यस्य तस्येति॥२२॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰ उ॰
१५

यदूनां कुलपांसन कुलदूषणावस्तु तस्तु यदूनां कुलपुकुलस्य ये तो हे अंसनात्स्वपं चारिपुहनन चतुरा अंससमाघाते इत्यस्मात् दातो
कर्तरि ल्युट् प्रत्ययानंघो विहितः॥२४॥ ध्वांक्षकाकस्य यथा हविर्मुष्णाति तद्वत्। वस्तुतस्तु अध्वांक्षवादिति छेदसहस्रात्क्षवदिस्य
धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः॥ आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन॥२४॥ कुत्र यासि स्वसारं मे मुषित्वा ध्वां
क्षवद्धविः॥ हरिष्येद्य मदं मंद मायिनः कूटयोधिनः॥२५॥ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां॥ स्मयन् कृष्णो ध
नुश्छित्वा षड्भिर्विव्याध रुक्मिणं॥२६॥ अष्टभिश्चतुरो वाहान् द्वाभ्यां सूतं ध्वजं त्रिभिः॥ स चान्यद्धनुरादाय कृष्णं विव्याध
पंचभिः॥२७॥ तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः॥ पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः॥२८॥ परिघं पट्टिशं
त. शूलं चर्मासी शक्तितोमरैः॥ यद्यदायुधमादत्त तत्सर्वं सोच्छिनद्धरिः॥२९॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया॥
कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकं॥३०॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः॥ छित्वासिमाददे तिग्मं रुक्मि
णं हंतुमुद्यतः॥३१॥ दृष्ट्वा भ्रातृवधोपायं रुक्मिणी भयविह्वला॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती॥३२॥ यो
गेश्वराप्रमेयात्मन् देवदेव जगत्पते॥ हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज॥३३॥ श्रीशुक उवाच॥ तया परित्रा
सविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया॥ कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत॥३४॥ १५

र्थः॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥ परित्रासेन विकंपितान्यंगानि यस्यास्तया शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धः
कंठो यस्याः सा च सा च कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया गृहीतो पादो यस्य सः॥३४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सश्मश्रुकेशासहितानि स्थाने स्थानेऽवशेष्य निश्मश्रुकेशं यथा भवति तथा तेनैवासिना प्रवपन्मुंडयन् व्यरूपयत् विरूपमकरोत्॥
॥३५॥ तथाभूतं हतप्रायमिति स्पष्टतरवाक्येष्वनुषंगः॥३६॥३७॥ रुक्मिणीं सांत्वयति मैवास्मानिति॥३८॥३९॥ पुनरुक्तमाक्षिपति बंधुरिति
॥४०॥ पुनर्देवीं प्रत्याह क्षत्रियाणामिति येनाधर्मेण भ्रातापि भ्रातरं हन्यात् ततस्तस्मात् घोरतर अतिदारुणः॥ धर्मश्चात्र तस्यैको स्मा-
कमपराध इति भावः॥४१॥ पुनः श्रीकृष्णं प्रत्याह राज्यस्येति तथाप्यस्माकमेतदनुचितमिति भावः॥४२॥ पुनर्देवीं प्रत्याह। नैवायमिति

चैलेन बध्वाऽतमसाधुकारिणं सश्मश्रुकेशं प्रवपन् व्यरूपयत्॥ तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः
॥३५॥ कृष्णांतिकमुपव्रज्य ददृशुस्तत्र रुक्मिणं। तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः॥ विमुच्य बद्धं करुणो भगवान् कृष्ण-
मब्रवीत्॥३६॥ असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितं॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः॥३७॥ मैवास्मान्सा-
ध्व्यसूयेथा भ्रातुर्वैरूप्यचिंतया॥ सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक्पुमान्॥३९॥ बंधुर्वधार्हदोषोऽपि न बंधोर्व-
धमर्हति॥ त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः॥४०॥ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः॥ भ्रातापि भ्रातरं
हन्याद्येन घोरतरस्ततः॥४१॥ राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः॥ मानिनोऽन्यस्य वा हेतोः श्रीमदांधाः क्षिपं-
ति हि॥४२॥ तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदां॥ यन्मन्यसे सदाभद्रं सुहृदां भद्रमज्ञवत्॥४३॥ ॥ ॥

सर्वभूतेषु दुर्हृदां महितानां भ्रातॄणां अज्ञवत् भद्रं मन्यसे इच्छसि। इयं तव विषमा असमीचीना बुद्धिः कुतः यतस्त्वं सुहृदां मम भद्र-
मिति यद्वा सर्वभूतेषु दुर्हृदां भद्रं मवेदं दंडरूपं मुंडनं भद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति अथवा सर्वभूतेषु मध्ये दुर्हृदां शि-
शुपालादीनां अभद्रं सुहृदां भद्रं च यन्मन्यसे तवेयं विषमा बुद्धिः समा न भवति अज्ञवत् ज्ञानाभिव॥४३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰उ॰ कुत इत्यत आह। आत्मसमोह इति॥४४॥ परमार्थमाह। एक एवेति परः शुद्धः॥ ज्योतिश्चंद्रादिर्यथोदकेषु नभो यथा घटादिष्विति॥४५॥
१६ कुतस्तर्हि न चंद्रादिवदात्मानं एकं शुद्धं प्रतीमस्तत्राह। देह इति द्रव्यमधिभूतं प्राणा इंद्रियाण्यध्यात्मं गुणाश्चदेवताः साधिदैवांत
त्रितयात्मकदेहोपाधिना शुद्धो न प्रतीयत इत्यर्थः॥४६॥ ननु देहसंबंधे नापि संसारे सति शुद्धत्वं गतमेवेत्यत्राह। नात्मन इति
हे सखे अन्येन अधिभूतादिना आत्मनः संयोगवियोगौ न स्तः कुतः असतः। असतोऽन्यस्येत्यर्थः॥ कुतोऽसत्वं तत्राह। तद्धेतुत्वा
दिति तस्याध्यात्माधिभूतेंद्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वात् आत्महेतुकत्वात्। ननु देवैरधिष्ठितेभ्य इंद्रियेभ्योऽधिभूतानां प्रती

आत्मसमोहो नृणामेष कल्पते देवमायया॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनां॥४४॥ एक एव परो ह्यात्मा सर्वेषा
मपि देहिनां॥ नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः॥४५॥ देह आद्यंतवानेष द्रव्यप्राणगुणात्मकः॥ आत्मन्य
विद्यया कॢप्तः संसारयति देहिनां॥४६॥ नात्मनोऽन्येन संयोगो वियोगो वाऽसतः सखे॥ तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपा
भ्यां यथा रवेः॥४७॥

तिप्रसिद्धाधिभूतप्रतीत्याश्च तत्प्रसिद्धिरात्मन इत्यत आह दृग्रूपाभ्यां यथा रवेः। यथा प्रकाश्यप्रकाशकत्वेन वर्त्तमानयोरपि च
क्षुरूपयोः रवेः सकाशात्सिद्धिः। द्वयोरपि तैजसत्वात्। तदभेदश्च तथाधिभूतेंद्रियादीनां परस्परसिद्धानामपि चैतन्याधीन १६
एव प्रकाशः। तत्कार्यत्वाच्च तद्व्यतिरेकेण असत्वं चेत्यर्थः। तथा च वक्ष्यति। दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथ
ग्भवेत्। एवं धीः खानि मात्राश्च न स्युरन्यतमादृतादिति। यद्वा रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्यात्मनः सिद्धिर्यथा तद्वदिति॥४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहसंबंधाभावदेवनात्मनो जन्मादयोपीति वक्तुं जन्मादीनां देहधर्मत्वमाह। जन्मादयस्त्विति ननु कथं तर्हि जातोहं बालोहं वृद्धोहमित्या
त्मनि जन्मादिप्रतीतिर्देहजन्मादिनैवेति सदृष्टांतमाह। कलानामिव नेति। इंदोः कलानामिव जन्मादयो नेंदोर्यथा तद्वत्। यथा च कु
लोंदो नाशादेव कुहूरमावास्या इंदुक्षय उच्यते तद्वदस्यात्मनो देहनाशादेव मृतिर्व्यवहार इत्यर्थः॥४८॥ नन्वात्मनो देहादिसंबं
धाभावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्यात्मस्वप्नदृष्टांतेन समर्थयति यथा शयान इति॥ आत्मानं भोक्तारं विषयान् भोग्यान्॥

ना जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित्॥ कलानामिव नैवेंदोर्मृतिर्ह्यस्य कुहूरिव॥४८॥ यथा शयान आत्मानं विषयान्
फलमेव च॥ अनुभुंक्तेप्यसत्यर्थे तथाप्नोत्यबुधो भवं॥४९॥ तस्मादज्ञानजं शोकमात्मशोषविमोहनं॥ तत्त्वज्ञानेन नि
र्हृत्य स्वस्था भव शुचिस्मिते॥५०॥ श्रीशुक उवाच॥ एवं भगवता तन्वी रामेण प्रतिबोधिता॥ वैमनस्यं परित्यज्य मनो बु
द्ध्या समादधे॥५१॥ प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः॥ स्मरन् विरूपकरणं वितथात्ममनोरथः॥ चक्रे भोज
कटं नाम निवासाय महत्पुरं॥५२॥ अहत्वा दुर्मतिं कृष्णमप्राप्य यवीयसीं॥ कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावस
द्रुषा॥५३॥ भगवान् भीष्मकसुतामेवं निर्जित्य भूमिपान्॥ पुरमानीय विधिवत् उपयेमे कुरूद्वह॥५४॥ तदा महो
त्सवो नृणां यदुपुर्यां गृहे गृहे॥ अभूदनन्यभावानां कृष्णे यदुपतौ नृप॥५५॥

फलं भोगं॥ असत्यप्यर्थे अनुभुंक्ते तथाऽबुधः संसारं प्राप्नोतीति॥४९॥ आत्मानं शोषयति विमोहयति चेति तथा तं निर्हृत्य अपा
कृत्य॥५०॥ समादधे समाहितमकरोत्॥ रुक्मिणी स्वैवं कृतवती तदा ज्ञानं निवृत्तमिति दर्शयन्नाह। प्राणावशेष इति॥५२॥ अह
त्वा अहत्वा अदुर्मतिमिति च स सोर्थः॥ अप्रसूह्य अनावर्त्य। अप्रतिबुध्येति नुसत्तां यवीयसीं स्वसारं यत्र विरूपितस्तत्रै॥ वावे
सत्। यत्र च भोजकटं नाम पुरमभूवत्॥५३॥५४॥५५॥

द०श०उ०
१७

चरयोर्वरवध्वोः। देयमुपस्करं॥५६॥ उत्तंभितैरिंद्रकेतुभिर्ध्वजविशेषैः। उपक्रमानि मंगलानि लाजांकुरपुष्पप्रकारादीनि तैः॥५७॥
आहूता आहूतं। प्रेष्ठा भूभुजस्तेषां गजैः परामृष्टा उच्छ्रिता रंभाश्च पूगाश्च तै रूपशोभिता यद्वा तैरेव गजैः परामृष्टाः संस्पृष्टा रं
भाश्च तैरुपशोभिता॥५८॥ संभ्रमपरा सौत्सुक्या परिधावतां बंधूनां मध्ये मिथः समेत्य मुदन्वाः पुः॥५९॥६०॥६१॥ इति दशमे चतु
पंचाशत्तमः॥५४॥ ॥५५॥ ॥पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि स्मृतः॥ शंबरेण हृतः सोथ हत्वा तं कांतया गमत्॥ प्रद्यु
नरा नार्यश्च मुदिता प्रमृष्टमणिकुंडलाः॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः॥५६॥ सा वृष्णिपुर्युत्तंभितेंद्रके
तुभिर्विचित्रमाल्यांबररत्नतोरणैः॥ बभौ प्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागुरुधूपदीपकैः॥५७॥ सिक्तमार्गा
मदच्युद्भिराहूतप्रेष्ठभूभुजां॥ गजैर्द्वाःसु परामृष्टरंभापूगोपशोभिता॥५८॥ कुरुसंजयकैकेयविदर्भयदुकुंत
यः॥ मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां॥५९॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः॥ राजानो राजक
न्याश्च बभूवुर्भृशविस्मिताः॥६०॥ द्वारकायामभूद्राजन्महामोदः पुरौकसां॥ रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रि
यः पतिं॥६१॥ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिण्युद्वाहो नाम चतुःपंचाशत्तमोऽध्यायः॥५४॥७॥
श्रीशुक उवाच॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत॥१॥ स एव जातो वैद
र्भ्यां कृष्णवीर्यसमुद्भवः॥ प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः॥२॥ ॥ ॥ ॥
महानि लाभाद्यैः शंबराहरणादिना॥ कुटुंबिनामपत्यादिसुखदुःखमसूचयत्॥ जांबवत्यादिविवाहात्प्रागेव प्रद्युम्नजन्म ततो विवा
हाः। ततः शंबरागारात्प्रद्युम्नप्रत्यागमनं। अतः पुत्रकथनप्रस्तावेपि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते। प्रत्यागम
नं तु तत्कालीनमपि कथापर्यवसानायात्रोक्तमिति। वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः। स्वदेहे तु तद्योग्यदेहोपपत्तये देहप्राप्ति

ति॥१॥ स्मरः कामांशः॥२॥

१७

सप्रसिद्धः कामस्तत्र शंबरस्तमात्मनः शत्रुं विदित्वा हत्वा समुद्रे प्रास्य प्रक्षिप्य गृहमागमदिति ॥३॥ निर्जगार गिलितवान् ॥४॥ स्वधितिनाऽसिपुत्रि
कया अवद्यन्। अवाद्यन्नारेभे इति तः ॥५॥ तस्य कामपोष्यं तव भर्त्तेति ॥ उत्पत्तिं श्रीकृष्णाद्रुक्मिण्यां उत्पन्न इति ॥६॥ यद्वा स्वं नीपतिव्रता भर्त्तुर्देह

तं शंबरः कामरूपी हृत्वा तोकमनिर्दशम्॥ स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहम् ॥३॥ तं निर्जगार बलवान्मीनः सोऽप्यपरैः
सह॥ वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥४॥ तं शंबराय कैवर्त्ता उपजह्रुरुपायनम्॥ सूदा महानसं नीत्वाऽवद्यन्स्वधि
तिनाद्भुतम् ॥५॥ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन्॥ नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः॥ बालस्य तत्त्वमुत्पत्तिं म
त्स्योदरनिवेशनम् ॥६॥ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी॥ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥७॥ निरूपिता शं
बरेण सा सूपोदनसाधने॥ कामदेवं शिशुं बुध्वा चक्रे स्नेहं तदार्भके ॥८॥ नातिदीर्घेण कालेन स कार्ष्णीरूढयौवनः ॥ ज
नयामास नारीणां वीक्षंतीनां च विभ्रमम् ॥९॥ सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरम्॥ सव्रीडहासोत्तभि
तभ्रुवेक्षती प्रीत्योपतस्थे रतिरंगसौरतैः ॥१०॥ तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा॥ मातृभावमतिक्रम्य वर्त्त
से कामिनी यथा ॥११॥ रतिरुवाच॥ भवान्नारायणसुतः शंबरेणाहृतो गृहात्॥ अहं तेऽधिकृता पत्नी रतिः कामो भवा
न्प्रभो ॥१२॥ एष त्वानिर्दशं सिंधावक्षिपच्छंबरोऽसुरः॥ मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो ॥१३॥ तमि
मं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः॥ मायाशतविदं तं च मायाभिर्मोहनादिभिः ॥१४॥ ॥ ॥ ॥

प्राप्तिं लप्रतीक्षमाणा ॥७॥ तं शिशुं कामदेवं बुध्वा ॥८॥ विभ्रमं संमोहं ॥९॥ अंगाहे राजन्। सोरतैर्भावैरुपतस्थे अभजत ॥१०॥११॥
अधिकृता पत्नी यत्र हेतु रतिरहं भवान्काम इति ॥१२॥१३॥ दुर्जयत्वे हेतुः। मायाशतविदमिति कथं तर्हि हंतव्यस्तत्राह। मायाभि
रिति ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचात्रविलंबकार्यइत्याह॥ परिशोचति रोदितीत्यर्थः॥१५॥१६॥१७॥१८॥ वज्रस्य निष्पेषो निर्घातो यथा निष्ठुरस्तीव्रो नादो भवति तथाभू
तं नादं व्यनदत्॥ सामान्यविशेषतया व्याप्यव्यापकत्वं ओदनं पाकं पचतीतिवत्॥ अतिनिष्ठुरं नादमकरोदित्यर्थः॥१९॥२०॥ वैहायसः॥

परिशोचति ते माता कुररीव गतप्रजा॥ पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा॥१५॥ अभाष्यैवं ददौ विद्यां प्रद्युम्नाय
महात्मने॥ मायावती महामायां सर्वमायाविनाशनीं॥१६॥ स चक्राम वरं प्राप्य संयुगाय समाह्वयत्॥ अविषह्यैस्तमाक्षेपै
क्षिपन्संजनयन्कलिं॥१७॥ सोधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः॥ निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः॥१८॥
गदामाविध्य तरसा प्रद्युम्नाय महात्मने॥ प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं॥१९॥ तामापतंतीं भगवान्प्रद्युम्नो गद न्
या गदां॥ अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप॥२०॥ तामापतंतीं भगवान्प्रद्युम्नो गदया गदां॥ अपास्य शत्रवे कु
द्धः प्राहिणोत्स्वगदां नृप॥२०॥ स च मायां समाश्रित्य दैतेयीं मयदर्शितां॥ मुमुचेऽस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः॥२१
बाध्यमानोऽस्त्रवर्षेण रौक्मिणेयो महारथः॥ सत्त्विकां महाविद्यां सर्वमायोपमर्दिनीं॥२२॥ ततो गौह्यक गांधर्व पैशा
च्योरगराक्षसीः॥ प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्सताः॥२३॥ निशातमसिमुद्यम्य सकिरीटं सकुंडलं॥ शंबर
स्य शिरः कायात्तो परम ओजसा हरत्॥२४॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः॥ भार्यया वरचारिण्या पुरं
नीतो विहायसा॥२५॥ अंतःपुरवरं राजन्ललनाशतसंकुलं॥ विवेश पत्न्या गगनाद्विद्युतेव बलाहकः॥२६॥ तं दृष्ट्वा जल
दश्यामं पीतकौशेयवाससं॥ प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननं॥२७॥ ॥ ॥ ॥ ॥ ॥

आकाशस्थितः॥२१॥ सात्त्विकां सत्त्वगुणमयीं॥ प्रायुंक्त स्कंदरस्यानुबंगः॥२२॥ तामायां व्यधमत्॥२३॥ ताम्राणि रमश्रूणि यस्मिन्
तत्॥ ओजसा बलेन॥२४॥२५॥ विद्युता सह बलाहको मेघ इव॥२६॥२७॥

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलाश्ववक्त्रास्वयेत्यलकास्तएवालयतैः। हीता लज्जिताः॥२८॥ श्रीकृष्णोनभवतीत्यवधार्य्यसस्त्रीरत्नंश्रेष्ठाइतिसत्तत्सहितं॥२९॥३०॥ सुतंतस्मरंस्या
हाकोन्वयमितिनरवैडूर्य्यपुरुषश्रेष्ठः॥३१॥ एतेनतुल्यंवयोरूपंयस्यसःभवेदिति॥३२॥ तस्यस्वपुत्रत्वंसंभावयंत्याह। कथंस्विति॥३३॥ त

स्वलंकृतमुरसंप्रोजंनीलवक्त्रालकालिभिः॥ कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह॥२८॥ अवधार्य्यशनैरीषदुल
क्षण्येनयोषितः॥ उपजग्मुःप्रमुदिताःसस्त्रीरत्नंसुविस्मिताः॥२९॥ अथतत्रासितापांगीवैदर्भीवल्गुभाषिणी॥ अस्मरत्स्व
सुतंनष्टंस्नेहस्नुतपयोधरा॥ कोन्वयंनरवैडूर्य्यःकस्यवाकमलेक्षणः॥ धृतःकयावाजठरेकेयंलब्धात्वनेनवा॥३१॥ म ४
प्रवाप्यात्मजोनष्टोनीतोयःसूतिकागृहात्॥ एततुल्यवयोरूपोयदिजीवतिकुत्रचित्॥३२॥ कथंत्वनेनसंप्राप्तंसा
रूप्यंशार्ङ्गधन्वनः॥ आकृत्यावयवैर्गत्यास्वरहासावलोकनैः॥३३॥ सएववाभवेन्नूनंयोमेगर्भेधृतोर्भकः॥ अमु
ष्मिन्प्रीतिरधिकावामस्फुरतिमेभुजः॥३४॥ सवमीमांसमानायांवैदर्भ्यांदेवकीसुतः॥ देवक्यानकदुंदुभ्यामुत्तमश्लो
कआगमत्॥३५॥ विज्ञातार्थोपिभगवान्तूष्णीमासजनार्द्दनः॥ नारदोकथयत्सर्वंशंबराहरणादिकं॥३६॥ तच्छ्रुत्वा
महदाश्चर्यंकृष्णांतःपुरयोषितः॥ अभ्यनंदन्बहून्नष्टान्मृतमिवागतं॥३७॥ देवकीवसुदेवश्चकृष्णरामौतथा
स्त्रियः॥ दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं॥३८॥ नष्टंप्रद्युम्नमायातमाकर्ण्यद्वारकौकसः॥ अहोमृतइवायं मि
तोबालोदिष्ट्येतिहाब्रुवन्॥३९॥

देवाग्निकंसंभावयति। सएवेति॥३४॥ देवक्यानकदुंदुभिभ्यामपिसहार्थः॥॥३५॥ ॥३६॥ ॥३७॥ ॥३८॥ ॥३९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश० उ० अतिसौंदर्येण प्रद्युम्नमनुवर्णयति। यमिति पिता श्रीकृष्णस्तत्स्वरूपे स्थितं आत्मीयं ईशमर्त्तेति भावो भावनायास्तस्मान्मातरः कृष्णपत्न्यो
१९ पि रहसि निरूढभावा सत्योपभजं त्रीतियदा न खलु चित्रं कथंसति॥ स्मरेस्मय माग एते नैव क्षोभके कामो लक्षविषयेसति। किं च रमोदं
श्रीकृष्णस्तस्याबिंबमूर्त्तिस्तस्यां बिंबे पुत्रो दृष्टे सुवक्ष्यं अन्यनार्यो भेजुरिति॥४०॥ इति दशमे पंचाशत्तमः॥५५॥ ५५॥ ॥५५॥
मणि पंचाशत्तमे मिथ्याभियोगे माहरत्। कन्यां जांबवतः प्राप कृष्णः सत्राजितस्ततः॥१॥ पुताद्दिकापबोरस्यास्यतिस्मा मुक्ताति चेंचलौं॥ अर्थे

यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन् रहरूढभावाः॥ चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेऽक्षविष बिंबे
ये किमुतान्यनार्यः॥४०॥ इति श्रीभागवते महापुराणे दशमस्कंधे प्रद्युम्नागमनं पंचपंचाशत्तमोध्यायः॥५५॥ ५५॥
श्रीशुक उवाच॥ सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः॥ स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान्॥१॥ राजो
वाच॥ सत्राजितः किमकरोद् ब्रह्मन्कृष्णस्य किल्बिषं॥ स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः॥२॥ श्रीशुक उवाच॥ त:
आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा॥ प्रीतस्तस्मै मणिं प्रादात् सूर्यस्तुष्टः स्यमंतकं॥३॥ स तं बिभ्रन्मणिं कंठे
भ्राजमानो यथा रविः॥ प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः॥४॥ ॥ ॥ ॥

स्यानर्थतामाह स्यमंताहरणादिना॥२॥ सत्यभामा जांबवत्योर्विवाह प्रस्तावा यस्यमंतकाख्यानमाह॥ सत्राजित इसकारांतं॥ कृवि
चन्नकारांतो यन्वयानुसारेण द्रष्टव्यः॥ कृतापराधस्तस्य तयेस्वयमेवोद्यमं कृत्वा मणिनासह प्रादादिति॥१॥२॥ भक्तस्य सत्राजि १९
तस्सूर्यः स्वाम्यपि सखासीदित्यर्थः॥ स च तुष्टस्तस्मै स्यमंतकं नाम मणिं प्रादात्॥ प्रीत स्निग्धः॥३॥ नोपलक्षितः सत्राजितोऽसाविन्य
विज्ञातः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्यते श्री उते। सूर्योयमितिशंकिताः संत कथया मासुरिति॥५॥ सूर्य्यनमस्कारायागतं कल्पयि लोद्विजभक्तीनां संबोधमात्रिनारायणेत्यादी
नि॥६॥ गभस्ति चक्रेण रश्मिजालेन मुष्णन् प्रतिवन् तिग्मातीक्ष्णाचोरस्मयो यस्य॥७॥ नवेदमेघटमानमपित्याहुः। नन्वन्विछंति मृगयंतेऽग्र
जस्सूर्यः॥८॥ बालानां स्त्रीणां च वचनं ज्वलन्निद्योतमानः॥९॥ कौतुकेनोत्सवेन मंगलानि यस्मिन् तत्। विप्रैः हुत्वा॥१०॥ भारप्रमाणं वाच

२ तं विलोक्य जना दूरात्तेजसा मुषदृष्टयः॥ दीव्यते सौ भगवंत शार्ङ्गंसुः सूर्य्यशंकिताः॥५॥ नारायण नमस्तेस्तु शंखचक्रगदा
धर॥ दामोदरारविंदाक्ष गोविंद यदुनंदन॥६॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते॥ मुष्णन् गभस्तिचक्रेण नृणां चक्षु
षितिग्मनुः॥७॥ नन्वन्विछंति ते मार्गं त्रिलोक्यां विबुधर्षभाः॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो॥८॥ श्रीशुक उ
वाच॥ निशम्य बालवचनं प्रहस्यांबुजलोचनः॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन्॥९॥ सत्राजित्स्वगृहं श्रीम
त्कृतकौतुकमंगलं॥ प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत्॥१०॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो॥ दुर्भिक्षमा
र्य्यरिष्टानि सर्पाधिव्याधयोऽशुभाः॥ न संति मायिनस्तत्र यत्रास्तेभ्यर्चितो मणिः॥११॥ स याचितो मणिं क्वापि यदुराजा
ना य शौरिणा॥ नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयन्॥१२॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं॥ प्रसेनो हयमारुह्य मृग
या यां व्यचरद्वने॥१३॥
तु र्भिक्षं हि भिक्षुभुंजंगुंजान्यं च पणं पणान्। अष्टौ धारणमष्टौ च कर्षस्तांश्चतुरः पलं तुलां पलशतं प्राहुर्भारस्याद्विंशतिस्तुला इति मारीना
म अकालमृत्युः अरिष्टमभद्रं अशुभादुःखहेतवः॥११॥ क्वापि कदाचित्। अनेन भगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वारिष्टनिवर्त्तक
मपि अनिष्टहेतुरेव भवतीति सूचितं॥१२॥ तदेव दर्शयितुमाह तमेकदेति प्रतिमुच्य बद्ध्वा प्रसेनः सत्राजितो भ्राता॥१३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आछिद्याकृष्णगृहीता॥१४॥१५॥अजपन्नुपांश्ववोचन्॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥क्रव्यार्थे आमिषार्थे॥२३॥अष्टविंशाहं
अष्टचविंशतिश्चआह। नित्यदिनानियस्मिंस्तदष्टविंशाहं हांविंशतिःशब्देतिलोपश्चार्षः॥वज्रस्यनिष्पेषोनिधीतस्तद्वत्परुषैर्निष्ठु

प्रसेनंसहयंहत्वामणिमाछिद्यकेसरी॥गिरिंविशन्जांबुवतानिहतोमणिमिछता॥१४॥सोपिचक्रेकुमारस्यमणिंक्रीडनकं
बिले॥अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत॥१५॥प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः॥भ्राताममेतितछ्रु
त्वाकर्णेकर्णेजपन्जनाः॥१६॥भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि॥मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः॥१७॥ह
तंप्रसेनमश्वंचवीक्ष्यकेसरिणावने॥तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः॥१८॥ऋक्षराजबिलंभीममंधेनतमसा
वृतं॥एकोविवेशभगवानवस्थाप्यबहिःप्रजाः॥१९॥तत्रदृष्ट्वामणिश्रेष्ठंबालक्रीडनकंकृतं॥हर्तुंकृतमतिस्तस्मिन्न
वतस्थेर्भकांतिके॥२०॥तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत्॥तछ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः॥२१॥स
वैभगवतातेनयुयुधेस्वामिनात्मनः॥पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित्॥२२॥द्वंद्वयुद्धंसुतुमुलमुभयोर्विजि
गीषतोः॥आयुधाश्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव॥२३॥आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः॥वज्रनिःपेषप
रुषैरविश्रममहर्निशं॥२४॥कृष्णमुष्टिविनिपातनिष्पिष्टांगोरुबंधनः॥खिन्नसत्वःखिन्नगात्रस्तमाहातीवविस्मितः॥२५॥ २०

रैः॥२४॥श्रीकृष्णमुष्टीनांविनिपातैराघातैर्विनिष्पिष्टानिविश्लथानिअंगानांऊरूणिबंधनानिसंधिस्थानानियस्यसः॥२५॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोके को वा उ यं मत्तो बलीयानिति विस्मितस्सन्नुविभुरुवाह । जाने इति सर्वभूतानां यः प्राणस्तत्र च य ओजः सहो बलं चा इंद्रियहृदयदेह
बलानि । तत्सर्वं त्वामहं जाने । कथं तथा त्वमतः आह । विष्णुमित्यादि ॥२६॥ पुराणत्वे हेतुत्वे हीतिस्त्र ... निमित्ते । यद्वा सदुपादेनां । अंत
पुराणः । प्रभविष्णुत्वे हेतुः । काल इति । अधीश्वरत्वं मध्यमत एव त्वोऽहं इत्यपर इति तत्त्वं नेतथैति साह । अत्र त्वनामा त्वेति ॥२७॥ यत एवं
भूतः अतो मम एष देवं रघुनाथ एव त्वमसि साहे । यस्येति । ईषदुत्कलित उद्दीपितो यो रोषस्तेन येन कटाक्षमोक्षात्सौक्षापितानक्र

जाने त्वां सर्वभूतानां प्राण ओजः सहो बलं ॥ विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं ॥२६॥ त्वं हि विश्वसृजां स्रष्टा स्रष्टा
नामपि यद्वसतेः ॥ कालः कालयतामीशः पर आत्मा तथात्मना ॥२७॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशात्
क्षुभितनक्रतिमिंगिलोब्धिः ॥ सेतुः कृतः स्वयश इव ज्वलिता च लंका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥२८॥ इति विज्ञो
तविज्ञानमुक्त्वा राज्ञा नमश्च्युतः ॥ व्याजहार महाराजं भगवान्देवकीसुतः ॥२९॥ अभिमृश्यारविंदाक्षः पाणिना शंकरेण
तं ॥ कृपया परया भक्तं प्रेमगंभीरया गिरा ॥३०॥ मणिहेतोरिह प्राप्ता वयमृक्षपते बिलं ॥ मिथ्याभिशापं प्रमृजन्नात्म
नो मणिनामुना ॥३१॥

ग्रहास्तिमिंगिला महामत्स्यास्ते यस्मिन्सोऽब्धिर्वर्त्मादिशात् दत्तवान् । तथापि येन तस्मिन् स्वयश एव सेतुः कृतः । उज्वलिता दग्धा च
पश्चात् इषुभिः क्षतानि छिन्नानि रक्षसो दशग्रीवस्य शिरांसि भुवि पेतुः । स एव त्वमिति जाने ॥२८॥ इति विज्ञातं विज्ञानं येन तं विज्ञा
तं येन तं विज्ञानशब्दः करणसाधनः कर्मसाधनो वा ऋक्षराजं प्रति उक्तवान् ॥२९॥३०॥ वयं त्विह बहुवा बिलद्वारं प्राप्ता स्मत्र
मिथ्याभिशापमपनुनाममणिना प्रमृजन्नपमार्जयन्नेक एवांतर्बिलमिह प्राप्त इत्यर्थः ॥३१॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स०उ०
२१

सहमणिना समर्पयामास॥३२॥३३॥३४॥ श्रीहत्प्राप्तये चंद्रभागां नाम दुर्गामभजत्॥३५॥ स च बहून्यस्तेषां प्रादुर्बभूव। असवदिति पादे
असवदिंद्रियाणि तेषां प्रेष्ठ इत्यर्थः। कृशोदेव्या उपस्थानात् प्रसादिष्टा दत्ता या आशीः हत्वं द्रक्ष्यथेति तया सहैव॥३६॥ यदि लोके जनाक
थंचिन्मृतबंधुं पुनरागतमुपलभेत तत्तदुपलभ्य सर्वे जाता महोत्सवाः आसन्निति॥३७॥३८॥ पापना आत्मनो अपराधेनानुतप्य

इत्येकः स्वां दुहितरं कन्यां जांबवतीमुद्‌॥ अर्हणार्थं समणिना कृष्णायोपजहार सः॥३३॥ अदृष्ट्वा निर्गमं शौरेः प्रवि
ष्टस्य बिलं जनाः॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः॥३३॥ निशाम्य देवकी देवी रुक्मिण्यानकदुंदुभिः॥ सुहृ
दो ज्ञातयो शोचन्बिलात्कृष्णमनिर्गतं॥३४॥ सत्राजितं शपंतस्ते दुःखिता द्वारकौकसः॥ उपतस्थुर्महामायां दुर्गां
कृष्णोपलब्धये॥३५॥ तेषां च देव्युपस्थानात्प्रसादिष्टाशिषा सवः॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः॥३६॥
उपलभ्य हृषीकेशं मृतं पुनरिहागतं॥ सह पत्न्या मणिग्रीवं सर्वे जात महोत्सवाः॥३७॥ सत्राजितं समाहूय सभायां रा
जसंन्निधौ॥ प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत्॥३८॥ स चातिव्रीडितो रत्नं गृहीत्वा वाङ्मुखस्ततः॥ अनु
तप्यमानो भवनमगमत्स्वेन पाप्मना॥३९॥ सोनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः॥ कथं मृजाम्यात्मरजः प्रसी
देद्वाच्युतः कथं॥४०॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा॥ अदीर्घदर्शीनं क्षुद्रं मूढं द्रविणलोलुपं॥४१॥ दा
स्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च॥ उपायोयं समीचीनस्तस्य शांतिर्नचान्यथा॥४२॥ ॥ ॥ २१

मानः॥३९॥ अघं दोषं आत्मनो रजमलं अपराधमिति॥४०॥ किं कृत्वा कस्मिन्कृते इत्यर्थः। साधु भद्रं। अदीर्घदर्शी नमविचारकं मा
क्षुद्रं कृपणं मूढं मंदमतिं॥४०॥४१॥ एवं ध्यायन्नुपायं निश्चिनोति। स्त्रीरत्नं दुहितरं तां वक्ष्यमाणां तदनेतरं पारिबर्हं तेन रत्नमयीति
४२

बहुभिः कृतवर्मादिभिः ॥४३॥४४॥ मणिं न प्रतीच्छाम मनस्वी कुर्मः । देवस्यैतद्भक्तस्य । तत्फलाक्षेपफलभागिन इति तव पुत्रलाभवदी
यं धनमस्माकमेवेति गूढोभिप्रायः ॥४५॥ दशमे षट्पंचाशोध्यायः ॥५६॥ ॥ ॥ सप्तपंचाशत्तमे तु पुनः शतधनुर्वधो ॥ प्राप्तं
स्वदुर्यशोमार्ष्टि कृष्णोक्रूराहृतात्मने ॥ अक्रूरमुरे रीकृत्य मणेः पात्रं यथाच्युतः ॥ उपप्राप्तीतमेकांते स्वरामोगा... जाकृयं ॥ सत्रा

एवं व्यवसितो बुद्ध्वा सत्राजित्स्वसुतां शुभां ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥४३॥ तां सत्यभामां भगवानुप
भि यमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥४४॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप ॥ तवास्तां
देवभक्तस्य वयं च फलभागिनः ॥४५॥ इति श्रीभागवते महापुराणे दशमस्कंधे - प्रं - क - रनो नाम षट्पंचाशत्तमो
ध्यायः ॥५६॥ ॥ ॥ ॥ श्रीशुक उवाच ॥ विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे स
हरामो ययौ कुरून् ॥१॥ भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥२॥ ल
श्री ब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥३॥ योस्मभ्यं संप्रतिश्रुत्य कन्यार
त्नं विगर्ह्य नः ॥ कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ॥४॥ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः ॥ शयान
मवधील्लोभात्स पापः क्षीणजीवितः ॥५॥

जितस्तस्याज्ञाभंगफलं व्यक्तीकर्तुमाह ॥ विज्ञातार्थोपि पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातोर्थो येन कुंतीं च दग्धा
माकर्ण्य कुल्यकरणे कुलोचितसंव्यवहारार्थं ॥१॥ अन्येषां तद्दाहदुःखाभावात् भीष्मादीनुसंगम्येत्युक्तं ॥२॥३॥ ननु जीवन्सत्रा
जित्कथं मणिं दास्यतीति तत्राहतुः ॥ योस्मभ्यमिति भ्रातरं प्रसेनं मृतं कस्मान्नान्वियात् नानुगच्छेत्तत्प्रियेतामित्यर्थः ॥४॥५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०उ० २२

जग्मिवान् जगाम॥६॥७॥८॥९॥१०॥११॥ हेलनं प्रति कूलं वृजिनमपराधं॥१२॥ अपीतोमृतः। सप्तदशसंख्यास्संयुगान्॥१३॥
१४॥ तौ रामकृष्णावेकमेव तत्वमित्यभिप्रेत्याह य इदमिति। अजपामायया मोहिता जयेति संधिरार्षः॥१५॥१६॥१७॥ अं

स्त्रीणां विक्रोशमानानां क्रंदती नामनाथवत्॥ हत्वा पशून् सौनिकवन्मणिमादाय जग्मिवान्॥६॥ सत्यभामा च पितरं हतं
वीक्ष्य शुचार्पिता॥ व्यलपत्तात तातेति हा हतास्मीति मुह्यती॥७॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं॥ कृष्णायवि
दितार्थाय तप्ता चख्यौ पितुर्वधं॥८॥ तदा कर्ण्येश्वरौ राजन्ननुसृत्य नृलोकतां॥ अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः
॥९॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरं॥ शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः॥१०॥ सोपि कृतोद्यमं ज्ञात्वा
भीतः प्राणपरीप्सया॥ साहाय्ये कृतवर्माणमयाचत स चाब्रवीत्॥११॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः॥
को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन्॥१२॥ कंसस्सहानुगोपीतो यद्द्वेषात्त्याजितः श्रिया॥ जरासंधस्सप्तदशसंयु
गान्विरथो गतः॥१३॥ प्रत्याख्यातस्स चाक्रूरं पार्ष्णिग्राहमयाचत॥ सोप्याह को विरुध्येत विद्वानीश्वरयोर्बलं॥१४॥
य इदं लीलया विश्वं सृजत्यवति हंति च॥ चेष्टां विश्वसृजो यस्य न विदुर्मोहिताजया॥१५॥ यः सप्तहायनश्शैलमुत्पाट्यै
केन पाणिना॥ दधार लीलया बाल उच्छिलींध्रमिवार्भकः॥१६॥ नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे॥ अनंतायादि
भूताय कूटस्थायात्मने नमः॥१७॥ प्रत्याख्यातस्स तेनापि शतधन्वा महामणिं॥ तस्मिन्न्यस्याश्वमारुह्य शतयो
जनगं ययौ॥१८॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ॥ अन्वयातां महावेगैरश्वै राजन्गुरुद्रुहं॥१९॥ ॥

तर्यामि कृत्स्ननियुक्तोस्तास्मिन्नक्रूरे मणिं न्यस्यापपौ पलायत॥१८॥ गुरुश्वशुरस्तद्धंतारं॥१९॥ ॥ ॥

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शतयो जनगामि त्वात्तपः परं गंतुमशक्तस्तत्र पतितस्तं हयं विसृज्य ॥२०॥ व्याचिनोत् दृगयामास अक्रूरेमणि रक्षितं सर्वहृत
याविदित्वापिरामं वनायय तथाहृत वानितिभावः ॥ रा ॥२२॥ अन्वेषअन्विछ ॥२३॥ सर्वहृस्येवं चाप्ते तमेद्वचनायेतिमत्वाग्रूटम

मिथिलाया उपवने विसृज्य पतितं हयं ॥ पभ्याप्रुधां वर्त्सं त्रस्तः कृष्णोप्यन्वद्रवद्रुषा ॥२०॥ पदातेर्भार्गवां स्तस्य
पदातिस्तिग्मनेमिना ॥ चक्रेण शिर उत्कृत्य वाससो व्यचिनोन्मणिं ॥२१॥ अलब्ध्वमणिं रागत्य कृष्णमभ्याहाग्रजं
तिकं ॥ वृथाहतश्शतधनुर्मणिस्तत्र न विद्यते ॥२२॥ ततआह बलोनूनं समणिः शतधन्वनो ॥ कस्मिंश्चित्पुरु
षे न्यस्तस्तमन्वेषपुरं व्रजः ॥२३॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतरं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेशायदुनं
दनः ॥२४॥ तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः ॥ अर्हयामास विधिवदर्हणीयं समर्हणैः ॥२५॥ उवास त
५८ स्यां कतिचिन्मिथिलायां समा विभुः ॥ ततोशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः ॥ मानितः प्रीतियुक्तेन जनकेन म
हात्मना ॥२६॥ केशवो द्वारकामेत्य निधनं शतधन्वनः ॥ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥२७॥ ततः
स कारयामास क्रियां बंधोर्हतस्य वै ॥ साकं सुहृद्भिर्भगवान्याया स्युः सांपरायिकाः ॥२८॥ ॥ ॥

न्युराह । अहमिति ॥२४॥२५॥ कतिचित्समाः संवत्सरान् । प्रासंगिकमाह । ततइति ॥२६॥ सत्यभामामप्यवंचयदितिसूचयन्ना
ह । केशव इति ॥२७॥ बंधोः सत्राजितः सांपरायिकाः पारलौकिकाः ॥२८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰उ॰ व्यूषतु द्वारकायाः सकाशात्। कापि पलायितौ प्रयोजकौ मणिहरणे ज्ञात धन्वन प्रवर्त्तकौ तत्राक्रूर कृष्णानुमतेनैव गात कृतवर्मा तु भ-
२२ कृपक्षयात प्राकृष्णभयाद्देवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वर वंचनं तयो संभवतीति॥२९॥ तदेवं श्रीवाराणस्यां दानं
पति समीक्ष्य मणिहस्ते अक्रूरे स्वमवेदि देवोर्महाध्वरैर्यजमाने निवसति सति पुनः श्रीकृष्णेनैव प्रस्थापितो क्रूर इति कर्णे कर्णे
जपति जने सत्यभामारामादीनां मध्य विश्वासे जनसंग्रहायाक्रूरमाहूय साक्षेपं श्रीकृष्ण प्राह। इदं च भगवन्मतं संगोप्य

अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं॥ व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ॥२९॥ अक्रूरे प्रोषिते
रिष्टान्यासन्वै द्वारकौकसां॥ शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः॥३०॥ इत्यंगोपदिशंत्येके विस्मृ-
त्य प्रागुदाहृतं॥ मुनिवासनिवासे किं घटेतारिष्टदर्शनं॥३१॥ ॥ ॥ ॥

केचन कषयोन्यत्कारणमक्रूरानयमेव वर्णयंति॥ तद्यथा श्रुतं दूषयितुमनुवदति अक्रूरे प्रोषित इति॥३०॥ दूषयति इतीति अं- २३
गहेराजन्। श्रीकृष्णपारावस्य विस्मृन्येपति तदेवाह। मुनिवास इति मुनीनां निवासो यस्मिन् स मुनिवासः श्रीकृष्णस्तस्य नि-
वासे सति अक्रूरागमनमात्रेणारिष्टदर्शनं कीं घटेत तन्न दृष्टं विना न घटत इत्यर्थः॥३१॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनस्तन्नातपेवानुवर्णयति। कादिशेदेषुदेवेमघवति अवर्षतिसति॥३२॥ इत्येवंभूतमक्रूरमहिमप्रतिपादनपरं छानांवाक्यंश्रुत्वा
सत्सपेवांतथाय्येतावदेवकारणंनभवति। किंतुमणेरप्यपभावइतिमत्वेत्येतदंतंपरमं तोंवस्तुतस्तुतस्यलीलाव्रयदेवेष्टादिष्टो
दिदर्शनमिति श्रुक्कादिसंमतमिति भावः॥३३॥३४॥ विज्ञातमखिलंयेनसर्वोसौ अतएवचित्तज्ञश्चा अयंप्रावमहाभागवतस्यास्य
मयादत्तेपिमणावपेक्षानास्त्येवयस्मादाहृतोमणिर्नास्तिहेवागतइति ज्ञातवति॥३५॥ ततकिंमितअआह। सत्राजितइतिअपपिंडां

देवोवर्षतिकाशीशः श्वफल्कायागतायवै॥ स्वसुतांगांदिनींप्रादात्ततोवर्षत्स्मकाशिषु॥३२॥ तत्सुतस्तत्प्र
भावोसावक्रूरोयत्रयत्रह॥ देवोभिवर्षतेतत्रनोपतापानमारिकाः॥ इतिवृद्धवचःश्रुत्वानैतावदिहकारणं॥
इतिमत्वासमानाय्यप्राहाक्रूरंजनार्दनः॥ पूजयित्वाभिभाष्यैनंकथयित्वाप्रियाःकथाः॥३४॥ विज्ञाताखिलचि
त्तज्ञःस्मयमानउवाचह॥ ननुदानपतेन्यस्तस्त्वय्यास्तेशतधन्वना॥ स्यमंतकोमणिःश्रीमान्विदितःपूर्वमेव
नः॥ सत्राजितोनपत्यत्वाद्गृह्णीयुर्दुहितुःसुताः॥ दायंनिनीयापःपिंडान्विमुच्यर्णंचशेषितं॥३६॥ तथा
पिदुर्द्धरस्त्वन्यैःस्त्वय्यास्तांसुव्रतेमणिः॥ किंतुमामग्रजःसम्यङ्नप्रत्येतिमणिंप्रति॥ दर्शयस्वमहाभागबंधूनां
शांतिमावह॥३७॥

श्वतिनीयदत्वाऋणंचविमुच्यापाहृत्यशेषितमवशिष्टंदायंदुहितुससपमायपासुतागृह्णीयुरितिशास्त्रंतथाच स्मरंतिपत्नी
दुहितरश्चैवपितरोभ्रातरस्तथा तत्सुतागोत्रजाबंधुशिष्यासब्रह्मचारिणइति॥३६॥ अग्रजोपिनप्रत्येतिनविश्वसितिनास्ती
तिवचनवक्तव्यं॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ
२४

यत अयुधिष्ठिराः संततामरवावर्त्तत इति ॥३८॥ आलब्ध उक्त हृदिस्पृष्ट इति वा ॥३९॥ रजःप्रियथापि शापसंभ्रज्या अन्ये दुर्धरइत्यादि
विषेण श्रीत्याभूयस्तस्मै प्रत्यर्पितवानिति ॥४०॥ दुष्कीर्त्तिं तन्मलं दुरितं चेति ॥४१॥ इति दशमे सप्तपंचाशत्तमः ॥५७॥ ॥ छ ॥
अष्टपंचाशत्तमे तु कृष्णपंचकेकरग्रहीत् ॥ कालिंदीमित्रविंदां च सत्यां भद्रां च लक्ष्मणां ॥ कालिंदीं निजलाभाय तपः परमुपेयुषीं ॥ प

अयुधिष्ठिरामरवास्त्वधवर्त्ते तेरुक्मवेदयः ॥३८॥ एवं सामभिरालब्धः स्वफल्कतनयो मणिं ॥ आदाय वाससाछन्नं ददौ
सूर्यसमप्रभं ॥३९॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ॥४०॥ यस्त्व
तत् भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं मंगलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्त्तिं दुरितमपो
ह्य याति शांतिं ॥४१॥ इति श्रीभागवते महापुराणे दशमस्कंधे - मं - रवा - सप्तपंचाशत्तमोध्यायः ॥५७॥ छ ॥
श्रीशुक उवाच ॥ एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः ॥ इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥१॥ दृष्ट्वा
तमागतं पार्था मुकुंदमखिलेश्वरं ॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं ॥२॥ परिष्वज्याच्युतं वीरा अंगसंग
हतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥३॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं ॥ फल्गुनं परिर
भ्याथ यमाभ्यां चाभिवंदितः ॥४॥ परमासन आसीनं कृष्णा कृष्णमनिंदिता ॥ नवोढा व्रीडिता किंचिच्छनैरेत्याभिवंद
यत ॥५॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः ॥ निषसादासनेन्ये च पूजिताः पर्युपासत ॥६॥ ॥ ॥

रितेष्वनु प्रियावासमिंद्रप्रस्थमथागमत ॥ प्रतीतान्नजनान्पिदुपदमहे पुनः सर्वे दृष्टान्युयुधान सात्यकिः ॥१॥ प्राणाइंद्रिया
णि मुख्यं पंचवत्तिं प्राणमिव ॥२॥३॥ ज्येष्ठयोः प्रणमं कृत्वा समेनालिंगितः ॥ कनिष्ठाभ्यां नमस्कृतो ब्रह्वव ॥४॥ कृष्णा द्रौपदी बहुभार्या

२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिहार्दे नस्नेहेन आर्द्रे सजले दृशौ यस्याः सा तया परिष्वक्त तया परिपृष्टा बांधवा यस्य सः ॥७॥ प्रेमगर्भं कृव्यं तेन रुद्धः कंठो यस्याः । क्लेशा
प्राये आसनिदर्शनं यस्याः तां नजनं नांक्लेशापायाय आलानं दर्शयतीति ॥८॥ ज्ञातीन् बंधूंश्च नो अस्मान्वदा भ्राता तान् अनुकर्षे प्रेषिता ॥९॥
ज्ञानी निति वचना स्मामं मोहं वारंपती स्तोतिनतेस्तीति। तत्र हे तु विश्वस्येति सुहृद् दृष्ट्वा सा च तस्याहंसि ना ज्ञायसि ॥१०॥ कुमेघसां विष

दृष्ट्वा समागत्य कृताभिवंदनस्तयाति हार्दार्द्रदृशाभिरंभितः ॥ आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबांध
वः ॥७॥ तया सप्रेमगर्भकृव्यरुद्धकंठाश्रुलोचना ॥ स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनीं ॥८॥ तदेव कुशलं नोऽस्म
नाथास्ते लतो वयं ॥ ज्ञातिबंधूः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥९॥ न तेऽस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः ॥ तथापि
स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः ॥१०॥ युधिष्ठिर उवाच ॥ किं न आचरितं श्रेयो न वेदाहमधीश्वर ॥ योगेश्वराणां दु
॥श्रीकृक: र्दर्शो यन्नो दृष्टः कुमेधसां ॥११॥ इति वै वार्षिकान्मासान् राज्ञा सोऽभ्यर्थितः सुखं ॥ जनयन्नयनानंदमिंद्रप्रस्थौकसां विभुः
॥१२॥ एकदा रथमारुह्य विजयो वानरध्वजं ॥ गांडीवं धनुरादाय तूणौ चाक्षय्यसायकौ ॥१३॥ साकं कृष्णेन संनद्धो विहर्तुं
विपिनं वनं ॥ बहुव्यालमृगाकीर्णं माविशत्परवीरहा ॥१४॥ तत्राविध्यच्छरैर्व्याघ्रान् शूकरान्महिषान्रुरून् ॥ शरभान्ग
वयान्खड्गान्हरिणान्शशशल्लकान् ॥१५॥ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्युपागते ॥ तृट्परीतः परिश्रांतो बीभत्सु
र्यमुनामगात् ॥१६॥

यासकृच्चित्तानां दृष्टोऽसि ॥११॥ सुखमवसदिति शेषः सुखमर्थित इति वा क्रियासमाप्तिः ॥१२॥ कालिंदीदर्शनप्रसंगमाह । एकदेति
अक्षय्यसायकौ ययोस्तौ तूणौ इषुधी ॥१४॥१५॥ राज्ञे युधिष्ठिराय मेध्यान् कर्माहीनावी भत्सुरर्जुनः ॥१६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰उ
२५

॥१७॥ सख्या श्रीकृष्णेन ॥१८॥१९॥२०॥ अयं मां कामयेदिति शंकया माहात्म्यापिति ॥२१॥२२॥ आदावेव तद्विद्वान् ॥२३॥ प्रसंगात्तत्कालीनं
चरित्रं तस्मात् हास्ये वेति पार्थैर्यदैवसदिष्टं दिष्टं ज्ञापित श्रीकृष्णस्तत्र दैवतेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास ॥२४॥ किंच । भ
गवान्निरतिशयैश्वर्यगुणो नापि अर्जुनस्य धनुरादिलाभाय सारथिः सन् खांडववनाग्नेयंद्रस्य वनं ॥२५॥ अक्षय्यो अक्षयसायकौ ॥
तत्रोपस्पृश्य सलिलं पीत्वा वारि महारथौ ॥ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां ॥१७॥ तामासाद्य वरारोहां सुद्विजां रुचि
राननां ॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां ॥१८॥ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि ॥ मन्ये त्वां पतिमि
च्छंतीं सर्वं कथय शोभने ॥१९॥ कालिंद्युवाच ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं तपः परममास्थि
ता ॥२०॥ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं ॥ तुष्यतां मे स भगवान् मुकुंदोऽनाथसंश्रयः ॥२१॥ कालिंदीति समाख्याता
वसामि यमुनाजले ॥ निर्मिते भवने पित्रा यावदच्युतदर्शनं ॥२२॥ तथावदद्गुडाकेशो वासुदेवाय सोऽपि तां ॥ रथमारोप्य तद्
विद्वान् धर्मराजमुपागमत् ॥२३॥ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतं ॥ कारयामास नगरं विचित्रं विश्वकर्मणा ॥
॥२४॥ भगवांस्तत्र निवसन् स्वानां प्रियचिकीर्षया ॥ अग्नये खांडवं दातुमर्जुनस्यास सारथिः ॥२५॥ सोऽग्निस्तुष्टो धनुरदा
द्धयान् श्वेतान् रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥२६॥ मयश्च मोचितो वह्नेः सभां सख्य उपाहर
त् ॥ यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥२७॥ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सा
॥२६॥ खांडवदाहकवह्नेः ॥ सख्ये अर्जुनाय ॥ यस्मिन्निति सा प्रान्यते ॥ निर्देशः ॥ यस्य भ्रमस्यार्थः ॥ जलस्थलयोर्दृशो दृष्टेर्भ्रमः ॥ यद्वा ज
लेस्थलत्वदृक् दृष्टिर्यस्मिन् तत् जलस्थलदृक् तस्मिन् भ्रम आसीदिति ॥२७॥२८॥ ॥ ॥ ॥

२५

सुपुण्य ऋतु ऋक्षंन्वयस्मिन्॥२९॥ पंचमंमित्रविंदा विवाहमाह। विंदानुविंदावितिद्वाभ्यां आवंत्यौ अवंतीराजानौ॥३०॥३१॥ षष्ठमाह।
नग्नजिदितिकौशल्य अयोध्यापतिसस्यानाम कन्या अभवत्। देवीकांतिमतीनाग्नजितीतिपितृनाम्ना प्रसिद्धेत्यर्थः॥३२॥ वीरस्य
गंधमपिनसहंत इतितथा तान्। खलान् दुर्ग्रहान्॥३३॥ वृषान्जायतियस्तेनलभ्या॥३४॥ प्रतिनंदितस्तंप्रतिवंदितान्। श्रीहृ
अथोपयेमेकालिंदींसुपुण्यत्वर्क्षउर्जिते॥ वितन्वन्परमानंदंस्वानांपरममंगलं॥२९॥ विंदानुविंदावावंत्यौदुर्योधनव
शानुगौ॥ स्वयंवरेस्वभगिनींकृष्णेसक्तांन्यषेधतां॥३०॥ राजाधिदेव्यास्तनयांमित्रविंदांपितृष्वसुः॥ प्रसह्यहृतवान्
कृष्णोराजन्राज्ञांप्रपश्यतां॥३१॥ नग्नजिन्नामकौशल्योआसीद्राजातिधार्मिकः॥ तस्यसत्याभवत्कन्यादेवीनाग्नजिती
२ नृप॥३२॥ नतांशेकुर्नृपावोढुमजित्वासप्तगोवृषान्॥ तीक्ष्णशृंगान्सुदुर्धर्षान्वीरगंधासहान्खलान्॥३३॥ तांश्रु
त्वावृषजिल्लभ्यांभगवान्सात्वतांपतिः॥ जगामकौशलपुरंसैन्येनमहतावृतः॥३४॥ सकौशलपतिःप्रीतःप्रत्युत्थायासन
नादिभिः॥ अर्हणेनापिगुरुणापूजयन्प्रतिनंदितः॥३५॥ वरंविलोक्याभिमतंसमागतं नरेंद्रकन्याचकमेरमापतिं॥ भू
यादयंमेपतिराशिषोमलाः करोतुसत्यायदिमेधृतव्रतो॥३६॥ अर्चितंपुनरित्याहनारायणजगत्पते॥ आत्मानंदेनपूर्ण
र्णस्यकरवाण्यल्पकः॥३७॥ यत्पादपंकजरजःशिरसाबिभर्तिश्रीरब्जजःसगिरिशःसहलोकपालैः॥ लीलातनूस्वकृ
तसेतुपरीप्सयेशःकालेदधत्सभगवान्ममकेनतुष्येत्॥३८॥ श्रीशुकउवाच॥ तमाहभगवान्हृष्टःकृतासनपरिग्रहः॥ मेघगंभी
रयावाचासस्मितंकुरुनंदन॥ ...
हेमानवासप्रतिनंदितः॥३५॥३६॥३७॥३८॥३९॥ हृष्टःकृष्णारविंदाक्षवासुदेवजगत्पते॥ त्वामहंशरणंयातःपाहिमांकरुणानिधे॥ यथा
दामितवांस्त्वंवैदुर्दमान्वृषभानिमान्। तथारागादिकान्दोषान्दामयत्वंविजयप्रभो॥३९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ० हे नरेंद्र एतन्यबंधो क्षत्रियस्य ॥ शुल्कदा द्रव्यादिप्रदाः ॥४०॥ गुणानामेकमेव धामस्थानं तां तथाभूतस्य यस्य तवांगे ॥४१॥४२॥ दुर्दां
२६ ता अशिक्षिता दुरवग्रहा अपरायत्ताः । कुतस्तद्दाह । एतैरिति भग्ना भंगं प्रापिताः । एतान्येनिगृहीतितस्य कन्येति समयपहृतः ॥४३॥

श्रीभगवानुवाच ॥ नरेंद्र यांच्या कविभिर्विगर्हिता राजन्यबंधो र्निजधर्मवर्त्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदी
यां न हि शुल्कदा वयं ॥४०॥ राजोवाच ॥ को न्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपा
यिनि ॥४१॥ किं त्वास्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥४२॥ सप्तैते गोवृषा वीर
दुर्दांता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥४३॥ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन ॥ वरो भवा
नभिमतो दुहितुर्मे श्रियःपते ॥४४॥ एवं समयमाकर्ण्य बध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव ता
न ॥४५॥ बध्वा तान् दामभिः शौरिर्भग्नदर्प्पान् हतौजसः ॥ व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ॥४६॥ ततः प्रीतः सुतां
राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान् विधिवत्सदृशीं विभुः ॥४७॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिं
लेभिरे परमानंदं जातश्च परमोत्सवः ॥४८॥ शंखभेर्य्यानका नेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदिताः सुवासःस्र
गलंकृताः ॥४९॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससां ॥५०॥ ॥ ॥

यद्यदि इमे गोवृषा ॥४४॥ सप्तधा कृत्वेति । बह्वीनां योषितां संपूर्ण एवाहं संभोगयोग्यः स्यामिति सर्वांप्रत्यसापत्न्यप्रदर्शनार्थं आ २६
त्मनः सप्तधा करणं ॥४५॥४६॥४७॥४८॥४९॥ निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां च दासीनां ॥५०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नागात् नागेभ्यः । शतगुणा अत्वल क्षानिरथात् रथेभ्यः शतगुणा अवकोदीः । अश्वात् अश्वेभ्यः शतगुणा अवयप्राप्ति ॥५१॥५२॥ यदुभिर्गो
रथैश्वभग्नवीर्या अपि सुदुर्मर्षा रुरुधुः ॥५३॥ अस्यतास्तिततप्रयुंजाना नीतियावत् ॥५४॥५५॥ सप्तमं विवाहमाह । श्रुतकीर्त्तेरि

नवनागसहस्राणि नागाच्छतगुणा रथाः ॥ रथाच्छतगुणा अश्वा अश्वाच्छतगुणा नराः ॥५१॥ दंपती रथमारोप्य
हत्वा सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो प्रेषयामास कोशलः ॥५२॥ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां ॥ भग्नवीर्याः
सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥५३॥ तानस्यतः शरव्रातान् बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ॥५४॥
पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥५५॥ श्रुतकीर्त्तेः सुतां भद्रामुपयेमे
पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥५६॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां ॥ स्वयंवरे ज
हारैकः स सुपर्णः सुधामिव ॥५७॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृता
श्चारुदर्शनाः ॥५८॥ इति श्रीभागवते महापुराणे दशमस्कंधे अ - म - षु - हो नाष्टपंचाशत्तमोध्यायः ॥५८॥ ७ ॥

ति । श्रुतकीर्त्तिर्नाम्न्या पितृष्वसा तस्याः सुतां भद्रां नाम्ना कैकेयीं तद्दत्तां ॥५६॥ अष्टममाह । सुतां चेति एकः एव श्रीकृष्णो
लक्षणां जहार ॥५७॥ तस्य निरोधात् पुरं तस्मात् ॥५८॥ मैत्री जांबवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिंदी मित्रविंदा
चेत्यष्टौ पट्टमहास्त्रियः ॥५९॥ इति दशमे अष्टपंचाशत्तमोध्यायः ॥५८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श० उ० तुनषष्टितमे भौमं हत्वा तेनाहृता हरिः॥ कन्यासहस्रशः प्राप्य पारिजातं दिवोहरत्॥ परिणीय ततस्ताभिस्तन्मार्गेण रथपूरणैः॥ श्रीत्या
२७ राधोऽयमसौरेमेत हृहेषु गृहस्थवत्॥ येन तास्त्रियो निरुद्धाः स भौमः। चकारादनेन कारणेन हतः॥ तदा च वक्ष्यतीति॥१॥ इंद्रेण भौमविचेष्टि
तं विज्ञापितः सन् प्राग्ज्योतिषपुरं भौमनगरं ययाविति अन्वयः॥ कथंभूतेनाहृतं छत्रं यस्य तेन लोकपालधाम्नः तत्त्वात् इंद्रस्य वरुणच्छ
त्रहरणेपि तस्येव प्रमानभंग इति तथोक्तं हृते कुंडले यस्याः सा दितिः बंधुर्यस्यास्तया यस्य तेनाहृतममराद्रेरास्थानं मणिपर्वतलक्षणं च
राज्ञोक्ता च॥ यथा हतो भगवता भौमो येन च तास्त्रियः॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः॥१॥ श्रीशुकउवा
च॥ इंद्रेण हृतछत्रेण हृतकुंडलबंधुना॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं॥ सभार्यो गरुडारूढः प्राग्ज्योति
षपुरं ययौ॥२॥ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं॥३॥ गदया निर्वि
भेदाद्रीन् शस्त्रदुर्गाणि सायकैः॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना॥४॥ शंखनादेन यंत्राणि हृदयानि
मनस्विनां॥ प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः॥५॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं॥ मुरः श
यान उत्तस्थौ दैत्यः पंचशिरा जलात्॥६॥
स्यतेनासत्यभामायाः गृहे भगवंतमिंद्र आगत्य विज्ञापितवान्॥ तदा तस्याः कौतुकापतया भार्यया सहयया वितियद्वा त्वदनुज्ञ
यैव त्वत्पुत्रं हनिष्यामीति इति ह्युक्तो भूम्येव वरं दत्तं स संकल्पं सत्यभामाया भूम्यंशत्वात्तया सह युयोध इति नारदानीतया रिज्ञा
तैककुसुमैः रुक्मिण्यै दत्ते सति। कुपितां सत्यभामां सांत्वयन् आतुभ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवं
शे प्रसिद्धं तदर्थं आनीतवानिति ज्ञेयं॥२॥ गरुडेन यानेकारणं गिरिदुर्गोरित्यादिना रूपलक्षितं जलाग्न्यनिलैश्च सर्वतो वर्त्तमा २७

॥७॥ आविध्य आतोल्या समहत्रादरं सन्वय॥८॥ तस्मै श्रीहस्ताय गदां व्यमुंचत्॥९॥१०॥ इंद्रतेजसा वज्रेण प्रतिक्रियापाहेतुभूतया

अमर्षजुषः॥११॥ पीठं पीठनामानं निरगन् निरगमन्॥१२॥ निकृत्तानि शीर्षादीनि येषां तान्॥१३॥१४॥ शतघ्नीः शक्तिविशेषं॥१५॥ विचित्रा

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगांतसूर्यानलरोचिरुल्बणः॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोर

रवं गः॥७॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः॥ स रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमावृणो

त्॥८॥ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्य

मुंचत॥९॥ तामापतंतीं गदया गदां मृधे गदाग्रजो निर्विभिदे सहस्रधा॥ उद्यम्य बाहूनभिधावतोजितः शिरांसि चक्रेण ज

हार लीलया॥१०॥ व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रिया

मर्षजुषः समुद्यताः॥११॥ ताम्रोंतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्र

री युक्ता निरगन्धृतायुधाः॥१२॥ प्रायुंजतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः॥ तच्छस्त्रकूटं भग

वान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह॥ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः॥१३॥ स्वा

नीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्र

मत्॥१४॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीः योधाश्च सर्वे

युगपच्च विव्यधुः॥१५॥ तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः॥ निकृत्तबाहूरुशिरोध्रविग्रहं चक्र

वाजा पत्राणि येषां तैर्वाणैः॥ निकृत्ता वाहवः उरवः शिरोधराः कंधराः विग्रहाः देहा यस्य तत्॥ तर्ह्येव तं यदा विव्यधुस्तस्मिन्नेव क्षणे॥१६॥

ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्क० उ० ऽस्याश्चर्यं कुरूद्वहेति संबोधनं । तथाहि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तस्मात्पूर्वमेव तत्सर्वं सैन्यं हत्वा पश्चात्तान्यस्त्राणि च
२८ । चिच्छेदेत्यन्वयः । एकैकं शस्त्रं च त्रिभिस्त्रिभिः शरैरित्याश्चर्यं ॥१७॥ किंच गरुत्मतेति ॥१८॥ यत्तया शक्त्या वज्रप्रतिहतत्वा

यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ उह्यमानः सुप
र्णेन पक्षाभ्यां निघ्नता गजान् ॥१७॥ गरुत्मता हन्यमानास्तुंडपक्षनखैर्गजाः ॥ पुरमेवाविशन्नार्ता नरको
युध्ययुध्यत ॥१८॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं ॥ तं भौमोऽप्याहरच्छक्त्या वज्रप्रतिहतो यतः ॥ ना
कंपत तया विद्धो मालाहत इव द्विपः ॥१९॥ शूलं भौमोऽच्युतं हंतुमाददे वितथोद्यमः ॥ तद्विसर्गात्पूर्वमेव न
८ रकस्य शिरो हरिः ॥ अपाहरत् गजस्थस्य चक्रेण क्षुरनेमिना ॥२०॥ सकुंडलं चारु किरीटभूषणं बभौ पृथिव्यां
पतितं समुज्वलत् ॥ हा हेति साध्विति ऋषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे ॥२१॥ ततश्च भूः कृष्ण
मुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे ॥ सवैजयंत्या वनमालयार्पयत् प्राचेतसं छत्रमथो महामणिं
॥२२॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितं ॥ प्रांजलिः प्रणता राजन् भक्तिप्रवणया धिया ॥२३॥ ॥ २८

सा गरुडस्कंधेनाकंपत ॥१९॥ गरुडे वितथोद्यमः सन् ॥२०॥२१॥ प्रतप्ते जांबूनदे यानि रत्नानि तैर्भास्वरे मेर्वंशभूतमंदर
शिखरं महामणिं चार्पयदिति ॥२२॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐश्वर्य्यं ज्ञानं वा भूमिस्तोति नमस्त इति परमात्मदेवायेतं तर्य्यामिनं ॥२४॥ येन मंत्रेण कुंत्या प्रसन्नपूर्वमासीत्तेन मंत्रेण नमस्य
ति नम इति पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः अत एव संकीर्त्तिमयी पंकजमाला विद्यते यस्य तस्मै एवं भूतं ध्यायतां पंक
जवत्सुप्रसन्ने तापोपशमने नेत्रे यस्य तस्मै पंकजवत्सुसेव्यौ पंकजांकितौ वा अंघ्री यस्य तस्मै नम इति ॥२५॥ किं च भगवते नि
रतिशयैश्वर्याय वासुदेवाय सर्वभूताश्रयाय अतो विष्णवे व्यापिने न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवतीति कुतः सर्वा
श्रयत्वं तत्राह । पुरुषाय सर्वस्मात्पूर्वमासीत् पूर्वमेवाहमिहासमिति तत्पुरुषत्वमिति श्रुतेः । एतदपि कुतः । आदिबीजाय आदि

भूमिरूपाय ॥ नमस्ते देवदेवेश शंखचक्रगदाधर ॥ भक्तेच्छोपात्तरूपाय परमात्मन्नमोस्तु ते ॥२४॥
नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२५॥ नमो भगवते
तुभ्यं वासुदेवाय विष्णवे ॥ पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥२६॥ अजाय जनयित्रेस्य ब्रह्म
णेनंतशक्तये ॥ परावरात्मन् भूतात्मन् परमात्मन्नमोस्तु ते ॥२७॥ ॥ ॥ ॥

जगत्कारणस्यापि कारणाय एवमपि नमदादिवत् जाप्रमितोहा पूर्णबोधायेति ॥२६॥ नन्वेवमपि स्वकारणात्पूर्वसत्त्वं नस्याद
तआह । अजायतिस्वयमजायेऽस्य च जनयित्रे उभयत्रापि क्रमेण हेतुद्वयं । ब्रह्मणो बृहतो अनंतशक्तये इति चा
बृहत्त्वादजत्वं अनंतशक्तित्वात् जनयितृत्वमपि सर्वार्थः ॥ ननु पित्रादय पुत्रादीनां जनकास्तेषां च तत्पूर्वं तेषां च भूता
नि तेषां च स्वकर्मद्वारेण जीवाः । किमत्राह । तत्राह परावरात्मन्नित्यादि पित्रादयः आत्मत्वान्न त्वमेव जनक इत्यर्थः ॥२७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ उ॰ द॰ ननु गुणा विशेषाः सत्त्वादि हेतवः। ते च प्रधानस्यैवा तस्य च पुरुषपक्षे भक्तः। तत्र कालो निमित्तमिति प्रसिद्धं किमत्राह तत्राह। त्वंवा इतित
२९ मसोधारणेप्यसंवृत एव। स्थानाय पालनाय। जगतस्तस्यापार्थं उत्कटं रजोमात्रादित्वमेव बिभर्षि स्त्वजसीत्यर्थः कालप्रधानपु
रुषाश्च त्वद्व्यतिरिक्ता न संतीत्युक्तं तु परस्य सर्वव्यतिरिक्तः॥ अतस्त्वमेव। नपितेत्यर्थः॥२८॥ कार्यकारणप्रपंचस्ये तदाव्यतिरेकांतस्यं
च सर्वव्यतिरेकमुपपादयति। आहमिति अहंभूमिः। मात्राणीति। देवामन इंति। इंद्रियाणीति च त्रिविधाहंकारकार्याणि कर्त्ता
मू त्वंवै सिसृक्षे रज उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः॥ स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो भवान्प
रः॥२८॥ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि। कर्त्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगो
वन्नयं भ्रमः॥२९॥ तस्यात्मजोयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः॥ तत्पालयैनं कुरु हस्तपंकजं शिरस्यमु
ष्याखिलकल्मषापहं॥३०॥ श्रीशुक उवाच॥ इति भूम्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया॥ दत्वाभयं भौमगृहं प्राविश
त्सकलर्द्धिमत्॥३१॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं॥ भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः॥३२॥
तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः॥ मनसा वव्रिरेभीष्टं पतिं दैवोपसादितं॥३३॥ भूयात्पतिरयं मह्यं धाता
तदनुमोदतां॥ इति सर्वाः पृथक्कृष्णे भावेन हृदयं दधुः॥३४॥ ॥ ॥ ॥ ॥
हंकारः॥२९॥ एवं स्तुत्वा प्रार्थयते तस्येति हा प्रपन्नार्तिहरा तस्य नरकस्यायं भगदत्तो नाम भीतः। अत एव मया तव पादपंकजमु २९
पसादित॥३०॥ अभयं दत्वा॥३१॥ शताधिकमित्यपि ज्ञातव्यं यथाह पराशरः। कन्यापुरे स कन्यानां षोडशातुलविक्रमः। शता
धिकानि ददृशे सहस्राणि महामते। इति राजन्य इत्युपलक्षणं सिद्धादिभ्योपीति तथाहि तेनैवोक्तं देवसिद्धासुरादीनां नृपाणां च कज

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राहिणोत प्रस्थापयामासा सुमस्त्राकमनीयाश्च विरजोंबराश्रताः। नरपानैश्चिविकाभिः॥ अपि च प्रहाकोशानीति॥३५॥३६॥ सप्रि
यस सपापासहितः॥३७॥३८॥ गृहोद्यानेनिकुटं तदुपस्रोभयतियः॥३९॥ सेंद्राविबुधास्त्रिर्जियेतीद्दृलक्ष्मया संग्रामउक्त तत्र ननुकथं
प्रसाधितस्त्वमनोरथेनश्रीलक्ष्मेनसेंद्रस्पसंग्राम इत्याशंक्याह। पय्याम्बइति। अच्युतोप्यर्थसाधनादिति। नाकपर्वद्वयंपाचतिधातोवि
गृह्यतेविग्रहंकरोतिमाह। नपितमक्रोधः। आग्घतोधनिकृतं॥४०॥ यथायथावत् अनेनदेवक्यादिबंधुजनसमागमोपिप्रति
ताप्राहिणोद्वारवतींसुमृष्टविरजोंबरः॥ नरपानैर्महाकोशान्यथाश्वान् द्रविणंमहत्॥३५॥ ऐरावतकुलेभांश्च चतुर्द
तांस्तरस्विनः॥ पांडुरांश्च चतुष्षष्टिं प्रेषयामासकेशवः॥३६॥ गत्वाक्षुरेंद्रभवनंदत्वादितिश्च कुंडले॥ पूजितस्त्रिदशेंद्रेणम
हेंद्राण्याचसप्रियः॥३७॥ चोदितोभार्ययोत्पाद्य पारिजातंगरुत्मति॥ आरोप्यसेंद्रान्विबुधान्निर्जित्योपानयत्पुरं
म ॥३८॥ स्थापितःसत्यभामायागृहोद्यानोपशोभनः॥ अन्वभुर्भ्रमराःस्वर्गात् तद्गंधासवलंपटाः॥३९॥ ययौवच्छ्रानभ्याकिरी टाः
टकोटिभिः पादौस्पृशन्त्यच्युतमर्थसाधनं॥ सिद्धार्थितेनविग्रह्य तेमहात्मनोहो सुराणांचतमोधिवाढ्यतां॥४०॥ अथो
मुहूर्ते एकस्मिन्नानागारेषु ताःस्त्रियः॥ यथोपयेमे भगवान् तावद्रूपधरोव्ययः॥४१॥ गृहेषु तासामनपाय्यतर्क्यकृन्नि
रस्तसाम्यातिशयेघवस्थितः॥ रेमेरमाभिर्निजकामसंप्लुतो यथेतरोगार्हकमेधिकांश्चरन्॥४२॥ ॥ ॥
गृहं योगपद्येनसूचितः॥ अव्ययस्वेनापिसंपूर्ण एव॥४१॥ अहो भाग्यं नारीणामित्याह त्रिभिः॥ गृहेष्विति। अतर्क्याणि कर्मा
णि करोतीतितथासः॥ निरस्तसाम्यपातिशयश्चैश्वर्यैरस्येषांतेषु गृहेषु। अतएवापीअवस्थितस्माभिलक्ष्मीः आनंदाभूतताभिः॥ निज
कामसंप्लुतस्वानंदपरिपूर्णः। गार्हकमेधिकान् गृहस्थसाधर्मान्॥४२॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८०उ० अनुरागहाससहितमवलोकं चातपूर्वकं नवसंगमं चा तहतं जल्पं च तस्मिन् लज्जां स्वामेनुः ॥४३॥ विश्रमणं संवाहनं केशप्र
३० प्रसारके शप्रसाधनं दासी नां शता निविघं तेयसां तथाभूत अपि स्वयं विभोर्दास्यं विदधुरिति ॥४४॥ इति दशमे एकोन
षष्टितमः ॥५९॥ ५९ ॥ अथ षष्टितमे रूक्मिणः परिहासेन रूक्मिणी ॥ कोपयित्वात तत्प्रेम कलहे तां प्रसादयेत् ॥ रामा राम ज
नानंद महोदय विधुं बनै ॥ रुक्मिण्या प्रेम कलह छद्मनैश्वर्य्यमीयिते ॥ स्वतल्पस्थं स्वयं पर्य्यकस्थं ॥१॥ वक्ष्यमाणं रुक्मिण्याश्च
इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमेधितयानुरागहासा
वलोक नवसंगम जल्पलज्जाः ॥४३॥ प्रत्युद्गमासनवरार्हणपादशौच तांबूलविश्रमणवीजन गंधमाल्यैः ॥ केशप्रसा
रस्नापनस्त्रपनो पहार्य्यैर्दासीशता अपि विभो र्विदधुः स्म दास्यं ॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे पारि
जातहरण भौमवध बहुस्त्री विवाहो नाम एकोनषष्टितमोध्यायः ॥५९॥ ॥६०॥ ॥ श्रीबादरायणिरुवाच ॥ कर्हिचित्सु
खमासीनं स्वतल्पस्थं जगद्गुरुं ॥ पतिं पर्य्यचरद्भैष्मी व्यजनेन सखीजनैः ॥१॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्यव
तीश्वरः ॥ स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥२॥ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना ॥ विराजिते
हस्तग्रहादिभिः॥ विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः॥५॥ पृष्टाश्चानामयं स्वेषु [illegible] गद्गदया गिरा॥ कृष्णे कमलपत्रा
क्षे संन्यस्ताखिलराधसः॥६॥ कच्चिन्नो बांधवा राम सर्वे कुशलमासते॥ कच्चित्स्म[illegible] नो राम यूयं दारसुतान्विताः॥७॥
दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः॥ निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः॥८॥ गोप्यो हसंत्यः पप्र
च्छू रामसंदर्शनादृताः॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः॥९॥ कच्चित्स्मरति वा बंधून् पितरं मातरं च सः॥ अप्य
सौ मातरं द्रष्टुं सकृदप्यागमिष्यति॥ अपि वा स्मरतेऽस्माकमनुसेवं महाभुजः॥१०॥ मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄरपि॥ यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो॥११॥ तानः सद्यः परित्यज्य गतः संछिन्नसौहृदः॥ कथं नु
ताहृशं स्त्रीभिर्न श्रद्धीयेत भाषितं॥१२॥ कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः॥ गृह्णंति वै चित्र
कथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः॥१३॥ किं नस्तत्कथया गोप्यः कथयामपराः॥ यात्यस्माभिर्विना कालो यदि

अन्ना विधानि वाक्यानि॥१२॥ तत्रान्या ऊचुः॥ कथं न गृह्णंतीति॥ अन्या ऊचुः। गृह्णंति वा इति। चित्रकथस्य चित्रकथाकथनकोवि
दस्य किंच। सुंदरं स्मितं यस्मिन् तेनावलोकनेन उच्छ्वसितस्तेनोपस्मरते नातुरा॥१३॥ अपरा ऊचुः। किं न इति॥ कालस्तावत् तस्य
चास्माकं च यात्येव किंतु। तस्य सुखेनास्माकं तु दुःखेनेत्येतावानेव विशेष इति ध्वनितं॥१४॥ ॥ ॥ ॥ ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥ नानाविधेष्वनुनयेषु कोविदः ॥१६॥ मधुं चैत्रं माधवं वैशाखं गोपीनां रतिं प्रीतिं श्रीहलभृत्क्रीडासमये तु तत्रा ना पतिबालानां चान्यासा
मित्यभियुक्तप्रसिद्धिः ॥१७॥ पूर्णचंद्रस्य कलाभिर्मरीचिभिरामृष्टे उज्वले कौमुदीगंधवायुना कुमुद्वतीनां गंधवातेन सेविते यद्वा कौ
मुदीशब्देन तद्विकासीनि कुमुदानि लक्ष्यंते कुमुदगंधवातेनेत्यर्थः ॥१८॥ वारुणी सुधपा सहोत्पन्ना मदिरा ॥१९॥२०॥ क्षीबो मत्तः

इति प्रहसितं शौरेर्जल्पितं चारुवीक्षितं ॥ गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः ॥१५॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृ
दयंगमैः ॥ सांत्वयामास भगवान्नानानुनयकोविदः ॥१६॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च ॥ रामः क्षपासु भगवा
न्गोपीनां रतिमावहन् ॥१७॥ पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना ॥ यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥१८॥ वरु
णप्रेषिता देवी वारुणी वृक्षकोटरात् ॥ पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत् ॥१९॥ तं गंधं मधुधाराया वायुनोपहृ
तं बलः ॥ आघ्रायोपगतस्तत्र ललनाभिः समं पपौ ॥२०॥ उपगीयमानचरितो वनिताभिर्हलायुधः ॥ वनेषु व्यचरत्क्षीबो म
दविह्वललोचनः ॥२१॥ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया ॥ बिभ्रत्स्मितमुखांभोजं स्वेदप्रालेयभूषितं ॥२२॥ स आ
जुहाव यमुनां जलक्रीडार्थमीश्वरः ॥ निजं वाक्यमनादृत्य मत्त इत्यापगां बलः ॥ अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥२३॥
पापे त्वं मामवज्ञाय यन्नायासि मयाहुता ॥ नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीं ॥२४॥ एवं निर्भर्त्सिता भीता यमुना
यदुनंदनं ॥ उवाच चकिता वाचं पतिता पादयोर्नृप ॥२५॥ राम राम महाबाहो न जाने तव विक्रमं ॥ यस्यैकांशेन विधृता जग

॥२१॥ स्वेद एव प्रालेयं हिमं तेन भूषितं ॥२२॥ मत्तो यमित्यनागतं आपगां नदीं ॥२३॥ आहुता आहूताय तु यस्मान्नागच्छसि तस्मा
त्त्वेष्ये गमयिष्यामि ॥२४॥ चकिता कंपिता ॥२५॥ एकांशेन शेषाख्येन ॥२६॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श० उ०
४६

॥२७॥ विजगाहे अवगाहनं कृतवान् ॥२८॥ उत्तीर्णाय निर्गताय असितौ वरादीनि कांतिर्ददौ कांतिर्लक्ष्मी॥ यथोक्तं वैष्णवे वारुणप्रहितां चा
स्मै मालामम्लानपंकजां समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छतेति हरिवंशे च बलं प्रती लक्ष्मीवाक्यं जातरूपमयं चैकं कुंडलं व
ज्रभूषणं आदिपद्मं पद्मास्त्यादि दिव्यं श्रवणभूषणं॥ देवेमा प्रतिगृहीष्व पौराणीभूषणक्रियामित्यादि॥२९॥ वसित्वा परिधाय स्र

परं भावं भगवतो भगवन्मामजानतीं॥ मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल॥२७॥ ततो व्यमुंचद्यमुनां याचितो
भगवान्बलः॥ विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट्॥२८॥ कामं विहृत्य सलिलादुत्तीर्णायासितांबरे॥ भूषणानि
महार्हाणि ददौ कांतिः शुभां स्रजं॥२९॥ वसित्वा वाससी नीले मालामामुच्य कांचनीं॥ रेजे स्वलंकृतो लिप्तो माहेंद्र इव वा
रणः॥३०॥ अद्यापि दृश्यते राजन्यमुनाकृष्टवर्त्मना॥ बलस्यानंतवीर्यस्य वीर्यं सूचयतीव हि॥३१॥ एवं सर्वा निशा या
ता एकेव रमतो व्रजे॥ रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषितां॥३२॥ इति श्रीभागवते महापुराणे दशमस्कंधे ल
व ज य ना र्ब न पंचषष्टितमोऽध्यायः॥६५॥ ॥श्रीशुक उवाच॥ नंदव्रजं गते रामे करूषाधिपतिर्नृप॥ वासुदे
वोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत्॥१॥ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः॥ इति प्रस्तोभितो बालैर्मेन आत्मा
त्. नमच्युतं॥२॥ दूतं च प्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्मने॥ द्वारकायां यथा बालो नृपो बालकृतोऽबुधः॥३॥ दूतस्तु
द्वारकामेत्य सभायामास्थितं प्रभुं॥ कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत्॥४॥ ॥ ॥ ॥ ४६

सुच्यकंठे निधार्य चंदनादिभिरालिप्तः॥३०॥३१॥ एकेव एकैव निशाय था तथा माधुर्यैर्विलासैः॥३२॥ इति दशमे पंचषष्टितमः॥
॥६५॥ षट्षष्टितमे काशीगतो हन्यौड्रकं हरिः॥ तन्मित्रं च ततो दृत्तं सुदक्षिणवधादिकं॥१॥१॥ प्रस्तोभितस्तत्सा प्रोत्सा
हितः बालैरज्ञैः॥२॥ बालकृतो नृपबालेन पल्वेन क्रीडाया परिकल्पितः॥३॥ ४॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥ हे मूढ उत्सृज्य स्यामिये सह त्वमेवं विकत्थसे तेव पीस्वर्थय हायै कृत्रिमे सुदर्शनादिभिस्त्वेवं श्लाघसे ताथ कत्त्र क्षेत्या जयिष्या
मिसर्थः ॥८॥ मां शरणमेही यस्यांतरं मुखमिति वटाकं कौदिवत्याक्षि विशेषाः। तत्र तदा शुनो शरणमाश्रयो भविता सि ॥९॥ का
वासुदेवो वतीर्णो हमेकएव न चापरः ॥ भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज ॥५॥ यानि त्वमस्मच्चिन्हानि मौढ्या ८५
द्बिभर्षि सात्वतः ॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं ॥६॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्पमेध
सः ॥ उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥७॥ उवाच दूतं भगवान्परिहासकथामनु ॥ उत्स्रक्ष्ये मूढ चिन्हानि
ये स्त्वमेवं विकत्थसे ॥८॥ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः ॥ शयिष्यसे हतस्तत्र भविता शरणं शुनां ॥९॥ इति दूत
स्तदाक्षेपं स्वामिने सर्वमाहरत् ॥ कृष्णोपि रथमास्थाय काशीमुपजगाम ह ॥१०॥ पौंड्रकोपि तदुद्योगमुपलभ्य म
हारथः ॥ अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतं ॥११॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोन्वयान्नृप ॥ अक्षौहिणी
भिस्तिसृभिरपश्यत्पौंड्रकं हरिः ॥१२॥ शंखार्यसिगदाशार्ङ्ग श्रीवत्साद्युपलक्षितं ॥ बिभ्राणं कौस्तुभमणिं वनमाला
विभूषितं ॥१३॥ कौशेयवाससी पीते वसानं गरुडध्वजं ॥ अमूल्यमौल्याभरणं स्फुरन्मकरकुंडलं ॥१४॥ दृष्ट्वा तमात्म
नस्तुल्यवेषं कृत्रिममास्थितं ॥ यथा नटं रंगगतं विजहास भृशं हरिः ॥१५॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः
असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिं ॥१६॥ कृष्णस्तु तत्पौंड्रककाशिराजयोर्बलं गजस्यंदनवाजिपत्तिमत् ॥ गदासि
चक्रेषुभिरार्दयद्भृशं यथा युगांते हुतभुक्पृथक्प्रजाः ॥१७॥ ॥ ॥ ॥ ॥
शीमिति पौंड्रकस्यापि तदा मित्र पुरोवस्थानात् ॥१०॥११॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥१२॥१३॥ गरुडकृत्रिमो ध्वजो यस्य तं अमूल्यो
नार्घ्यो मौलिरापरणं च यस्य तं ॥१४॥१५॥१६॥ गजस्यंदनादि चतुरंगबलमर्दितवान् ॥ पृथक् प्रजाश्चतुर्विधं भूतग्रामं यथा युगांता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश० उ०
४७

आयोधने रणस्थाने अरिणा चक्रेण चितं आकीर्णं आक्रीडनमिव कल्पांते रुद्रस्य क्रीडास्थनमिव ॥१८।१९।२०॥ गिरेः शृंगं यथेति ॥
॥२१।२२।२३।२४॥ प्रथमं किमिदमिति पश्चात् वक्त्रमिति भाव्यकस्य चेति संशयिरे संशयं कृतवंत इति ॥२५।२६॥ संस्थाविधिं उत्तरक्रि

आयोधनं तद्रथवाजिकुंजरैः दीपत्र रोष्टैः रणावरवं दितेः ॥ वनौ षितं मोद वहंमनस्विना मा क्रीडनं भूतपतेरिवोल्बणं ॥
॥१८॥ अथाह पौंड्रकं शौरिर्भो भो पौंड्रक यद्भवान् ॥ दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥१९॥ सोऽजयिष्येऽभिधा
नं मे यत्त्वया ज्ञम्टवाध्टतं ॥ व्रजामि शरणं तेद्य यदि नेच्छामि संयुगं ॥२०॥ इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौंड्रकं ॥ शिरो
वृश्च्य द्रथांगेन वज्रेणेंद्रो यथा गिरेः ॥२१॥ तथा काशिपतेः कायाच्छिरउत्कृत्य पत्रिभिः ॥ न्यपातयत् काशिपुर्यां पद्मकोश
मिवानिलः ॥२२॥ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानं यथामृतं ॥२३॥ स नित्यं भगव
द्ध्यानप्रध्वस्ताखिलबंधनः ॥ बिभ्राणश्च हरे राजन्स्वरूपं तन्मयो भवत् ॥२४॥ शिरः पतितमालोक्य राजद्वारे सकुंड र
लं ॥ किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥२५॥ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः ॥ पौराश्च हा हता राजन्
नाथ नाथेति प्रारुदन् ॥२६॥ सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ॥
॥२७॥ इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरं ॥ सुदक्षिणोर्चयामास परमेण समाधिना ॥२८॥ प्रीतोऽविमुक्ते भग
वांस्तस्मै वरमदाद्विभुः ॥ पितृहंतुर्वधोपायं स वव्रे वरमीप्सितं ॥२९॥ दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजं ॥ अभिचार
विधानेन स चाग्निः प्रमथैर्वृतः ॥३०॥

यो अपचितिं निष्कृतिं ॥२७॥ आत्मनाभिसंधाय बुध्या व्यवस्य सुदक्षिण आत्सुदारः ॥२८॥ वरमदात् वृणीष्वेत्यकृत्वा नुइ स्यर्थः ॥२९॥
कृत्विजं ऋत्विजमिव स्वतियोगकारणं यत्तस्य देवमृत्विजमितिश्रुतेः ॥ अब्रह्मण्ये प्रयोजित इतिकृत्से प्रयोजितो विपरीतो भविष्यतीतिस्य र
४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिचरन् अभिचारं कुर्वन् व्रती गृहीतनियमः ततस्तां त्रिपि वा शिखा वा श्मश्रु अग्नेः यस्य सः॥ अंगारोहारीणि लोचनानि यस्य सः॥ ३२॥
दंष्ट्राभिरुग्रैर्भ्रकुटीदंडेश्च करालं क्रूरं आस्यं यस्य सः। त्रिशिखं त्रिशूलं॥ ३३॥ दिशः प्रदहन्॥ ३४॥ ३५॥ त्राहि त्राहीत्याहुरिति शेषः॥ ३६॥
अहमविता रक्षिष्यामीति॥ ३७॥ ३८॥ रोदसी च प्रकाशयदिति शेषः। यद्वा स्वतेजसा स्वारी न्प्रतिजा ज्वल्यमानं अत्यर्थं प्रकाश

इत्यादिष्टस्तथा चक्रे कृत्यायाभिचारव्रती॥ ततोऽग्निरुत्थितः कुंडान्मूर्तिमानतिभीषणः॥ तप्ततामशिखाश्मश्रूरंगारोहारि
लोचनः॥ ३२॥ दंष्ट्रोग्रभ्रकुटीदंडकरालास्यस्वजिह्वया॥ आलिहन् सृक्विणी नग्नो विधुन्वंस्त्रिशिखं ज्वलन्॥ ३३॥ प
भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलं॥ सोऽभ्यधावद्धृतो भूतैर्द्वारकां प्रदहन्दिशः॥ ३४॥ तमाभिचारदहनमायांतं द्वार
कौकसः॥ विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः॥ ३५॥ अक्षैः सभायां क्रीडंतं भगवंतं भयातुराः॥ त्राहि त्राहि त्रिलोके
शाग्नेः प्रदहतः पुरं॥ ३६॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं॥ ३७॥ शरण्यः संप्रहस्याह मा भैष्टेत्यविता स्म्यहं॥ ३८॥
सर्वस्यांतर्बहिःसाक्षी कृत्यां माहेश्वरीं विभुः॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत्॥ ३८॥ तत्सूर्यकोटिप्रतिमं सु
दर्शनं जाज्वल्यमानं प्रलयानलप्रभं॥ स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमार्दयत्॥ ३९॥ कृत्यानलः
प्रतिहतः स रथांगपाणेरस्त्रौजसा सन्नृपभग्नमुखो निवृत्तः॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्व
कृतोऽभिचारः॥ ४०॥ चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणां॥ सगोपुराट्टालककोष्ठसंकुलां सकोशह

मानमित्यर्थः॥ आर्दयत् अपीडयत्॥ ३९॥ आर्दितो निर्यकृतवान् तदाह। कृत्यानल इति सहर्त्विग्जनैरवर्त्तमानं अभिचर्यंतो
नेनैव अभिचारकृत्यानलः॥ ४०॥ दिसहितोऽट्टा मंचाः॥ ४१॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० ॥४२॥४३॥ इति दशमे षट्षष्टितमः॥६६॥ ॥सप्तषष्टितमे रामो गिरौ रैवतके मदात्॥ श्रीउं अवधीद्द्विविदं रवालं कालिंदीविदारणः॥
४८ नंतरं रामचरितं द्विविदवधादि संगतमप्यनुक्तं तत्पूर्वभावित्वेन पौंड्रकवधादिति रूपे दानीं तदेव प्रस्तौति भूयोहमित्यादिना रामच
रितश्रवणे छायामद्भुतकर्मत्वं हेतु तत्र वानंतत्वं तत्राप्यप्रमेयत्वमिति॥ नरकस्य सखेति हरिणा वैरे कारणं सुग्रीवस्य सचिव इति तस्य मंत्र

दग्ध्वा वाराणसीं सर्वां विष्णोश्चक्रं सुदर्शनं॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः॥४२॥ य एनं श्रावयेन्मर्त्य
उत्तमश्लोकविक्रमं॥ समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्र धा
षट्षष्टितमोध्यायः॥६६॥ ॥राजोवाच॥ भूयोहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः॥ अनंतस्याप्रमेयस्य यद
स्प न्यत्कृतवान्प्रभुः॥१॥ श्रीशुक उवाच॥ नरकस्य सखा कश्चिद्द्विविदो नाम वानरः॥ सुग्रीवसचिवः सोथ भ्राता मैंदस्य
वीर्यवान्॥२॥ सख्युः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन्॥३॥ क्वचित्स
शैलानुत्पाट्य तैर्देशान्समचूर्णयत्॥ आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः॥४॥ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुद्धृ
त्य तज्जलं॥ देशान्नागायुतप्राणो वेलाकूले न्यमज्जयेत्॥५॥ आश्रमानृषिमुख्यानां कृत्वा भग्नवनस्पतीन्॥ अदू
षयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः॥६॥

वलं मैंदस्य भ्रातेति रामायणे इति प्रसिद्धत्वेन वीर्याधिक्यमुक्तमिति॥२॥ सख्युर्नरकस्य अपचिति आनृण्यं राष्ट्रविप्लवो नाशो यथा भव ४८
ति तथा पुरादीन् अदहदिति॥३॥ किंच॥ क्वचिदिति कदाचित्स द्विविदमित्रहा सखिहंता॥४॥ तस्य समुद्रस्य जलं बाहुभ्यां उत्क्षिप्य वे
लायाः कूले वर्तमानान् देशान् लावयामासेति॥५॥ आश्रमस्थानानां वनस्पतीन् भंक्त्वा आहवनीयाद्यग्निषु मूत्रादिकृतवान्॥६॥

CC-0. In Public Domain:Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्यधात् पिदधे येशस्कारी भ्रमरः ॥ ७ ॥ ८ ॥ ९ ॥ प्रमित्रं मत्तं ॥ १० ॥ ११ ॥ जातास्वभावे नैव चापलं यासां ताः ॥ १२ ॥ हेलयामासस्त्र वज
ह्रै निरीक्ष्य तो निरीक्ष्यमाणस्य तमनादृत्येत्यर्थः ॥ १३ ॥ १४ ॥ आस्फालयत् । योषितां वासांस्या लुप्य पाटितवान् । विप्रचक्रे एवम

पुरुषान्योषितो दृप्तः क्ष्माभृद्द्रोणी गुहासु सः ॥ निक्षिप्य चाप्यधाच्छैलैः पेशस्कारीव कीटकं ॥ ७ ॥ एवं देशान् विप्रकुर्व
न् दूषयंश्च कुलस्त्रियः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ८ ॥ तत्रापश्यद् यदुपतिं रामं पुष्करमालिनं ॥ सु
दर्शनीयसर्वांगं ललनायूथमध्यगं ॥ ९ ॥ गायंतं वारुणीं पीत्वा मदविह्वललोचनं ॥ विभ्राजमानं वपुषा प्रभिन्नमि
व वारणं ॥ १० ॥ दुष्टः शाखामृगः शाखामारूढः कंपयन् द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ॥ ११ ॥
तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥ १२ ॥ ता हेलयामास कपिर्भ्रू
क्षेपैः संमुखा द्विविः ॥ दर्शयन् स्वगुदं तासां रामस्य च निरीक्षतः ॥ १३ ॥ तं ग्राव्णा प्राहरत् क्रुद्धो बलः प्रहरतां वरः ॥ सवं
चवि ता ग्रावाणं मदिराकलशं कपिः ॥ गृहीत्वा हेलयामास धूर्तस्तं कोपयन् हसन् ॥ १४ ॥ निर्भिद्य कलशं धृष्टो
वासांस्यास्फालयद् बली ॥ कदर्थीकृत्य बलवान् विप्रचक्रे मदोद्धतः ॥ १५ ॥ तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रु
तान् ॥ क्रुद्धो मुशलमादत्त हलं चारिजिघांसया ॥ १६ ॥ द्विविदोपि महावीर्यः शालमुद्यम्य पाणिना ॥ अभ्येत्य तरसा
तेन बलं मूर्द्ध्न्यताडयत् ॥ १७ ॥ तं तु संकर्षणो मूर्द्धि पतंतमचलो यथा ॥ प्रतिजग्राह भगवान् सुनंदेनाहनच्च तं ॥ १८ ॥
मुशलाहतमस्तिष्को विरेजे रक्तधारया ॥ गिरिर्यथा गैरिकया प्रहारं नानुचिंतयन् ॥ १९ ॥

पल्लतवान् ॥ १५ ॥ १६ ॥ शालं वृक्षं ॥ १७ ॥ सुनंदेन मुशलेनाहनत् । आहात्रित्यर्थः । तं वानरं ॥ १८ ॥ मस्तिष्कं मस्तकावयवविशेषः ।
गैरिकया लोहितधातुना नानुचितयन् । अगणयन् ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०सं०उ० ॥२०॥२१॥२२॥ अरूरुजत्ताडयामास॥२३॥ जत्रौकंठबाहुशूले॥२४॥ टंकासतोयविवराणि तत्सहितः॥२५॥२६॥ जगतोव्यतिकरं
४९ नाशमावहतीतितथते॥२७॥ इतिदशमेसप्तषष्टितमः॥६७॥ ॥ अष्टषष्टितमेसांबेविवद्धे कौरवैर्युधि॥ तद्विमोक्षायरामेणग

पुनरन्यंसमुत्क्षिप्य कृत्वानिष्पत्रमोजसा॥ तेनाहतः सुसंक्रुद्धस्तंबलः शतधाछिनत्॥२०॥ ततोन्येनरुषाजघ्नेतंचा
पिशतधाछिनत्॥ एवंयुध्यन्भगवताभग्नेभग्नेपुनःपुनः॥ आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनं॥२१॥ ततोमुं
चच्छिलावर्षंबलस्योपर्यमर्षितः॥ तत्सर्वंचूर्णयामास लीलयामुशलायुधः॥२२॥ सबाहूतालसंकाशौ मुष्टीकृत्य
कपीश्वरः॥ आसाद्यरोहिणीपुत्रंताभ्यांवक्षस्यरूरुजत्॥२३॥ यादवेंद्रोपितंदोर्भ्यां त्यक्त्वा मुसललांगलै॥ तत्राव
तू. भ्यर्दयत्क्रुद्धः सोपतद्रुधिरंवमन्॥२४॥ चकंपेतेनपततासटंकः सवनस्पतिः॥ पर्वतः कुरुशार्दूल वायुनानौरिवां
भसि॥२५॥ जयशब्दोनमःशब्दः साधुसाध्विति चांबरे॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां॥२६॥ एवंनिहत्यद्वि
विदंजगद्व्यतिकरावहं॥ संस्तूयमानोभगवान्जनैःस्वपुरमाविशत्॥२७॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे
सप्त द्विविदवधोनामसप्तषष्टितमोध्यायः॥६७॥ ॥श्रीशुक उवाच॥ दुर्योधनसुतांराजंल्लक्ष्मणांसमितिंजयः॥ स्वयंवर
स्थामहरत्सांबोजांबवतीसुतः॥१॥ कौरवाःकुपिताऊचुःदुर्विनीतोयमर्भकः॥ कदर्थीकृत्यनःकन्यामकामामहरद्ब ४९
लात्॥२॥ बध्नीतेमंदुर्विनीतं किंकरिष्यंतिवृष्णयः॥ येस्मत्प्रसादोपचितांदत्तांनोभुंजतेमहीं॥३॥ ॥ ॥

जाकृष्यविकर्षणं॥१॥ रामचरित्रांतरंनिरूपयितुमाहदुर्योधनसुतामिति समितिंजयसंग्राममजित्॥१॥२॥ नोस्माकंमहीं अस्मा
भिर्दत्तांनतमुपतयइतिभावः॥३॥ श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यांति यास्यंति प्राणा इंद्रियाणी वसुसंयता प्राणायामादिभिर्दमिताः ॥४॥ कुरुवृद्धो भीष्मस्तेनानुमोदिता तत्सहिता पांडवे ते इत्यर्थः ॥५॥६॥
कर्णो ग्रणी येषां ते ॥७॥ नत्राम्रष्यति न असहत् । अचिं सस्य भगवतो भक्तः । अचिसश्च आसावर्भश्चेति वा ॥८॥९॥ तस्य पंचपतिश्च वसु

विग्रहीतं सुतं श्रुत्वा यद्योष्यंतीह रक्षसः ॥ भयाद्दर्पाः शमंयांति प्राणा इव सुसंयताः ॥४॥ इति कर्णशलोभूरिर्यज्ञकेतुः
सुयोधनः ॥ सांबमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः ॥५॥ दृष्ट्वानुधावतस्तान्बोधार्त्तराष्ट्रा महारथः ॥ प्रगृह्य रुचिरं चा
त्ति पं तस्थौ सिंह इवैकलः ॥६॥ तं ते जिघृक्षवः क्रुद्धाः तिष्ठ तिष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन्
॥७॥ सोपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः ॥ नामृष्यत्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव ॥८॥ विस्फूर्ज्य रुचिरं चापं सर्वा
न्विव्याध सायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् ॥९॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् ॥ र
थिनश्च महेष्वासांस्तस्य तत्तेभ्यपूजयन् ॥१०॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः
शरासनं ॥११॥ तं बध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि ॥ कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥१२॥ तच्छ्रुत्वा ना
रदोक्तेन राजन्संजातमन्यवः ॥ कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः ॥१३॥ सांतयित्वा तु तान्रामः सन्नद्धान्वृष्णिपुं
गवान् ॥ नैच्छत्कुरूणां वृष्णीनां कलिं कलिमलापहः ॥१४॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा ॥ ब्राह्मणैः कुलवृद्धैश्च वृ
तश्चंद्र इव ग्रहैः ॥१५॥ गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः ॥ उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया ॥१६॥ सोभिवंद्या
म्बिकापुत्रं भीष्मं द्रोणं च बाल्हिकं ॥ दुर्योधनं च विधिवद्रामामागतमब्रवीत् ॥१७॥ ॥ ॥ ॥

भिश्च तुरहृत्य त्रवीसानुसंधेया ता कर्म ते संपादितवंतः ॥१०॥११॥ स्वस्य दुर्योधनस्य कन्यां च नीत्वा तत्र दोषः ॥१२॥१३॥ यतकलिं
नैच्छत् अतसा तापिता जगामेति ॥१४॥१५॥ धृतराष्ट्रं प्रति बुभुत्सयेति अभिप्रायजिज्ञासयेत्यर्थः ॥१६॥ विधिवदभिवंद्य ॥१७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०३० तमुद्धवमर्चयित्वा सहलसमंगलपाणयः। उपायनहस्ताः ॥१८॥ वृद्धा अपि प्रणेमुः ॥१९॥२०॥२१॥ यद्यूयमित्युग्रसेनवाक्यं मृष्ये सहे अत्र
५० यादृशुतमानीयसमर्पयेतेतिशेषः ॥२२॥ वीर्यं प्रभावः शौर्यं उत्साहः बलं सत्वं तैरुन्नद्धं उच्छ्रितं स्वलोकं कथां आत्मनः शक्तेः समं अनुरूपं
॥२३॥ उपानत्पादरक्षा शिर आरोढुं इच्छति हीना अस्मानाज्ञापयंतीत्यर्थः ॥२४॥ अस्यैव प्रपंचः। एते इति चतुर्भिः ॥ यौने

तेतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमं ॥ तमर्चयित्वाभिययुः सर्वे मंगलपाणयः ॥१८॥ तं संगम्य यथान्यायं गा
मर्घ्यं च न्यवेदयन् ॥ तेषां येतत्प्रभावज्ञाः प्रणेमुः शिरसा बलं ॥१९॥ बंधून्कुशलिनश्श्रुत्वा पृष्ट्वा शिवमनामयं ॥ परस्प
रमथो रामो बभाषेविक्लवं वचः ॥२०॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः ॥ तदव्यग्रधियः श्रुत्वा कुरुध्वमवि
लंबितं ॥२१॥ यद्यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकं ॥ अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया ॥२२॥ वीर्यशौ
र्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥२३॥ अहो महच्चित्रमिदं कालगत्या दु
रत्यया ॥ आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितं ॥२४॥ एते यौनेन संबद्धाः सहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतां
नीता अस्मद्दत्तनृपासनाः ॥२५॥ चामरव्यजने शंखमातपत्रं च पांडुरं ॥ किरीटमासनं शय्यां भुंजतेस्मदुपेक्षया ॥
२६॥ अलं यदूनां नरदेवलांछनैर्दातुः प्रतीपैः फणिनामिवामृतं ॥ येस्मत्प्रसादोपचिता हि यादवा आज्ञापयंत्यद्य
गतत्रपा बत ॥२७॥ कथमिंद्रोपि कुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधीत सिंहग्रस्तमिवोरणः ॥२८॥ ॥ ५०

नएथायाविवाहेन ॥२५॥ किंच। चामरव्यजने इति भुंजंति पउपभुंजते इत्यर्थः ॥ अस्मदुपेक्षया अस्माकमनाग्रहेण ॥२६॥ अ
लमिति अमृतपरं तान्यपहरिष्यामः इत्यर्थः ॥२७॥ अवरुंधीत स्वीकुर्यात्। उरणो मेषः ॥२८॥ ॥ ॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मना बंधुभिश्चोपलक्षितया श्रिया उन्नद्ध उत्कटो मदो येषां ते दुर्वाच्यं परुषं वाक्यं । असभ्या दुर्जनाः ॥१९॥ ॥२०॥ नानाधनाभिजना
दिमदैरुन्नद्धाः । तेषां दंड एव प्रशम प्रकर्षेण शमयतीति तथा यथा लकुट दंड ॥२१॥ दुर्भाषान् । अवाच्यशब्दान् ॥२३॥ दुर्भाषण
मनुस्मरति षड्भिः । नोग्रसेन इति विभुः । आज्ञापयितुं समर्थः ॥२४॥ अहो धृष्टाः श्रीकृष्णमप्यधिक्षिपंतीति कुपितः आह सुधर्मेत्या

श्रीशुक उवाच ॥ जन्मबंधुश्रियोन्नद्धमदास्ते भरतर्षभ ॥ आश्राव्य रामं दुर्वाच्यमसभ्याः पुरमाविशन् ॥१९॥ दृष्ट्वा कु
रूणां दौःशील्यं श्रुत्वावाच्यानि चाच्युतः ॥ अवोचत्कोपसंरब्धो दुःप्रेक्ष्यः प्रहसन्मुहुः ॥२०॥ नूनं नानामदोन्नद्धाः शांतिं
नेच्छंति साधवः ॥ तेषां हि प्रशमो दंडः पशूनां लकुटो यथा ॥२१॥ अहो यदून्सुसंरब्धान्कृष्णं चकुपितं शनैः ॥ सांत्वयि
त्वाहमेतेषां शममिच्छन्निहागतः ॥२२॥ तइमे मंदमतयः कलहाभिरताः खलाः ॥ तं मामवज्ञाय मुहुर्दुर्भाषान्मानिनो
ब्रुवन् ॥२३॥ नोग्रसेनः किल विभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ॥२४॥ सुधर्मा
क्रम्यते येन पारिजातोमरांघ्रिपः ॥ आनीय भुज्यते सोसौ न किलाध्यासनार्हणः ॥२५॥ यस्य पादयुगं साक्षाछ्री
रुपास्ते खिलेश्वरी ॥ स नार्हति किल श्रीशो नरदेवपरिछदान् ॥२६॥ यस्यांघ्रिपंकजरजोखिललोकपालैर्मौल्युत्त
मैर्धृतमुपासिततीर्थतीर्थं ॥ ब्रह्मा भवोहमपि यस्य कला कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥२७॥ भुंजते कु
रुभिर्दत्तं भूखंडं वृष्णयः किल ॥ उपानहः किल वयं स्वयं तु कुरवः शिरः ॥२८॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानि
नां ॥ असंबद्धा गिरो रूक्षाः कः सहेतानुशासितः ॥२९॥ [illegible] कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमु
दिभिस्त्रिभिः ॥२५॥२६॥ मौल्युत्तमैर्मौलिमुकुटैः स्वकभोगः । उत्तमैर्मौलिनिरिति निरिति वा उपासितानि तीर्थानि यैस्तेषां गीर्भिस्तेषामपि
तीर्थं यद्धा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्य तीर्थत्वे निमित्तं किंच । ब्रह्मा भव श्रीश्चाहमपि उद्वहेम कथंभूता वयं यस्य कलायाः अंशांस्य

कांश्च काः ॥३०॥ अन्नानामिव मद्यानां दितानां
क्षापरस्यावुद्धमसितान्यं दुरस्य ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा०उ०
५१

लांगलाग्रेण दक्षिण प्राकारमूले निखातेन उद्धिदार्य्य उसाद्य ॥४१॥४२॥ जिजीविषव इत्यक्षराधिक्यं सोढव्यं ॥४३॥४४॥४५॥ शेषेशय
नं करोषि शेषपर्यंके परिशिष्यमाणो सच त्वमेवेति वा ॥४६॥ अस्मासु कोपश्च तवायमनुचित एवेत्याह ॥ कोपस्त इति स्थितिपालने तत्पर
लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं ॥ विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ॥४१॥ जलयानमिवाघूर्णं गंगायां नगरं पतत्
आकृष्यमाणमालोक्य कौरवाजातसंभ्रमाः ॥४२॥ तमेव शरणं जग्मुः सकुटुं[illegible]जी[illegible] ॥ सलक्ष्मणं पुरस्कृत्य सांबं प्रांजल
यः प्रभुं ॥४३॥ राम रामाखिलाधार प्रभावं न विद्म ते ॥ मूढानां नः कुबुद्धीनां क्षंतुमर्हस्यतिक्रमं ॥४४॥ स्थित्युत्पत्त्यप्यया
नां त्वमेको हेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीश क्रीडतस्ते वदंति हि ॥४५॥ त्वमेव मूर्द्ध्नीदमनंत लीलया भूमंडलं बिभर्षि
सहस्रमूर्द्धन् ॥ अंते च यः स्वात्मनि रुद्धविश्वः शेषे ऽद्वितीयः परिशिष्यमाणः ॥४६॥ कोपस्तेखिलशिक्षार्थं न द्वेषान्न च म
त्सरात् ॥ बिभ्रतो भगवन्सत्वं स्थितिपालनतत्परः ॥४७॥ नमस्ते सर्वभूतात्मन्सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नम
स्तेस्तु त्वां वयं शरणं गताः ॥४८॥ श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः सुप्रसन्नो माभैष्ट
त्यभयं ददौ ॥४९॥ दुर्योधनः पारिबर्हं कुंजरान्षष्टिहायनान् ॥ ददौ च द्वादशशतान्ययुतानि तुरंगमान् ॥५०॥ रथानां
षट्सहस्राणि रौक्माणां सूर्यवर्चसां ॥ दासीनां निष्ककंठीनां सहस्रं दुहितृवत्सलः ॥५१॥ प्रतिगृह्य तु तत्सर्वं भगवा
न्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः ॥५२॥ ततः प्रविष्टः स्वपुरं हलायुधः समेत्य बंधूननुरक्तचे
तसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ॥५३॥ अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमं ॥ समुन्नतं द
क्षिणतो गंगायामनुदृश्यते ॥५४॥ इति श्रीभागवते महापुराणे दशमस्कंधे — स्नि — पु — के — रणं — ल — द्द — ज — नामष्टषष्टि
तासयैवान्केपपाठांते संबोधनं ॥४७॥ विश्वकर्मन्हल संयस्य सवमिति संबोधनं ॥४८॥ तेपमा[illegible]नं पुरं येषां तौ ॥४९॥ तुरंगमाश्च
द्वादशायुतानि ॥५०॥५१॥ सुहृद्भिः कौरवैः ॥५२॥ मध्ये सभायां सभा[illegible] ॥५३॥५४॥ दशमेऽष्टषष्टितमः ॥६८॥ छ ॥ छ ॥ छ ॥

ने

५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकोनसप्ततितमे गार्हस्थ्यं प्रतिमंदिरं ।। कृष्णस्य नारदो दृष्ट्वा विस्मितो गातवान् तस्य वन् ।।१।। दिदृक्षया भिनयेनाह विचित्रमिति द्वाभ्यां स
हस्रं स्त्रीउदावहत् परिणीतवान् ।।२।। तां द्वारवतीमनुवर्णयति सार्द्धत्रयेण पुष्पितेषूपवनेषु आरामेषु उद्यानेषु च द्विजानां अलीनां
च कुलानि तैर्नादितां ।।३।। छुरितेषु व्याप्तेषु ।।४।। महामरकतैः प्रख्यायंते प्रकाशंते इति तथा तैः ।। स्वर्णरत्नमयाः परिच्छदाः परिकरा ये
षु तैः ।।५।। पतंत्यश्च चलंत्यः पताका येषु तैर्ध्वजैर्वारितः आतपो यस्यां तां ।।६।। तस्यां सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं ।।७।। षोडशभिः सद्म

श्रीशुक उवाच ।। नरकं निहतं श्रुत्वा तथोद्वाहं च योषितां ।। कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ।।१।। चित्रं बतैतदेकेन वपुषा
युगपत्पृथक् ।। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ।।२।। इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् ।। पुष्पितोपवनारामद्वि
जालिकुलनादितां ।।३।। उत्फुल्लेंदीवरांभोजकल्हारकुमुदोत्पलैः ।। छुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ।।४।। प्रासादल
क्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ।। महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ।।५।। विभक्तरथ्यापथचत्वरापणैः शालासभाभी
रुचिरां सुरालयैः ।। संसिक्तमार्गांगणवीथिदेहलीं पतत्पताकाध्वजवारितातपां ।।६।। तस्यामंतःपुरं श्रीमदर्चितं सर्वधिष्ण्य
पैः ।। हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ।।७।। यत्र षोडशभिः सद्मसहस्रैः समलंकृतं ।। विवेशैकतमं शौरेः पत्नी
नां भवनं महत् ।।८।। विष्टब्धं विद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः ।। इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ।।९।। ।। ।।

सहस्रैः समलंकृतं हरेरंतःपुरं विवेश तत्र तस्य शौरेः पत्नीनां भवनेषु एकतमं [illegible] यत्र च कौशलं त्वष्ट्रा दर्शितमित्युक्तं त
त्पुरभवनयोर्विशेषणं ।।८।। तदनुवर्णयति चतुर्भिर्विष्टब्धमिति विद्रुमस्तंभैर्विष्टब्धं विधृतं वैदूर्यमयानि फलकोत्तमानि स्तंभाश्र
पाणि छादनानि तैः ।। इंद्रनीलमयैः कुड्यादिभिश्चोपलक्षितं जगत्या भूमिकया च इंद्रनीलमय्या नेहता त्विट् यस्यास्तया ।।९।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ०
५२

मुक्ता दाम्नां विलंबा विविधा विलंबनानि विद्यंते येषु तैः॥ मरा पुत्तमैः। परिघतैर्भूषिते॥१०॥ ईक्ष्यसमीक्ष्य घनो मेघो पमितिबुद्धिर्येषां
ते॥१२॥ अनुसवंसर्वकालं आत्मनासमानानि गुणरूपवयांसि सुवेषोलंकारश्च यस्य तेन दासीसहस्त्रेण युतया गृहिरापा सह॥१३॥
प्रियरुक्मिण्या पर्यंकात्तः। अवीविशत् उपवेशयामास॥१४॥ तविभ्रत्। दध्यारे सर्थः। विभ्रादिति शेत्रं तं वा तदा च संपूज्य दिमा

विताने निर्मितैस्वच्छा मुक्तादामविलंबिभिः॥ दांतैरासनपर्यंकैर्मणयुक्तमपरिष्कृतः॥१०॥ दासीभिर्निष्ककंठीभिः सुवासोभिर
लंकृतं॥ पुंभिः सुकंचुकोष्णीषसुवस्त्रमणिकुंडलैः॥११॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखि
खंडिनोंग॥ नृत्यंति यत्र विहितागरुधूपमक्षैर्निर्यातमीक्षघनबुद्धय उन्नदंतः॥१२॥ तस्मिन्समानगुणरूपवयः सुवे
षदासीसहस्त्रयुतयाऽनुसवं गृहिण्या॥ विप्रो ददर्श चमरव्यजनेन रुक्मदंडेन सात्वतपतिं परिवीजयंत्या॥१३॥ तं सं
निरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतां वरिष्टः॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांज
लिरवीविशदासने स्वे॥१४॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना बिभ्रज्जगद्गुरुतरोपि सतां पतिर्हि॥ ब्रह्मण्यदेव इतिय
द्गुणनाम युक्तं तस्यैव यच्चरणशौचमशेषतीर्थं॥१५॥ संपूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनो
दितेन॥ वाण्याभिभाष्य मितया मृतमिष्टया तं प्राह प्रभो भगवते करवाम हे किं॥१६॥ ॥ ॥ ॥ ५२

यच्च प्राह स्फुततरेणान्वयः। कथंभूतः यस्य चरणशौचं गंगाख्यं अशेषतीर्थं सः। अत एवं जगद्गुरुतरोपि सतां धर्मभृतां पतिः स देवमक
रोदित्यर्थः॥ स तां पतित्वे हेतुः ब्रह्मण्यदेव इति यत् गुणकृतं नाम तस्यैव युक्तं यतः संमं जसं अतस्तद्धर्मप्रवर्तनायैवमाचर
णमित्यर्थः॥१५॥ अभिभाष्य दिष्ट्या त्वदागमनमित्यादि प्रियमुक्त्वा॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवता स्वस्यार्हणमनर्हणं मन्यमानस्य संभावयन्नाह नैवेति सर्वमित्रत्वादेवमर्हणं न तु मम गौरवात् तर्हि कथं कंसादिष्वमैत्री त
त्राह खलानां दमश्च नैवाद्भुतमिति कुतः जगतां स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह तस्य निःश्रेयणार्थं तवायं स्वेच्छावतार इति वयं
सुष्ठु सम्यग्विद्मः॥ अतः खलु दमसाधुसन्मानं च युक्तमिति भावः॥१७॥ यदुक्तं प्रभो किं करवामेति अत्राह दृष्टमिति भक्तजनतायाः

नारद उवाच॥ नैवाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानां॥ निःश्रेयसाय हि जगत्स्थिति

स्वेच्छ

रक्षणाभ्यां स्वैरावतार उरुगाय विदाम सुष्ठु॥१७॥ दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाध
बोधैः॥ संसारकूपपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात्॥१८॥ श्रीशुक उवाच॥ ततोऽन्य
दाविशद्गेहं कृष्णपत्न्याः स नारदः॥ योगेश्वरेश्वरस्यांग योगमायाविवित्सया॥१९॥ दीव्यंतमक्षैस्तत्रापि प्रियया चो
द्धवेन च॥ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः॥२०॥ पृष्टश्चाविदुषेवासौ कदायातो भवानिति॥ क्रियते किं नु
पूर्णानामपूर्णैरस्मदादिभिः॥२१॥ अथापि ब्रूहि नो ब्रह्मन् जन्मैतच्छोभनं कुरु॥ स तु विस्मित उत्थाय तूष्णीमन्यदगा
द्गृहं॥२२॥ तत्राप्यचष्ट गोविंदं लालयंतं सुतान् शिशून्॥ ततोऽन्यस्मिन् गृहेऽपश्यन्मज्जनाय कृतोद्यमं॥२३॥ ॥

अपवर्गरूपं किं च अतिदुर्लभं तया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं किं च संसारकूपे पतितानामुत्तरणायावलंबं आश्र
यं एवंभूतं तवांघ्रियुगलं मया दृष्टं अतः कृतकृत्योऽस्मि तथापि त्वत्स्मृतिर्यथा स्यात्तथानुगृहाण अतस्तच्छापत्रो वतिसंचरा
मीति॥१८॥१९॥ अक्षैर्दीव्यंतमित्यादेर्दद्रीति ज्ञातव्यं॥२०॥२१॥२२॥२३॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० वितानाग्नीनाहवनीयादीन् अग्निहोत्रेण पंचभिर्मखैर्महायज्ञैर्यजंतं ॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥ काले तत्तत्समये विधिना
५३ उपयायनं प्रापणं विवाहमित्यर्थः । कल्पयंतं घटयंतं विभूतिभिर्विभवैः ॥३२॥ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तद्गृहे

जुह्वंतं च वितानाग्नीन्यजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान् क्वापि भुंजानमवशेषितं ॥२४॥ क्वापि संध्यामुपासीनं जपंतं
ब्रह्म वाग्यतं ॥ एकत्र चासिचर्मभ्यां चरंतमसिवर्त्मसु ॥२५॥ अश्वैर्गजै रथैः क्वापि विचरंतं गदाग्रजं ॥ क्वचिच्छयानं पर्यं
के स्तूयमानं च वंदिभिः ॥२६॥ मंत्रयंतं च कस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः ॥ जलक्रीडारतं क्वापि वारमुख्याबलावृ
तं ॥२७॥ कुत्रचिद्द्विजमुख्येभ्यो ददतं गाः स्वलंकृताः ॥ इतिहासपुराणानि शृण्वंतं मंगलानि च ॥२८॥ हसंतं हास्यकथ
या कदाचित्प्रियया गृहे ॥ क्वापि धर्मं सेवमानमर्थकामौ च कुत्रचित् ॥२९॥ ध्यायंतमेकमात्मानं पुरुषं प्रकृतेः परं ॥
शुश्रूषंतं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥३०॥ कुर्वंतं विग्रहं कैश्चित्संधिं चान्यत्र केशवं ॥ कुत्रापि सह रामेण
चिंतयंतं सतां शिवं ॥३१॥ पुत्राणां दुहितॄणां च काले विध्युपयापनं ॥ दारैर्वरैस्तत्सदृशैः कल्पयंतं विभूतिभिः ॥३२
प्रस्थापनोपानयनैरपत्यानां महोत्सवान् ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥३३॥ यजंतं सकलान्देवान्
क्वापि क्रतुभिरूर्जितैः ॥ पूर्तयंतं क्वचिद्धर्मं कूपाराममठादिभिः ॥३४॥ चरंतं मृगयां क्वापि हयमारुह्य सैंधवं ॥ घ्नंतं क्वा
पि पशून्मेध्यान्परीतं यदुपुंगवैः ॥३५॥ अव्यक्तलिंगं प्रकृतिष्वंतःपुरगृहादिषु ॥ क्वचिच्चरंतं योगेशं तत्तद्भावबुभुत्सया ५३
॥३६॥ अथोवाच हृषीकेशं नारदः प्रहसन्निव ॥ योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिं ॥३७॥ ॥ ॥

प्रत्तिनयनोऽपानयनं तेन तु हा पुनरानयनं तैर्महोत्सवान् कल्पयंतं योगेश्वरेशस्य येषामपत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे
विसिस्मिरे विस्मयं चक्रुः । तथाभूतान् कल्पयंतं ॥३३॥३४॥३५॥ अव्यक्तलिंगं वेषांतरेण छन्नं ॥३६॥३७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे योगेश्वर आत्मनि मम मनसि तव स्वरूपं निर्भाता प्रतिता स्तवयोगमायाकेवलं विदाम विमन नतु स परमार्थ्यमिति भावः ॥३८॥ तन्मा
नुष्यनाट्येन नतु स्तोमि ॥ अतो मां प्रस्थापयेत्याह अनुजानीहीति ॥३९॥ तत् तस्मात् लोकं शिक्षयन्निमं धर्ममास्थितः ॥ न तु तत्त्वतः ॥ हे पुत्र
मा खिद मोहं मा प्राप्नुहीति ॥४०॥ इति एवमनुगृहीतः तस्तमेव सर्वत्र ददर्शेति ॥४१॥ मुहुर्मुहुर्दृष्ट्वा जातकौतुको मुनिर्विस्मितोऽभूदिति ॥४२॥
विदाम योगमायास्ते दुर्दर्शा अपि मायिनां ॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ॥३८॥ अनुजानीहि मां देव लोकांस्ते यश
साप्लुतान् ॥ पर्यटामि तवोद्गायन् लीलां भुवनपावनीं ॥३९॥ श्रीभगवानुवाच ॥ ब्रह्मन् धर्मस्य वक्ताहं कर्ता तदनुमोदिता ॥ त
च्छिक्षयन् लोकमिममास्थितः पुत्र मा खिदः ॥४०॥ श्रीशुक उवाच ॥ इत्याचरन्तं सद्धर्मान् पावनान् गृहमेधिनां ॥ तमेव सर्वगेहेषु
संतमेकं ददर्श ह ॥४१॥ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं ॥ मुहुर्दृष्ट्वा ऋषिरभूत् विस्मितो जातकौतुकः ॥४२॥
इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना ॥ सम्यक् सभाजितः प्रीतस्तमेवानुस्मरन् ययौ ॥४३॥ एवं मनुष्यपदवीमनुव
र्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेंऽग षोडशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः
॥४४॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार ॥ यस्त्वंग गायति शृणोत्यनुमोदते वा
भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥४५॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनसप्ततितमोऽध्यायः ॥६९॥ छ ॥
श्रद्धितश्रद्धायुक्तः ॥ आत्मा यस्य तेन ॥४३॥ नारदृष्टां श्रीकृष्णलीलां निगमयति एवमिति अखिलस्य भवाय उद्भवाय गृहीता शक्तिये
नानामूर्तयो येन सः ॥ सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः ॥४४॥ अनन्यविषयाणि असाधारणानि ॥ अपवर्ग
मार्गे मोक्षप्रदे ॥४५॥ इति दशमे एकोनसप्ततितमोऽध्यायः ॥६९॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशी०उ०
५४

ततस्तु सप्ततितमे कृष्णस्याह्निककर्मणि॥ दूतनारदयोः कार्ये कार्यमंत्रविचारणं॥ जगन्मंगलचारित्र्यमाह्निकं जगदीशितुः। नार
देन च विकिंचिद्दृष्टमाहात्म्यथा क्रमं॥ इत्यर्थं धर्मकामेषु कृष्णेन श्रद्धितामनेति प्रसक्तस्य श्रीकृष्णस्याह्निकस्याधिकारो ऽथराष्टः।
उपवृत्तायां आसन्नायां पतिभिः श्रीकृष्णैर्माधव्यो माधवस्य भार्याः॥१॥ वंदिन इव श्रीकृष्णं बोधयंतीति वयांसि पक्षिणो रुरुवन् अति
शयेनाक्रुजन्। मंदारवनवायुभिः गायत्स्वलिष्वनिद्राणि वयांसि॥२॥ वैदर्भीत्युपलक्षणं परिरंभणविश्लेषात् तं पर्यालोच्य॥३॥४॥

श्रीशुक उवाच॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतो ऽशपन्॥ गृहीतकंठ्यः पतिभिर्माधव्यो विरहातुराः॥१॥ वयां
स्यरूरुवन्कृष्णं बोधयंतीव वंदिनः॥ गायत्स्वलिष्वनिद्राणि मंदारवनवायुभिः॥२॥ मुहूर्तं तं तु वैदर्भी नामृष्यदतिशो
भनं॥ परिरंभणविश्लेषात् प्रियबाह्वंतरं गता॥३॥ ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः॥ दध्यौ प्रसन्नकरण आ
त्मानं तमसः परं॥४॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिः
स्वशक्तिभिर्लक्षितभावनिर्वृतिं॥५॥ अथाप्लुतोंभस्यमले यथाविधि क्रियाकलापं परिधाय वाससी॥ चकार संध्यो
पगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः॥६॥ ॥ ॥ ॥ ॥

एकं अखंडं तत्र हेतुः अनन्यं निरुपाधिं॥ अत एव अव्ययं नित्यं स्वयंज्योतिष्ट्वे हेतुः। नित्यनिवृत्तकल्मषं अविद्या यस्मात्तं। उपलक्षणमा
ह। अस्येति। विश्वस्य लक्षितभावश्चासौ निर्वृतिश्च भावः सत्ता निर्वृतिरानंदः तथा हि गुणक्षोभात्पूर्वं सत्तामात्रं यत्सदेव सोम्येदमग्र
आसीदित्यादिश्रुतौ सत एवानंदश्च विलीनमानंदमित्यादिश्रुतौ तं सदानंदमित्यर्थः॥५॥ आप्लुतः स्नातः। उपगमः उपासनं आदि
र्यथा भवति तथा क्रियाकलापं चकार कण्वलाः दुदयात्पूर्वमेव हुतानलः ब्रह्म गायत्रीं जजाप॥६॥ ॥ ॥ ॥ ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वाः अंशान् देवान् ऋषीन् पितॄंश्च तर्प्पयित्वा ॥७॥ गृहीत्वा प्रथमप्रसूतानां ॥८॥ बहुमिति हिरण्येनपरिवृतान् तस्मान् शृङ्गदन्तो
मृगान्मप्राशिभरतो ददाद्धतं बहूनि सप्तचेति श्रुत्वा निसप्तो त्तरशतं बहून्यकी लस्य पुराणे चतुर्दश लक्षत्वेन गणितानि
यथोक्तं भरतमेवाधिकृत्य सनवपस्कंधो मृगान् मुक्तदंत लक्ष्मान् सुवर्णेन परिवृतान् अदात्कर्मणि मष्णारे नियुतानि चतुर्दशेति
ततश्चेयं बहुसंख्या श्लोकेन सगृह्यते चतुर्दशानां लक्षाणां सप्ताधिकशतां शकः ॥ बद्ध चतुरशीत्यग्र सहस्राणि त्रयोदशेति
उपस्थायार्कमुद्यंतं तर्प्पयित्वा ततः कृत्वाः ॥ देवान् ऋषीन् पितॄन् वृद्धान् विप्रानभ्यर्च्य बालवान् ॥७॥ धेनूनां रूक्मशृं
गीणां साध्वीनां मौक्तिकस्रजां ॥ पयस्विनीनां गृष्टीनां सवत्सानां सुपाससां ॥८॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः
सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्धं बद्धं दिने दिने ॥९॥ गोविप्रदेवता वृद्धगुरून् भूतानि सर्वशः ॥ नमस्कृत्यात्मसंभूतीर्मंग
लानि समस्पृशत् ॥१०॥ आत्मानं भूषयामास नरलोकविभूषणं ॥ वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥११॥ अवे
क्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरांतःपुरचारिणां ॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्य
नंदत ॥१२॥ संविभज्याग्रतो विप्रान् स्रक्तांबूलानुलेपनैः ॥ सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयं ॥ तावत्सूत उपानी
यस्यंदनं परमाद्भुतं ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणामावस्थितोऽग्रतः ॥१४॥ गृहीत्वा पाणिना पाणीं सारथेस्तमथारुहत् ॥ सा
त्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥१५॥
दिनेदिने च प्रतिग्रहं चेति ॥९॥ आत्मसंभूतीर्मंगलानीति कपि [illegible] ॥१०॥ नरलोकस्य विभूषणरूपमात्मानं स्वीयैरपीतांबरकौ
स्तुभादिभिः ॥११॥ कामान् अभिलषितानर्थान् ॥१२॥ विप्रादीन् स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वेत्यर्थः ॥ उपायुंक्त भोगा
र्थमग्रहीत् ॥१३॥१४॥ पाणीकृतं [illegible] गृहीत्वा ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ०
५५

सव्रीडप्रेमवीक्षितैरीक्षितः क्षणं स्थितस्ताभिरेव वीक्षितैः लक्ष्याद्विस्पष्टो निरगादिति ॥१६॥ एवं सर्वगृहेभ्यः पृथक् पृथक् निर्गत्यानन्तरं एक एव सन् सुधर्मां प्राविशत् यान्निविष्टानां यत्र प्रविष्टानां ॥१७॥ नरसिंहैर्नृपश्रेष्ठैः ॥१८॥ उपमंत्रिगणपारिहासकाः पृथक् पृथक् स्वस्वसमुदायैः ॥१९॥ मृदंगादय प्रसिद्धा दरशंखस्य सूतादयस्तुष्टुवुः ॥२०॥ ब्राह्मणा ब्रह्मवेदं प्राहुर्मंत्रान् व्याचक्षते सर्वदः।

ईक्षितो तत्पुरस्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ लक्ष्याद्विस्पष्टो निरगात् ज्ञातहासो हरन्मनः ॥१६॥ सुधर्माख्यां सभां सर्वैर्वृ
ष्णिभिः परिवारितः ॥ प्राविशद्यन्निविष्टानां न सन्त्यंग षडूर्मयः ॥१७॥ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभो
ऽवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दिवि तारकागणैः ॥१८॥ तत्रोपमंत्रिणो राजन् नानाहास्यरसै
र्विभुं ॥ उपतस्थुर्नटाचार्या नर्तक्यस्तांडवैः पृथक् ॥१९॥ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवु
श्च सूतमागधवंदिनः ॥२०॥ तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः ॥ पूर्वेषां पुण्ययशसां राज्ञां चाकथयन् कथाः
॥२१॥ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रतिहारैः प्रवेशितः ॥२२॥ स नमस्कृत्य कृष्णाय प
त. रेशाय कृतांजलिः ॥ राज्ञामावेदयद्दुःखं जरासंधनिरोधजं ॥२३॥ ये च दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य
रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे ॥२४॥ कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभंजन ॥ वयं त्वां शरणं यामो भवभीताः पृथग्धियः ॥२५ ५५

वादिन वदनचतुराः ॥२१॥२२॥२३॥ गिरिव्रजे तत्संज्ञके दुर्गे रुद्धा आसन् तेषां च दुःखमावेदयादित्यन्वयः ॥२४॥ श्रीकृष्ण कृष्णेति
षट्श्लोकी राज्ञां विज्ञाप्तिः । तत्र प्रथमेन शरणाश्रवणं। त्रिभिर्भयानुवादः। द्वाभ्यां प्रार्थनमिति ॥२५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एयकुदर्शिनो लोकस्य भयभयं विवृण्वंतो नमंति। लोक इति विकर्म निषिद्धं काम्यं च तास्मिन्नितरां रतः। स्वकुशले धर्मे प्रयतोर्चने तया
उदिते ऊके पंचरात्रे सामान्यतश्च गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति
प्रमत्तो नवहितो यावदस्य लोकता वदेवास्य लोकस्य यसद्यो जीविताशांच्छिनत्ति तस्मै तुभ्यं प्रानिमिषाय कालात्मने नमइति॥२५॥ सै
यं श्लोकस्य गतिर्वयं तु सेद्धृणोश्वतोस्माकं कुतः ततः दुःखमापन्नामित्यास्मर्येणाहुः॥ लोक इति भो ईश जगत ईन ईश्वर त्वयि सद्व्रस

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे॥ यस्तावदस्य वलवानिह जीविताशां सद्यश्छिनत्ति
मिषाय नमोस्तु तस्मै॥२६॥ लोके भवान्जगतीनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः॥ कश्चित्त्वदी
यमतियाति निदेशमीश किंवा जनः स्वकृतमृच्छति तन्न विद्मः॥२७॥ स्वप्नायितं नृपसुखं परतंत्रमीश शश्वद्भयेन म
तके न धुरं वहामः॥ हित्वा तदात्मनि हि सुखं त्वदनीहलभ्यं क्लिश्यामहे तिकृपणास्तव मायये ह॥२८॥ ॥ ॥

णार्थमवतीर्णोपि वेदस्माकं दुःखं स्यात्। तर्हि किमन्य कश्चित् जरासंधादिः त्वदाज्ञामति वंधपतिकिंच तया रक्षमाणेपि जनस्य
कर्मजं दुःखं प्राप्तोसेवेति न विद्य इत्यन चैतदुभयमपि युक्तमितिभावः॥२७॥ किं दुःखं तत्राह स्वप्नायितमिति। स्वप्नवज्ज्ञातं नृपसुखं
यतपरतंत्रं विषयस्वाध्यं किंच। संप्रति शश्वद्भयं यस्मिन् जेत्तृमृतकतुल्येन शरीरेण धुरं पुत्रकलत्रादिचिंताकेवलं वहामः॥ अहो नो
ष्टं नयेव यापितः पूर्वमेव निकामासतस्त्वा नाश्रिता इत्याह हित्वेति तत्तत्पदन्नीहेः॥ निकामेर्लभ्यं आत्मनि स्वतासिद्धं सुखं तद्धितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा०भा० त्वन्मायया कृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयंते तत्र इति । विभुं त्वमेव यन्नामधो जरासंधतस्तं संकटात् वा र्मपाशात् भवाद्भिरेव
५६ विक्रम्यततो निर्गम्यतामिति वेदत आहुः यदुरिति या एकएव अयुतमतंगजानां वीर्यं विभ्रत्स तन्मुस्त्वभवनेभूभुजौ अस्मानरूगेधसिंहे
मेषीरिव ॥२९॥ किंच । युष्मदीयावयमित्यस्मान बाधे ... आहुः । यो वा इति हे उदात्तचक्र उद्यतसुदर्शन । यो वै द्विनव

तन्नो भवान् प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुंक्ष्व मगधाह्वयकर्मपाशात् । यो भूभुजोऽयुतमतंगजवीर्यमेको विभ्र
द्रुरोध भवने मृगराडिवावीः ॥२९॥ यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यं ॥ जित्वा नृलो
कनिरतं सकृदूढदर्पो युष्मत्प्रजा रुजति नोऽजित तद्विधेहि ॥३०॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥ प्र
पन्नाः पादमूलं ते दीनानां शं विधीयतां ॥३१॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ॥ विभ्रत्पिंगजटाभारं प्रादुरासी
द्यथा रविः ॥३२॥ तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥३३॥ सभा
जयित्वा विधिवत्कृतासनपरिग्रहं ॥ बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं ॥३४॥ अपि स्विदद्य लोकानां त्रया
णामकुतोभयं ॥ ननु भूयान्भगवतो लोकान्पर्यटतो गुणः ॥३५॥ नहि तेऽविदितं किंचित् लोकेष्वीश्वरकर्तृषु ॥
अथ पृच्छामहे युष्मान् पांडवानां चिकीर्षितं ॥३६॥

कृत्व अष्टादशवारान् । त्वया सह मृधे वर्तमाने तत्र स सप्तदशकृत्व त्वया खलु भग्नः पराजितः । पश्चादनंतवीर्यमपि नृलोके नि ५६
रतं नरशरीरविनोदं भगवंतं सकृज्जित्वा उदूढदर्पः प्राप्तगर्वः युष्मत्प्रजा नः रुजति पीडयति तत्तत्र यत् युक्तं तद्विधेहीत्यर्थः
॥३०॥ दूत आह इतीति ॥३१॥३२॥३३॥३४॥ भूयान् गुणो लाभो यमस्माकं सर्वलोकचरतां तज्ज्ञानमिति ॥३५॥ ईश्वरकर्ता येषां तेषु ॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमविदुषेवसर्वं तेन जरासंधवधार्थमेव पांडवचिकीर्षितं पृष्टो नारदो मायेयमिति ज्ञात्वाह दृष्टा इति त्रिभिः। विश्वसृजश्च अल
गोपिमायिनो मोहकस्य ते स्वशक्तिभिर्विद्यादिभिर्भूतेषु अंतर्यामितया चरतो वर्त्तमानस्याय घहं भूतेषु वर्त्ततेहि भूता निमां किं नप
श्यंतितत्राह। वन्हेरिवछन्नरुच इति। स्वशक्तिभिरिति वह्नेर्यथा काष्ठप्रकाशो यस्य तस्या अतस्त्वेदं प्रश्नादिनमेद्भुतं॥३८॥ इदं जगत्
कथंभूतं असदेव यत्तवमानात्मतया वभासते तज्जगत्सृजतः किं तु केवलं तुभ्यं नमः न मेय शक्यमित्याह तस्मै नमः इति। कुतस्त्वेन रू

श्रीनारद उवाच॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्वन्हेरिव छ
न्नरुचो न मेद्भुतं॥३८॥ तवेहितं कोर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः॥ यद्विद्यमानात्मतयावभासते तस्मै
नमस्ते स्वविलक्षणात्मने॥३९॥ जीवस्य यः संसरतो विमोक्षणं न जानतो नर्थवहाच्छरीरतः॥ लीलावतारैः स्वयशः प्रदी
पकं प्राज्वालयत्त्वा तमहं प्रपद्ये॥४०॥ अथाप्याश्रावये ब्रह्मन्नरलोकविडंबनं॥ राज्ञः पितृस्वस्रेयस्य भक्तस्य च चि
कीर्षितं॥४१॥ यक्ष्यति त्वां मखेंद्रेण राजसूयेन पांडवः॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदतां॥४२॥ ॥ ॥

पेण सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः॥ नन्वेवं भूतस्य किं मायाचेष्टितैरित्यत आह। जीवस्येति॥ अविद्यातमसावृतत्वे
न अनर्थप्रापकात् शरीरात् संसरतस्तेन नैव तमसा शरीरात् मोक्षोपायमजानतः प्राज्वालयत् प्रदीपितवान् त्वं लीलावतार
श्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः॥४०॥ आश्रावये श्रावयिष्यामि नरलोकविडंबनं ब्रह्मन्स्त्वां ब्रह्मन्निति पाठेपि हे ब्रह्मन्
परमात्मन् नरलोकानुकारिणं त्वां श्रावयिष्यामीति॥४१॥४२॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०भाग०उ०
५७

नचात्रैवानुमोदनं कार्यं किंतु तत्रागंतव्यमित्याशयेनाह। तस्मिन्निति॥४३॥ तत्रागताश्च सर्वे त्वद्दर्शनादिना पूता भविष्यंतीत्याह श्र
वणादिति। अंतेवसायिनश्श्वपचा अपि ब्रह्ममयस्य ब्रह्मघनस्य दर्शनादिना॥ ईक्षणं च अभिमर्षनं स्पर्शनं च ते विद्यते येषां ते॥४४॥ [illegible]
तिशयेनाह यस्येति हे भुवनानां मंगलरूप दिवि पाताले भूमौ च प्रथितं यस्य यशो विश्वं पुनाति कथं प्रथितं दिविताननं [illegible] नां।

तस्मिन्देवक्रतुवरे भवंतं वै सुरादयः॥ दिदृक्षवस्समेष्यंति राजानश्च यशस्विनः॥४३॥ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंऽते
वसायिनः॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः॥४४॥ यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल
दिग्वितानं॥ मंदाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणांबु पुनाति विश्वं॥४५॥ श्रीशुक उवाच॥ तत्र तेषा
त्मपक्षेष्वगृह्णत्सु जिगीषया॥ वाचः पेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः॥४६॥ श्रीभगवानुवाच॥ त्वं हि नः परमं चक्षु
सुहृन्मंत्रार्थतत्ववित्॥ तथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत्॥४७॥ इत्युपामंत्रितो मंत्री सर्वज्ञेनापि मुग्धवत्॥
निदेशं शिरसाधाय उद्धवः प्रत्यभाषत॥४८॥ इति श्रीभागवते महापुराणे दशमस्कंधे ग ध्या सप्ततितमोध्यायः॥७०॥

वितानवदलंकरणं तथा चरणांबु च प्रथितं पुनाति। कथं तत्प्रथितं दिवि मंदाकिनीति॥ अधश्च भोगवतीति इह च भूमौ गंगेति त ५७
स्य तवागमनात् सर्वं प्रांगलं पवित्रं च भविष्यतीति भावः॥४५॥ तत्रैवं नारदेनोक्ते तेषु वर्तमानेषु आत्मीयपक्षेषु यादवेषु जरासंध
स्य जिगीषया अगृह्णत्सु अमन्यमानेषु वाचः पेशैः पेशलवाग्भिरित्यर्थः॥ चक्षुरिव हेतुर्मंत्रार्थानां मंत्रसाध्यानां तत्ववित्त्वयाक
वेदितो॥४७॥४८॥ दशमे सप्ततितमः॥७०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैक सप्ततितमे उद्धवस्यतु मंत्रतः॥ इंद्रप्रस्थं गते कृष्णे पार्थानां परमोत्सवः॥ राजसूयमिषं कृत्वा भीमदुर्योधनादिषु॥ कालिमु
साद्य तत्द्वाराभूभारमहरत्प्रभुः॥२॥ देवर्षेर्मतं राजसूयगमनं सभ्यानां मतं राजरक्षा कृष्णस्य तूभयं॥१॥ यद्यपि तयोगं
कश्चिष्यतपैतृष्वस्रेयस्यापि तत्पसुपुत्रस्य साचिव्यं साहाय्यं तत्त्वकार्यं तथा शरणार्थिनां राज्ञां रक्षा च कार्या॥२॥ तत्र प्रथ
मं राजसूयार्थं गंतव्यं ततो राज्ञां रक्षा कर्त्तव्ये साहाय्यमप्यमित्यपि॥ अतो दिग्विजयहेतोः। उभयार्थः राजसूयार्थं शरणाग

श्रीशुक उवाच॥ इत्युक्तोदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत्॥ सभ्यानां मतमाज्ञाय कृष्णस्य महामतिः॥१॥ श्रीउद्ध
व उवाच॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया॥ कार्यं पैतृष्वस्रेयस्य रक्षा च शरणैषिणां॥२॥ यष्टव्यं राज
सूयेन दिक्चक्रजयिना विभो॥ अतो जरासुतजय उभयार्थो मतो मम॥३॥ अस्माकं च महानर्थो ह्येतेनैव भ
विष्यति॥ यशश्च तव गोविंद राज्ञो बद्धान् विमुंचतः॥४॥ स वै दुर्विषहो राजा नागायुतसमो बले॥ बलिनामपि
चान्येषां भीमं समबलं विना॥५॥ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः॥ ब्रह्मण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्या
ति कर्हिचित्॥६॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः॥ हनिष्यति न संदेहो द्वैरथे तव सन्निधौ॥७॥ ॥

तरक्षार्थश्च॥३॥ ४॥ अत्यक्तस्तु कृतपासद्य एव जरासंधं हंतुमिष्यते। यादवानां लक्ष्याहसवाइति॥ अन्येषां ततो [illegible] लिनामपि
यद्यपि समबल एव भीमस्तथापि तं विना भीमादेवतस्य मृत्युर्विहित इति भावः॥८॥ न नु स्वबलसाम्यापि से [illegible] धि
कमिति चेत् तत्राह द्वैरथ इति द्वंद्वयुद्धे शतेनाक्षौहिणीभिर्युतोपि न जेतव्य इत्यर्थः। नन्वसौ स्वसन्यप्रेव युद्धाय नियुजाते
कुतस्तव न द्वैरथमिति तत्राह ब्रह्मण्य इति। न प्रत्याख्याति न निराकरोति॥६॥ भिक्षेत द्वंद्वयुद्धं याचतां तथापि समबलत्वात् सा

॥७॥ तैर्विघ्नितसमासतासादरस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशा० उ०
५८

ननुअकिंचित्कुर्वतोममसन्निधानात्किंस्यादतआहनिमित्तमिति॥अयमर्थः।यथातवारूपस्यकालात्मनोविश्वसर्गनि[...]मित्तंकेव
लंहिरण्यगर्भः।तथाशर्वश्चतन्निरोधेतथात्वमेवसन्निधिमात्रेणहंताभीमोनिमित्तमात्रःपिति॥८॥अतो[...]येनत
यासरीद्धंहंतव्यइत्याशयेनाहगायंतीतिजरासंधतोनांराज्ञांदेव्यपल्यतेविशदंकर्मस्वगृहेषुबालकलाल[...]गाक
तकर्मस्वशत्रोर्जरासंधस्यवाधंआत्मनांपतीनांविमोक्षणंचावत्सप्रारोदीश्रीकृष्णएवंकरिष्यतीतिअत्रदृष्टांतो[...]पा
द्पयथागोप्यशंखचूडवधंस्वमोक्षंचगायंति॥अवतारांतरगतंचकुंजरपतेर्नक्रात्।जनकात्मजायाश्वरावणात्।पित्रोश्च

निमित्तंपरमीशस्यविश्वसर्गनिरोधयोः॥हिरण्यगर्भःशर्वश्चकालस्यारूपिणस्तव॥८॥गायंतितेविशदकर्मगृहेषु
देव्योराज्ञांस्वशत्रुवधमात्मविमोक्षणंच॥गोप्यश्चकुंजरपतेर्जनकात्मजायापित्रोश्चलब्धशरणामुनयोवयंच॥९॥
तू. जरासंधवधःकृष्णभूर्यर्थायोपकल्पते॥प्रायःपाकविपाकेनतवचाभिमतःक्रतुः॥१०॥श्रीशुकउवाच॥इत्युद्धव
वचोराजन्सर्वतोभद्रमच्युतं॥देवर्षिर्यदुवृद्धाश्चकृष्णश्चप्रत्यपूजयन्॥११॥ ॥ ॥ ॥

कंसगृहान्मोक्षंअतएवंभूतानांतासांकृपयात्वयातथैवकर्तव्यमितिभावः॥९॥किंच।जरासंधइतिभूर्यर्थायेतितत्रशि
शुपालवधादयोपिसुखसाध्याभविष्यंतीतिभावः॥एतच्चसर्वंभविष्यत्येवेतिसंभावयन्नाहप्रायइतिपाच्यंतइतिपाकःकर्मत
स्यविपाकःफलंतेनराज्ञांपुण्यविपाकेनजरासंधादीनांपापविपाकेनेतिपाठांतरेजरासंधस्यपापविपाकेनेति।तेनायंक्रतु
स्तवाभिप्रेतः।तत्रागतेष्वपिसर्वंभविष्यतीत्यर्थः॥१०॥अच्युतंउपपत्त्यादृढंयदुवृद्धाइतिवदत्रानिरुद्धादयस्तथानापूज
यन्नितिसूचितं॥११॥ ५८

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुज्ञाप्य नृतो प्रार्थ्य गुरून् वसुदेवादीन् ॥१२॥ अवरोधास्त्वान् निर्गमय्य प्रयाणं कारयित्वा ॥१३॥ भटा पदातपसादि नश्च
श्वारोहा रथादि नायकैः करालयातीव्रया आत्मसेनया परिवृतो निराक्रमत् निरगात् । कुतसकाशात् । मृदंगादिभिर्वाद्यैः
प्रघोषेण घोषिताः ककुभः ॥१४॥ न वाजीति नरयानैश्च श्वकांच नारी शिबिकाभिश्च अच्युतं पतिमनुययुः । सुव्रता पतिव्रता

अथादिशत्प्रयाणाय भगवान् देवकीसुतः ॥ भटसान्दारुकजैत्रादीन् अनुज्ञाप्य गुरून्विभुः ॥१२॥ निर्गमय्यावरोधा
न्स्वान् सस्तुतान्सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥ सूतोपनीतं स्वरथमारुहद्गरुडध्वजं ॥१३॥
ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैः प्रघोषघोषितक
कुभो निराक्रमात् ॥१४॥ नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजा पतिमनु सुव्रता ययुः ॥ वरांबराभरणविलेपन
स्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥१५॥ नरोष्ट्रगोमहिषखराश्वतर्यनः करेणुभिः परिजनवारयोषितः ॥ स्व
लंकृताः कटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वतः ॥१६॥ बलं बृहत् ध्वजपटछत्रचामरैर्वरायुध
रणाकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः ॥१७॥ गी ॥
वराण्यंबरादीनि यासां ताः ॥१५॥ नरोष्ट्रादिभिर्यानैः ॥ अश्वतरी गर्दभ्यां मरश्वाज्जाता जनः शकटं करेणुर्ग[...]न
योषितो वारयोषितश्च कटकुटयः । उशीरादितृणनिर्मितगृहाः कंबलांबरादयश्चोपस्कराः । कुभ्यादि[...]ः
अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं संनह्य ॥१६॥ रवेरंशुभिश्च तद्बलं दिवा बभौ कथंभूतं तुमुलर[...]त्स्वन
क्षुभितैस्तिमिंगिलैरुर्मिभिः ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०उ० मुनिर्नारदो विहायसा ययावितिशेषः ॥१८॥ मामैष्टेति बहु तं राजाभिप्रायेण ॥१९॥ प्रत्यैक्षन्न प्रत्यैक्षंत यत् यस्मात् मुमुक्ष[वः] ॥२०॥
५९ आनर्त्तादयो मार्गस्य देशातीतीर्त्वा अतिक्रम्य विनशनं कुरुक्षेत्रं अतीत्याप अतिक्रम्य ययौ ॥२१॥ शक्रप्रस्थं इंद्रप्र[स्थं] ॥२२॥२३॥
अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदस[...]
तेंद्रियः ॥१८॥ राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा ॥ मामैष्ट दूत भद्रं वो घातयिष्यामि मागधं ॥१९॥ इत्युक्तोऽ[...]
दूतो यथावदवदन्नृपान् ॥ तेऽपि संदर्शनं शौरेः प्रत्यैक्षंश्च मुमुक्षवः ॥२०॥ आनर्त्तसौवीरमरूंस्तीर्त्वा विनशनं ह[...]
गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥२१॥ ततो दृषद्वतीं तीर्त्वा मुकुंदोऽथ सरस्वतीं ॥ पंचालानथ मत्स्यांश्च श[क्र]
प्रस्थमथागमत् ॥२२॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणां ॥ अजातशत्रुर्निरगात् सोपाध्यायः सुहृद्वृतः ॥२३॥ गी
तवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृतः ॥२४॥ दृष्ट्वा विक्लिन्नहृदयः कृ
स ष्णं स्नेहेन पांडवः ॥ चिराद्दृष्टं प्रियतमं स्वजे चैव पुनः पुनः ॥२५॥ दोर्भ्यां परिष्वज्य रमामलालयं मुकुंदगात्रं नृपतिर्हृ
ताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मय
न्प्रेमजवाकुलेंद्रियः ॥ यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतं ॥२७॥ युधिष्ठिरस्य भीमस्य कृष्णोऽपादा ५९
भिवंदनं ॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः ॥ ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥२८॥ मानितो मान
यामास कुरुसृंजयकैकयान् ॥ सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ॥२९॥
प्राणा इंद्रियाणि प्राणं मुख्यं प्राणमिव ॥२४॥ सस्वजे परिरेभे ॥२५॥ रमाया अमलं निर्दोषमालयं विस्मृतो लोकव्यवहारो येन सः ॥२६॥
॥२७॥ अर्जुनेन सम्यक् परिष्वक्त एव केवलं पादौ नमस्कुर्वन्नर्जुनस्तु नकुलेन भुजाभ्यां धृत इति भावः ॥ यमाभ्यां त्वभिवादितश्चेति ॥२८॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३०॥ ३१॥ चित्रध्वजादिभिर्विराजमानं॥ ३१॥ प्रासादसमुद्दीप्तैर्दीपैर्बलिभिः पुष्पादिं प्रकारैश्च जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपैः रुचि
रं विलसंत्यः पताका यस्मिन् तत्। मूर्द्धन्याभ्रद्विप्रभा हेमकलशा येषां ते॥ राजतमया निरूप्यमया नि तुरूणि स्थूलानि शृंगाणि
कलशाधस्तान्भूमिका येषां तैर्भवनैर्जुष्टं कुरुराजस्य धामपुरं ददर्श॥ ३२॥ नराणां लोचनानि तेषां पानस्य सादर वीक्षणस्य
मृदंगशंखपटहवीणापणवगोमुखैः॥ ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्ननृतुर्जगुः॥ ३०॥ एवं वृष्णिद्विपर्यस्तः पुण्यश्लोककी
र्त्याम्पतिः॥ संस्तूयमानो भगवान् विवेशालंकृतं पुरं॥ ३१॥ संसिक्तवर्त्मकरिणां मदगंधतोयैश्चित्रध्वजैः कनकतोरणपू
र्णकुंभैः॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं॥ ३२॥ उद्दीप्तदीपबलिभिः प्रतिसद्म
जालनिर्यातधूपरुचिरं विलसत्पताकं॥ मूर्द्धन्यहेमकलशैरजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम॥ ३३॥ प्रा
प्तं निशाम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः॥ सद्यो विसृज्य गृहकर्मपतींश्च तल्पे द्रष्टुं ययु
र्युवतयः स्म नरेंद्रमार्गे॥ ३४॥ तस्मिन् सुसंकुल इभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः॥ नार्यो वि
कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन॥ ३५॥ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथो
हा किमकार्यमूभिः॥ यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति॥ ३६॥ तत्र तत्रोपसं
शामंगलपाणयः॥ चक्रुः सपर्यां कृष्णाय श्रेणिमुख्या हतैनसः॥ ३७॥ ॥ ॥
पात्रं विषयं यत्किंपुन मीरिणामित्यर्थः॥ ३४॥ सुष्टु स्वागतं तत्र श्रादिकं प्रियं उत्स्मयवीक्षितेनैव विदधुः॥ ३५॥ उ ॥ ॥
चराहृत्यर्थः॥ अमूभिः किं पुण्यापकारि॥ ३६॥ श्रेणय एकशिल्पोपजीविनां संघास्तेषु मुख्याश्च॥ ३७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰स्कं॰ उ॰
६०

भ्युपेत अभिगमनेन सत्कृतः ॥ ३८ ॥ सस्नुषा द्रौपदीसहिता ॥ ३९ ॥ कृतं प्रकारविशेषं प्रमोदेनोपहतो भिभूतः ॥ ४० ॥ गुरुस्त्रीणां चा
लक्ष्मया वद्रौपद्या भगिन्या सुभद्रया ॥ ४१ ॥ आनर्च अर्चितवती ॥ ४२ ॥ अन्याश्च याः कृष्णपत्न्यो भ्यागताः ॥ ता अ [illegible] त्यहं न
वं नवं यथा भवति तथा सुखं निवासयामास ॥ ४४ ॥ कथंभूतोः प्रप्रीमणा निसंफाल्गुनेन संयुतः ॥ अत एव तस्य [illegible] ता

अंतःपुरजनैः प्रीत्या मुकुंदः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ॥ ३८ ॥ पृथा विलोक्य भ्रा [illegible]
त्रिभुवनेश्वरं ॥ प्रीतात्मोत्थाय पर्यंकात् सस्नुषा परिषस्वजे ॥ ३९ ॥ गोविंदं गृहमानीय देवदेवेशमादृतः ॥ पू [illegible]
नाविदत्क्लृप्तं प्रमोदोपहतो नृपः ॥ ४० ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेभिवादनं ॥ स्वयं च कृष्णया राजन् भगि [illegible]
चाभिवंदितः ॥ ४१ ॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीश्च सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा ॥ ४२ ॥
कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीं ॥ अन्याश्चाभ्यागता याः स्तु वासःस्रङ्मंडनादिभिः ॥ ४३ ॥ सुखं निवासया
मास धर्मराजो जनार्दनं ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ॥ ४४ ॥ तर्पयित्वा खांडवेन वह्निं फाल्गुनसंयुतः
मोक्षयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४५ ॥ उवास कतिचिन्मासान् राज्ञः प्रियचिकीर्षया ॥ विहरन् रथमारुह्य
फाल्गुनेन भटैर्वृतः ॥ ४६ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकसप्ततितमोध्यायः ॥ ७१ ॥ छ ॥ छ ॥ छ ॥ ६०

येन खांडवेन वह्निं तर्पयित्वा तत्र च मयं मोचयित्वा तं मयं प्रयुज्य युधिष्ठिराय दिव्या सभा कृता तं श्रीजनार्दनं ॥ अनेन राजसूयो
पकारानुस्मरणं दिव्यत्वात् सभाया यथा मनोरथं सर्वावकाशसंपादनं च दर्शितं ॥ ४५ ॥ ४६ ॥ इति दशमे एकसप्ततितमः ॥ ७१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोद्विसप्तति तमेराहाकार्यैर्निवेदिते॥ दुर्जयं मागधं बुध्वा भीमेनाघातयद्धरिः॥१॥ श्रण्वतामेवेति यस्मसन्नेह लस्तकरोति नत
दन्य कश्चिदपि कर्त्तुं समर्थ इति निश्चित्य सर्वानेव तान् नाद्दत्य हस्तमुवाचेत्यर्थः॥ आभाषाभो भो हस्तभक्तवत्सलेत्येवं सं
बोध्य॥२॥ विभूतीअंशान्॥३॥ एष चक्रवर्त्ति नां मनोरथः॥ कथं त्वया क्रियत इति चेद्वदत आह॥ त्वत्पादुके इति परिये चरंतीति यच्छ
द्द्व्यवधान मार्गे ये परि चरंति देहे नाध्यायंती मनसा अभद्रस्य नशाने नाशके नणंति वा चोत्ते भवस्याप वर्गं मोक्षं विंदंति
श्रीशुक उवाच॥ एकदा तु सभामध्ये आस्थितो मुनिभिर्वृतः॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्टिरः॥१॥ आ
चार्यैः कुलवृद्धैश्च ज्ञातिसंबंधिबांधवैः॥ श्रण्वतामेव चैतेषां आभाष्येदमुवाचह॥२॥ युधिष्टिरउवाच॥ क्रतुराजेन
गोविंद राजसूयेन पावनीः॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो॥३॥ त्वत्पादुके अविरतं परि ये चरंति ध्यायंत्य
भद्रनशाने शुचयो गृणंति॥ विंदंति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये॥४॥ तद्देवदेव भव
तश्चरणारविंदसेवानुभावमिह पश्यतु लोक एषः॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसं
याना॥५॥
यद्यप्याशासते तर्हि आशिषो पि त एव विंदंति नान्ये चक्रवर्तिनोपि॥४॥ भगवतो भक्तपक्षपातं नाविष्कार यन्नाहा[illegible] त
तस्मात्सदृश्यात्तु साक्षात्। एवं निश्चितेपि ये कर्मादिप्रधाना केचित्कुरुसंजया भगवद्भक्तिं न बहुमन्यं तेषां मो[illegible] त्वां
भजंति तेषां निष्ठां स्थितिं प्रदर्शय॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशो०उ० अनुरागादिरहिते पथिक कथमिदं वैषम्यं स्यात्तत्राह नेति स्वपर इति भेदमतिस्तव नस्याद्देवकृतब्रह्मणे। निरूपाधे किं च सर्वस्यास्मन्...तसम
६१ दृशः। किं वा स्वसुखानुभूतेः। अतो रागाद्यभावे तथापि संसेवमानानामेव तत्प्रसादो नान्येषां तत्रापि सेवानुरूप... तत्त्वन्न
पर्ययोन्यथाभावः। यथा कल्पद्रुमस्य रागादिरहितस्यापि सेवकेष्वेव फलजनकत्वं नान्येषु॥६॥ सत्संपद्भक्तानां ... हि
न्येषामित्यनुमोदमान आह। सम्यगिति राजानुकारिणेति संबोधयन् सर्वराजविजयेन कीर्तिं संचारयति अनुभविष्य... लो
न ब्रह्मणस्त्वपरभेदमतिस्तव स्यात् सर्वात्मनः समदृशः स्वसुखानुभूतेः॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुद...
पर्ययोत्र॥६॥ श्रीभगवानुवाच॥ सम्यग्व्यवसितं राजन् भवता राजानुकारिणा॥ कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति॥
ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो॥ सर्वेषामपि भूतानां प्रीणितः क्रतुराड् यं॥८॥ विजित्य नृपतीन्सर्वान् कृत्वा ...
गतीं वशे॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुं॥९॥ एते ते भ्रातरो राजन् लोकपालांशसंभवाः॥ जितोस्म्यात्मवता ते
हं दुर्जयो योऽकृतात्मभिः॥१०॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया॥ विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थिवः॥११॥

कल्याणी भविष्यतीत्यर्थः॥७।८॥ किमात्मप्रयासान्येन वा संपादनीयं तत्र क्रतुकर एव राजसूय इत्याह। विजित्येति जगतीं सर्वां पृथिवीं
संभारान् यज्ञोपस्करान् संपाद्य आहरस्व अनुतिष्ठेत्यर्थः॥९॥ ननु नृपतिविजयादि कथं शक्यं स्यादित्याह। एत इति किं च। ६१
आत्मवतो जितेन्द्रियेण ते त्वया अहं च जितो। स्मि वशीकृतोस्मि॥ अकृतात्मभिरजितेन्द्रियैः॥१०॥ आस्तां तावदेवं भूतस्य तव
परैस्तु अभिभवशंका अकिंचन मत्परमपि मत्परं कोपि नाभिभवितुं प्रभवतीत्याह न कश्चिदिति। तेजसा प्रभावेन विभूतिभिः सैन्यादिसामग्रीभिः॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयुक्त नियुक्तवान् विक्षेपोस्ते जसा उपबृंहितान् संवर्द्धितान् । तेजोपबृंहितानिति सांधिरार्षः ॥१२॥ नकुलादीनां मत्स्यादिभिः सह । यैर्यथा
संख्यानसंबंधः ॥१३॥ कथंभूताय यक्ष्यते यागं करिष्यते ॥१४॥ अधोहरि श्रीकृष्णः ॥१५॥ ब्रह्मलिंगधरा ब्राह्मणलिंगधारिणः ॥ यत्र
यत्र बृहद्रथसुतो जरासंधः ॥१६॥ गृहेषु वर्त्तमानं समयाच्चेरन् । साम्यं कृ[illegible]याचं ते तर्थः ॥१७॥१८॥ नन्विदं कामपेयापह इति विशेषोनि
र्दिश्यतो अन्यथा यस्य पुत्रादेर्वियोगो दुःसहस्स कथं देयः तथा राजमंडनं किरीटादि देयं यत् तत् भिक्षभ्यः कथं देयो तथा प्रतिरम्यं र

श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः ॥ भ्रातॄन् दिग्विजये युंक्त विष्णुतेजोपबृंहितान् ॥१२॥ सहदेवं दक्षि
णस्यामदिशत्सह सृंजयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं ॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः ॥१३॥
ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा ॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥१४॥ श्रुत्वाजितं जरासंधं नृपतेर्ध्या
यतो हरिः ॥ आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥१५॥ भीमसेनोर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥ जग्मुर्गिरिव्रजं तात
बृहद्रथसुतो यतः ॥१६॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनं ॥ ब्रह्मण्यं समयाच्चेरन् राजन्या ब्रह्मलिंगिनः ॥१७॥ राज
न्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥१८॥ किं दुर्मर्षं तितिक्षूणां किमका[illegible]
साधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनां ॥१९॥

त्वाभरणादि पुत्रादि योग्यं कथं परस्मै देयमिति चेद् तत्राहुः किं दुर्मर्षमित्यादि अत्र दृष्टांतत्वेनार्थांतरमाहुः ॥ किमका[illegible]सा
धूनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं दुःसहं नास्ति वदान्यानामत्यक्तदान्यानामत्यक्तदाराणामदेयं नास्ति स[illegible]
नास्ति । अतः किं विशेषनिर्देशेनेत्यर्थः ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शां०उ० ६२

किंच। आर्थिनैधीरेण मुहुर्लादिवप्राणोपिन वंचनीय इत्याशयेनाहुः। यो नित्येनेतिना विनोति नसंपादयतिस वाच्यसनिंद्यः॥२० इविश्वा
मित्रार्थीन एयाय हरिश्चंद्रो भार्यात्मजादिसर्वं विक्रीय स्वयं चांडालतां प्राप्तोप्य निर्विण्णस्सह योध्यावासिभिर्जनैः स्वर्ग [illegible] रंति
देवस कुटुंबोऽष्टचत्वारिंशद्दहान्यलब्धोदकोपिकथंचिल्लब्धान्नोदकार्थिभ्योदत्वा ब्रह्मलोकं गतः॥ उंछवृत्ति [illegible] ण वेष
दत्कुटुंबोप्यातिथ्यदानेन ब्रह्मलोकं गतः शिबिश्शरणागतकपोत रक्षणाय स्वमांसं श्येनाय दत्वा दिवं गतः॥ वलि [illegible]
यो नित्येन शरीरेणासतां गेयं पदं ध्रुवं॥ नो विनोति स्वयं कल्पः [illegible] वाच्यः शौच्य एव सः॥२०॥ हरिश्चंद्रो रंतिदेव उं [illegible]
शिबिर्बलिः॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः॥२१॥ श्री शुक उवाच॥ स्वैरैरालतिभिस्तांस्तु प्रकोऽपि सहितैरपि॥
न्यबंधूनु विज्ञाय दृष्टपूर्वानचिंतयत्॥२२॥ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति॥ ददामि भिक्षितं तेभ्य आत्मानमपि दु
स्त्यजं॥२३॥ बलेनुश्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा॥ ऐश्वर्याद्भ्रंशितस्यापि विप्रव्याजेन विष्णुना॥२४॥ श्रियं जिहीर्षतें
द्रस्य विष्णवे द्विजरूपिणे॥ जानन्नपि महीं प्रादात् वार्यमाणोपि दैत्यराट्॥२५॥

वोधारिणे हरये दत्वा तमेवात्मसाध्यं कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्वा विमानेन दिवं गतः॥ व्याधस्तपो
सत्वं वीक्ष्य स्वयमपि निर्विण्णो महाप्रस्थानेन वनाग्निदग्धदेहो नि कलाषो दिव्यमारुरोह एवमन्ये च बहवोऽध्रुवेण शरीरेण ध्रु
वं लोकं गता इति॥२१॥ ज्याहतैर्ज्याघातकिणांकितैः॥ दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु॥२२॥२३॥ इंद्रस्य श्रियं जिहीर्षता विप्रव्या
जेन विष्णुना भ्रंशितस्यापि वलेर्नअहो नेति पाठे न श्रूयते किमपि तु श्रूयत इति॥२४॥ तं श्लाघते विष्णवे इति शुक्रेण वार्यमाणोपि अत एव ६२

पतमानेन पतता क्षत्रबंधुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहता नेहमानेन असंपादयता को न्वर्थः। न कोपि स्यर्थः॥२६॥ एवं नि
श्चित्य प्राह हे विप्रा इति॥२७।२८॥ राजन्यता मेव प्रपंचयति। असाविति॥२९।३०॥ यतो माद्भियासमुद्रं शरणं गतः॥३१॥ वयसा स्तु
ल्य नातिसत्त्व अनतिबलश्च न च देहेन मया समः। अतोर्जुनो योद्धा न भवेत्। भीमस्तु भवेत्। यतो मम तुल्यबलः॥३२॥ प्रादायेर्द

जीवता ब्राह्मणार्थाय को न्वर्थः क्षत्रबंधुना॥ देहेन पतमानेन नेहता विपुलं यशः॥२६॥ इत्युदारमतिः प्राह कृष्णार्जुन
वृकोदरान्॥ हे विप्रा व्रियतां कामो ददाम्यात्मशिरोपि वः॥२७॥ श्रीभगवानुवाच॥ युद्धं नो देहि राजेंद्र द्वंद्वशो यदि मन्यसे॥
युद्धार्थिनो वयं प्राप्ता राजन्या नान्नकांक्षिणः॥२८॥ असौ वृकोदरः पार्थस्तस्य भ्राताऽर्जुनो ह्ययं॥ अनयोर्मातुलेयं मां कृ
ष्णं जानीहि ते रिपुं॥२९॥ एवमावेदितो राजा जहासोच्चैः स्म मागधः॥ आह चामर्षितो मंदा युद्धं तर्हि ददामि वः॥३०॥ न
त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा॥ मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः॥३१॥ अयं तु वयसा तुल्यो नातिस
त्त्वो न मे समः॥ अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम॥३२॥ इत्युक्त्वा भीमसेनाय प्रदाय महतीं गदां॥ द्वितीयां
स्वयमादाय निर्जगाम पुराद्बहिः॥३३॥ ततः समेखले वीरौ संयुक्ताविंतरेतरौ॥ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां र[णदु]
र्मदौ॥३४॥ मंडलानि विचित्राणि सव्यं दक्षिणमेव च॥ चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः॥३५॥ ततश्च[टचटा]
शब्दो वज्रनिष्पेषसन्निभः॥ गदयोः क्षिप्तयो राजन् दंतयोरिव दंतिनोः॥३६॥ ॥ ॥

त्येस्यर्थः॥३३॥ समेखले युद्धांगणे॥३४॥ मंडलानि गदायुद्धगतिभेदान् सव्यं दक्षिणं च यथा भवति तथा इंगि[...]
टयोरिवेति निर्भयत्वे नोपमा॥३५॥ चटचटेति गदयोः परस्पराघातेन शब्दानुकरणं वज्रस्य निष्पेषः पातः तस्य [...] युध्य
तोर्दंताघातशब्द इव शुशुभे॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशं० उ०
६२

अंसकघादोरुपेस्वादीप्तोमन्युर्ययोस्तयोर्द्विरदयोर्गजयोरर्कशाखाभ्यांसमं युध्यतोस्ते यथा चूर्णा भवतस्तद्वत्॥३७॥ अपि [illegible] चूर्णी च
क्रतुः॥३८॥ शिक्षा अभ्यासबलं सत्त्वं ओजः प्रभावः साम्या नियया स्तयोः॥३९॥४०॥ तन्मध्ये शाकलरूपां मृतिं पुनः शाकलीभावः। वेविद्वा
नू जानन्। जरा नाम राक्षसी तत्कृतं अर्वितयत् कथमसौ शाकलीभवेदिति॥४१॥ विटपं शाखां करेण विटपं ग [illegible]
तेवैगदे भुजजवेन निपात्यमाने अन्योन्यतो सकटिपादकरोरुजानू। चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुग [illegible]
याविव दीप्तमन्योः॥३७॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयस्पर्शैरपिष्टाम्। शब्दस्तयोः प्रहरतोरिभ [illegible]
रिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः॥३८॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः। निर्विशेषमभूद्युद्धमक्षीणज
वयोर्नृप॥३९॥ एवं तयोर्महाराजयुध्यतोः सप्तविंशतिः। दिनानि निरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः॥४०॥ एकदा मातुलेय
वै प्राह राजन्वृकोदरः। न शक्तोऽहं जरासंधं निर्जेतुं युधि माधव॥४१॥ शत्रोर्जन्ममृती विद्वान्जीवितं च जराकृतं॥
पार्थमाप्याययन्स्वेन तेजसाचिन्तयद्धरिः॥४२॥ संचिंत्यारिवधोपायं भीमस्यामोघदर्शनः। दर्शयामास विटपं पाट
यन्निव संज्ञया॥४३॥ तद्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः। गृहीत्वा पादयोः शत्रुं पातयामास भूतले॥४४॥ एकं
पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः। गुदतः पाटयामास शाखामिव महागजः॥४५॥ एकपादोरुवृषणकटिपृष्ठस्तनांसके॥ एक
बाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः॥४६॥ हाहाकारो महानासीन्निहते मगधेश्वरे॥ पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ॥
परिरंभस्थितु कृष्णेन विरजोभूद्वृकोदरः॥४७॥ सहदेवं तत्तनयं भगवान्भूतभावनः॥ अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः॥ ६२
मोचयामास राजन्यान्संरुद्धा मागधेन ये॥४८॥ इति श्रीभागवते महापुराणे दशमस्कंधे जरासंधवधो नाम द्विसप्ततितमोध्यायः॥७२॥
यथाहं विटपं विपाटितवान् तथा त्वमेनं विपाटयेति संज्ञया संकेतेन अरिवधोपायं दर्शयामास स्वार्थः॥४२॥४३॥४४॥ एकैकपादादिर्येषां तेषु श
कलो॥४५॥४६॥४७॥ दुर्वृत्तत्वाद्वसौ हननं न राज्याभिलाषेणेति दर्शयन्नाह सहदेवमिति॥४८॥ इति दशमे द्विसप्ततितमोध्यायः॥ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्त्रिसप्ततितमे मोचयित्वा नृपान् हरिः । राजार्हभोगैस्तान्देशान्प्रस्थाप्य पुनरागमत् ॥१॥ अत्र कृष्णजरासंधवधात्तद्बद्धभूपतीन् ॥ वि
मोक्ष्य कृपया कृष्णो निजरूपमदर्शयत् ॥२॥ येनिर्जिता जरासंधेन निरुद्धाश्च गिरिद्रोण्यां ते ततो निर्गतास्सन्तो घनश्यामं ददृशुरित्यन्तरेणा
न्वयः ॥१॥ क्षुधा क्षामाः कृशाः । शुष्काः । संरोधेन परिकर्षिताः क्लेशिताः ॥२॥३॥४॥ भ्राजत् भ्राजमानो वरमणिः कौस्तुभो यस्य सा ग्रीवा यस्य तं नि

श्रीशुक उवाच ॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः ॥ ते निर्गता गिरिद्रोण्यां मलिना मलवाससः ॥१॥ क्षुत्क्षामाः शुष्क
वदनाः संरोधपरिकर्षिताः ॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससं ॥२॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं ॥ चारुप्र
सन्नवदनं स्फुरन्मकरकुंडलं ॥३॥ पद्महस्तं गदाशंखरथांगैरुपलक्षितं ॥ किरीटहारकटककटिसूत्रांगदांचितं ॥४॥ भ्रा
जद्वरमणिग्रीवं निवीतं वनमालया ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥५॥ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः ॥ प्र
णेमुर्हतपाप्मानो मूर्द्धभिः पादयोर्हरेः ॥६॥ कृष्णसंदर्शनाल्हादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषीकेशं गीर्भिः प्रांजलयो
नृपाः ॥७॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्त्तिहराव्यय ॥ प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥८॥ नैनं नाथा
नुसूयामो मागधं मधुसूदन ॥ अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥९॥ ॥ ॥

वीतं कंठलंबितया व्याप्तं पिबंत इवेत्यादीनां हरेः पादयोः प्रणेमुरित्यन्तरेणान्वयः ॥५॥ रंभंतः परिरंभमाणा इव ॥६॥ श्रीकृ
न ध्वस्तः संरोधनक्लमो येषां ते ॥७॥ संरोधाद्दुःखितानस्मान्घोरायाः संसृतेरपि पाहि मोचय ॥८॥ ननु भवंतो जरासं
मुत्र भोगासक्ताश्च कथं संसृतेर्मोचनीया इत्याशंक्य सम्प्रति न वयं तथाभूता इत्याहुः । नैनमित्यष्टभिः । हे नाथ वयं
अन्वनुदोषदृष्ट्या न पश्यामः ॥ अत इत्यत आहुः । अनुग्रह इति यत् यस्मात् ॥९॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव व्यतिरेकेणोपपादयंति॥ राज्यैश्वर्येति राज्यैश्वर्यस्य यो मदस्तेनोन्नद्धउच्छंखलो नित्या अचलाश्च संपदो मन्यते यद्वा आयुस्सास
तीअचला शाश्वतीर्मन्यते॥१०॥ किंच। अवस्तु सद्वस्तु तया पश्यंतीत्याहुर्मृगतृष्णामिति॥ वैकारिकीं सृष्ट्यादि [illegible] त्व
युक्ता अविवेकिनः॥११॥ राज्यस्य योगवियोगयोरनर्थार्थं विहतमस्माभिरेवानुभूतमित्याहुः वयमिति द्वाभ्यां श्रीमदे [illegible] बा
तो अस्याः पृथिव्या इतरेतरस्याधः परस्परं स्पर्द्धमाना पुरःपुरतः॥ [illegible] मृत्युमविगणय्य प्रायेण दुर्मदा वयं॥१२॥ हे कृ [illegible]

राज्यैश्वर्य्यमदोन्नद्धो न श्रेयो विंदते नृपः॥ त्वन्मायामोहितो नित्या मन्यते संपदो चलाः॥१०॥ मृगतृष्णां यथा बा [illegible]
पु मन्यंत उदकाशयं॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते॥११॥ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या
इतरेतरस्पृधः॥ घ्नंतः प्रजास्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वा विगणय्य दुर्मदाः॥१२॥ त एव कृष्णाद्य गभीर
वीर्ये रंहसा दुरंतवीर्येण विचालिता श्रियः॥ कालेन तन्वा भवतोनुकंपया विनष्टदर्पाश्चरणौ स्मराम ते॥१३॥ अथो न रा
ज्यं मृगतृष्णिरूपितं देहेन शश्वत्पतता रुजां भुवा॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनं॥१४॥

प्रथाविनष्टदर्पास्ते चरणौ स्मरामस्मर्तुं माशास्महे कथंभूता भवतस्तन्वा मूर्त्या कालेन श्रियो विचालिताः विभ्रंशिताः। अतो राज्य ६४
च्युतिर्भवदनुग्रह एवेत्यर्थः॥१३॥ अत एव अथो अनंतरं मृगतृष्णिसदृशं राज्यं शश्वत्पतता प्रतिक्षणं क्षीयमाणेन तथा रु
जां रोगाणां भुवा जन्मक्षेत्रेण देहेन उपासितव्यं सेव्यं न स्पृहयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिभोगं उपासितव्यं न
स्पृहयामहो कथंभूतां कर्णगोरोचनं रुचिजनकमात्रं तत्रगतस्य संपदो घनपगमेन सुखाभावादित्यर्थः॥१४॥ ॥ ॥

पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्येवंभूताश्च यूयं तर्हि मम चरणौ स्मरत तत्तो नाद्यासेन मुक्तिर्भविष्यतीति किं मदपेक्षयेति चेदत आह ॥ तं न इति तत्व चरणस्मृतिरपि
तत्प्रसादफलमेवेत्यर्थः ॥१५॥१६॥ श्लक्ष्णया मंजुलया ॥१७॥ यथा भवद्भिराशंसितं तथा वाढं निश्चितं वो मयि भक्तिर्जायते आयता
मित्यर्थः ॥१८॥ हे भूपा मद्भजनमेव कर्तव्यमितिभवद्भिर्व्यवसितं संकल्पितं दिष्ट्या भद्रं भवद्भिरुक्तं च सत्यमेवेत्याह भवंत इति श्रीश्च
ऐश्वर्यं च । ताभ्यां मदस्तेनोन्नाहो उद्बंधनं स्वैरचारित्वमित्यर्थः । पश्यतेपश्यापि ॥१९॥ तदेवाह हैहय इति हैहयकार्त्तवीर्यश्चक्रव
तं नः समादिशोपायं येन ते चरणाब्जयोः ॥ स्मृतिर्यथा न विरमेदपि संसरतामिह ॥१५॥ कृष्णाय वासुदेवाय हरये परमा
त्मने ॥ प्रणतः क्लेशनाशाय गोविंदाय नमो नमः ॥१६॥ श्रीशुक उवाच ॥ संस्तूयमानो भगवान् राजभिर्मुक्तबंधनैः ॥ तानाह क
रुणस्तात शरण्यः श्लक्ष्णया गिरा ॥१७॥ श्रीभगवानुवाच ॥ अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे ॥ सुदृढा जायते भ
क्तिर्वाढमाशंसितं तथा ॥१८॥ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहं पश्यउन्मादकं नृणां ॥१९॥
हैहयो नहुषो वेनो रावणो नरकोऽपरे ॥ श्रीमदाद्भ्रंशिताः स्थानात् देवदैत्यनरेश्वराः ॥२०॥ भवंत एतद्विज्ञाय देहाद्यु[illegible]
द्यमंतवत् ॥ मां यजंतोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ ॥२१॥ संतन्वंतः प्रजातंतून् सुखं दुःखं भवाभवौ ॥ प्राप्तं प्राप्तं च सेवं[illegible]
र्ती नरेश्वरः पितुः कामधेनुहरणात् परशुरामेण सपुत्रो हतः । नहुषो देवेंद्रतां प्राप्य उन्मत्तः शचीसंगाय ब्राह्मणान् शिबि[illegible]ै
रेव ततो भ्रंशितोऽजगरत्वं भवाय वेनो प्युन्मत्तो ब्राह्मणानाधिक्षिपं स्तैरेव हुंकृतैर्हतः रावणो राक्षसेश्वरः सीता[illegible]घवे
ण हतः नरको दैत्येश्वरो दितिकुंडलाद्याहरणान्मयैव हतः । अपरेपि श्रीमदात् स्थानात् भ्रंशिताः ॥२०॥ यद्दुत्साद्यं[illegible]
वं विज्ञाय युक्ता अप्रमत्ता रक्षथ रक्षतेत्यर्थः ॥२१॥ प्रजातंतून् पुत्रादिसंततीः प्राप्तं प्राप्तं समत्वेन सेवमानाः ॥२२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰ उ॰ ६५ मां ब्रह्मण्यस्य च॥ २३॥ स्त्रियश्च तेषां मज्जनकर्मणि अभ्यंगस्नानो देन्यर्युक्त॥२४॥२५॥ सुस्नातान् सम्यगलंकृतान्। भोगैश्च युक्तान्
वरेणान्नेन भोजयित्वा पुनस्तेषां सपर्या सहदेवेन कारयामास॥२६॥ गृहाश्चंद्रादयो यथा॥२७॥ प्रीणयामानंदपित [damaged] [illegible]
उदासीनाश्च देहादावात्मारामा धृतव्रताः॥ मय्यावेश्य मनः सम्यक् मामंते ब्रह्मण्यस्य च॥२३॥ श्रीशुक उवाच॥ [damaged]
नृपान्कृष्णो भगवान्भुवनेश्वरः॥ तेषां प्रयुक्तपुरुषान् स्त्रियो मज्जनकर्मणि॥२४॥ सपर्यां कारयामास सहदेवेन भ [damaged]
देवोचितैर्वस्त्रैर्भूषणैस्स्रग्विलेपनैः॥२५॥ भोजयित्वा वरान्नेन सुस्नातान्समलंकृतान्॥ भोगैश्च विविधैर्युक्तान् [damaged]
यैर्नृपोचितैः॥२६॥ ते पूजिता मुकुंदेन राजानो मृष्टकुंडलाः॥ विरेजुर्मोचिताः क्लेशात् प्रावृडंते यथा ग्रहाः॥२७॥ रथा [damaged]
श्चानारोप्य मणिकांचनभूषितान्॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान्प्रत्ययापयत्॥२८॥ त एवं मोचिताः कृच्छात्कृष्णेन सुमहा
त्मना॥ ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः॥२९॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितं॥ यथान्वशासद्भगवांस्तथा च
क्रुरतंद्रिताः॥३०॥ श्रीशुक उवाच॥ जरासंधं घातयित्वा भीमसेनेन केशवः॥ पार्थाभ्यां संयुतः प्रायात् सहदेवेन पूजितः॥३१॥
गत्वा ते खांडवप्रस्थं शंखान्दध्मुर्जितारयः॥ हर्षयंतस्स्वसुहृदो दुर्हृदां चासुखावहाः॥३२॥ तच्छ्रुत्वा प्रीतमनस इंद्रप्रस्थ
निवासिनः॥ मेनिरे मागधं शांतं राजा चाप्तमनोरथः॥३३॥ अभिवंद्याथ राजानं भीमार्जुनजनार्दनाः॥ सर्वमाश्रावयां ६५
चक्रुरात्मना यदनुष्ठितं॥३४॥ निशम्य धर्मराजस्तत् केशवेनानुकंपितं॥ आनंदाश्रुकलां मुंचन् प्रेम्णा नोवाच किंचन॥
॥३५॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिसप्ततितमोध्यायः॥७३॥ श्रीकृष्णार्पणमस्तु॥ छ॥
च्छुः॥३०॥३१॥ खांडवप्रस्थं इंद्रप्रस्थं॥३२॥ शांतं मृतं॥ आप्तमनोरथो बभूव॥३३॥३४॥३५॥ इति श्रीदशमस्कंधे सप्ततितमोध्यायः॥७३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्युक्सम्प्रतितमेराजसूयक्रियाद्विजैः॥ अग्रपूजाप्रसंगेनचैद्यघातादिवर्ण्यते॥ राजसूयमुखेहत्वाजरासंधंतदंतरे चैद्यंतदंते
कुर्वंतंबीजंकलिमिवावपत् कृष्णस्यचानुभावमितिचकरात् तस्यस्वाज्ञानुविधायित्वंचालक्ष्येत्यर्थः॥१॥ तदाहयेस्युरितियेत्रैलोक्यस्य
स्यापिगुरवःस्युःसनकादयःसर्वेचलोकाःलोकपालाश्चतेशिरसैवतवानुशासनंवहंतिदुर्लभंलब्धेतिभाग्येनेतल्लब्धमितिमनुष्या
नेनेत्यर्थः॥२॥ सभवान्परमेश्वरोस्माकमनुशासनंधत्तेतदस्येतविडंबनं अनुरूपमनुकरणंस्वतेजोहानिप्रसंगादित्यर्थः॥
॥३॥ अथवातवपूर्णस्याज्ञापनाज्ञाधारणाभ्यांनतेजोहानिवृद्धी अतस्तत्कृपयासर्वेसंगच्छतइत्याहानह्येकस्याद्वितीयस्येतिस
श्रीशुकउवाच॥ एवंयुधिष्ठिरोराजाजरासंधवधंविभो॥ कृष्णस्यचानुभावंतंश्रुत्वाप्रीतस्तमब्रवीत्॥१॥ युधिष्ठिर
उवाच॥ येस्युस्त्रैलोक्यगुरवःसर्वेलोकाःसहेश्वराः॥ वहंतिदुर्लभंलब्ध्वाशिरसैवानुशासनं॥२॥ सभवानरविंदाक्षो
दीनानामीशमानिनां॥ धत्तेनुशासनंभूम्नस्तदत्यंतविडंबनं॥३॥ नह्येकस्याद्वितीयस्यब्रह्मणःपरमात्मनः॥ कर्म
भिर्वर्द्धतेतेजोह्रसतेचयथारवेः॥४॥ नवैतेजितभक्तानांममाहमितिमाधव॥ त्वंतवेतिचनानाधीःपशूनामिववैक[illegible]
॥५

मानासमनराहितस्यब्रह्मणस्तवोभयंमायापरमात्मनइतिसर्वजीवनियम्यसंस्तुतरां नवास्तवंअतपरमानुग्रहार्थे[illegible]च
वतेजोनवर्द्धतेनचह्रसतिरवेरिवोदयास्तमयादिकर्मभिरित्यर्थः। तथाचश्रुतिःनकर्मणावर्ततेनोकनोपा[illegible]वव
मप्यहंपरमेश्वरममेदनीचंकर्मायोग्यमितिमनसिकथंनमेवदतआह। नवैतइतिहेअजिततवभक्तानामेव[illegible]वी
पेद्मतियथापशूनामहानांवेहंताशरीरविषयातवतुनास्तीतिकिंपुनर्वक्तव्यमित्यर्थः॥५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० उ०
६६

यज्ञियेयज्ञोपचिते वसंतादिकालेयुक्तान् अभियुक्तान्। सयुधिष्ठिरः। ऋत्विजो होतप्रमुखान् वव्रे हृतवान्॥ ६॥ तानहं द्वैपायन इति
त्रिभिः॥ ७॥ ८॥ अहतब्राह्मणांतानेतान्दे विप्रुपद्रष्टादिभेदेन वव्रे॥ ९॥ अन्ये चोपहूता यज्ञादिदृक्षवस्तत्रो युधि[illegible]॥ ११॥
देवयजनं यज्ञभूमिं हलाद्याकर्षणादिभिः संशोध्य दीक्षायां चक्रिरे दीक्षासंस्कारयुक्तमकुर्वन्॥ १२॥ उप[illegible]रा॥
श्रीशुक उवाच॥ इत्थं कायल्पिये काले वव्रे युक्तान् स ऋत्विजः॥ लेखानुमोदितः पार्थो ब्राह्मणान् ब्रह्मवादिनः[illegible]
पायनो भरद्वाजः सुमंतुर्गौतमोऽसितः॥ वसिष्ठश्च्यवनः कण्वो मैत्रेय कवषस्त्रितः॥ ७॥ विश्वामित्रो वामदेवः सुमतिर्जैमि[illegible]
निः क्रतुः॥ पैलः पराशरो गर्गो वैशंपायन एव च॥ ८॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः॥ वीतिहोत्रो मधु
छंदा वीरसेनोऽकृतव्रणः॥ ९॥ उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः॥ १०॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः॥ तत्रेयुः सर्वे राजानो राज्ञां प्रकृतयो नृप॥ ११॥ ततस्ते देवयजनं ब्राह्मणाः
स्वर्णलांगलैः॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयांचक्रिरे नृपं॥ १२॥ हैमाः किलोपकरणा वरुणस्य यथा पुरा॥ इंद्रादयो
लोकपाला विरिंच्य भवसंयुताः॥ १३॥ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः॥ मुनयो यक्षरक्षांसि खगकिन्नरचा
रणाः॥ १४॥ राजानश्च समाहूता राजपत्न्यश्च सर्वशः॥ राजसूयं समीयुः स्म राज्ञः पांडुसुतस्य वै॥ मेनिरे कृष्णभक्तस्य
न् सूपपन्नमविस्मिताः॥ १५॥ अयाजयन्महाराजं याजका देववर्चसः॥ राजसूयेन विधिवत्प्राचेतसमिवामराः॥ १६॥ ॥ ६६
वरुणस्य राजसूये यथा आसन्निति शेषः। किं च। इंद्रादय इति ये इंद्रादयो देवगणा॥ १३॥ १४॥ ये च राजादयः समाहूतास्तत्र समीयु
स्ते सर्वे कृष्णभक्तस्य पांडुसुतस्य राज्ञो राजसूयमविस्मिताः संतः सूपपन्नं सुसंपन्नं मेनिरे इत्यन्वयः॥ १५॥ याजका ऋत्विजः॥ १६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्या

स्तूयेहानिसोमाभिषवादिने॥१७॥अग्र्यार्हणंअग्रपूजातस्यार्हंयोग्यंअनेकास्यात्‌योग्यानांबहुत्वेनैकस्यानिश्चयात्‌॥१८॥१९॥सांख्यंज्ञा
नंयोगउपासना॥२०॥मनुसांख्यंकेवलपरंयोगसविशेषणपरकथमुभयोरेकपरत्वंतत्राह।एकएवाद्वितीयोसौअतसांख्यस्यै
तत्परत्वंयुक्तंविशेषणभूतस्यचसर्वप्रपंचस्यतन्मयत्वात्सविशेषणविषयस्ययोगस्यापियुक्तमद्वितीयपरत्वमित्याहऐतदात्म्यमि
तिएषश्रीकृष्णआत्मायस्यतत्‌एतदात्मनस्यभावऐतदात्म्यंभावितयैवभावनिर्देशः।ऐतदात्म्यमिदंसर्वमितिश्रुतेः।अत्रहेतुः।आ

स्तूयेहन्यवनीपालोयाजकान्सदसस्पतीन्॥अपूजयेन्महाभागान्यथावस्तुसमाहितः॥१७॥सदस्याग्र्यार्हणार्हंवैविमृशं
तस्सभासदः॥नाध्यगच्छन्ननैकांत्यात्सहदेवस्तदाब्रवीत्‌॥१८॥अर्हतिह्यच्युतःश्रैष्ठ्यंभगवान्सात्वतांपतिः॥एषवैदेवताःसर्वा
देशकालधनादयः॥१९॥यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः॥अग्निराहुतयोमंत्राःसांख्यंयोगश्चयत्परः॥२०॥एकए
वाद्वितीयोसावैतदात्म्यमिदंजगत्‌॥आत्मनात्माश्रयःसभ्याःसृजत्यवतिहंत्यजः॥२१॥विविधानीहकर्माणिजनयन्यदवे
क्षया॥ईहतेयदयंसर्वःश्रेयोधर्मादिलक्षणं॥२२॥तस्मात्कृष्णायमहतेदीयतांपरमार्हणं॥एवंचेत्सर्वभूतानामात्मन
श्चार्हणंभवेत्‌॥२३॥सर्वभूतात्मभूतायकृष्णायानन्यदर्शिने॥देयंशांतायपूर्णायदत्तस्यानंत्यमिच्छता॥२४॥

तद

त्मनेतिहेसभ्याआत्माश्रयअन्यनिरपेक्षस्स्वयमजइदंजगत्सृजति।अवतिहंतिचेति॥२१॥किंचविविधानीतियस्यावेक्षया
विविधानिकर्माणितत्पायोगादीनिजनयन्कुर्वन्‌यत्‌यस्मात्‌अयंसर्वोपिजनोधर्मादिलक्षणंश्रेयईहतेसाधयति
निश्चयदधीनानीत्यर्थः॥२२॥२३॥आत्मनाक्रियमाणमर्हणमात्मनकथंस्यात्तत्राहसर्वभूतानामात्मभूतायअनन्यदर्शि
तये॥२४॥

ग्या

द०उ श्रीकृष्णानुभावविन् सहदेव इत्युक्त्वा तूष्णीमभूत् ॥२५॥ द्विजेरितं साधु साध्विति घोषं श्रुत्वा हार्दमभिप्रायं ॥२६॥२७॥२८॥ ॥२९॥३०॥
६७ ॥३१॥ हे सदस्यास्तथा सर्वैर्बालस्य भाषितं मामन्यध्वं मा जानीत मा गृह्णीत किं तत् । यत् यत् कृष्णोऽर्हणे सम्मतं तत् तत् ॥३२॥ ॥३३॥ अस्ये
ववास्तवोऽर्थः पूर्ववद् ज्ञेय गोपालः इति वेद पृथिव्यादिपालक इत्यर्थः । कुत्सितं वेदविपरीतं लपन्तीति कुलपाः पांडवास्त...

इत्युक्त्वा सहदेवोऽभूत् तूष्णीं कृष्णानुभाववित् ॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः ॥२५॥ श्रुत्वा द्विजेरितं ते...
त्वा हार्दं सभासदां ॥ समर्हयत् हृषीकेशं प्रीतः प्रणयविह्वलः ॥२६॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः ॥ स...
सानुजामात्यः सकुटुंबो वहन्मुदा ॥२७॥ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः ॥ आर्हयित्वाश्रुपूर्णाक्षो नाशकत् से...
विक्षितुं ॥२८॥ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो जनाः ॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥२९॥ इत्थं निशम्य द
मघोषसुतस्त्वपीठात् क्रुद्धः स्वयम् कृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन् भगवते परुषाण्यभी
तः ॥३०॥ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ॥ वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥३१॥ यूयं पात्रविदां श्रेष्ठा
मा मंध्वं बालभाषितं ॥ सदसस्पतयः सर्वे कृष्णो यत्सम्मतोऽर्हणे ॥३२॥ तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् ॥ परमर्षी
न् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ॥३३॥ सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्ह ६७
घातयतीति तथा स अकार ककारं च अकं च काके सुखदुःखे ते न विद्येते यस्य स अकाकः आप्तकाम इत्यर्थः स यथा आप्तकामो देवयोग्यं केव
लं पुरोडाशमात्रं नार्हति । अपितु सर्वस्वमपि तस्यायं श्रीकृष्णोऽपि ब्रह्मर्षियोग्यं सपर्यामात्रं कथमर्हतीति । किंत्वात्मसमर्पण
मप्यर्हतीत्यर्थः ॥३४॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सान

वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात्। अनामगोत्रादिति श्रुतेः। अत एवानधिकारित्वात् सर्वैर्धर्मैः बहिष्कृतः। स्वैरवर्ती परमेश्वरत्वात्
अत एव निर्गुणतमः आदिरहितत्वात्। एवंभूतो जीवानां योग्यं तु घासपर्यां पात्रं कथमर्हतीत्यर्थः॥३६॥ अपि चाकथं वर्णनीयो माघ ६०
रैरेषां यदूनां महिमा यस्मादेषां कुलं ययातिना शापमपि किं सद्भिर्बहिष्कृतं अपि तु ब्रह्मरसाधृतां किं चा अस्मदादादिकुलवत् किं च
था पानरतं अपि त्वातिनियताचारमित्यर्थः। अहो यदूनामेव तावदीदृशं माहात्म्यं यदुतकुलं वृद्धस्य ययातेः शापोन प्राप्तं दिसा
दित्यादि। अयं तु साक्षादीश्वरः अतः सपर्यामात्रं कुमपर्हतीत्यर्थः॥३७॥ किं चार्ये राजानो दुष्टानुद्धाटयंति तदर्थं कीकटादिदे

वर्णाश्रमकुलापेतः सर्वधर्मबहिः कृतः॥ स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति॥३६॥ ययातिनैषां हि कुलं शप्तं
साद्भिर्बहिः कृतं॥ वृथापानरतं शश्वत् सपर्यां कथमर्हति॥३७॥ ब्रह्मर्षिसेवितान्देशान्नहिवै ते ब्रह्मवर्चसं॥ स
मुद्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः॥३८॥ एवमादीन्यभद्राणि बभाषे नष्टमंगलः॥ नोवाच किंचिद्भगवा
न्यथा सिंहः शिवारुतं॥३९॥ भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः॥ कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा॥४०॥

शान यस्याश्रयं ति एते तु ब्रह्मर्षिसेवितान्देशान्नाश्रित्य अब्रह्मवर्चसं समुद्रं दुर्गमपि हि त्वाह पार्थिवेत्यर्थः। बाधंते त्वं पु
स्य व प्रजां तीर्थाश्रयत्वप्र पमर्थ। वेदत दर्थाभियोगो ब्रह्मवर्चसं तद्विरूपम ब्रह्मवर्च संसमुद्रं मुद्रात्र लिंगं तत्सहितं म[illegible]
द्र लिंगधारणपाषंडमित्यर्थः। तल्लिंगं स्याजयित्वा बाधंते दंडयंति। कथंभूतं दुर्गं॥ धर्मवत्मतीते र धर्मतया [illegible] ते
था दस्यवदस्यन पिप्रजावेषेण वर्त्तमानान् दंडयंति॥ अतो यदुभ्योऽन्यको नाम धार्मिकोऽस्तीति पारुष्यं वक्त्वा ना[illegible] २॥
श्शिवा फेरु तस्यारुतं श्रुत्वा यथा सिंहो न किंचित् ब्रूते तद्वत्॥३९॥४०॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰उ॰
६८

॥४१॥४२॥४३॥ तावदुत्थायेत्यस्यायमभिप्रायः॥ एषमत्पार्षदो मत्तुल्यबलस्सर्वानेतान् हन्यात्॥ अतो मय्येव शीघ्रं हंतव्य[इ]ति तस्य
णमेवोत्थाय शिरो जहारेति॥४४॥४५॥४६॥ नन्वेवं निंदकस्य कथं वासुदेवे प्रवेश तत्राह जन्मत्रयेति जन्मत्रये[ण] [अ]नुगुणितमनु

निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा॥ ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः॥४१॥ ततः पांडुसुताः [...] [...]
कैकयसृंजयाः॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसया॥४२॥ ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी [...]
यन् कृष्णपक्षीयान् राज्ञः सदसि भारत॥४३॥ तावदुत्थाय भगवान् स्वान्निवार्य स्वयं रुषा॥ शिरः क्षुरांतचक्रेण ज[...]
पततो रिपोः॥४४॥ शब्दः कोलाहलोप्यासीत् शिशुपाले हते महान्॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः॥४५
चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत्॥ पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता॥४६॥ जन्मत्रयानुगुणित
वैरसंरब्धया धिया॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणं॥४७॥ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदा
त्॥ सर्वान् संपूज्य विधिवच्चक्रेऽवभृथमेकराट्॥४८॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः॥ उवास कतिचिन्मा
सान् सुहृद्भिरभियाचितः॥४९॥ ततोनुज्ञाप्य राजानमनिच्छंतमपीश्वरः॥ ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः॥ ६०९ ६८
॥५०॥ वर्णितं तदुपाख्यानं मया ते बहुविस्तरं॥ वैकुंठवासिनोर्जन्म विप्रशापात्पुनः पुनः॥५१॥ राजसूयावभृथ्येन
स्नातो राजा युधिष्ठिरः॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव॥५२॥ ॥ ॥ ॥

वर्णितं यद्द्वेरे तेन संरब्धाया आविष्टया तन्मयतां यातः पुनः पार्षदो बभूवेत्यर्थः॥ अत्र हेतुः॥ भावो हीति भावो भावना अनुध्या
नं भवस्य ध्येयाकारजन्मनः कारणं पेशस्कारि ध्यानेन कीटादेस्तथा दृष्टत्वादित्यर्थः॥४७॥४८॥४९॥५०॥५१॥५२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरामानवाखेचराप्रमथाश्च॥५२॥ पापंधर्मद्विषंअत्रहेतुः कलिंकलेरंशं॥ अतएवकुरुकुलस्यामयं व्याधिंनाशकं॥५४॥ विता
नंयज्ञंच॥५५॥ दशमेचतुसप्ततितमः॥७४॥ ॥पंचसप्तसप्ततितमेयज्ञावभृथसंभ्रमः॥ सुयोधनस्यचाक्षांत्यापानभंगोहरिश्रमा
त॥ दुर्योधनस्येवदुःखकारणंप्रष्टुमुक्तमनुवदतिअजातशत्रोरिति॥१॥ इतिश्रुतंसन्मुखवादेवेत्यर्थः॥२॥ दुर्योधनस्यासहनकारण
शज्ञासभाजिताः सर्वेसुरमानवखेचराः॥ क्षमं कतुं चकांसंतः स्वधामानिर्ययुर्मुदा॥५३॥ दुर्योधनमृतेपापंकलिं
१ कुरुकुलामयं॥ योनसेहेश्रियंस्फीतां दृष्ट्वापांडुसुतस्यतां॥५४॥ यदुदेवकीर्त्तयोद्विजाः कर्मचैघवधादिकं॥ राजमोक्षं विता
नंचसर्वपापैः प्रमुच्यते॥४५॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेशिशुपालवधेचतुसप्ततितमोध्यायः॥७४॥
राजोवाच॥ अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयं॥ सर्वेमुमुदिरेब्रह्मन्नृदेवायेसमागताः॥१॥ दुर्योधनंवर्जयित्वा
राजानःसर्षयःसुराः॥ इतिश्रुतंनोभगवंस्तत्रकारणमुच्यतां॥२॥ ऋषिरुवाच॥ पितामहस्यतेयज्ञेराजसूयेमहात्मनः॥
बांधवाःपरिचर्यायांतस्यासन्प्रेमबंधनाः॥३॥ भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः॥ सहदेवस्तुपूजायां
नकुलोद्रव्यसाधने॥४॥ गुरुशुश्रूषणेजिष्णुःकृष्णःपादावनेजने॥ परिवेषणेद्रुपदजाकर्णोदानेमहामनाः॥५॥ युयु
धानोविकर्णश्चहार्दिक्योविदुरादयः॥ बाल्हीकपुत्राभूर्याद्यायेचसंतर्दनादयः॥६॥ निरूपितामहायज्ञे [illegible]
र्मसुतेतदा॥ प्रवर्त्तंतेस्मराजेंद्रराज्ञःप्रियचिकीर्षवः॥७॥ ॥ ॥ ॥
होवनयागमहोत्सवप्रेवपुनःसिंहावलोकनेनानिरूपयति॥ पितामहस्येत्यादिना एकांतपुरेतस्येत्यतप्रोक्तेनेन [illegible] नबंधना
प्रेमयंत्रिता॥३॥ पूजायांसंमाननेद्रव्यसाधनेनावस्तुसंपादने॥४॥ गुरुशुश्रूषणेचंदनालेपनादौ॥५॥६॥ निरूपितानियुक्ता

संटीनामकप्रथमस्कं ७

द्वि० उ०
७०

॥२८॥२९॥ गतज्वरा निश्चिंता आसीत् ॥३०॥ अच्युते आम्नायस्य तस्य ॥३१॥ नरेंद्रादीनां लक्ष्मीर्लक्ष्य विभूतयः विश्वसृजा मयेन उपक्रमा वि
रचिता ताभिः सह कुरुराट् दुर्योधनो तप्यत् ॥३२॥ महिषीसहस्रमिति बहुलोप लक्षणं क्वणद्भिः घ्रिभिः शोभा यस्य मध्ये स चारु सुचारु
मध्ये इत्यर्थः ॥ कुचकुंकुमैः शोणा हारा यस्य तत् । श्रीमंति मुखानि यस्य तत् ॥ चलैः कुंडलैश्च आचांसं पत्रमइशोभते [illegible] तः ॥३३॥ को

ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवासयामास स लक्षं च त्यागकातरः ॥२८॥ भगवानपि तत्र [illegible] यवा
सी तत्प्रियंकरः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं ॥२९॥ इत्थं राजा धर्मसुतो मनोरथमहार्णवं ॥ सुदुस्तरं
रू समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥३०॥ एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥३१॥
यास्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन् द्रुपदराजसुतोपतस्थे यस्यां
विषक्तहृदयः कुरुराडतप्यत् ॥३२॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं ॥ मध्ये सुचा
रु कुचकुंकुमशोणहारं श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यं ॥३३॥ सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिराट् ॥ वृतोनु
जैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ॥३४॥ आसीनः कांचने साक्षादासने मघवानिव ॥ पारमेष्ठ्यश्रिया जुष्टस्तूयमानश्च
वंदिभिः ॥३५॥ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृपः ॥ किरीटमाली न्यविशदसिहस्तः क्षिपन्रुषा ॥३६॥ स्थलेभ्य
गृह्णद्वस्त्रांतं जलं मत्वा स्थलेपतत् ॥ जले च स्थलवद्भ्रांत्या मयमायाविमोहितः ॥३७॥ ॥ ॥ ७०

पिका दाचित् सविरेजे इति शेषः स्वस्य चक्षुषा हिताहितज्ञापकेन ॥३४॥३५॥ मानी साहंकारः किरीटं च माला च विद्यते यस्य स न्यवि
शत् विवेश आक्षिपन् दास्यादीन् अधिक्षिपन् ॥३६॥ तत्र स्थले वस्त्रांतमभ्यगृह्णात् आकुंचितवान् । कुतः तस्मिन् स्थल एव भ्रां
त्या जलं मत्वा जले च अपतत् । कुतः स्थलवत् भ्रांत्या ॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवो भारं जिहीर्षुरिति अद्य संपादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति पश्यतीति। किंच। यस्य दृशा दृष्टिमात्रेण दुर्योधनो ऽप
तस्मिन्प्रीतिं प्रापयन् मायया तुष्णीं स्थितमात्रे स भूभारहरणबीजं दुर्योधनभ्रमं भीमादिहास्यं न च तस्य पराभवं इति ध्यायन् तूष्णीमासीदि
त्यर्थः॥३९॥४०॥ इति दशमे पंचसप्ततितमोऽध्यायः॥७५॥ ॥ ततः षट्सप्ततितमे वृष्णिशाल्वमहामृधे॥ द्युमद्गदाप्रहारेणास्र

जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे॥ निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः॥३८॥ स व्रीडितोऽवाग्वदनो रुषा ज्वल
न्निःक्रम्य तूष्णीं प्रययौ गजाह्वयं॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत्॥ बभूव तूष्णीं भगवान्भुवो
भारं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा॥३९॥ एतत्तेऽभिहितं राजन्यत्पृष्टोऽहमिह त्वया॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्र
तौ॥४०॥ इति श्रीभागवते महापुराणे दशमस्कंधे दुर्योधनस्य मानभंगो नाम पंचसप्ततितमोऽध्यायः॥७५॥ ॥ श्रीशुक उ
वाच॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः॥१॥ शिशुपालसखः शाल्वो रुक्मि
ण्युद्वाह आगतः॥ यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा॥२॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां॥ अयादवीं क्ष्मां
त करिष्ये पौरुषं मम पश्यत॥३॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं॥ आराधयामास नृपः पांसुमुष्टिं सकृद्ग्रसन्॥४॥ संव
त्सरांते भगवानाशुतोष उमापतिः॥ वरेण छंदयामास शाल्वं शरणमागतं॥५॥ ॥ ॥ ॥

द्युम्नन निर्गमः॥ संपाद्य धर्मराजस्य राजसूयमहोत्सवं। निहत्य सौभराजादीन् यो पारमदच्युतः॥१॥३॥ पांसुमुष्टिं सकृत्[illegible]सुमुष्टिमे
कागसन्नभक्षयन्॥४॥ संवत्सरांते इति आशुतोषोऽपि भगवानुमापति श्रीकृष्णविद्वेषिशाल्वेन वरस्य वैफल्यं पश्य[illegible]न दृशी घंपा
दुरभूत् तस्यातिनिर्बंधमालक्ष्य संवत्सरांते च वरेण छंदयामास इच्छां कारितवान् वरं वृणीष्वेत्युवाचेत्यर्थः॥५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० उ०
७२

अपोवाह अन्यतो निनाय॥२७॥२८॥ सत्यमेतो विनाक्लीबं चिंतयस्यते न त्वयास्मृते न॥२९॥ पितरौ रामकृष्णा वभिसंगम्यत स्मा
श्वं गत्वा तात्मानं एव स्वयोग्यं किंनुवक्ष्यामीति॥३०॥ भ्रातृजाम्यो भ्रातृभार्या व्यक्तं निश्चितं मत्कृतं व्यं कथयिष्यंति तत्कथनमनु
करोति कथं कथमिति॥३१॥ विभो हे समर्थ एतत् अपसर्पणं धर्मप्राह स्तदिति॥३२॥ अपोवाहितः अपनीतः उपसृष्ट उपसर्गपी
प्रद्युम्नं गदयाशीर्णवक्षस्थलमरिंदमं। अपोवाहरणात्सूतो धर्मविद्दारुकात्मजः॥२७॥ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः
सारथिमब्रवीत्॥ अहोसाध्विदं सूत यद्रणान्मेपसर्पणं॥२८॥ नयदूनां कुले जातः श्रूयते रणविच्युतः॥ विनामत्क्लीबचि
त्तेन सूतेन प्राप्तकिल्बिषात्॥२९॥ किंनुवक्ष्येभिसंगम्य पितरौ रामकेशवौ॥ युद्धात्सम्यगपक्रांतः पृष्टस्तत्रात्मनः
क्षमं॥३०॥ व्यक्तं मे कथयिष्यंति हसंत्योभ्रातृजामयः॥ क्लैव्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे॥३१॥ सारथिरुवा
च॥ धर्मं विजानतायुष्मन् कृतमेतन्मयाविभो॥ सूतः कृच्छ्रगतं रक्षेत् रथिनं सारथिं रथी॥३२॥ एतद्विदित्वा तु भवान्
मयापोवाहितो रणात्॥ उपसृष्टः परेणेति मूर्छितो गदया हतः॥३३॥ इति श्रीभागवते महापुराणे दशमस्कंधे षट्सप्तति
तमोध्यायः॥७६॥ ॥श्रीशुकउवाच॥ सउपस्पृश्य सलिलं दंशितो धृतकार्मुकः॥ नयमांद्युमतः पार्श्वं वीरस्येत्या
हसारथिं॥१॥ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन्॥२॥ चतु
र्भिश्चतुरोवाहान् सूतमेकेन चाहनत्॥ द्वाभ्यां धनुश्चकेतुं च शरेणान्येन वै शिरः॥३॥ ॥ ॥ ॥ ७२
उपांशुसंइति कृत्वा यतः परेण शत्रुणा गदया हतस्तस्मान्मूर्छितो निसृतो गतो भवानीति॥३३॥ इति दशमे षट्सप्ततितमोध्या
यः॥७६॥ ॥सप्तसप्ततितमे नानामाया विचक्षणः॥ कृष्णेनागत्य शाल्वस्य हतसौभं च चूर्णितं॥१॥ दंशितः सन्नद्धः॥१॥
विधमंतं क्षपयंतं प्रतिहत्य प्रतिहत्य प्रतिरुध्य॥२॥ अष्टानां विनियोगमाह चतुर्भिरिति॥३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

सौभेयासौ भस्थ्या ॥४॥ नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्रीणां समाहारः त्रिणवरात्रं सप्तविंशतिरहोरात्राणीत्य
र्थः ॥ तुमुलमाकुलं उल्बणं घोरं ॥५॥ परमजमुपन्यस्यति इंद्रप्रस्थं गत इत्यादिना ॥६॥ आहचेति स्वगतमेवपार्थिवं ता विजनं मि
तमाभाषणं ॥ आर्यमिश्राभिसंगतो बलभद्राद्रिसहितः ॥८॥ दुर्निमित्तदर्शनाकुलचित्त एवाचिंतयन् द्वारकामागसस्वानां कद
गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं ॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ॥४॥ एवं यदूनां शाल्वानां निघ्नता
मितरेतरं ॥ युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ॥५॥ शुक उवाच ॥ इंद्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना ॥ राजसूये
४ मिनिर्वृत्ते शिशुपाले च संस्थिते ॥६॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां ॥ निमित्तान्यति घोराणि पश्यन् द्वारवतीं य
यौ ॥७॥ आह चाहमिहायात आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥८॥ इति संचिंत्य भग
वान् जगाम त्वरान्वितः ॥ संग्रामभूमिमागत्य प्रद्युम्नादीन् निरीक्ष्य सः ॥९॥ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं ॥ सौ
भं च शाल्वराजं च दारुकं प्राह केशवः ॥१०॥ रथं प्रापय मे सूत शाल्वस्यांतिकमाशु वै ॥ संभ्रमस्ते न कर्तव्यो मायावी सौ
भराडयं ॥११॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे परे चारुणानुजं ॥१२॥ शाल्वश्च कृष्ण
मालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥१२॥ तामापतंतीं नभसि महोल्कामिव रंह
सा ॥ भासयंतीं दिशः शौरिः सायकैः शतधाच्छिनत् ॥१३॥
नं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य निसृज्य दारुकं प्राह स न्वय ॥९॥ ते त्वया ॥१०॥ आस्थाय सम्य
गधिष्ठाय अरुणानुजं ध्वजेवर्तमानं गरुडं ॥११॥ हतप्रायस्य बलस्येश्वरः ॥१२॥१३॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०उ०
७३

तं च शाल्वं शरसंदोहैः शरजालैः ॥ खं सूर्य इव रश्मिभिरिति सुनीलनविपुलतादिभिः आकाशोपमा सौभस्य अचिंत्यवेगबाहुल्यादि भिः शराणां रश्मिसादृश्यं अयत्नेनैव रश्मिवत् शरजालप्रसारणात् सूर्यतुल्यश्रीकृष्ण इति ॥१४॥ दोर्बाहुः ॥१५॥ सरव्य शिशुपालस्य

तं चबोऽशभिर्विध्वा बाणैः सौभं च खे भ्रमत ॥ अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः ॥१४॥ शाल्वः शौरेस्तु दोः सव्यं

सशार्ङ्ग सशार्ङ्गधन्वनः प्रभो ॥ बिभेदन्यपतद्धस्तात् शार्ङ्गमासीत्तदद्भुतं ॥१५॥ हाहाकारो महानासीत् भूतानां तत्र पश्यतां ॥ वि

नद्य सौभराड् उच्चैरिदमाह जनार्दनं ॥१६॥ यत्त्वया मूढ नः सख्युः भ्रातुर्भार्या हृतेक्षतां ॥ प्रमत्तः स सभामध्ये त्वया

व्यापादितः सखा ॥१७॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥१८॥ श्री

भगवानुवाच ॥ वृथा त्वं कत्थसे मंद न पश्यस्यंतिके तकं ॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः ॥१९॥ इत्युक्त्वा भ

गवान् शाल्वं गदया भीमवेगया ॥ तताड जत्रौ संरब्धः स चकंपे वमन्नसृक् ॥ गदायां सन्निवृत्तायां शाल्वस्त्वंतरधी

यत ॥२०॥ ततो मुहूर्त्त आगत्य पुरुषः शिरसाच्युतं ॥ देवक्या प्रहितोस्मीति नत्वा प्राह वचो रुदन् ॥२१॥ कृष्ण कृष्ण म

हाबाहो पिता ते पितृवत्सल ॥ बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः ॥२२॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृ

तिं गतः ॥ विमनस्को घृणी स्नेहात् बभाषे प्राकृतो यथा ॥२३॥ कथं राममसंभ्रांतं जित्वाजेयं सुरासुरैः ॥ शाल्वेना

ल्पीयसा नीतः पिता मे बलवान् विधिः ॥२४॥ इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय ७३

ईक्षता तस्माकं प्रमत्त अनवहित व्यापादित निहित ॥१७॥ अपराजितोहमिति मानवंतो अपुनरावृत्तिं मं स्फ तिष्ठे स्थास्यति ॥१८॥

॥१९॥२०॥२१॥२२॥ घृणी दयावान् ॥२३॥२४॥२५॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनिता जनयिता ईश्वरः श्वेतः शालः श्वेत् ॥२६॥२७॥ स्वबोधस्य तसिद्धज्ञानवान पिस्वजनस्नेहत महतो मानुषस्वभावे उपप्लुतानिमग्न आसो
अतिष्टत् ततस्तत्सर्वमासुरीं मायाम बुध्यत मायेयमिति ज्ञातवान् ॥२८॥ स्वाप्नं स्वप्नप्रपंचं यथा ॥२९॥ एवं परमनुपपन्यस्तं निराकरोति
एवमिति केचकेचेना नान्विता पूर्वापरानुसंधानरहिताः तदाह यत्स्ववाच्य इति तत्रानुस्मरंती स्यर्थं अयमभिप्रायः। न ता वद्रामस्य
एष ते जनिता तातो यदर्थमिह जीवसि॥ वधिष्येपीड्यतस्तेपुमीशास्त्रे पाहि बालिश ॥२६॥ एवं निर्भर्त्स्य मायावी खड्गेना
नकदुंदुभेः॥ उत्कृत्य शिर आदाय स्वस्थं सोभं समाविशत् ॥२७॥ ततो मुहूर्त्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुष
गतः॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयोदितां ॥२८॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आ
जौ समपश्यदच्युतः॥ स्वप्नं यथा चांबरचारिणं रिपुं सौभस्थमालोक्य निहंतुमुद्यतः॥२९॥ एवं वदंति राज
र्षे ऋषयः केच नान्विताः॥ यत्स्ववाचो विरुध्येत नूनं ते न स्मरंत्युत ॥३०॥ क्व शोकमोहौ स्नेहो वा भयं वायोज्ञ
संभवाः॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः॥३१॥ ॥ ॥ ॥

यार्थी रामेण सहगत श्रीकृष्ण संकर्षणामनुज्ञाप्येति पूर्वमुक्तत्वात् ॥३०॥ असंभावितं चेत्याह क्व शोकमोहाविति भयं वादु
र्निमित्तदर्शीनं कृतन्तूनं हन्तु पुरीममेति यदुक्तं यच्च हस्ताच्छाउद्धृत्य पतदिति उक्तं तद्भयं वा क्वेति। अज्ञेषु संभवो येषां ते।
अखंडिता निविज्ञानज्ञानैश्वर्या लियस्य सः॥ तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यविषयं ॥३१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ०
७४

किंच। यस्यपादसेवया ऊर्ज्जितापुष्कलाया आत्मविघातया अनादिश्चासावात्मविपर्ययग्रहश्च अहं हले रा सुखी दुखी त्यादि लक्षणतं
हिन्वंति नाशयंति संतः ऐश्वर्यं पदं च तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं सम्यगित्यर्थः॥३२॥ किं तर्हि सत्यं तदा
हतं शस्त्रपुंगैरिति वर्मकवचं रुरोज बभंज॥३३॥ लयार्कसन्निभं प्रलयकालीन सूर्यसदृशं॥३५॥३६॥ देवगणेरिता सखी

यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहं॥ लभंत आत्मीयमनंतमैश्वर्यं कुतो नु मोहः परमस्य सद्गतेः
॥३२॥ तं शस्त्रपूगैः प्रहरंतमोजसा शाल्वं शरैः शौरिरमोघविक्रमः॥ विध्वाछिनद्वर्मधनुः शिरोमणिं सौभं च शत्रोर्गदया
रुरोज सा॥३३॥ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शा
स्व ल्वोच्युतमभ्यगाद्द्रुतं॥३४॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं॥ वधाय शाल्वस्य लयार्कसन्नि
भं बिभ्रद्बभौ सार्क इवोदयाचलः॥३५॥ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः॥ वज्रेण वृत्रस्य य
था पुरंदरो बभूव हाहेति वचस्तदा नृणां॥३६॥ तस्मिन्निपतिते पापे सौभे च गदया हते॥ नेदुर्दुंदुभयो राजन् दिवि देव
गणेरिताः॥ सखीनामपचितिं कुर्वन् दंतवक्रो रुषाभ्यगात्॥३७॥ इति श्रीभागवते महापुराणे दशमस्कंधे सौभवधो
नाम सप्तसप्ततितमोऽध्यायः॥७७॥ ॥श्रीशुक उवाच॥ शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्मतिः॥ परलोकगता ७४
नां च कुर्वन् पारोक्ष्यसौहृदं॥१॥ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन्॥ पद्भ्यामिमां महाराज महासत्वो व्यदृश्यत॥२॥
नामिति॥३७॥ इति दशमे सप्तसप्ततितमोऽध्यायः॥७७॥ ॥ततोऽष्टसप्ततितमे दंतवक्रविदूरथौ॥ हत्वा हरिः पुरे रेमे रामस्तं ततोव पु
धीत्॥ सखीनामपचितिं कुर्वन्नित्यकं ते देवाह। शिशुपालस्येति। परोक्षसौहृदं परोक्षे करणीयं सुहृत्कृत्यं॥२॥ ॥ ॥

CC-0. In Public Domain.Ravikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यधात् प्रतिरुरोध ॥३॥ मुकुंदं प्राह दुर्मद इत्यादे राधिक्षेपपरतां स्फुटैव परमार्थस्तु दुर्मदं तामद प्राह । मुकुंदं त्वत्तो येजन्मानि
मुक्तिदानार्थं मया गतां आयेति जन्मत्रये यच्चिंत्यमानो यमब्रह्मशापावसाने भवान्मयस्वीयो दृष्टिपथंगत एतदिष्टाभद्रं भद्रं अतिहर्षे
सा वीसा ॥४॥ किंच । हे कृष्ण त्वमस्माकं मातुलेयो बंधुः एवमपि मित्रध्रुक् मित्राणि घातितवान् राज्ञो चाजिघांससि तस्मादस्माकं त्वन्नोऽस्मि
त्फुसनकारा यत्नुग्रहप्राप्ता नूनं दुर्वारः । अतस्त्वामपि तावत्स्मात्रमहं यास्ये इत्युक्तिं तदाह । हे अमंद सर्वसहन समर्थ क्षात्रधर्मेण सेवितुंग

तं तथायं तम्यालोक्य गदामादाय सत्वरः ॥ अवप्लुत्य रथात्तूर्णं सिंधुवेलेव प्रत्यधात् ॥३॥ गदामुद्यम्य कारूषो
मुकुंदं प्राह दुर्मदः ॥ दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥४॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुक् मां जिघांससि ॥
अतस्त्वां गदया मंद हनिष्ये वज्रकल्पया ॥५॥ तर्ह्यानृण्यमुपेम्यज्ञ मित्राणां मित्रवत्सलः । बंधुरूपमरिं हत्वा व्या
धिं देहचरं यथा ॥६॥ एवं रूक्षैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं ॥ गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ॥७॥

दया त्वां हनिष्ये प्रहरिष्यामि तामेकवारं सहस्वेति न नु वज्रतुल्यां त्वहदां को वा सहेत नैव मित्याह । अवज्रकल्पया उसलपालावदति को
मलयेत्यर्थः ॥५॥ नन्वेवं हनने कस्तव पुरुषार्थस्तमाह तहीति ॥ अज्ञ न विद्यते ज्ञो यस्मात् हे सर्वज्ञेत्यर्थः । परमार्थतस्त्वा मित्रां एतद्
ह संबंधेन बंधुरूपं ब्रह्मशापेन शत्रुत्वेन प्रतीतं त्वां हत्वा मित्राणामानृण्यमुपैमि विरोधेणाधीयते मनसि चिंत्यत इति व्याधिः ॥
देहे तयोमितया चरतीति तथा तमीश्वरं हत्वा क्षत्रधर्मेण रण्य हंतेर्गत्यर्थस्य ज्ञानार्थत्वात् ज्ञात्वेति वा ते न यथा पित्रादीनामा
नृण्यमुपयंति तद्वदिति ॥६॥ रूक्षैरित्यादि प्रतीत्यभिप्रायेण तोत्रैरंकुशादिभिः ॥७॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०उ० ॥१५॥ एवंश्रीकृष्णोमहाबलानपिलीलयाजयत्येवेतिकृत्वासकृदपितृजरासंधादिभिर्निर्जितइतिपशुदृष्टीनामीयतोनित्यजयेहेतवः।
७५ योगेश्वरसभगवान् जगदीश्वरइति॥१६॥ विदूरथं तमाह॥ अथ सुतेनादिदनो कुलां कृष्णस्तु पारमन्त्रा राद्रोमोहस्तु ते वक्षो तेस्सग
गद्याभिहतोप्याजौ न च चालयद्दृढह॥ कृष्णोपि तमहन्गुर्व्या कौमोदक्या स्तनांतरे॥८॥ गदानिर्भिन्नहृदय उद्वमन्रुधि
रं मुखात्॥ प्रसार्य केशबाह्वंघ्रीन् धरण्यां न्यपतद्व्यसुः॥९॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं॥ पश्यतां सर्वभूता
नां यथा चैद्यवधे नृप॥१०॥ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः॥ आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघांसया॥११॥
तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना॥ शिरो जहार राजेंद्र सकिरीटं सकुंडलं॥१२॥ एवं सौभं च शाल्वं च दंतवक्रं
सहानुजं॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः॥१३॥ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः॥ अप्सरोभिः पितृग
णैर्यक्षैः किन्नरचारणैः॥ उपगीयमानविजयः कुसुमैरभिवर्षितः॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं॥१५॥ ए
वं योगेश्वरः कृष्णो भगवान् जगदीश्वरः॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः॥१६॥ श्रुत्वा युद्धोद्यमं रामः कुरूणां
सह पांडवैः॥ तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल॥१७॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान्॥ सरस्वतीं
प्रतिस्रोतं ययौ ब्राह्मणसंवृतः॥१८॥ पृथूदकं बिंदुसरस्त्रितकूपं सुदर्शनं॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं॥१९ ७५
यमुनामनु यान्येव गंगामनु च भारत॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते॥२०॥ ॥ ॥ ॥

माह। श्रुत्वेति॥१७॥ प्रतिस्रोतं प्रतिलोमं॥१८॥ सुदर्शनं तीर्थं चक्रं चक्रतीर्थं॥१९॥ यमुनामनुयानि तीर्थानि गंगामनु च यानि तानि
निसर्वाणि गत्वा नैमिषारण्यं जगाम॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥२१॥ महर्षेर्व्यासस्य ॥२२॥ सूतं प्रतिलोमजं नम्रं कृतप्रह्वरूपं मंजलिश्रयेन तं अध्यासीनं च तान् तेभ्योप्यु
च्चैरासीनानित्यर्थः ॥२३॥२४॥ अजानन्नध्यास्त इति चेत् नैवमित्याह ऋषेरिति ॥२५॥ ननु बहुश्रुतः कथमेवं कुर्यात् तत्राह । अदांतस्येति दु
र्णाय यथोचितानुष्ठानाय ॥२६॥ विप्रानध्यास्तां अन्यद्वा किंचित्करोतु किं तवेति चेत् । अत आह । एतदर्थ इति धर्मध्वजिन उत्तमलिंगधा

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥ सोर्चितः सपरीवारः कृतासनप
रिग्रहः ॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥२२॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं ॥ अध्यासीनं च तान् विप्रांश्चु
कोपोद्वीक्ष्य माधवः ॥२३॥ कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः ॥ धर्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः ॥२४॥
ऋषेर्भगवतो भूत्वा शिष्योधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥२५॥ अदांतस्याविनीतस्य वृथा
पंडितमानिनः ॥ न गुणाय भवंति स्म नटस्येवाजितात्मनः ॥२६॥ एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्व
त जिनस्ते हि पातकिनोधिकाः ॥२७॥ एतावदुक्त्वा भगवान्निवृत्तोसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः
॥२८॥ हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥२९॥ अस्य ब्रह्मासनं दत्तमस्मा
भिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावत् यावत्सत्रं समाप्यते ॥ अजानतैवाचरितस्त्वया ब्रह्मवधो यथा ॥३०॥ ॥

रिणः ॥२७॥ भावित्वादिति नहि भवितव्यं केनापि । परिहर्तुं शक्यत इत्यर्थः । अहनत् । अहन् ॥२८॥ ते त्वया ॥२९॥ अधार्मिकं प्रतिलोमज
वधको पातकमर्हतीति चेत्तत्राहुः । अस्येति पुराणप्रवचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिन् तदायुश्च दत्तमिति ॥३०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०रा०उ० ब्रह्मवधेपि किं मामेश्वरस्येति चेत्सत्यमेवं तथापि प्रायश्चित्तं कर्तव्यमित्याशयेनाहुः। योगेश्वरस्येति सार्द्धेनाऽम्नायो ब्राह्मणो न हंत
७६ व्य इत्यादि लक्षण तथाप्येतस्या ब्रह्महत्याया पावनं प्रायश्चित्तं हे लोकपावन त्वं अनन्यचोदितः स्वयमेव भवान् यदि करिष्यति तर्हि लो
कसंग्रहो भविष्यति नान्यथेति॥ ३१॥ वधस्य निर्वेशं प्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतां उपदिश्यतां॥ ३२॥ किंच। बत हे मु
नयः एतस्य दीर्घमायुः सत्त्वबलमिंद्रियं तत्सात्त्वं॥ अन्यत्र यद्भवद्भिराशासितमपेक्षितं तत्तत्र तत्सर्वं॥ ३३॥ अस्त्रादीनां सत्यता यथा
भवेत्। अस्माकं वचसत्यं यथा भवेत्तथा भवेत्तथा विधीयतामित्यर्थः॥ ३४॥ तत्रासंपादयन्नाह। अंगादंगात् संभवसि हृदयादधिजा

योगेश्वरस्य भवतो नाम्नायोपि नियामकः॥ यद्येतद्ब्रह्महत्याया पावनं लोकपावन॥ चरिष्यति भवान् लोकसंग्रहो नान्य
चोदितः॥३१॥ श्रीभगवानुवाच॥ करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया॥ नियमः प्रथमे कल्पे यावान् स तु विधीयतां॥३२॥
दीर्घमायुर्वतैतस्य सत्त्वमिंद्रियमेव च॥ आशासितं यत्तद्ब्रूतं साधये योगमायया॥३३॥ ऋषय ऊचुः॥ अस्त्रस्य तव वीर्यस्य
मृत्योरस्माकमेव च॥ यथा भवेद्वचः सत्यं तथा राम विधीयतां॥३४॥ श्रीभगवानुवाच॥ आत्मा वै पुत्र उत्पन्न इति वेदानु
शासनं॥ तस्मादस्य भवेद्वक्ता आयुरिंद्रियसत्ववान्॥३५॥ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ॥ अजानतस्त्वपचि
ति यथा मे चिंत्यतां बुधाः॥३६॥

यसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यादि वेदानुशासनं वेदवचनं। तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवा भवतां पुराणप्र
वक्ता भवेत्। स च आयुरादिमांश्च भवेत्॥ अतः साक्षाज्जीवनादस्त्रस्य सत्यत्वं आयुस्सत्यता पुत्ररूपेण वा युरादिसिद्धेर्युष्मद्वचनस्यापि स ७६
त्यता स्यादिति भावः॥ ३५॥ किं ब्रह्मदंडो यं युष्माभिरपेक्षितं प्रथमेन नावदपेक्षितं कथ्यतां तदहं करिष्यामीत्याह। किंच काम इति। किं
विषयो वः कामो वर्त्तते तत् ब्रूतेति॥ अथानंतरं ब्रह्मदंडं गृहीत्वा अपचितिं निष्कृतिमजानतो मे हे बुधा यथा वा चिंत्यतां प्रपचितिरिति॥ ३६॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमं तावदपेक्षितं कर्त्तव्यं कथयंति इल्वलस्येति द्वाभ्यां॥३७॥३८॥ प्रायश्चित्तमहं तत्र श्रेष्ठेति परिस्य प्रदक्षिणीकृत्य सुसमाधाना दिगु
णविशेषादेकाब्द मात्रमुक्तमित्यविरोधः सुसमाहितकाम क्रोधादिरहितश्चरित्वा द्वादशमासानि॥३९॥ इति दशमे टीकायामष्टसप्ततितमोऽध्यायः
॥७८॥ ॥उवाचेतीति तमेरामो वल्वलं द्विजतुष्टये॥ निहत्य तीर्थस्नानाद्यैस्ततहत्यामपानुदत्॥ उपावृत्ते प्राप्ते॥१॥२॥ मित्रो वि
कृषयतुच्चु॥ इल्वलस्य सुतो घोरो वल्वलो नाम दानवः॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि॥३७॥ तं पापं जहि दाशा
र्ह तन्नः शुश्रूषणं परं॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं॥३८॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः॥ चरित्वा
द्वादशमासांस्तीर्थस्नायी विशुध्यसे॥३९॥ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टसप्ततितमोऽध्यायः॥७८॥ ॥
श्रीशुक उवाच॥ ततः पर्वण्युपावृत्ते प्रचंडः पांशुवर्षणः॥ भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः॥१॥ ततोऽमेध्यमयं व
र्षं वल्वलेन विनिर्मितं॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक्॥२॥ तं विलोक्य बृहत्कायं भिन्नांजनचयोपमं॥
तप्ततामशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं॥३॥ संस्मार मुसलं रामः परसैन्यविदारणं॥ हलं च दैत्यदमनं ते तूर्णमुप
तस्थतुः॥४॥ तमाकृष्य हलाग्रेण वल्वलं गगनेचरं॥ मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः॥५॥ सोऽपतद्भुवि निर्भि
न्नललाटोऽसृक् समुत्सृजन्॥ मुंचन्नार्त्तस्वरं शैलो यथा वज्रहतोऽरुणः॥६॥ संस्तुत्य मुनयो रामं प्रयुज्यावितथा
शिषः॥ अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा॥७॥ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजां॥ रामाय वाससी दिव्ये दि
दीर्णाजनचयः। उपमा यस्य तं अतिकृष्णमित्यर्थः। तप्तताम्रवत् शिखाश्मश्रूणि च यस्य तां दंष्ट्राभिरुग्रं भ्रकुटीयुतं मुखं यस्य तं॥३॥
॥४॥५॥ अरुणो रुधिरेण दैत्यशैलो धातुभिः॥६॥७॥ श्रियो धामानि अम्लानानि यस्यां तां॥८॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०७ क्षिं तत्सरयतदृति आस्त्रवत् उदगात्॥९॥ अनुस्रोतेन अनुलोमतः। पुलहाश्रमं हरिक्षेत्रं॥१०॥ गोमत्यां गंडक्यां विपाशायां
७७ च स्नात्वा शोणे च आप्लुत इत्वा संपूज्य॥११॥१२॥ श्रीशैलं श्रीपर्वतं॥१३॥ कांची पुरी॥१४॥१५॥१६॥ दक्षिणमर्णवं

अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः॥ स्नात्वा सरोवरमगात् यतः सरयुरास्त्रवत्॥९॥ अनुस्रोतेन सरयूं
प्रयागमुपगम्य सः॥ स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं॥१०॥ गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः॥ ग
यां गत्वा पितॄन् इष्ट्वा गंगासागरसंगमे॥११॥ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च॥ सप्तगोदावरीं वेणीं पंपां भी
मरथीं ततः॥१२॥ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः॥१३॥ का
मकोष्णीं पुरीं कांचीं कावेरीं च सरिद्वरां॥ श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः॥१४॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां
मथुरां तथा॥ सामुद्रं सेतुमगमत् महापातकनाशनं॥१५॥ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः॥ कृतमालां ता
म्रपर्णीं मलयं च कुलाचलं॥१६॥ तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतो
र्णवं॥ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः॥१७॥ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं॥ विष्णुसंनिहितो स्प
यत्र स्नात्वास्पर्शद्व्रवायुतं॥१८॥ ततोऽभिव्रज्य भगवान् केरलांस्त्रिगर्तकान्॥ गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं
दे यत्र धूर्जटेः॥१९॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः॥ तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं॥ ताप ७७
॥२०॥ प्रविश्य रेवामगमत् यत्र माहिष्मती पुरी॥ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत्॥२१॥ ॥ ॥

॥१७॥ फाल्गुने अनंतपुरं पंचाप्सरसंसरः अस्पर्शम् अस्पर्शात॥१८॥ केरलादीन् देशान्॥१९॥ द्वीपमपनं यस्यास्तां॥२०॥२१॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२२॥ विनशनं कुरुक्षेत्रं ॥२३॥ विवक्षवुक्कुदिधुः। किंवदिष्यतीति। अयात्तल्लीमासन्निति॥२४॥२५॥२६॥ अन्यपराजयो वारणसंग्रामः
॥२७॥ अर्थवद्वाक्यं ॥२८॥ दिष्टं प्राचीनकर्म समुपागतसंगतः॥२९॥ ऋत्विंगं यज्ञमूर्त्तिं॥३०॥ आत्मनि आधिष्ठाने विश्वगं सर्वानु
श्रुतावाद्विजेभ्यश्च ध्यमानं कुरुपांडवसंयुगे॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः॥२२॥ सभीमदुर्योधनयोर्गदाभ्यां युध्य
तोर्मृधे॥ वारयिष्यन्विनशनं जगाम यदुनंदनः॥२३॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि॥ अभिवाद्याभवं
स्तूष्णीं किं विवक्षुरिहागतः॥२४॥ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ॥ मंडलानि विचित्राणि चरंताविदमब्रवीत्
॥२५॥ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर॥ एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं॥२६॥ तस्मादेकतरस्येह युवयो
समवीर्ययोः॥ न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः॥२७॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत्॥ अनुस्मरंतावन्यो
न्यं दुरुक्तं दुःकृतानि च॥२८॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः॥२९॥
तं पुनर्नैमिषं प्राप्तमृषयोऽयाजयन्मुदा॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं॥३०॥ तेभ्यो विशुद्धविज्ञानं भगवान्व्य
तरद्विभुः॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः॥३१॥ स्वपत्न्यावभृथः स्नातो ज्ञातिबंधुसुहृद्वृतः॥ रेजे स्वज्योत्स्न
येवेंदुः सुवासाः सुष्ठ्वलंकृतः॥३२॥ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः॥ अनंतस्याप्रमेयस्य मायामर्त्यस्य संति
हि॥३३॥ योऽनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः॥ सायंप्रातरनंतस्य विष्णोः स दयितो भवेत्॥३४॥ इति श्रीभागवते महा
मो पुराणे दशमस्कंधे एकोनशीतितमोऽध्यायः॥७९॥ श्रीकृष्णार्पणमस्तु॥
स्यूतं येनैव विदुः पश्यंति तद्विशुद्धं विज्ञानं व्यतरत् अदात्॥३१॥३२॥३३॥३४॥ इति दशमे एकोनशीतितमोऽध्यायः॥७९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाशीतितमे कृष्णस्य श्रीदामानं गृहागतं॥ संपूज्याह छद्धर्थं स्मृत्वा गुरुवासकथं मुदा॥ सुदामादिमारको हरिपुरा चकार श्रीसतोऽपत
पत्नी वेनैवतं निजोपकार प्राचरत्। रामचरितानि श्रुत्वा पुनर्मुकुंदवीर्याणि पृच्छति॥ हे भगवन् श्रोतुमिच्छामि इत्यन्वयः॥१॥ उत्त
मश्लोकस्य सस्तोमनोहरा विषयवैतृष्ण्यजनिका कथा विशेषज्ञः सारवित् विषण्णविषादं प्राप्त॥२॥ कथाश्रवणेस्तु वनूदसंत

राजोवाच॥ भगवन्यानि चान्यानि मुकुंदस्य महात्मनः॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामहे प्रभो॥१॥ को नु श्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः॥ विरमेत विशेषज्ञो विषण्णः काममार्गणैः॥२॥ सा वाग्यया तस्य गुणान्गृणीते करौ
च तत्कर्मकरौ मनश्च॥ स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः॥३॥ शिरस्तु तस्योभयलिंगमानमेत्
देव यत्पश्यति तद्धि चक्षुः॥ अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं॥४॥ सूत उवाच॥ विष्णुरातेन संपृष्टो भगवान्बादरायणिः॥ वासुदेवे भगवति निमग्नहृदयोऽब्रवीत्॥५॥ श्रीशुक उवाच॥ कृष्णस्यासीत्सखा कश्चिद्
ब्राह्मणो ब्रह्मवित्तमः॥ विरक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः॥६॥ यदृच्छयोपपन्नेन वर्त्तमानो गृहाश्रमी॥
तस्य भार्या कुचेलस्य क्षुत्क्षामा च तथाविधा॥७॥ ॥ ॥ ॥ ॥

तया न्यार्थ्या नाहासावागिति तावेव करौ यौ तत्कर्म करोतदेवम नयत्। स्थिरजंगमेषु वसंतं स्मरेता परतास्य पुण्याः कथाः शृणोति स
एव कर्णः॥३॥ उभयालिंगं स्थिरजंगमं च तस्यैव लिंगं मिति मत्वा आनमेत्तदेव शिरः। न दे वतस्य लिंगान्यत्यैव यत्पश्यति तद्दे ७८
व चक्षुः। तान्येवांगानि पादोदकं भजंतीति॥४॥५॥६॥ तथाविधा कुचेला किंचित्वस्तु क्षामा यतः किंचित्संपन्नं अन्नं तस्मै परिविष्य स्वयं
क्षुधाजीर्णा॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्लायता पुष्यतासीद्दमाना भर्त्तुर्भोगसंपादनाशक्त्या वसीदंती वेपमाना भयेन कंपमाना ॥८॥९॥१०॥ भोजवद्दपंधकेश्वर इति तत्स्वी
कारमात्रेण सर्वेति दास्यंतीति भाव नान्यभीप्सान् पाइ पाकविरसत्वात् ॥११॥१२॥ अप्यस्ति किमस्ती निप्रश्ने ॥१३॥१४॥ मत्सं भ्रम ॥१५॥ गु
ल्मा निरक्षार्थं सैन्यस्थाना निकक्षा प्रतोली अतीताय अतिक्रम्य जगाम सद्विजै सहितान् ततश्च अगम्याद् दुर्गमाये अंधकादृहस्य यश्चतेषां

पतिव्रता पतिं प्राह म्लायता वदनेन सा ॥ दरिद्रा सीदमाना सा वेपमाना भिगम्य च ॥८॥ ननु ब्रह्मन् भगवतः सखा साक्षाच्छ्रि
यःपतिः ॥ ब्रह्मण्यश्च शरण्यश्च भगवान् सात्वतर्षभः ॥९॥ तमुपेहि महाभाग साधूनां च परायणं ॥ दास्यति द्रविणं भूरि
सीदते ते कुटुंबिने ॥१०॥ आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः ॥ स्मरतः पादकमलमात्मानमपि यच्छति ॥ किंन्व
र्थकामान् भजतो नात्यभीष्टान् जगद्गुरुः ॥११॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदु ॥ अयं हि परमो लाभ उत्तमश्लो
कदर्शनं ॥१२॥ इति संचिंत्य मनसा गमनाय मतिं दधे ॥ अप्यस्त्युपायनं किंचित् गृहे कल्याणि दीयतां ॥१३॥ याचित्वा
चतुरो मुष्टीन् विप्रान् पृथुकतंडुलान् ॥ चैलखंडेन तान् बध्वा भर्त्रे प्रादादुपायनं ॥१४॥ स तानादाय विप्राग्र्यः प्रय य
यौ द्वारकां किल ॥ कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन् ॥१५॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्विजः ॥ ति
प्रो गम्यांधकवृष्णीनां गृहेष्वच्युतधर्मिणां ॥१६॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः ॥ विवेशैकतमं श्रीमत् ब्रह्म
णानंदं गतो यथा ॥१७॥ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः ॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥
॥१८॥ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः ॥ प्रीतो व्यमुंचदब्बिंदून् नेत्राभ्यां पुष्करेक्षणः ॥१९॥ ॥ ॥

गृहेषु ॥१६॥ तथाह नेर्द्व्यष्ट सहस्राणां महिषीणां च ये गृहास्तेषु च मध्ये श्रीमत् एकतमं गृहं विवेश तदा च सद्विजो ब्रह्मानंदं गतो य
था तथा बभूवेति शेषः ॥१७॥ पर्यग्रहीत् पर्यरंभत ॥१८॥ अब्बिंदून् आनंदाश्रूणि ॥१९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰उ॰ समर्हणंउपायनं।उपहृत्यसमर्प्यपादावनेजनीरप॥२०॥२१॥२२॥धमनिभिर्शिराभिः संततं व्याप्तं॥२३॥अवधूतं मलिनं॥२४॥
७९ विस्मयमाह। किमनेनेति द्वाभ्यां॥२५॥संभृतः संमानितः॥२६॥ततो वसतो गृहस्य गृहीतौ॥२७॥भार्याजुष्टा परिणीता न वेति गृहस्थलिं

अथोपवेश्यपर्यंके स्वयं सख्युः समर्हणं॥उपहृत्यावनिज्यास्य पादौ पादावनेजनीः॥ अग्रहीच्छिरसा राजन् भगवान्
लोकपावनः॥२०॥ व्यलिंपद्दिव्यगंधेन चंदनागरुकुंकुमैः॥२१॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा॥ अर्चित्वा
वेद्य तांबूलं गां च स्वागतमब्रवीत्॥२२॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं॥ देवी पर्यचरत्साक्षाच्चामरव्यजनेन
वै॥२३॥ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्त्तिना॥ विस्मितोभूदतिप्रीत्या अवधूतं सभाजितं॥२४॥ किमनेन कृतं
पुण्यं अवधूतेन भिक्षुणा॥ श्रिया हीनेन लोकेस्मिन् गर्हितेनाधमेन च॥२५॥ योसौ त्रिलोकगुरुणा श्रीनिवासेन
संभृतः॥ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा॥२६॥ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः॥ आत्मनो ललि
ता राजन् करौ गृह्य परस्परं॥२७॥ श्रीभगवानुवाच॥ अपि ब्रह्मन् गुरुकुलात् भवता लब्धदक्षिणात्॥ समावृत्ते
न धर्मज्ञ भार्योढा सदृशी न वा॥२८॥ प्रायो गृहेषु ते चित्तमकामविहितं तथा॥ नैवाति प्रीयसे विद्वन् धनेषु वि
दितं हि मे॥२९॥ ७९

गृहदर्शनात्। भोगादर्शनाच्च संशयादिव प्रश्नः॥२८॥ अप्रतिषेधादुहमनुमतं मत्वाह प्राय इति तर्हि ति चित्तं नूनं अकामविह
तं कामैर्विहतं न भवतीति मे विदितं तथा हि धनेषु वस्त्रादिषु नैवाति प्रीयसे हे विद्वन् इति विदुषस्त्वेतद्युक्तमिति भावः॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामहतत्वाभावे किंरह धर्म क्लेशेनेत्याशंक्याह। केचिदिति॥ दैवी ईश्वरमायारचिता प्रकृती विषयवासनारूपा तज्जन्नैः। कामैरन्तार्हेष्टचेतसामपि कर्मकरणे दृष्टांतं यथाहमिति लोकसंग्रहं लोकस्य संग्रहो ग्रहणं यथा भवति तथा अहमीश्वरोपि कर्माणि यथा करोमि
तद्वत्॥३०॥ नैवावयोर्यतो गुरो विज्ञेयं परमात्मतत्त्वं तमसः संसारस्य॥३१॥ तत्र ज्ञानप्रदस्य गुरोरत्यंतं पूज्यत्वं वक्तुं पुरुषस्य त्रीन् गुरून् आहसवाई इति इह संसारे यत्र संभवो जन्ममात्रं स पिता तावदाद्य प्रथमो गुरुः पूज्यः कर्मविद्याप्रदं गुरुमाह। द्विजातेस्ततः पुंसस्त्वकर्मणा यत्र संभवः उपनीय वेदाध्यापक इत्यर्थः स द्वितीयो गुरुः। यथाहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः।
केचित्कुर्वंति कर्माणि कामैरहतचेतसः॥ यज्ञं तप्रकृती दैवी यथाहं लोकसंग्रहं॥३०॥ कश्चिद्गुरुकुले वासं ब्रह्मन् मूसमरसि नैव यतः॥ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते॥३१॥ स वै सत्कर्मणां साक्षात् द्विजातेरिह संभवः॥ आद्यो गयत्राश्रमिणां यथाहं ज्ञानदो गुरुः॥ ३२॥ नन्वर्थकोविदा ब्रह्मन् वर्णाश्रमवतामिह॥ ये मया गुरुणा वाचा तरंत्यंजो
ज्या भवार्णवं॥३३॥ नाहमिज्याप्रजातिभ्यां तपसोपशमेन च॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा॥३४॥ राम ॥
ब्रह्मविद्याप्रदं गुरुमाह आश्रमिणां सर्वेषामपि ज्ञानदो यः स तु साक्षात् अहमेवेति॥३२॥ अतो ज्ञानप्रदं गुरुरूपं मामाश्रित्य ये संसारं तरंति ते बुद्धिमंत इत्याह। नन्विति हे ब्रह्मन् नूते ननु वर्णाश्रमवतां मध्ये अर्थकोविदा इह मनुष्यजन्मनि तत्रापि वर्णाश्रमे सति
ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणांजः सुखेनैव भवार्णवं तरंतीति ज्ञानप्रदाद्गुरोरधिकसेव्यो नास्ति इत्युक्तं॥३३॥ अतएव बहुजनादधिको धर्मश्च नास्तीत्याह। नाहमिति॥ इत्या गृहस्थधर्मैः प्रजातिप्रकृष्टजन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते तापस्या तथा तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरः तथा न तुष्येयं यथा सर्वभूतात्मापि गुरुशुश्रूषयेति॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ श्रा०उ० ८० किंच। अस्माकं गुरुशुश्रूषणं किमपि दैवाद्देवसंपन्नं तत्किं त्वया स्मर्यत इति। गुरौ निवसतामस्माकं यत्किमपि दत्तं तत् कच्चिदद्य चित्॥
॥३५॥ अपत्नौ अपगतेक्षतौ अकाले इत्यर्थः। वातश्च वर्षं च तयोः समाहारः स्तनयित्नवो गर्जिता निचाभवन्॥३६॥ निम्नं कूलं नतं उन्न
तं च स्थानं॥३७॥ अंबूनां संप्लवः व्याप्तिश्रणं यस्मिन्नेकोदके तस्मिन्वन इत्यर्थः। परिबभ्रिम भ्रमणे इत्यस्मात् ज्ञातोपरिपरितः ब
भ्रिम इडागमः छांदसः। मारान्नुध्यतवंत इत्यर्थः॥३८॥३९॥ उक्ताचत्कपया श्लोकत्रयीं ययावयं कृतार्था इत्याह। अहो इति। आत्मा
नै अपि नः स्मर्यते ब्रह्मन्नूवृत्तं निवसतां गुरौ॥ गुरुदारैश्चोदितानामिंधनानयने क्वचित्॥३५॥ प्रविष्टानां महारण्यमपत्नौ
सुमहद्द्विज॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः॥३६॥ सूर्यश्चास्तंगतस्तावत्तमसा चावृता दिशाः॥ निम्नं कूलं
जलमयं न प्राज्ञायत किंचन॥३७॥ वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे॥ दिशोऽविदंतोऽथ पर
स्परं वनेगृहीतहस्ताः परिबभ्रिमातुराः॥३८॥ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः॥ अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान्॥३९॥ अहो हे पुत्रका यूयं अस्मदर्थे तिदुःखिताः॥ आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः॥
॥४०॥ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतं॥ यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ॥४१॥ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः
संतु मनोरथाः॥ छंदांस्ययातयामानि भवंत्विह परत्र च॥४२॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु॥ गुरोरनुग्रहेणैव पु
देहः॥४०॥ पुरोर्निष्कृतं प्रत्युपकारः। सर्वे अर्थाय स्मात्सैः आत्मा देहस्तस्यार्पणं विनियोग॥४१॥ अयातयामा नियातो यामो यस्य पक्व
स्यान्नस्य तत् गतसारं भवति। तद्वदन्यदपि गतसारं गौरो यातयामा तया मभिस्त्रच्यते॥ अगतसाराणि छंदांसि प्रत्तोधीयमा
नानि भवंत्वित्यर्थः॥४२॥ इत्थंविधानि एवं प्रकाराणि। अनेकानि वृत्तानि किं त्वया स्मर्यत इति शेषः। फलितमुपसंहरति गुरोरिति॥४३॥ ८०

[illegible]

अस्माभिः किमनिवृत्तं असंपन्नंयेषां मस्माकंभवता सहवासोभूत् ॥ ४४ ॥ भवतस्तत्सर्वमेतद्धि डंबनपात्रमित्याहायस्येति छंदोमयं
वेदाख्यंब्रह्म तथा श्रेयसां मावपनंतदुद्भवस्थानं इहोक्तं निर्गस्यतस्यतव ॥ ४५ ॥ इति दशमेअशीतितमोध्यायः ॥ ८० ॥ ॥ एकाशी
तितमेसख्युर्जग्ध्वा पृथुकतंदुलान् ॥ श्रियं निर्मितवानिंद्र दुर्लभांतुतदाश्रमे ॥ १ ॥ संकथयन् सुखगोष्ठींकुर्वन् ॥ सर्वभूतानांमनसो
ब्राह्मणउवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवतासत्यकामेन येषां वासोगुरावभूत् ॥ ४४ ॥ यस्यछंदोमयंब्रह्म
देहआवपनंविभो ॥ श्रेयसां तस्यगुरुषु वासोत्यंतविडंबनं ॥ ४५ ॥ इतिश्रीभागवतेमहापुराणे दशमस्कंधेअशीतितमोध्या
यः ॥ ८० ॥ ॥ श्रीशुकउवाच ॥ सइत्थंद्विजमुख्येन सहसंकथयन् हरिः ॥ सर्वभूतमनोभिज्ञस्स्मयमानउवाचतं ॥ १ ॥
ब्रह्मण्यो ब्राह्मणंकृष्णो भगवान्प्रहसन्प्रियं ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलुसतांगतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमु
पायनमानीतंब्रह्मन्मे भवतागृहात् ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्य्येवमेभवेत् ॥ ३ ॥ भूर्य्यप्यभक्तोपहृतंनमेतोषाय
कल्पते ॥ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ॥ ४ ॥ इत्युक्तोपिद्विजस्तस्मै
व्रीडितः पतयेश्रियः ॥ पृथुकप्रसृतिं राजन्नप्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूतात्मदृक्साक्षात्तस्यागमनकारणं ॥ वि
ज्ञायाचिंतयन्नायंश्रीकामोमाभजत्पुरा ॥ ६ ॥ पत्न्यापतिव्रतायास्तु सख्याप्रियचिकीर्षया ॥ प्राप्तोमामस्यदास्यामिसं
भिज्ञपदर्थं पृथुकाना नीयदातुं लज्जतइतिजानन्नित्यर्थः ॥ १ ॥ प्रहसन् क्ष्वेलीकुर्वन् ॥ २ ॥ लज्जयातकथयतस्तामपानुदत्राह ।
अण्वपीतिद्वाभ्यां ॥ ३ ॥ ४ ॥ ५ ॥ सर्वभूतानामात्मसदृक् अंतःकरणसाक्षी ॥ ६ ॥ अमर्त्यानां देवानामपिदुर्लभा ॥ ७ ॥ ॥ ॥

द०सं० उ०
८९

अतिजीर्णत्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बद्धान् ॥ ८ ॥ अंगहे सखे मां विश्वं विश्वात्मानं मं ॥ ९ ॥ इति वदत्रेकां मुष्टीं जग्ध्वा तत्सरेति ॥ अ
यं भावः एतावता पुंसः इहामुत्र च मत्कृपाक्षविलासभृतां नां सर्वसंपदां समृद्धये अलं ॥ अतः परं द्वितीयमुष्टस्य दने नमामामेतदवीनां कुर्वि
ति ॥ १० ॥ सत्तोषकारणं तव तोषस्य कारणं यथा भवेत् तथा सर्वसंपत्समृद्धयो यां भक्तस्य समृद्धिं दृष्ट्वा तं तुष्यैरित्यर्थः ॥ ११ ॥ स्वर्गतं स्वर्ग

इत्यं विचिंत्य वसनाच्चीरबद्धान् द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतंडुलान् ॥ ८ ॥ नन्वेतदुपनीतं मे परमप्री
णनं सखे ॥ तर्पयंत्यंगमां विश्वमेते पृथुकतंडुलान् ॥ ९ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे
हस्तं तत्परापरमेष्ठिनः ॥ १० ॥ एतावतालं विश्वात्मन् सर्वसंपत्समृद्धये ॥ अस्मिन् लोकेथवामुष्मिन् पुंसस्त्वत्तोषका
रणं ॥ ११ ॥ ब्राह्मणस्तां तु रजनीं मुषित्वाच्युतमंदिरे ॥ भुक्त्वा पीत्वा सुखं मेन आत्मानं स्वर्गतिं यथा ॥ १२ ॥ श्वोभूते वि
श्वभावेन स्वसुखेनाभिवंदितः ॥ जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः ॥ १३ ॥ स चालब्ध्वा धनं कृष्णात् न तु याचि
२ तवान् स्वयं ॥ स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः ॥ १४ ॥ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रत
मो लक्ष्मीमाश्लिष्टो विभ्रतोरसि ॥ १५ ॥ क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्मबंधुरिति स्माहं बाहुभ्यां प
रिरंभितः ॥ १६ ॥

वासितं ॥ १२ ॥ श्वोभूते उदिते रवौ विश्वं भावयतीति विश्वभावस्तेनेति पुरतो भावितमिदं दुर्लभं विभवं सूचयति स्वसुखेन स्वानंदपू
र्णेनेति दानाद्दीनतां दर्शयति । नंदितो विनयोक्तिभिः ॥ १३ ॥ व्रीडितस्याचित्त कर्मण्येन लज्जितमहतः श्रीकृष्णस्य दर्शनेन निर्
वृतः ॥ १४ ॥ निर्वृतिमेवाह । अहो इति चतुर्भिः । यत् यत लक्ष्मीमुरसि बिभ्रता तां आश्लिष्टोहं ॥ १५ ॥ पापीयान् नीचः ॥ १६ ॥ ॥

ध
८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७॥ पूजितश्चंदनलेपनादिभिः॥१८॥ एवंसंपूज्यापि धनस्यादानेकारणं कल्पयति स्वर्गापवर्गयोरिति द्वाभ्यां॥१९॥ स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुणिक तो दम्र्यं पि धनं मह्यं नो ददातु॥२०॥ निजगृहस्यांतिकं तस्मात् तं जस्य विशेषणं स्वर्येति॥२१॥ विचित्रोपवनादिभिर्वृतां कथंभूतैः कूजद्भिर्द्विजकुलैः तथा प्रोत्फुल्लानि कुमुदादीनि येषु तानि वारीणि येषु तानि तथा तैः॥२२॥ किंच जुष्टमिति हरिणीनामिवाक्षीणि यासां ताभिः तदैश्वर्यं दृष्ट्वा वितर्कितवान् तदाह किमिदमिति प्रथमं तेजःपुंजं

निवासितः प्रिया जुष्टे पर्यंके भ्रातरो यथा॥ महिष्यावीजितः श्रांतो बालव्यजनहस्तया॥१७॥ शुश्रूषयापरमया
पादसंवाहनादिभिः॥ पूजितो देववदेवेन विप्रदेवेन देववत्॥१८॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां॥ सर्वा
सामपि सिद्धीनां मूलं तच्चरणार्चनं॥१९॥ अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत्॥ इति कारुणिको नूनं धनं मे
णी भूरिणी ददात्॥२०॥ इति तच्चिंतयन्नंतः प्राप्तो निजगृहांतिकं॥ सूर्यानलेंदुसंकाशैर्विमानैः सर्वतो वृतं॥२१॥ वि
चित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः॥ प्रोत्फुल्लकमलांभोजकह्लारोत्पलवारिभिः॥२२॥ जुष्टं स्वलंकृतैः पुंभि
स्त्रीभिश्च हरिणाक्षिभिः॥ किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत्॥२३॥ एवं मीमांसमानं तं नरा नार्योऽमरप्र
पं भाः॥ प्रत्यगृह्णन्महाभागं गीतवाद्येन भूयसा॥२४॥ पतिमागतमाकर्ण्य पत्न्युद्धर्षातिसंभ्रमा॥ निश्चक्राम गृहात्तूर्णं
रूपिणी श्रीरिवालयात्॥२५॥ ॥ ॥ ॥ ॥

दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य वेति स्थानं च स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमिति एवं रूपमभूदिति॥२३॥ अपर प्रभात तुल्यकांतय प्रत्यगृह्णन् उपादानादिभिरादृतवंतः॥२४॥ उद्धृतो हर्षो यस्याः सा अतिसंभ्रम आदरो यस्याः आलेपात् कमलवनात् रूपधारिणी श्रीरिव स्वर्गस्य तत्र भगवता आनीतत्वात् स्वर्गिणीमिव तयो रूपं बभूवेति भावः॥२५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० बुध्या अयमेव वंध इति निश्चये नमनसा संकल्पेन ॥२६॥२७॥२८॥ यत्र ... दीर्घ पयः फेन निभा शय्या आस्तरणानी त्यादि सं
८२ पदः। तत्र सर्व संपदां समृद्धिं विलोक्य तर्कयामासेति चतुर्थेनान्वयः। यत्र च दांता गजदंतमयाः पर्यंकाः ॥२९॥ यत्र
आसनानि च मृदून्यूपस्तरणानि तूलादिमयानि येपुतानि यत्र च मुक्तादाम विलंबवंति धुमंति चविजानानि ॥३०॥

पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाश्रु लोचना ॥ मीलिताक्ष्यनमद्बुध्या मनसा परिषस्वजे ॥२६॥ पत्नीं वीक्ष्य
विस्फुरंतीं देवीं वैमानिकीमिव ॥ दासीनां निष्ककंठीनां मध्ये भ्राजीं स विस्मितः ॥२७॥ प्रीतः स्वयं तया युक्तः
प्रविष्टो निजमंदिरं ॥ मणिस्तंभशतोपेतं महेंद्रभवनं यथा ॥२८॥ पयः फेन निभाः शय्या दांता रुक्म परिच्छदाः
पर्यंका हेमदंडानि चामर व्यजनानि च ॥ आसनानि च हैमानि मृदूपस्तरणानि च ॥ मुक्ता दाम विलंबीनि
पु वितानानि द्युमंति च ॥३०॥ स्वच्छ स्फटिक कुड्येषु महामारकतेषु च ॥ रत्नदीपा भ्राजमाना ललनारत्न
संयुताः ॥३१॥ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदां ॥ तर्कयामास निर्व्यग्रः स्वसमृद्धिमहेतुकीं ॥३२॥ स्व
नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥ महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ॥३३॥

॥३१॥ निर्व्यग्रः संस्थिरः ॥ सत्वा अहेतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास कुत एषा समृद्धिरागतेति ॥३२॥ नि
श्चिनोति नूनमिति एतन्ममेति एषचासा वहंत्वतस्य एतन्मम महतीति विभूतिर्यस्य तस्यावलोकादन्यः ॥३३॥ राम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु स चेद्देवलोकनमात्रेण महदैश्वर्यं दत्तवान् तर्हीदं तुच्छं दत्तमिति किं नावोचदत आह। नान्विति ननु मे सख्या समक्षम्ब्रुवाणोपि ए
वपाचिस्नवे याञ्चकाय भूरिबह्वपि दिशते ददाति अत्र हेतुर्भूरिभोजः स्वयं तद्दर्शपर्जन्यवदीक्षमाण इति अयमर्थः। स्वयं तो
वृद्धः रिभोज बहुभोज आप्तकामत्वात् लक्ष्मीपतीलाघ्व अंतोयथो पारावारपरिपूरकोपि तिवदान्यपर्जन्य कदाचिद्दृष्टिपि नर्षमल्प
मेवमन्यमानो लज्जयेव समक्षमवर्षन् रात्रौ निद्राणे कर्षके तत्क्षेत्रमाप्लावयति। एवं श्रीकृष्णोपि स्वभोगापेक्षया तद्देयमिदं
दिपदमति तुच्छं मन्वान तस्य च भजनेन बहु मन्यमानः समक्षमब्रुवाण एव ददातीति ॥२४॥ तदेवाह किंचिद्ददिति उरुकृपि स्वद
नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभोजः ॥ पर्जन्यवत्तत्स्वयमीक्ष्यमाणो दाशार्हकाणामृषभः सखा
मे ॥२४॥ किंचित्करोत्युर्वपि यः स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ॥ मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत् प्रीतियुतो
महात्मा ॥२५॥ तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनि जन्मनि स्यात् ॥ महानुभावेन गुणालयेन विषज्जत
तस्तत्पुरुषप्रसंगः ॥२६॥ भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्द्धयत्यजः ॥ अदीर्घबोधाय विचक्ष
णः स्वयं पश्यन्निपातं धनिनां मदोद्भवं ॥२७॥
तं यत्किंचित्करोतीति अल्पं मन्यते सुहृत्कृतं फल्गु अतितुच्छमपि भूरिकारी बहु मन्यत इत्यर्थः। अत एव मयोपनीतं समीपं वीतं प्रा
ति युते स्वयमेव प्रतिगृहीतवान् ॥२५॥ श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिं प्रार्थयते तस्यैवेति सौहृदं प्रेम च सख्यं हिताशंसनं चा
मैत्री उपकारकत्वं च दास्यं सेवकत्वं तत्समाहारे एकवचनं तस्य तत्संबंधिनो मे मम स्यात् तनु विभूतिः किं च। महानुभावेन तेनैव विष
ज्जतो विशेषेण संगं प्राप्नुवतस्तद्भक्तेषु प्रकृष्टसंगः स्यादिति ॥२६॥ ननु भक्तिफलं संपदं प्राप्य पुनर्भक्तिं किमिति प्रार्थयसे अत आह। अवि
भक्ताय इति संपदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रादीन् न समर्द्धयति न ददाति अपि तु दृढभक्तिमेवाकुरुत अदीर्घबोधायाभावि
वोक्षिनो मम तु भक्तप्रभावादेवं जातं अतस्तादृक्तिरेव स्यादिति भावः ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ० सक्षनूशनैशनैस्यागमभ्यसनूजायया सह बुभुजे॥३८॥ श्रीलक्ष्मस्येयं ब्रह्मण्यता नातिचित्रमिः ... हतस्येति॥३९॥ अन्ये
८३ रजितमपिस्वमस्यैपराजितं दृष्ट्वा तस्य ध्यानेतस्य वेगास्तेनोद्ग्रथितप्राणबंधनमहंकारोयस्य संगातिमियाविरलिंगं वा मवि शे
षणं सतां ब्रह्मविदां प्राप्यामित्यर्थः॥४०॥ एतस्य शुको पाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वेति॥४१॥ इति दशमे
एकाशीतितमो ध्यायः॥८१॥ ॥ द्व्यशीतितमे आगस्य कुरुक्षेत्रे रविग्रहे॥ वृष्णीन् दृष्ट्वा मुदा भूयः श्रीकृष्णस्य
इत्थं व्यवसितो बुध्या भक्तोतीव जनार्दने॥ विषयान् जायया त्यक्ष्यन् बुभुजे नातिलंपटः॥३८॥ तस्य वै देवदेव
स्य हरेर्यज्ञपतेः प्रभोः॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परं॥३९॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृ
त्यैरजितं पराजितं॥ तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभेचिरतः सतां गतिं॥४०॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा
ब्रह्मण्यतां नरः॥ लब्धभावो भगवति कर्मबंधाद्विमुच्यते॥४१॥ इति श्रीभागवते महापुराणे दशमस्कंधे पृथुको
पाख्याने एकाशीतितमोध्यायः॥८१॥ ॥श्रीशुक उवाच॥ अथैकदा द्वारकायां वसतो रामकृष्णयोः॥ सूर्यो
परागः सुमहानासीत्कल्पक्षये यथा॥१॥ तं ज्ञात्वा मनुजा राजन् पुरस्तादेव सर्वतः॥ स्यमंतपंचकं क्षेत्रं ययुः
श्रेयोविधित्सया॥२॥ निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः॥ नृपाणां रुधिरौघेन यत्र चक्रे महाह्रदान्॥३॥ ८३
कथामिथः श्रीरामसुहृदोः कृष्णमकल्पयंद्वंद्वं पदं भुवि नंदादिसुहृदानंदी कुरुक्षेत्रं जगाम स कल्पक्षये यथा सर्वग्रास इ
त्यर्थः॥१॥ ज्योतिर्विद्भिः कथ्यमानमादावेव ज्ञात्वा स्यमंतपंचकं कुरुक्षेत्रं॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन परशु
रामस्यापापस्तुतिस्थानत्वेन च क्षेत्रस्य पापनिरासकत्वमाह निःक्षत्रियामिति द्वाभ्यां॥३॥ ॥ ॥

न्यन्याविद्यानुपथा॥४॥ आगतानाजग्मुर्भारत॥५॥ सुचंद्रश्चाक्रूरसारणौ [illegible] उद्धवो द्वारकारक्षायामास्ते तथा हृतवर्मा च यूथ
पतिसेनानी॥६॥ देवधिष्ण्यावैर्विमानसंकाशैस्तरलास्तरंगास्तद्वत्प्लवा गतिर्येषां तैः। विद्याधरद्युभिर्विद्याधरणामिव द्युतिर्ये
ईजे च भगवान् रामो यत्रास्पृष्टोपि कर्मणः॥ लोकस्य ग्राहयन्नीतिं योयथान्यायमापनुत्तये॥४॥ महत्यां तीर्थयात्रायां त
त्रागमन् भारतीः प्रजाः॥ वृष्णयश्च तथाक्रूरवसुदेवाहुकादयः॥५॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः॥ गदप्र
द्युम्नसांबाद्यास्सुचंद्रशुकसारणैः॥ आस्तेनिरुद्धो रक्षायां हृतवर्मा च यूथपः॥६॥ ते रथैर्देवधिष्ण्याभैर्हयैश्च तर
लप्लवैः॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः॥७॥ व्यरोचंत महातेजाः पथि कांचनमालिनः॥ दिव्यस्रग्वस्त्रसं
नाहाः कलत्रैः खेचरा इव॥८॥ तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः॥ ब्राह्मणेभ्यो ददौ धेनुर्वासस्स्रक्रुक्ममालि
नीः॥९॥ रामह्रदेषु विधिवत्पुनराप्लुत्य वृष्णयः॥ ददुः स्वन्नं द्विजाग्रेभ्यः कृष्णे नो भक्तिरस्त्विति॥१०॥ स्वयं च तद
नुज्ञाता वृष्णयः कृष्णदेवताः॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु॥११॥ तत्रागतांस्ते ददृशुः सुहृत्सं
बंधिनो नृपान्॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान्॥१२॥ कांबोजकैकयान्मद्रान् कुंतीनारदकेरला
न्॥ अन्यांश्चैवात्मपक्षीयान् परांश्च शतशो नृपान्॥ नंदादीन् सुहृदो गोपान् गोपीश्चोत्कंठिताश्चिरं॥१३॥ अ
न्योन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः॥ आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययु
र्मुदं॥७॥ महतेजा महातेजसा दिव्या अत्यंतमाः स्रग्वस्त्रसन्नाहा येषां॥८॥९॥ पुनरन्येद्युः आप्लुत्य यद्वा तस्मिन्नेवाह्नि मुक्तिस्ना
नं कृत्वा॥१०॥ स्निग्धा शीतला छाया येषां पादपानां तेषां पादपेषु अरलेषु॥११॥१२॥१३॥ प्रोत्फुल्लैः हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰ ३०
८४

अतिसौहृदेन यत्तु स्मितं तेन अमलापांगैर्दृशो दृष्टयो या सा ताः मिथ संवीक्ष्य दोर्भिः मिरेभिरे आलिंगनं कृतवत्य॥१५॥१६॥
संकथया मिथ सप्रेमगोष्ठ्या॥१७॥ तामेव वसुदेव एव अथयोः संकथामाह आर्येत्यादि चतुर्भिः। अकृता शिषं अपूर्णमनोरथं॥१८॥

स्त्रियश्च संवीक्ष्य मिथोतिसौहृदस्मितामलापांगदृशो मिरेभिरे॥ स्तनैः स्तनान्कुंकुमपंकरूषितान्निहत्य दोर्भिः प्र
णयाश्रुलोचनाः॥१५॥ ततो भिवाद्य ते वृद्धान्यविष्ठैरभिवादिताः॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः।
॥१६॥ पृथा भ्रातॄन्स्वसृर्वीक्ष्य तत्पुत्रान्पितरावपि॥ भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः॥१७॥ कुंत्युवाच॥
आर्य भ्रातरहं मन्ये आत्मानमकृताशिषं॥ यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः॥१८॥ सुहृदो ज्ञातयः पुत्रा
भ्रातरः पितरावपि॥ नानुस्मरंति स्वजनं यस्य दैवमदक्षिणं॥१९॥ वसुदेव उवाच॥ अंब मास्मानसूयेथा दैवक्री
डनकान्नरान्॥ ईशस्य हि वशे लोकः कुरुते कार्यते थवा॥२०॥ कंसप्रतापिताः सर्वे वयं याता दिशं दिशं॥ एतर्ह्ये
व पुनः स्थानं दैवेनासादिताः स्वसः॥२१॥ श्रीशुक[illegible]उवाच॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेर्चिता नृपाः॥ आ
सन्नच्युतसंदर्शपरमानंदनिर्वृताः॥२२॥ भीष्मो द्रोणोंबिकापुत्रो गांधारी ससुता तथा॥ सदाराः पांडवाः कुंती
संजयो विदुरः कृपः॥२३॥ कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान्॥ पुरुजिद्द्रुपदः शल्यो धृष्टकेतुः स काशिराट्॥२४॥
दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ॥ युधामन्युः सुशर्मा च ससुता बाल्हिकादयः॥२५॥ राजानो ये चेरा
जेंद्र युधिष्ठिरमनुव्रताः॥ श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः॥२६॥ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः॥

यस्य दैवमदक्षिणं अननुकूलं तं स्वजनमपि संतं सुहृदादयो नानुस्मरंति अतो मम दैवं प्रतिकूलं युष्माकं को परोधः इत्यर्थः॥१९॥२०॥
ईशवशत्वमेवाह कंसप्रतापिता इति हे स्वसः अत एव संप्राप्ता एव॥२१॥२२॥ ॥२३॥२४॥२५॥ युधिष्ठिरं ये अनुव्रतास्ते राजानः याजितं सौत॥२६॥२७॥

क्लेशं क्लिष्टा कालकृष्णकालकृत् ... (दीर्घ) ॥१८॥ अलीक ...

८४

जन्मभाजनानांमध्येसफलजन्मानः॥२८॥ किंचानकेवलंतस्यादर्शनंनवं आपितन्सातंदुर्लभंवयुयुष्माकंस्वतसंपन्नमित्याह
यद्विश्रुतिरितिद्वाभ्यां यदितिपृथक्पदंयस्येत्यर्थः विश्रुतिः कीर्तिः श्रुतिभिर्नुता स्तुता इदंविश्वमलंमत्स्यर्थंपुनाति यस्यपा
दावनेजनपयोगंगा च यस्य वचो वेदरूपं शास्त्रं च वेदाख्यं विश्वं पुनाति। किंच। कालेन भर्जितं दग्धं भगं माहात्म्यं यस्याः सा
तथाविधापि यस्यांघ्रिपद्मस्पर्शेनोत्था आविर्भूता शक्तिर्यस्याः सा नोस्माकमखिलानर्थानभितो वर्षति॥२९॥ दर्शनं च स्पर्शनं
च। अनुपथ आनुगतिः प्रजल्पो गोष्ठी च शय्या शयनं च आसनं च। अशनं च। यौनबंधो विवाहसंबंधः सपिंडबंधश्चैदैहिक

अहो भोजपते यूयं जन्मभाजो नृणामिह॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनां॥२८॥ यद्विश्रुतिः श्रुतिनुते
दमलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रं॥ भूः कालभर्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोखि
लार्थान्॥२९॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः॥ येषां गृहे निरयवर्त्मनि वर्ततां
वः स्वर्गापवर्गविरमः स्वयमास विष्णुः॥३०॥ श्रीशुक उवाच॥ नंदस्तत्र यदून्प्राप्तान् ज्ञात्वा कृष्णपुरोगमान्॥ तत्रा
गमद्वृतो गोपैरनःस्थार्थैर्दिदृक्षया॥३१॥ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः॥ परिषस्वजिरे गाढं चिरदर्श

[illegible]

संबंधः। तेन सह वर्तमानाः श्रीकृष्णेन दर्शनाद्युपलक्षितसयौनसपिंडबंधो येषां वोस्ति। किंच येषां वो गृहे विष्णुः स्वयमास
आविर्भूत्। निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानां स्वर्गापवर्गाभ्यां विरमयति वितृष्णान्करोतीति तथा सते यूयं जन्मभाजा
इति यद्वा तदिति सामान्यनिर्देशः स इत्यर्थः स विष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्तमानानामपि बध्यते
संबध्यत इति बंधः दर्शनादिभिः संबंधः स च स्वर्गापवर्गविरमः आसा परमसुखप्रदो बभूवेत्यर्थः॥३०॥ अनःस्थार्थैरिति
तत्रैव वासं चिकीर्षया शकटेषु स्थापितैरर्थैः सह आगत इत्यर्थः॥३१॥३२॥ ॥ ॥ ॥ ॥

म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०उ०
८५

वसुदेवस्तं परिष्वज्य स प्रेमविह्वलो बभूवेति शेषः॥२३॥२४॥ तौ सुतौ परिरभ्य नंदो यशोदा च विरहशोकान् विजहतुः तस्य जहतुर्यद्वा तु
च अश्रूणि विजहतुः मुमुचतुरित्यर्थः॥२५॥ व्रजेश्वरीं यशोदां॥२६॥ अनिवृत्तां निवृत्तिकारणे सत्यपि अनुवर्तमानां ऐंद्रमैश्वर्यं प्रा
प्यापि यस्या प्रतिक्रियां कर्तुं न शक्यत इत्यर्थः॥२७॥ तत्कृतां मैत्रीं महत्तु एतावितिन हृष्टौ पितरौ याभ्यां तौ वस्तुतस्तु अजत्वाद्देवा
दृष्टपितरौ हे भवती युवयोः पित्रोर्न्यस्तावेतौ संप्रीणतादीनि प्राप्य अकुत्र च भयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुर्वासं चक्रे
वसुदेवं परिष्वज्य संप्रीतः प्रेमविह्वलः॥ स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासं च गोकुले॥२३॥ कृष्णरामौ परिष्वज्य पित
रावभिवाद्य च॥ न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह॥२४॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च॥ यशोदा च
महाभागा सुतौ विजहतुः शुचः॥२५॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं॥ स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकंठ्यौ समूच
तुः॥२६॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि॥ अवाप्याप्यैंद्रमैश्वर्यं यस्या नेह प्रतिक्रिया॥२७॥ एतावदृष्टपि
तरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ
न सतां परस्वः॥२८॥ श्रीऋषिरुवाच॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति॥ दृग्भि
र्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापं॥२९॥ भगवांस्तास्तथाभूता विविक्त उपसंगतः॥ आश्लि
ष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत्॥४०॥ अपि स्मरत नः सख्यः स्वानामर्थचिकीर्षया॥ गतांश्चिरायितान्छत्रुपक्षक्षप
तुः कथंभूतयोः अक्ष्णोर्नेत्रयो रक्षकं पक्ष्म यद्वत् तथा रक्षकपोषकं युवयोरेतत् यत सतां परस्व इति नास्ति वैषम्यं॥२८॥ अभीष्टं तेलिं
गं यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकं पक्ष्म कृतं विधातारं शपंति॥ दृग्भिर्नेत्रद्वारै हृदीकृतं हृदये प्रवेशितं परिरभ्य
तद्भावं तदात्मतां प्रापुः अपि नित्ययुक्तां आरूढयोगिनामपि॥२९॥ [illegible] शत्रूणां पक्षस्य क्षपणे ८५

अपि स्वित् अस्मान् अवध्यायथ अवजानीथ अकृतज्ञा एते इत्याविशंकया ईदृशं स्नेहं कृत्वा न संगच्छन्ते निरुद्धितमेवैतत् परित्यज्यते वादि-
ति चेत् । अत आह । नूनमिति ॥४२॥ एतत् सदृष्टान्तमाह । वायुरिति आक्षिपते पृथक्करोतीत्यर्थः ॥४३॥ अपि अतिभद्रमिदं यद्भवती-
नां मद्वियोगेन मत्स्नेहातिशयो जात इत्याह । मयीति मयि भक्तिमात्रमेव तावदमृतत्वाय कल्पते यत्तु भवतीनां मत्स्नेह आसीत्
तद्दिष्ट्या अतिभद्रं कुतः मदापनः मत्प्रापण इति ॥४४॥ कीदृशं त्वां पश्चाद्वयं स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वरूपमाह अहं हीति
हे अंगना भौतिकानां शरावसैन्धवादीनां यथा आकाशादिपञ्चभूतान्याद्यन्तादिरूपाणि एवं सर्वभूतानां जरायुजादीनां अहं अन्तो

अप्यवध्यायथास्मान् स्विदकृतज्ञाविशंकया ॥ नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ॥४२॥ वायुर्यथा घनानीकं
तृणं तूलं रजांसि च ॥ संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ॥४३॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ॥ दि-
ष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥४४॥ अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः ॥ भौतिकानां यथा खं वार्भूर्वा-
युर्ज्योतिरंगनाः ॥४५॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः ॥ उभयं मय्यथ परे पश्यताभातमक्षरे ॥४६॥

व्यापकं मां भवत्यः प्राप्स्यथ एवेति ॥४५॥ ननु च चतुर्विधग्रामाणां तद्देशकालेष्वाद्यन्तादीरूपः तस्मिंश्च सर्वव्यापके सर्वभूता-
नि वर्त्तन्त इति कुतः स्वस्वात्मेतिरस्माकमित्यत आह । एवं हीति अयमर्थः । यथा शरावादीनां भौतिकानां महाभूतान्याद्यन्तरू-
पाणि एवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात् स्वकारणेषु भूतेष्वेवं वर्त्तन्ते न तु भोक्तापि त्वनि ॥ आत्मा तु
तेषु स्वात्मना भोक्तृरूपेण ततः व्याप्तः न कारणत्वेन अथ तदुभयं भूतानि भौतिकरूपं भोक्तारं चात्मानं मय्यक्षरे परिपूर्णे आ-
भातं पश्यतेति ॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श्री०उ०
८६

अध्यात्मशिक्षयास्वरूपोपदेशेनाशिक्षिताबोधितातस्यानुस्मरणेनध्वस्तोजीवकोशोलिंगंयासांतातमेवाध्यगन्प्रापुः॥४७॥एवंप्रा
सोपिकमलपुनर्गेहव्यासंगेनमापपातितिततच्चरणस्मरणंप्रार्थयामासुरित्याह।आहश्चेतिहेनालिननाभतेपदारविंदंगोदंजुषां
गृहसेविनामपिनोमनसिसदाउदियात्आविर्भवेत्॥४८॥इतिदशमेद्व्यशीतितमोध्यायः॥८२॥ ॥अशीतितमएवंच
स्त्रीणांकृष्णकथोत्सवो॥द्रौपद्योक्तलक्ष्मणभार्योभिरुक्तःस्वस्वकरग्रहः॥अध्यायंकुशलं॥१॥तस्मादेक्षपाहततमंहोयेषांते॥२॥म
हतांमनस्तकामानुमुखद्वारतोनिस्रजंक्कवितकदाचिदेहंभ्रतांदेहधारिणांदेहकत्तासावस्थतिश्चअविघातांछिनत्तीतितथतां

श्रीशुकउवाच॥अध्यात्मशिक्षयागोप्यएवंकृष्णेनशिक्षिताः॥तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्॥४७॥आहुश्च
तेनलिननाभपदारविंदंयोगेश्वरैर्हृदिविचिंत्यमगाधबोधैः॥संसारकूपपतितोत्तरणावलंबंगेहंजुषामपिमनस्यु
दियात्सदानः॥४८॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेतीर्थयात्रायांवृष्णिकुरुसंगमोनामद्व्यशीतितमोध्यायः॥८२॥
॥ ॥श्रीशुकउवाच॥तथानुगृह्यभगवान्गोपिनांसगुरुर्गतिः॥युधिष्ठिरमथापृछत्सर्वांश्चसुहृदोव्ययं॥१॥तएवं
लोकनाथेनपरिपृष्टाःसुसत्कृताः॥प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः॥२॥कुतोशिवंतवचरणांबुजासवंमह
न्मनस्तोमुखनिसृतंक्कचित्॥पिबंतियेकर्णपुटैरलंप्रभोदेहंभृतांदेहकृदस्मृतिच्छिदं॥३॥ ॥ ॥ ॥
देहकृदीश्वरस्तद्विषयाज्ञानछिदंवा॥३॥वित्सरवीहिप्रभोत्वच्चरणांबुजासवंकर्णपुटैरलंपिबंतितेषांत्वनदुर्जनशास्त्रकालरूपा
त्कुतोशिवंभवतीत्यन्वयकथंभूतंमहात्मनांव्यासादीनांमुखनिसृतंक्कचित्कदाचिदपिव्यासादिवाक्येभ्यस्त्वामहात्म्यंनजानतानदुःखं
भवतीत्यर्थः।नन्वीश्वरस्यात्मत्वमेवकथंतत्राह।देहंभृतइति॥देहंभृतोजीवाःत्वत्कृतेतवअनुग्रहेनउच्छ्वसंतिजीवंतिकोह्येवान्या
त्कःप्राण्यात्यदेषआकाशआनंदोनस्यादितिश्रुतेः॥अथवात्वन्मुखनिसृतंत्वच्चरणांबुजासवंयेपिबंतितेषांमहात्मनांकुतोशिवं

८६

हिलेति पदद्वयं ताभ्यां लीलां हि एव लीलामेव नतास्मेत्यर्थः॥ कथंभूतां आत्मधाम्ना स्वरूपप्रकाशेन निधुता निरस्ता आत्मकृता बुद्धिविलासित्वतो वस्था यस्मिन् नूता अत एव आनंदसंभवं सर्वानंदकंद स्वरूपं अखंडं अपरिच्छिन्नं यत् तत् अकुंठितो बोध श्च यस्यास्ति ईस्यतां नत्वेन स्वरूप
ता श्रीकृष्णस्य कुतोस्मकुतोस्मदादिवत् ईदृक् प्रतीतिज्ञ इत्याह आहु कालोपसृष्टचविधुता श्रुते निगमा श्रुते पामवनेरक्षार्थं आत्ता उपात्ता योगमाया यया आकृति निराकारा मूर्त्तिर्येन तां परमहंसानां गतिं तां अत स्त्वं वै स्वरूप लोहस्माकं च तत्मायया एतत्सर्वं वैपरीत्यं तामेव
हिलो त्म धामविधुतात्मकृतत्र्यवस्थमानंदसंभवमखंडमकुंठबोधं॥ कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहं
सगतिं नताः स्मः॥४॥ श्रीऋषिरुवाच॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः॥ समेत्य गोविंदक
था मिथोगृणंस्त्रिलोकगीताः श्रृणु वर्णयामि ते॥५॥ द्रौपद्युवाच॥ हे वैदर्भ्यच्युतो भद्रे हे जांबवति कौशले। हे सत्यभामे
कालिंदि शैब्ये रोहिणि लक्ष्मणे॥६॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान् स्वयं॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया॥
अ ॥७॥ श्रीरुक्मिण्युवाच॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः॥ निन्ये मृगेंद्र इव भागम
जावियूथात् तच्छ्रीनिकेतचरणोस्तु ममार्चनाय॥८॥
नतास्मेति यद्वा ताभिरिति प्रकरणात् ज्ञात व्यां लीलां नताः स्मः किं कृत्वा हित्वा किं आत्मधाम्ना आत्मशरीरं धाम गृहं तत्र च तत्र च देहदैहि
संगं परित्यज्य इत्यर्थ समानमन्यत्॥४॥ त्रिषु लोकेषु गीता॥५॥ कौशले हे सत्ये शैब्ये मित्रविंदे रोहिणी नामका चित् पट्टमहिषी
नाय तु॥६॥ हे अन्या श्रीकृष्णस्य पत्न्य॥७॥ मा मां अर्पयितुं संपादयितुं राजसु जरासंधादिषु उद्यतकार्मुकेषु सत्सु अजेया ये भटा
स्तेषां शेखरिता मुकुटवत्कृता अंघ्रिरेणवो येन तेषां मूर्ध्नि पदं दत्वा इत्यर्थः तस्य श्रीनिकेतस्य चरणो ममार्चनायास्तु॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म

स नामेभ्र्ये लुर्वधेनासिंहकृतेनतप्रहृ घस्यते नमेततेनालिसमभिशापंदुर्यशअपमार्ष्टपरिहर्त्तुं ऋक्षराजंजिलोरत्नस्यमंतकुपा
जहार आनीतवान् अथ अनंतरं मासित्रेरत्नमदात् । तेनस्वापराधेनमीतसमेपिताप्रभवेश्रीकृष्णायमामदित्यात् दहेदत्ता
अक्रूरादिप्रतिश्रुतामपी स्वर्थः ॥ ९ ॥ देहकृतूमेपिताअनुश्रीकृष्णंनिजंनाथंस्वामिनंदेवमीश्वरं सीतापातिं प्राज्ञायअवि
ज्ञायत्रिनवहानिहस्तंच्छंदोनुरोधेनसप्तविंशतिदिनान्यमुनाभ्ययुध्यात् परोक्षितसंजातापरीक्षायस्यसपारोक्षितातंसाक्षा

स त्यभामा उवाच ॥ योप्रेसनाभिवधतप्रहृदातते नलिसाभिशापमपमार्ष्टुमुपाजहार ॥ जिलवृक्षराजमथ
रत्नमदात्सतेनभीतः पितादिशातमांप्रभवेपिदत्तां ॥ ९ ॥ जांबवत्युवाच ॥ प्राज्ञायदेहकृदमुंनिजानाथदे
वं सीतापतिं त्रिनवहान्यमुनाभ्ययुध्यत् ॥ ज्ञात्वापरीक्षितउपाहरदर्हणंमांपादौप्रगृह्यमणिनाहममुष्य
दासी ॥ १० ॥ कालिंद्युवाच ॥ तपश्चरंतिमाज्ञायस्वपादस्पर्शनाशया ॥ सख्योपेत्याग्रहीत्पाणिंयोहंतद्गृ
हमार्जनी ॥ ११ ॥ मित्रविंदोवाच ॥ योमांस्वयंवरउपेत्यविजित्यभूपान्निन्येश्वयूथगांमिवात्मबलिं
द्विपारिः ॥ भ्रातृंश्चमेपकुरुतःस्वपुरंश्रियौकस्तस्यास्तुमेनुभवसंघ्रवनेजनत्वं ॥ १२ ॥ ॥ ॥

त् सीतापतिरेवासावितिज्ञात्वापादौप्रगृह्यमणिनासहमामर्हणमुपाहरत् । अर्हणतया समर्पितवान् । अहोतर्हि त्वपतिश्रेष्ठं
सिनेत्याह । अमुष्याहंदासीति ॥ १० ॥ सख्यार्जुनेनतस्यगृहमार्जनीगृहेसंमार्जनकर्त्री ॥ ११ ॥ भूनीयूथगतंस्वबलिंद्विपारिः
सिंहइवतिमेभ्रातृंश्चापकुरुतअपकारंकुर्वतोविजित्यश्रियौकलक्ष्मीनिवासस्तस्यांघ्रवनेजनंतच्चरणक्षालनकर्त्त्वंतस्अनुभवं

[illegible] ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्तउक्षण वृषभान् बलं च वीर्यं प्रभावश्चतीक्ष्ण शृंगाणि च अतिशापिता निर्येषां तान्। मे पित्रा हृतान् बलीयसे प्रोद्दत्त्यिति
पानी बलस्य वीर्यस्य परीक्षणयता नतिप्रसिद्धान् वीराणां दुर्मदं मंतियेतान् तरसा शीघ्रमेव भग्नदर्पान् पितो क्रीडन्न नी
यासेनैव बबंध। अत तो कान् अजापसोनि ॥१२॥ वीर्यमेव शुल्कं देयं यस्यास्तां दासीभिः सह चतुरंगिणीं गजाश्वादि सेनायु

सत्योवाच ॥ सप्तोक्ष्णो तिबलवीर्यसुतीक्ष्णशृंगान् पित्राहृतान् क्षितिपवीर्यपरिक्षणाय ॥ तान्वीर दुर्मदहन
स्तरसा निगृह्य क्रीडन् बबंध हयथा शिशवो जतोकान् ॥१३॥ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरंगिणीं ॥ प
थि निर्जित्य राजन्यान् निन्ये तद्दास्यमस्तु मे ॥१४॥ भद्रोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् ॥ कृ
ष्णे कृष्णाय तच्चित्तां अक्षौहिण्या सखीजनैः ॥१५॥ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि ॥ कर्मभिर्भ्राम्य
माणाया येन तच्छ्रेय आत्मनः ॥१६॥ लक्ष्मणोवाच ॥ ममापि राज्ञ्यच्युतजन्मकर्म च श्रुत्वा मुहुर्नारदगीतमा
सीत् ॥ चित्तं मुकुंदे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान् ॥१७॥ ॥ ॥

त्वां पुरं निन्ये ॥१४॥ हृष्णे हे द्रौपदि तस्मिन्नेव वाचितं यस्यास्तां मां अक्षौहिण्या सेनया सह सखीजनैश्च सह ॥१५॥ येन पाद
संस्पर्शेन आत्मनो मे तत्कैवल्याख्यं श्रेयो भवेत् ॥ यद्वा येन कारणेन आत्मनो जीवस्य तत् श्रेयस एव पुरुषार्थ इति ॥१६॥
राज्ञि हे द्रौपदि यथा मित्रविंदा पातथा ममापि चित्तं मुकुंदविषयमासीत् ॥ सुसंमृश्य सुविचार्य पद्महस्तया श्रिया वृता किल अतोपि
ममाचित्तं श्रीमुकुंदे आसीत् ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०उ०
८८

उपायं

तत्र श्रीकृष्णप्रासादावदीकरत्कारयामास॥१८॥यथा राज्ञितवस्वयंवरे पार्थस्येसया आप्तुमिच्छया कृततथा मत्स्यं कारितवान्
पाठांतरे पार्थस्येषुणा प्राकृततर्हि इदमपि अर्जुनए वकिंनाविध्यत् तत्राह। अयंवितिसमत्स्यो वहिरेवाच्छन्नो नांतअतस्तंभसंलग्न
योर्द्धदृश्यासं लक्ष्यते अयंतुनतथा किंतुस्तंभमूलेविहितकलशाजलेके वलंदृश्यतो अतो हस्तिरथस्ताद्रुपरि च लक्ष्यमितिश्रीकृ

ष्णासाम्प्रमतंसाधिपिनाद्रुहितवत्सलः॥ वहसेन इतिख्यातस्तत्रोपायमचीकरत्॥१८॥यथास्वयंवरेराज्ञिमत्
स्यःपार्थप्रयाकृतः॥ अयंतुबहिराछन्नो दृश्यते सजलेपरं॥१९॥श्रुत्वैतसर्वतो भूपा आययुर्मत्स्यतुःपुरं॥
सर्वास्त्रशास्त्रकृतत्वज्ञाःसोपाध्यायाःसहस्रशः॥२०॥पित्रासंपूजिताःसर्वेयथावीर्यंयथावयः॥आदौदुःस
हारंचापंवेद्धुंपर्षदिपद्धियः॥२१॥आदायव्यस्तजनूकेचित्संस्यकर्तुमनीश्वराः॥आकोष्ठंज्यांसमुत्कृष्यपेतु
रेकेमुनाहताः॥२२॥सज्यंकृत्वापरे वीरामागधांबष्टचेदिपाः॥भीष्मोदुर्योधनःकर्णो नाविदंतद्दवस्थितिं
॥२३॥मत्स्याभासंजलेवीक्ष्य ज्ञोलाचनदवस्थितिं॥पार्थोयत्तास्त्रजज्ञोणंनाछिनयस्परशोपरं॥२४॥राजन्ये
षुनिवर्तमानेषुभग्यमानेषुमानिषु॥भगवान्धनुरादायसज्यंकृत्वाथलीलया॥२५॥तस्मिन्संधायविशिखंमत्स्यं
वीक्ष्यसकृज्जले॥छित्वेषुणापातयत्तं सूर्येचाभिजितिस्थिते॥२६॥दिविदुंदुभयोनेदुर्जयशब्दयुताभुवि॥देवा
स्वव्यतिरेकेण नकस्यापिभेद्य इतिभाव॥१९॥२०॥ नत्संपवेद्धुंपर्षदि संसदिमद्धिपमत्स्येवधीयेषामितिअन्याचिनान वेद्धुंशक्ता इतिभा
वः॥२१॥ तदेवाह। आदायेति अप्तुनाव्याये न॥२२॥ नाविदंतद्दवस्थितिमागधादीनां क्रियाशक्तिरेव नतुलक्षणाभिज्ञतेत्यर्थः॥२३॥
पत्तोपलवान् अस्त्रजतप्तुमोच सवाणामसंनाछिनत् परंकेवलंस्पर्शोज्ञातवान् पार्जुनोवलेनापूर्णइत्यर्थः॥२४॥२५॥अभिजितिसर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवत्याप्रीतिहर्षनिर्भरेण स्नानमेवानुवर्णयं साहद्याभ्यां तदंगामिति तत्रादाक लोकलसत्तानूपुरो ययोस्ताभ्यां पद्भ्यां रंगं प्रविशंकन
केनोज्वलं रत्नमालां निवीय प्रावृत्य परिधाय नीवीबंधेन कौशिकाग्र्ये उत्तमकोट्टे यवरे सव्रीडो हासो यस्मिंस्तद्वदनं यस्याः साक
वर्यांधृतास्त्रजो यया सा ॥ २८॥ उरवकुंतला यस्मिन् कुंडलयो स्त्विषो ययोस्तगंडस्थलयस्मिन् तदेवयत्र वेशिशिर तापहरो हासो
येषु ते कटाक्षमोक्षे अपांगवीक्षणविलासे अनुरक्तं हृदयं यस्याः साहं ॥ २९॥ ३०॥ हे प्राज्ञसेनि द्रौपदि श्रीरुक्मिणी रेमया वर्तेसति

तद्रंगमाविश्याम हंकलनूपुराभ्यां पद्भ्यां प्रगल्भकनकोज्वलरत्नमालां ॥ नूलेनिवीयपरिधाय च कौशिकाग्र्ये सव्रीडहास
वदना कवरीधृतस्त्रक् ॥ २८॥ उन्नीय वक्रमुरुकुंतलकुंडलत्विट् गंडस्थलं शिशिरहासकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य
परितः शनकैर्मुरारेरंसे अनुरक्तहृदया निदधे स्वमालां ॥ २९॥ तावन्मृदंगपटहाः शंखभेर्यानकादयः ॥ निनेदुर्नटनर्त्त
क्या ननृतुर्गायका जगुः ॥ ३०॥ एवं वृते भगवति मयेशो नृपयूथपाः ॥ नसेहिरे याज्ञसेनि स्पर्द्धतो हृच्छयातुराः ॥ श्री
मां तावद्रथमारोप्य हयरत्नचतुष्टयं ॥ शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः ॥ ३२॥ दारुकश्चोदयामास कां
चनोपस्करं रथं ॥ मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव ॥ ३३॥ तेन्वसज्जंत राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृ
तेष्वासा ग्रामसिंहा यथा हरिं ॥ ३४॥

स्पर्द्धमाना तन्वेवं परमैश्वर्यं दृष्ट्वा तां कुतस्पर्द्धावसरस्तत्राह । हृच्छयातुरा इति हृच्छयेन कामेनातुरा विवशाः कामविजृंभितास्प
र्द्धेति भावः ॥ ३१॥ हयरत्नानां चतुष्टयं यस्मिन् तं रथं हस्ताभ्यां प्रमाणलिंग्य धनुर्बाणौ गृहीत्वा चतुर्भुजस्तस्थौ ॥ ३२॥ मृगाणां मिषतां मृ
गराडिव तदा हरिर्जगामेति शेषो ज्ञातव्यः । दारुकस्यैव कामगराजोपमा ॥ ३३॥ अन्वसज्जंत पृष्ठतः सक्ता बभूव विषेद्धुं प्रतिबंध
कर्तुं केचन पुरतो गत्वा पथि संयत्ता बभूवुरित्यर्थः उद्धृतेष्वासा उद्धृतानि वायाग्रामसिंहा श्वानः हरिं सिंहं यथेति ॥ ३४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ०
८९

रविंछादयंतीतिरविछदा ध्वजेषुपटायस्यां चित्राणितोरणानि यस्यां सैवसावतां॥ कुशस्थलीं पुरीं यदुपतिसमाविषत् । स्वकेतनं मंडलांअस्ता चलेंव॥ ३६॥ महार्हवासप्रभृतिभिःसुहृदं पूजयामास॥ ३७॥ दास्यादिभिःसह आयुधानि पूर्णपापि ददौ॥ ३८॥ इमा

ते शार्ङ्गच्युतबाणौघैःकृतबाहुंघ्रिकंधराः॥ निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः॥ ३५॥ ततः
पुरीं यदुपतिरलंकृतां रविछदध्वजपट चित्रतोरणां॥ कुशस्थलीं दिविभुवि चाभिसंस्कृतां समा
विशत्तरणिरिवस्वकेतनं॥ ३६॥ पितामहं पूजयामास सुहृत्सं बांधवबांधवान्॥ महार्हवासोलंकारैः
शय्यासनपरिच्छदैः॥ ३७॥ दासीभिः सर्वसंपद्भिर्भटेभरथवाजिभिः॥ आयुधानि महार्हाणि
ददौ पूर्णस्य भक्तितः॥ ३८॥ आत्मारामस्य तस्येमा वयं वैगृहदासिकाः॥ सर्वसंगनिवृत्या
द्धा तपसा च बभूविम॥ ३९॥ महिष्य ऊचुः॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथनः क्षितिज
ये जितराजकन्याः॥ निर्मुच्यसंसृतिविमोक्षमनुस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः॥ ४०॥

अद्धैवयंसर्वसंगनिवृत्यातपसास्वधर्मेण च अद्धासाक्षात्तस्य गृहदासिका बभूविम॥ ३९॥ क्षितिजयेदिग्विजयेजितानां राज्ञांकन्यानस्मान् तेनरुद्धाज्ञात्वाततो निर्मुच्यसंसृतेर्विमोक्षायस्मात्पादांबुजं अनुस्मरंतीर्नपरिणिनाय उद्वाह ८९
२० तु आप्तकामोपियः॥ ४०॥

नवयमिति साम्राज्यादि न कामयामहे। किंतु एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति ननु तस्य गृहिरापो पूर्यं सर्वसंपद्राजक्रि
मेवं काम्यते अत आहुः हे साध्वि साम्राज्यं सार्वभौमं पदं स्वाराज्ये मेंद्रपदं भोज्यं तदुभयभोगभाक्त्वं विविधं राजत इति विराट् तस्य
भावो वैराज्यं अणिमादिसिद्धिभाक्त्वमपि सर्थपारमेष्ठ्यं ब्रह्मपदं अनंत्यं मोक्षं हरेः पदं तत्सालोक्यादि न तु कामयामह इति येद्राज्ञि
द्रुच ब्रह्मलक्षणोक्तक्रमेण भागादि द्विक् तुल्ययोधिपत्यानि साम्राज्यभोज्यं स्वराज्यं वैराज्यानि व्याख्यातानि॥ ४१॥ तर्हि तत्पादरजए
नवयं साध्वि साम्राज्यं स्वराज्यं भोज्यमप्युत। वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं॥ ४१॥ कामयामह एतस्य श्रीम
त्पादरजः श्रियः॥ कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः॥ ४२॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः॥ गावश्चा
रयतो गोपाः पादस्पर्शं महात्मनः॥ ४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्र्यशीतितमोध्यायः॥ ८३॥ ॥ श्रीशु
क उवाच॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः॥ कृष्णेखिलात्मनि हरौ प्रणयानु
बंधं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः॥ १॥ इति संभाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु॥ आययुर्मुनयस्तत्र कृ
ष्णरामदिदृक्षया॥ २॥ द्वैपायनो नारदश्च च्यवनो देवलोसितः॥ विश्वामित्रः शतानंदो भारद्वाजोथ गौतमः॥ ३॥ ॥

वकाम्यते अत आहुः श्रियः कुचकुंकुमगंधाढ्यमिति ब्रह्मादिसेव्यया श्रियापि सेवितत्वादिति भावः॥ ४२॥ ननु तर्ह्यति दुर्लभत्वात्तद्वि
तद्वांछया अत आहुः व्रजस्त्रिय इति यत्तु यथा गावो महात्मनोपि गाश्चारयतः पादस्पर्शं च गोपा यथा वांछंति यद्वत्। तत्सरणं सु
लभमिति भावः॥ ४३॥ इति दशमे त्र्यशीतितमोध्यायः॥ ८३॥ ॥ चतुर्भिरथ विकाशीतितमेमुनिसमागमे॥ वसुदेवमखोत्साहं बं
धुप्रस्थापनादिकं॥ सुबलपुत्री गांधारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स्वगोप्यः कृष्णभक्ता गोप्यः विसिस्म्युः विस्मयं चक्रुः॥ १॥

द॰ शा॰ भा॰ ७ ॥४॥५॥६॥ आनर्चुः अर्चितवंत ॥७॥ धर्मगोप्त्रीः तनुर्यस्य स धर्मगुप्तनुः । यता नियता वाग्यस्य सदसः ॥८॥ जन्मभृतः सफलजन्मानः
९० तत्फलं जन्मफलं किं तत् यद्योगेश्वरदर्शनं ॥९॥ किंच । युष्माकं दर्शनमेव तावद्देवानामपि दुष्प्रापं अस्माकं तु स्पर्शनादिकमपि
कथं नु घटितमिति विस्मयेनाह किमिति स्वल्पतपसां तीर्थस्नानादिमात्रे तपो बुद्धिर्येषां तथाऽर्चायां प्रतिमायां देव इति चक्षुर्दृष्टिर्ये

रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः । पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ॥४॥ द्वितस्त्रितश्चैकत
श्च ब्रह्मपुत्रस्तथांगिराः । अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥५॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपा
दयः । पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥६॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् । स्वागतास
नपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥७॥ उवाच सुखमासीनान् भगवान्धर्मगुप्तनुः । सदसस्तस्य महतो यतवाचो सदसः
नुशृण्वतः ॥८॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं । देवानामपि दुःप्रापं यद्योगेश्वरद
र्शनं ॥९॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां । दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं ॥१०॥ नह्यम्मयानि
तीर्थानि न देवा मृच्छिलामयाः । ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न च चंद्रतारका न भू
र्जलं खं श्वसनोऽथ वाङ्मनः । उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥१२॥ ॥ ॥

षां तेषां योगेश्वरस्पर्शनादिकमिदं किं असंभावितमित्यर्थः ॥१०॥ एतत्प्रपंचयति न ह्यम्मयानीति त्रिभिः ॥११॥ वाङ्मनसयो ९०
रप्युपासना विषयत्वं यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपास्ते इति श्रुतेः ॥ अर्चंतं मूलमज्ञानं न हरंति ॥ अत्र हेतुर्भेदकृ
तो भेदकर्त्तारः यद्वा भेददृष्टिं कुर्वंतः पुंसः विपश्चितो निरस्तभेदास्तेतु मुहूर्तमात्रसेवयैवाघं घ्नंतीति ॥१२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतत्साधून्विधायान्यत्रादिषुध्यासउत्तमानेतिमंदइत्याह।यस्येति आत्मबुद्धिः अहमिति बुद्धिः। त्रयो वातपित्तश्लेष्माणः प्रकृतयो यस्य
तस्मिन्कुणपे शरीरे स्वधीः स्वीया इति बुद्धिः भौमे भूमिविकारे इज्यधीः देवताबुद्धिः यत् यस्य तीर्थबुद्धिः तीर्थमिति बुद्धिः अभिज्ञेषु तत्त्ववित्सु
पन्यैता बुद्धिर्योगसंतिसएवगोखरः खरदारुणः अन्यविवेकायद्यागवां तृणादिभारवाहः खरोगर्दभ इति।।१३।। दुरन्वयं अनन्वि
तरूपां भ्रमंती अनवस्थितावी बुद्धिर्येषां ते।।१४।। ईशितव्यतां अनीश्वरतां जनसंग्रहमात्रमेतादित्यूचे स्मयंतहसंत।।१५।। अनन्व
यं विवृण्वंत आहुर्द्वाभ्यां यन्माययेति तत्त्ववित्सु उत्तमा अपि वयाः कासोपायया विमोहिता इति तामाहुः यदिति यद्यस्मात् इहयानर

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः।। यत्तीर्थबुद्धिः सलिले न कर्हिचित् जनेष्वभिज्ञेषु स एव
गोखरः।।१३।। श्रीशुक उवाच।। निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः।। वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः
।।१४।। चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां।। जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं।।१५।। मुनय ऊचुः।। यन्मायया त
त्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः।। यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं।।१६।। अ
नीह एतद्बहुधैक आत्मना सृजत्यवत्त्यत्ति न बध्यते यथा।। भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं।।१७

चेष्टितेन गूढः सन् ईशितव्यायति अनीश्वरवदाचरति भवान् नन्वहमीश्वरश्चेत्किमित्येवमाचरेयं तत्राहुः। अहो इति भगवतस्तावद्वि
चेष्टितं विचित्रं अतर्क्यं।।१६।। भगवतस्तमेवाहुः। अनीह इति अनीहः अक्रिय एव आत्मना स्वरूपमात्रेण बहुधेत्यत्र दृष्टांतः यथा
भौमैरिति। भौमैर्घटादिविकारैरूपलक्षिता वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ननु कथमहं जगत्सृष्ट्यादि
कर्त्ता वसुदेवपुत्रत्वादिति तत्राहुः अहो इति विभूम्नः परिपूर्णस्य तव इदं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति।।१७।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ

९९

जनसंग्रहमाह॥ अथापीति त्रिभिः त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलया आचरेण वेदपथं च बिभर्षि॥१८॥ अत एव ब्राह्मणेषु
बहुमानमपि करोषीति सहेतुकमाह ब्रह्मेति ब्रह्म वेदाख्यं शुक्लं शुद्धं जे हृदयं अंतरंगं रूपं कुत इत्यत आह यत्रेति यत्र ब्रह्मणि
व्यक्तं कार्यं अव्यक्तं कारणं ततः परं सत् सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धं ततं ब्रह्म॥१९॥ तस्माद्धेदं हृदयं ततो वेदप्रवर्त्तकं ब्राह्म
णकुलं शास्त्रयोनेर्वेदप्रमाणकस्य तव सद्भाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि संपूजयसि ततस्मादेव कारणं ब्रह्मण्यनाम

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो
भवान्॥१८॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं॥१९॥ तस्माद्ब्रह्मकुलं
ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः॥ सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान्॥२०॥ अद्य नो जन्मसाफल्यं विद्यायास्त
पसो दृशः॥ त्वया संगम्य सद्गत्या यदंतः श्रेयसां परः॥२१॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे॥ स्वयोगमाययाच्छन्नम
हिम्ने परमात्मने॥२२॥ नयं विदंत्यमी भूपा एकारामाश्च वृष्णयः॥ मायाजवनिकाछन्नमात्मानं कालमीश्वरं॥२३॥
यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक्॥ नाममात्रेंद्रियाभातं न वेद रहितं परं॥२४॥

ग्रणीर्मुख्यतत्प्रवर्त्तकः सन् कपीश्वरसी यर्थः॥२०॥ तस्मादीश्वरस्य तदेवं जनसंग्रहमात्रं वयं तु तव संगत्या कृतार्था इत्याह॥ आ ९९
द्येति षड्भिः। सतां गत्या त्वया संगम्य संगं प्राप्य। यत् यस्मात्त्वं श्रेयसां परो वधिः॥२१॥२२॥ एकस्मिन्नेव स्थाने आरामो येषां
तेऽपि कालं सृष्ट्यादिकारणं ईश्वरं निपं तारं॥२३॥ एतत्सदृष्टांतमाह॥ यथेति शयानः स्वप्ने आत्मानं गुणतत्त्वदृक् स्वप्नविषये
षु तत्त्वदृष्टिर्नाममात्रेंद्रियेण मनसाभातं सिंहव्याघ्रादिरूपम् आत्मानं वेद तद्वत् हि देहेंद्रियादिरूपमात्मानं न वेद यथा॥२४॥

एवं त्वां त्वां नाममात्रेषु स्वप्नादितुल्यविषयेषु इंद्रियैर्या ईहा प्रवृत्तिः तैव माया तया विभ्रमच्चित्तो न वेद स्मृते विवेकस्योपप्लवात् नाशात्
॥२५॥ अद्यैवाघस्य मर्षं नाशं करोतीति यद्गंगाख्यं तीर्थं तस्यास्पदमाश्रयं तेंघ्रिं सुपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य तेंघ्रिं दृ
ष्टिमद्दृष्टवंतो वयं बहुभिः पुरो योगैः अतो स्मान् भक्तान् अनुगृहाण भक्तान् इह त्वा अनुग्रहं कुर्वित्यर्थः । ननु किं भक्त्या पृथा पूर्वं तप एव त
प्यतां मितिने त्याहुः । उत्सिक्तया उद्रिक्तया भक्त्या स्तपा उपहृत आशापलक्षणा जीवकोशो येषां त एव पूर्वं भगवद्गतिमायुर्नान्य

षिं एवं त्वा नानामात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥ तस्याद्य ते ददृशिमांघ्रिम
सु घौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भ
क्तान् ॥२६॥ श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे मनः ॥२ नृ
७॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥ श्री वसुदेव उवाच ॥ नमो
वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥२९॥ श्रीनारद उवाच ॥ नातिचित्र
मिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ॥३०॥ सन्निकर्षोत्र मर्त्यानामनादरणका
रणं ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये ॥३१॥
॥ ॥ ॥

इति ॥२६॥२७॥ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषेदमिति संधिरार्षः ॥२८॥ सर्वे देवा येषु तेभ्यः । यावतीर्वै देवतास्ताः सर्वा वेद
विदि ब्राह्मणे वसंतीति श्रुतेः येन कर्मणा यथाकृतेन वा कर्मणा निर्हारो निरासो भवति तदुच्यतां ॥२९॥ श्रीकृष्णं हित्वास्मान् पृच्छ
तीति विस्मितान् प्रत्याह नारद नातीति बुभुत्सया बोद्धुमिच्छया ॥३०॥ तत्रत्या गंगातीरवासी ॥३१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०१०उ० श्रीक्लेशैर्भक्तत्वं मन्यमानो विद्याविजृंभितइत्याह। यस्यानुभूतिरिति द्वाभ्यां अनुभूतिर्ज्ञानं कुतश्चिदपि नरिष्यति न नश्यति। तदेवाह कालेन कर्त्रा
९२ कार्यफलवत्। अस्य विश्वस्य लयोत्पत्त्यादिः स्वतश्च विद्युदादिवत्। अन्यस्माच्च मुद्गरादिवत् घटादेः। गुणतो रूपादयं तदेव सत्त्वे सर्वरूपादि
नादेहादि॥३२॥ तमेव कुतश्चिदप्यव्याहतानुभवं अत एवेश्वरं किंचाद्वितीयं क्लेशं अन्य प्राकृत उपगूढं माच्छन्नं मनुष्यं मन्येत।
कैः क्लेशकर्मादिभिः। तत्र क्लेशा रागादयश्च तत्पूर्वकाणि कर्माणि च तत्परिपाके सुखदुःखे च सत्त्वादिगुणानां पुनः प्रवाहश्चैते प्राणादिभि

यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै॥ स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति॥३२॥ तं क्लेशकर्मपरिपाकगु
णप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः॥३३॥
अथोचुर्मुनयो राजन्नाभाष्यानकदुंदुभिं॥ सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः॥३४॥ कर्मणा कर्मनिर्हार
एष साधुनिरूपितः॥ यच्छ्रद्धयायजेद्विष्णुं सर्वयज्ञेश्वरं मखैः॥३५॥ चित्तस्योपशमोयं वै कविभिः शास्त्रचक्षुषा॥
दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः॥३६॥ अयं स्वस्त्ययनं पंथा द्विजातेर्गृहमेधिनः॥ यच्छ्रद्धयाप्तवित्तेन शु
क्लेनेज्येत पुरुषः॥३७॥

श्च स्वविभवैः स्वकार्यैः अत्र दृष्टांतः। मेघहिमोपरागैः अभ्रतुषारराहुः स्वविभवैः सूर्यमिवेति॥३३॥३४॥३५॥ चित्तस्योपशमः उपशमहेतु ९२
योगो मोक्षोपाय श्च शनैरात्ममुदमावहतीति तथा सुगमः प्रत्यक्षाश्रयत्वाद्धर्म आवश्यकमन्यथा विहिताकरणे नमालिन्य प्रसंगा
त्॥३६॥ ननु न कर्मणा न प्रजया धनेन त्यागेनैके नामृतत्वमानशुरित्यादिना त्यागस्यैव विहितत्वात्कथं कर्म मोक्षोपाय इत्याशंक्याऽ
दावेव त्यागस्याशक्यत्वादित्याशयेनाहुः। अयमिति स्वार्धं च तुर्भि। अयं स्वस्त्ययनं ... स्तोत्र्ये: इयते नेनेति तथा श्रद्धयाप्तः कृपतया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्त्ययनतां नैवमाह वित्तैषणामिति वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणं वित्तेच्छां विसृज्य। तथा गृहे रतो वित्ते भोगे दारसुतैषणां विसृजेत्।
तदनुभवे नैव तदासक्यानि एवं देहे स्मृते आत्मनः स्वर्गादिलोकैषणां च कालेन क्षयानुसंधानेन विसृजेत्। देव हे वसुदेवाय ह्यादे
वकालेन देवानामपि स्पृहनाम्नस्यहेतुभूतेनेत्यर्थः॥ अत्राचारं प्रमाणयति ग्राम इति॥३८॥ किंच। ऋणैरिति तथा च श्रुतिः जा
यमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यादिनान्यनिस्तीर्य तेषामृणा

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम्॥ आत्मलोकैषणां देव कालेन विसृजेद्बुधः॥ ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्त
पोवनं॥३८॥ ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत्॥३९॥ त्वं त्वद्य
मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते॥ यज्ञैर्देवर्णमुन्मुच्य निरृणोऽशरणो भव॥४०॥ वसुदेव भवान्नूनं भक्त्या परमया
हरिं॥ जगतामीश्वरं प्रार्च्यः सपत्नीपुत्रतां गतः॥४१॥ श्रीशुक उवाच॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः॥ तान्
ऋषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च॥४२॥ त एनमृषयो राजन्वृता धर्मेण धार्मिकं॥ तस्मिन्नयाजयन्क्षेत्रे मखैरु
त्तमकल्पकैः॥४३॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः॥ स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृ
ताः॥४४॥ तन्महिष्यश्च मुदिता निष्ककंठ्यः सुवाससः॥ दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः॥४५॥ नेदुर्मृ
दंगपटहशंखभेर्यानकादयः॥ ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः॥ जगुः सुकंठ्यो गंधर्व्यः संगीतं सहभर्तृकाः॥४६

न्यनपाकृत्य तथा च मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति॥३९॥ निरृ
णो निर्मुक्तऋणः अशरणो भव गृहादि हित्वा व्रज॥४०॥ किंच। अथ वै शुद्धचित्तानामयं क्रमः त्वं तु कृतार्थ एवेत्याह वसुदेवेति प्रार्च्य अर्चित्वा
न्यय घस्मात्वा युवयो॥४१॥४२॥४३॥४४॥ आलिप्ता कुंकुमादिभिः वस्तुपाणयः हीतार्हणहस्ताः॥ ॥४६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰शं॰उ॰ अक्तं नेत्रयो रंजनेन । अभ्यक्तं सर्वांगेषु नवनीतेषु ॥४७॥ ताभिः पत्नीभिः सहितो दीक्षितो विरेजे ॥४८॥ ॥४९॥ जीवेशौ सर्वजीवानामी
१३ शौ ॥५०॥ अनु यज्ञं प्रतियज्ञं आम्नातसर्वांगा प्राकृता ज्योतिष्टोमदर्शपूर्णमासाद्यस्तेभ्यश्चोदनालिंगादिभिरतिदेशप्राप्तै

तमभ्यषिंचन् विधिवदक्तमभ्यक्तमृत्विजः ॥ पत्नीभिरष्टादशभिस्सोमराजमिवोडुभिः ॥४७॥ ताभिर्दुकूलवलयैर्हारनू
पुरकुंडलैः ॥ स्वलंकृताभिर्विभवैर्दीक्षितोजनसंवृतः ॥४८॥ तस्यर्त्विजो महाराजरत्नकौशेयवाससः ॥ ससदस्या विरे
जुस्ते यथा वृत्रहणोध्वरे ॥४९॥ तदा रामश्च कृष्णश्च स्वैः स्वैर्बंधुभिरान्वितौ ॥ रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥५०॥
ईजेनु यज्ञं विधिना अग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं ॥५१॥ आथर्त्विग्भ्यो ददात्काले यथा
म्नातं सदक्षिणाः ॥ स्वलंकृतेभ्योलंकृत्य गोभूकन्या महाधनाः ॥५२॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते महर्षयः ॥ सस्नु
रामहृदे विप्राय जमानपुरःसराः ॥५३॥ स्नातोलंकारवासांसि वंदिभ्योदात्तथा स्त्रियः ॥ ततः स्वलंकृतो वर्णाना
भृक्योन्नेन पूजयत् ॥५४॥ बंधून्सदारान्ससुतान्पारिबर्हेण भूयसा ॥ विदर्भकोशलकुरून्काशिकेकयसं
जयान् ॥५५॥ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणान् ॥ श्रीनिकेतनमनुज्ञाप्य शंसंतः प्रययुः क्रतुं ॥५६॥ ॥ ॥

गा वैकृता सौर्यसत्राद्यस्तैः सर्वैर्द्रव्यं पुरोडाशादि ज्ञानं मंत्राः । क्रियाकर्म तेषामीश्वरं ॥५१॥५२॥ सस्नुः स्नानं चक्रुः ॥५३॥ आश्वा १३
वास्यश्वनोपि याप्य अन्नेन पूजयत् अपूजयत् ॥५४॥ बंधादींश्चारणांतान्नूपारिबर्हेण प्रीतिदानेन चापूजयत् । ते च सर्वे प्रयु
यः ॥५५॥५६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयाणे केषांचिद्विशेषमाह तराष्ट्र इति द्वाभ्यां अनुजो विदुरः पार्था युधिष्ठिरभीमार्जुनाः यमौ नकुलसहदेवौ ।।५७।। सौहृदेनाक्लिन्नानि
चेतांसि येषां ते ।।५८।।५९।। मनोरथोपद्मविषयत्वमेव महार्णवं ।।६०।। सूराणां बलेन योगिनां ज्ञानेनापीसर्थः ।।६१।। तत्कृतस्तत्राह । अ
स्मास्विति कृता ज्ञेषु कृतमुपकारमजानतः सत्तमैर्भवद्भिर्प्रतिकल्प्या अनुपमा मैत्री यमर्पिता अफलोपि प्रत्युपकारशून्यापि कर्हि

मो धृतराष्ट्रोऽनुजः पार्था भीष्मो द्रोणः पृथा यमौ ।। नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ।।५७।। बंधून्नृपरिघञ्जय
दृढं सौहृदाक्लिन्नचेतसः ।। यशुर्विरहकृच्छ्रेण संदेशाश्रापरे जनाः ।।५८।। नंदस्तत्सहगोपालैर्बृहत्याप्यजयार्चि
तः ।। कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः ।।५९।। वसुदेवोंजसोत्तीर्य मनोरथमहार्णवं ।। सुहृद्वृतः प्रीतमना
नंदमाह करे स्पृशन् ।।६०।। वसुदेव उवाच ।। भ्रातरीशः कृतः पाशो नृणां यस्येह संज्ञितः ।। तं दुस्त्यजमहं मन्ये शूराणा
मपि योगिनां ।।६१।। अस्मास्वप्रतिकल्पेयं यत्कृता ज्ञेषु सत्तमैः ।। मैत्र्यर्पिताफला वापि न निवर्त्तेत कर्हिचित् ।।६२।। प्रा
गकल्पाच्च कुशलं भ्रातर्वो नाचराम हि ।। अधुना श्रीमदांधाक्षा न पश्याम पुरः सतः ।।६३।। मा राज्यश्रीरभूत्पुंसः
श्रेयस्कामस्य मानद ।। स्वजनानुत बंधून्वा न पश्यंति ययांधदृक् ।।६४।। एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः
रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ।।६५।।

चिद्यद्यस्मान्न निवर्त्तेत तस्मादीश्वरकृतेपाशोयं भवतामिति गम्यत इत्यर्थः ।।६२।। आफलत्वमेवाह । प्रागिति हे भ्रातः तव अकल्पात्
असमर्थत्वात् । वः कुशलं प्रियं न हि आचराम न कृतवंतो वयं श्रीमदेनांधान्यक्षीणि येषां ते ।।६३।। राज्यश्रीर्माभूत् तस्मादसोडागमः ।।६४।।६५

॥पांडवाश्च महाभागाः पृथाचन्द्रपसत्तम॥ अनुज्ञाताः केशवेन बाष्पगद्गदभाषिणः॥ शाक्रप्रस्थं ययुः सर्वे स्वजनेपरिवारितः॥

द०श०उ० अद्यश्वइति प्रातर्निर्गमिष्यैवापराह्णेगम्यतामितिअपराह्णे निर्गमिष्यश्वोगम्यतामितिपुनःपुनरेवंप्रापितः॥६६॥६७॥ यापितमहता
९४ सैन्येन प्रस्थापित॥६८॥६९॥७०॥ यदुदेवं महोत्सवं यज्ञादिलक्षणं सुहृत्संदर्शनादिकंचेति॥७१॥ इतिदशमेचतुरशीतितमोध्या

नंदस्तु सख्युः प्रियकृत्प्रेम्णागोविंदरामयोः॥ अद्यश्वइतिमासांस्त्रीन्यदुभिर्मानितोवसत्॥६६॥ ततःकामैः
पूर्यमाणः सव्रजः सहबांधवः॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः॥६७॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबल
द्विभिः॥ दत्तमादाय पारिवर्हं यापितो यदुभिर्ययौ॥६८॥ नंदगोपाश्चगोप्यश्चगोविंदचरणांबुजे॥ मनःक्षिप्तं पुन
र्हर्तुमनीशामाथुरान्ययुः॥६९॥ बंधुषुप्रतियातेषु वृष्णयःकृष्णदेवताः॥ वीक्ष्यप्रावृषमासन्नांययुर्द्वारव
तींपुनः॥७०॥ जनेभ्यःकथयांचक्रुर्यदुदेवमहोत्सवं॥ यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकं॥७१॥ इति
श्रीभागवतेमहापुराणेदशमस्कंधेतीर्थयात्रानुवर्णनेचतुरशीतितमोध्यायः॥८४॥ ॥श्रीशुकउवाच॥ अ
प्रा०स्को० थैकदात्मजौप्राप्तौ कृतपादाभिवंदनौ॥ वसुदेवोभिनंद्याह प्रीत्यासंकर्षणाच्युतौ॥१॥ मुनीनांसवचःश्रुत्वा
पुत्रयोर्धामसूचकं॥ तद्वीर्येर्जातविस्रंभः परिभाष्याभ्यभाषत॥२॥ ॥ ॥ ॥ ९४

यः॥८४॥ ॥पंचाशीतितमेरामकृष्णौसंप्रार्थितौसुतौ॥ पित्रेज्ञानमथोमात्रेमृतान्पुत्रानयच्छतां॥ नंदयित्वा कुरुक्षेत्रया
त्रायांसुहृदोबहून्॥ तत्रज्ञानं ततःपित्रोरादिशान्मृतरत्नुभिः॥१॥ धामप्रभावस्तत्सूचकं जातविस्रंभः। उत्पन्नोविश्वासःपरि
भाष्यसंबोध्य॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्य विश्वस्य साक्षात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ च साक्षाद्धां युवामिति जाने ॥३॥ ननु विदं विश्व
मनेककारकैर्जायमानं कुतः प्रधानपुरुषात्मकं कुतस्तरां वयोस्तत्कारणत्वेनेश्वरत्वं तत्राह यत्रेति यत्राधिकरणे येन कर्त्रा
करणेन वा यतोऽपादानात् यस्य संबंधे नष्टस्यार्थस्याकारत्वेऽपि निमित्तेनोक्तो यस्मै संप्रदानाय यद्यदिति प्रयोज्य कर्तृकर्मका
रके दर्शितो नास्ति भेदः यथोक्तं करोतीति क्रियमाणेन न कश्चित्कर्मणा विनाभवत्यर्थ कर्त्ता च करणे कर्मजायते तथाकारोत्यर्थ
स्य च कर्त्ता भवितुं संप्रयोजकं भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यत इति चासत्यं तथाप्यवस्थाभेदेन भेदो विवक्षितः दृश्यते

कृष्ण कृष्ण महायोगिन् संकर्षण सनातन । जानेवामस्य यत्साक्षात् प्रधानपुरुषौ परौ ॥३॥ यत्र येन यतो य
स्य यस्मै यद्यथा यदा ॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥४॥ एतन्नानाविधं विश्वमात्मसृष्टम
धोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यजः ॥५॥ ॥ ॥ ॥

वावस्था भेदः तंदुलानोदनं पचति मृदं घटं करोतीति तदेवं सप्तविभक्त्यर्था दर्शिताः । यथेति पदेति च क्रिया विशेषणभूता नाम
न्येषां चाव्ययानामर्था ॥ स्यादिति क्रियापदार्थोपलक्षणं एवं सर्वप्रपंचमनूद्य तत्कारणं भगवद्रूपतां विवक्षितां इदं साक्षादि
ति प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवान् त्वमेव साक्षादिति तयोरैक्यमित्यभिप्रेत्यैकवचनं ॥४॥ किंच धारणपो
षणकर्त्तापि त्वमेवेत्याह एतदिति हे आत्मन् प्राणक्रियाशक्तिः जीवो ज्ञानशक्तिश्च सन् त्वमेव बिभर्षि ॥५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ० ननुप्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वे । नस्वीत्वक त्वमुच्यत इत्याशंक्य प्राणादिशक्तेर्यो
९५ पितस्यैवेत्याह । प्राणादीनामिति प्राणाः सूत्रं तदादीनां विसृजां विश्वकारणानां याशक्तिर्यस्ता परस्य परमकारणस्येश्वरस्यैवा
कुतपारतंत्र्यात् । पथावेधशक्तिर्नबाणस्य अपितु पुरुषस्य तद्वदित्यर्थः । ननु भगवत प्राणादिवर्गस्य चस्वातंत्र्यमेव किं नस्या
त् । अतआह । वैसादृश्यात्तद्द्वयोरिति ॥ चेतनाचेतनत्वेन विस्वदृशत्वात् द्वयोः अचेतनप्राणादिवर्गस्य चेतनपारतंत्र्यमेव
युक्तमित्यर्थः । यद्वा प्राणादिषु द्वयोरेवतावद्विसदृशत्वे विरुद्धक्रियाकारित्वात् किंपुनर्बहूनां तस्मादेकेन सर्वज्ञेन सर्वशक्ति

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥
पारतंत्र्याद्वैसादृश्यात् द्वयोश्चेष्टैव चेष्टताम् ॥ ६ ॥

क्तिनाधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति तथा चोक्तं । यदैते संहताभावाभूतेंद्रियमनोगुणाः ॥
यदायतननिर्माणे नशेकुर्ब्रह्मवित्तम । तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यद ९५
इति तथा नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुमित्यादि ननु प्राणादीनां क्रियाकारित्वं शक्त्याभावे कुतस्त्याद्दत आह ।
चेष्टैव चेष्टतामिति । चेष्टमानानामेषां चेष्टैव न शक्तिः ॥ यथा कोयाशक्ता तृणादीनां चलनं यथा च पुरुषस्य शत्त्या शराणां वे
गइति ॥ ६ ॥

पारतंत्र्यमेव प्रपंचयति कांतिरिति पंचभिः। चंद्रस्य कांतिः। अग्नेस्तेजः। अर्कस्य प्रभा। नक्षत्र विद्युतां सत्तास्फुरणमात्रेण सत्ता अर्थ
तो वस्तुतो भवान्। तथा च श्रुतिः। न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति सर्वं तस्य
भासा सर्वमिदं विभातीति स्मृतिश्च यदादित्यगतं तेजो जगद्भासयतेऽखिलं। यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति भू
मेर्वृत्ति प्राणिनामाधारत्वेन वर्त्तनं गंधश्च भवानूतवैव शक्तिरित्यर्थः॥ ८॥ किंच हि देव आपां तर्पणं तप्तिजनकत्वं ताश्चापश्च त
त्सारं सश्च त्वमेव। किंच वायोरोज सहादि तवैव शक्तिः॥ ८॥ दिशामुपाधिकृतावकाशप्रदेशानामवकाशादिशश्च त्वं खं च साम

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युतां॥ यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोऽर्थतो भवान्॥ ७॥ तर्पणं प्राणनमपां दे
व त्वं ताश्च तद्रसः॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर॥ ८॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः॥
नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः॥ ९॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः॥ अवबोधो भवान्बु
द्धेर्जीवस्यानुस्मृतिः सती॥ १०॥ भूतानामसि भूतादिरिंद्रियाणां च तैजसः॥ वैकारिको विकल्पानां प्रधानम
नुशायिनां॥ ११॥

न्याकाशात् तदाश्रयः स्फोटश्च शब्दतन्मात्रं परावस्था वा इत्यर्थः॥ नादः पश्यंतीकार मध्यमा क वर्णश्च आकृतीनां पदार्थानां पृथक्
कृतिः पृथक्करणमभिधानं यस्मात् तत्पदं वर्णपदात्मिका वैखरी च त्वमित्यर्थः॥ ९॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः देवा
श्चेंद्रियाधिष्ठातारः। तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं अवबोधो व्यवसायशक्तिः। अनुस्मृतिः प्रतिसंधानशक्तिः॥ १०॥
भूतानां कारणं भूतादिस्तामसोऽहंकारस्त्वमसि इंद्रियाणां कारणं तैजसोऽहंकारस्त्वं विधिर्धर्मा अधिदेवाध्यात्मभेदेन कल्पंत इति
विकल्पा देवास्तेषां कारणं वैकारिकः सात्विकोऽहंकारश्च त्वं अनुशायिनां जीवानां संसारकारणं प्रधानं त्वं॥ ११॥ राम॥ कृष्ण॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा०उ०
१६

अपि च नश्वरेषु नानाभ्रशीलेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि द्रव्यविकारेषु परमत्सु वर्णादिकार्येषु घटकुंडलादिषु
नश्वरेषु द्रव्यमात्रं मृत्स्न वर्णादिमात्रमनश्वरं यथा तद्वत् ॥१२॥ ननु त्रिगुणात्मकं कार्यरूपापि त्वमित्यक्रमेलालक्ष्यमनश्वरं
त्वं तत्राह सत्त्वमिति तद्वृत्तयस्तत्परिणामाश्च महदाद्य अद्धा सा त्वपि परे अस्मि कल्पिता ॥१३॥ तस्मान्न संसृतिर्न च संसृतौ च
थं प्रतीतिरित आह। यहीति यदा विकल्पितास्तदैव प्रतीतिमात्रेण त्वपि संतित्वं चामीषु तदेव कारणतया अनुगत अन्यदा

नश्वरेष्विह भावेषु तदसि त्वमनश्वर ॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं ॥१२॥ सत्त्वं रजस्तम इति गुणास्त
द्वृत्तयश्च याः ॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥१३॥ तस्मान्न संत्यमी भावा यर्हि त्वय्येव कल्पिताः
त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः ॥१४॥ गुणप्रवाह एतस्मिन्न अबुधास्त्वखिलात्मनः ॥ गतिं सूक्ष्मा
मबोधेन संसरंतीह कर्मभिः ॥१५॥ यदृच्छयान्नतां प्राप्य सुकल्पामिह दुर्लभां ॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्मा
ययेश्वर ॥१६॥ असावहं ममैवैते देहे चास्यान्वयादिषु ॥ स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत् ॥१७॥ ॥

तत्त्व अव्यावहारिको विकल्पस्त्वमेवावशिष्यस इत्यर्थः ॥१४॥ एवंरूपं त्वामज्ञात्वा ज्ञानिनं च नश्वसंसार इत्याह। गुणप्रवाह इति सूक्ष्मां नि
प्रपंचां गतिमबुधा अविद्वांसः ॥ अबुधस्त्वेति वा पाठः अबोधेन देहाभिमानेन लब्धैः कर्मभिः संसरंतीति ॥१५॥ एवं तयोस्तत्त्वं १६
निरूप्य तदप्राप्त्या शोचतीति यदृच्छयेति नृणां मनुष्यतां सकल्पां पटुतरेंद्रियां ॥१६॥ अहो किमिति प्रमत्तोऽसि त्वया बहुभिः पाशैः
निबद्धत्वादित्याह। असावहमिति देहोऽस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैत इति ॥१७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो वसुत्रयोः एवयोः किमिदमारोप्यते अत आह। युवामिति भूभारक्षत्रक्षपणार्थं अवतीर्णौ तथाह। निश्चितं आकथयसि॥१८॥ त
तस्मादरणं शरणमापन्नानां संसृतिभयमपहंतीति तथा ततः। ननु स्वपति सरवी यथा किं निर्विद्यसे अत आह। एतावतेति इंद्रियला
लसेन इंद्रियार्थलालसया यत् पं नेंद्रियलालसेन मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिरहं त्वयि च परे परमेश्वरे अपत्यबुद्धिरास्थिते
नालं पर्याप्तमिति॥१९॥ ननु कुत एतत् अहं परमेश्वर इति तत्राह सूतीगृह इति अनुयुगं प्रतियुगं यदा स्तुतपापृश्निरिति युग्मं

युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ॥ भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह॥१८॥ तत्ते गतोस्म्यरणमद्य पदार थे
विंदमापन्नसंसृतिभयापहमार्त्तबंधो॥ एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः॥१९
सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै॥ नानातनूर्गगनवद्विदधज्जहासि को वेद भू
म्न उरुगाय विभूतिमायां॥२०॥ श्रीशुक उवाच॥ आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः॥ प्रत्याह प्रश्रयानम्रः प्रह
सन् श्लक्ष्णया गिरा॥२१॥ श्रीभगवानुवाच॥ वचो वः समवेतार्थं तातैतदुपमन्महे॥ यन्नः पुत्रान्समुद्दिश्य त
त्त्वग्राम उदाहृतः॥२२॥ अहं यूयमसावार्य इमे च द्वारकौकसः॥ सर्वेप्येवं यदुश्रेष्ठ विमृश्याः सचराचरं॥२३॥

नौ आवयोः पदावकाश्यपयोर्दितिश्चेति युग्मं अधुना च वसुदेवो देवकी च युग्मं एवं हि प्रतियुगं अत एवाहं संजज्ञ अवतीर्ण इति
भगवान्ननु जगाद ननु नासौ चतुर्भुजो देव इति तत्राह। नानातनूरिति गगनवदसंग एवं त्वं भूम्नः सर्वगतस्य विभूतिरूपां मा
यां॥२०॥२१॥ उपमन्महे उपमन्यामहे समुद्दिश्य विषयीकृत्य तत्त्वग्रामस्तत्त्वसमूह उदाहृतः सम्यक् निरूपितः॥२२॥ इमा
मेव दृष्टिं सर्वत्र विधत्स्वेत्याह। अहमिति एवं विमृश्या ब्रह्मत्वेनैवान्वेषणीया किंच। सचराचरं जगदपि॥२३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०उ० ननुनानाविकारवतांकुतोब्रह्मत्वंनब्रह्मणएवोपाधिधर्मैर्बहुधाप्रतीतेरितिसदृष्टांतमाह द्वाभ्यां आत्माहीति यथास्वादिभूत
८७ तानितत्कृतेषुघटादिषुआविस्तिरोभावोद्भियांतिएवमसावात्मापिआत्मसृष्टैर्गुणैःकृतेषुतत्कृतेषुदेहेषुबहुधाईयते। पुनश्च
यथाशयंयथोपाधिआविर्भावतिरोभावादिरूपेणप्रतीयते नवस्तुतः कुतएकोबहुधास्वयंज्योतिर्दृश्यत्वेन नित्योनित्यत्वे
आत्माह्येकस्वयंज्योतिर्नित्योन्योनिर्गुणोगुणैः॥ आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते॥२४॥ खंवायुर्ज्योतिरापोभूस्त
त्कृतेषुयथाशयं॥ आविस्तिरोल्पभूर्येकोनानात्वंयात्यसावपि॥२५॥ श्रीशुकउवाच॥ एवंभगवताराजन्वसुदेवउ
दाहृतः॥ श्रुत्वाविनष्टनानाधीस्तूष्णींप्रीतमनाअभूत॥२६॥ अथतत्रकुरुश्रेष्ठदेवकीसर्वदेवता॥ श्रुत्वानीतंगुरोः
पुत्रमात्मजाभ्यांसुविस्मिता॥२७॥ कृष्णरामौसमाश्राव्यपुत्रान्कंसविहिंसितान्॥ स्मरंतीकृपणंप्राहवैक्लव्यादश्रुलो
चना॥२८॥ देवक्युवाच॥ रामरामाप्रमेयात्मन्कृष्णयोगेश्वरेश्वर॥ वेदाहंवांविश्वसृजामीश्वरावादिपूरुषौ॥२९॥
कालविध्वस्तसत्वानांराज्ञामुच्छास्त्रवर्त्तिनां॥ भूमेर्भारायमाणानामवतीर्णौकिलाद्यमे॥३०॥ यस्यांशांशांशभा
गेनविश्वोत्पत्तिलयोदयाः॥ भवंतिकिलविश्वात्मंस्तंत्वाद्याहंगतिंगता॥३१॥ चिरान्मृतसुतादानेगुरुणाकिलचो
दितौ॥ आनिन्यथुःपितृस्थानात्गुरवेगुरुदक्षिणां॥३२॥ तथामेकुरुतंकामंयुवांयोगेश्वरेश्वरौ॥ भोजराजहता ८७
न् पुत्रान्कामयेद्रष्टुमाहृतान्॥३३॥
नाअन्योन्यत्वेननिर्गुणसगुणत्वेनेत्यादिबहुधात्वंप्रपंचनीयं॥२४॥२५॥२६॥सुविस्मिता॥२७॥२८॥२९॥भूमेर्भारायमाणानांरा
ज्ञामर्थेतेषांनिधनार्थंमेमयिकिलावतीर्णौहेआद्य॥३०॥ यस्यांशःपुरुषस्तस्यांशोमायातस्याअंशागुणास्तेषांभागेनपरमाण
मात्रलेशेनविश्वोत्पत्त्यादयोभवंतितंत्वांशरणंगतास्मि॥३१॥ आनिन्यथुःआनीतवंतौपितृस्थानात्यमसदनात्॥३२॥३३

॥३४॥ दैत्यराट् बलिः। कथंभूतौ विश्वस्याप्यभूतं दैवं सावयस परिवारः॥३५॥ स्वयं दसपारि जनकथंभूतौ पादाववनिज्या यदंबुय
योरवनेजनोदकं आब्रह्माणमभिव्याप्य जगत्पुनत्य त्रिपदत्ते ते तौ॥३६॥३७॥ इंद्रसेनो बलिप्रेम विभिन्नया प्रेमाश्र्याविमृते
धारयन्॥३८॥ अनंताय शेषाय बृहते फणैकदेशे विश्वधारणात् बृहत् तस्मै कृष्णाय च सदानंदरूपाय वेधसे जगद्विधा

ऋषिरुवाच॥ एवं संचोदितौ मात्रा रामकृष्णौ च भारत॥ सुतलं संविविशतुर्योगमायामुपाश्रितौ॥३४॥ तस्मिन्प्रविष्टावुप
लभ्य दैत्यराट् विश्वात्मदैवं सुतरां तथात्मनः॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः॥३५॥
तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः॥ दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्य
दंबु ह॥३६॥ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः॥ तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवि
त्तात्मसमर्पणेन च॥३७॥ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया॥ उवाच हानंदजलाकुलेक्ष
णः प्रहृष्टरोमा नृपगद्गदाक्षरः॥३८॥ बलिरुवाच॥ नमोऽनंताय बृहते नमः कृष्णाय वेधसे॥ सांख्ययोगवितानाय नो
पाठ्य ब्रह्मणे परमात्मने॥३९॥ दर्शनं वां हि भूतानां दुःप्रापं यातिदुर्लभं॥ रजस्तमःस्वभावानां यन्नः प्राप्तो यदृच्छया॥
॥४०॥ दैत्यदानवगंधर्वाः सिद्धविद्याध्रचारणाः॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः॥४१॥ विशुद्धसत्वधा
म्न्यद्धा त्वयि शास्त्रशरीरिणि॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः॥४२॥

त्रे सांख्ययोगवितानाये स्यादिपदत्रयमैक्यविवक्षया॥३९॥ योगेश्वराणामपि दुर्दर्शनो युवामस्माभिर्दृष्टौ विस्ये तत्राति चित्रमित्या
हा दर्शनमिति॥ दुष्प्रापमपि युष्मत्क्षपपाकेषां विदुर्लभं सुलभमपि भवति तदाह रजस्तमस्वभावानामिति नो दर्शनं प्राप्तो॥४०॥
अहो विद्विषो वयं सात्विकभक्तेभ्योपि सभाग्या इत्याह। दैत्येत्यादिभिः॥४१॥४२॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰ उ॰ उद्बद्धवैरेणया भक्तिस्तया केचनेति चैद्यादयः कामतो भक्त्या गोप्यादयो यथा सद्धर्मनिष्ठा ब्रह्मवादास्त्वां प्राप्तास्तथा सत्वसंरब्धा सत्ता
९८ विष्टा अपि सुरादयो न सद्भक्तिनिष्ठा इति ॥ ४३ ॥ ननु सात्विकेभ्यो पि राजसादयः सं निष्ठा इति चित्रं तत्राह । इदमपि स्थमिति इदमपि तिस्व
रूपतः स्थमिति विशेषतश्च ॥ ४४ ॥ तदेवं यद्यपि वैरभावे नापि त्वत्प्राप्तिर्भवेत्तथापि मां सात्विकं कुर्विति प्रार्थयते तत्र इतिततत्थान
प्रसीद यथा निरपेक्षेश स्वकामै पि विमृग्यं युष्मत्पादारविंदं तदेव धिषणमाश्रयं तस्मादन्यं गृहं तदेवांधकूपं तस्मान्निष्क्र
केचनोद्बद्धवैरेण भक्तिः केचन कामतः ॥ न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥ इदमपि स्थमिति प्रायस्तव
योगेश्वरेश्वर ॥ न विदंत्यपि योगेशा योगमायां कुतो वयं ॥ ४४ ॥ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंद
धिषणान्यगृहांधकूपात् ॥ निष्क्रम्य विश्वशरणांघ्र्युपलब्धवृत्तिः शांतो यथैक उत सर्वसखैश्चरामि ॥ ४५ ॥ शा
ध्यस्मानीशितव्येश निःपापान्कुरु नः प्रभो ॥ पुमान्यच्छ्रद्धयातिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥ ॥ ॥

म्य निर्गत्य विश्वस्य शरणं रक्षितारो रक्षास्तेषामंघ्रिषु मूलेषु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सो
हं शांतः सन्नेक एव चरामि उत अथवा सर्वेषां सखा यो यो महांस्तस्मै सह यथा चरामीति ॥ ४५ ॥ कथमल्पपुण्यानामेवं भावः सं ९८
भवति इति चेत्तर्हि यथैतद्भवेत्तथास्मान्मनुशिक्षये त्याह । शाध्धीति हे प्रभो ईशितव्याः सर्वे जीवास्तेषामीशयन्ते वानुशासनं
आतिष्ठन्नाश्रयन्नचोदनाया विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते न खलु त्वद्भक्तो विधिकिंकरः स्यादिति भावः ॥ ४६

नदुक्तं सर्वमनुमोदय स्वागमनकारणं सप्रपंचं कथयपतिआसन्निति पंचाभः। ऊर्णायां भार्यायां प्रथमेतातरे स्वायंभुवमन्वंतरे
ते देवाः। सुतां वा वैयमित्तुं जव मैथुनेन रमितुं उद्यतं उद्यात्कं कं प्रजापति जहस उपहसितवंतः॥४७॥ तेनावद्यकर्मणा पापे
न आसुरीयोनिमगात् अगमन्। अधुना तत्क्षणमेव हिरण्यकशिपोर्जाता इत्यर्थ ते च योगमायया ततोनीतासंतः॥४८॥ देवक्या
उदरे जाता हे राजन् बलीते च कंसेन विहिंसितासा च तानात्मजान् मत्वा शोचति ते चेमे तवांतिके ध्यासते॥४९॥ लोकं देवलोकं
श्रीभगवानुवाच॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेंतरे॥ देवाकं जहसुर्वीक्ष्य सुतां यभितुमुद्यतं॥४७॥ तेनास्तु
रीमगन्यानिमधुना वंद्यकर्मणा॥ हिरण्यकशिपोर्जाता नीतास्ते योगमायया॥४८॥ देवक्या उदरे जाता राजन् कंसवि
ध्या हिंसिताः॥ साता न् शोचत्यात्मजांस्वांस्त इमेध्यासतेंतिके॥४९॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये॥ ततः शाप
द्विनिर्मुक्ता लोकं यास्यंति विज्वराः॥५०॥ स्मरोद्गीथपरिष्वंगः पतंगः क्षुद्रभृद्घृणी॥ षडिमे मत्प्रसादेन पुनर्या
स्यंति सद्गतिं॥५१॥ इत्युक्त्वा तान्समादाय इंद्रसेनेन पूजितौ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां॥५२॥ तां
नू न् दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी॥ परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः॥५३॥ अपाययत्स्तनं प्री
ता सुतस्पर्शपरिप्लुता॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते॥५४॥ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः॥
नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनः॥५५॥ ते नमस्कृत्य गोविंदं देवकीं पितरं बलं॥ मिषतां सर्वभूतानां ययुर्धा
॥५०॥ स्मरो हीथ स्मरसहितः उद्गीथ सहेतिं मोक्ष्यां स्मरस्येव पूर्वं कीर्त्तिमानिति नामा अतः कीर्त्तिमंतं प्रथमजं कंसायानकदुंदु
भिरर्पयामास स्फुटं॥५१॥ अयच्छती अर्पयामासतुः॥५२॥५३॥५४॥ अमृततुल्ये हेतुगदाभृत पीतशेषमिति नारायणांगसंस्प
र्शनप्रतिलब्धं देवावयमिसात्मदर्शनं येस्ते॥५५॥ धामदेवलोकं॥५६॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ० मृतानामागमनं निर्गमनं च श्रीकृष्णस्य मायां मेनो ते नैवापत्यादिरूपेण रचितां॥५७॥५८॥ अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैरि
९९ तिब्रुवचनं प्रजार्थं जगतश्चर्चं भिनत्तीति तथा नतु अलं निःशेषं यथा भवति तथा नह्यच्छादिवादिति तदेवं मोक्षहेतुत्वं पापक्ष
यहेतुत्वं चोक्तं तद्भक्तानां तु सत्कर्णपूरं परमसुखावहं कर्णाभरणमिति स्वयं सुखस्वरूपतामाह। किंच भगवति कृतमावेशितं
चित्तं येन स तथा भूत्वा तस्य क्षेमं धाम कालादिभयरहितं लोकं याति इति॥५९॥ इति दशमे पंचाशीतितमोऽध्यायः॥८५॥ ॥

तं दृष्ट्वा देवकी देवी मृतागमननिर्गमं॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप॥५७॥ एवंविधान्यद्भुतानि कृष्णस्य
परमात्मनः॥ वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत॥५८॥ सूत उवाच॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरि
तममृतकीर्तेर्वर्णितं व्यासपुत्रैः॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम॥५९॥
इति श्रीभागवते महापुराणे दशमस्कंधे मृताग्रजानयनं नाम पंचाशीतितमोऽध्यायः॥८५॥ ॥राजोवाच॥ ब्रह्म
न्वेदितुमिच्छामः स्वसारं रामकृष्णयोः॥ यथोपयेमे विजयी या ममासीत्पितामही॥१॥ श्रीशुक उवाच॥ अर्जु
नस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः॥ गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः॥२॥ दुर्योधनाय रामस्तां
दास्यतीति न चापरे॥ तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी द्वारकामगात्॥३॥ ॥ ॥ ॥
सुभद्रामर्जुनो हरत्॥ गत्वा च मिथिलां कृष्णो नयद्विप्रावनंदयत्॥ पित्रोः स्वहस्तान्नमादिश्य सुभद्रां फाल्गुनाय च॥ जगामापि ९९
मिथिलां कृष्णः स्वभक्तप्रियकृत्ततः॥२॥ देवक्यामृतपुत्रलाभवत् अर्जुनस्य सुभद्रालाभोऽपि रामप्रातिकूल्यात् दुर्घट इति तन्नुपाख्यान
प्रसंगात्पृच्छति ब्रह्मन्निति॥१।२॥ कथमशृणोत् दुर्योधनायेति। अपरे वसुदेवादयो न दास्यंतीति तेऽल्लिप्सुस्तस्यां मातुलेय्यां
लिप्सुः रामं वंचयितुं प्रत्ययेतमं त्रिदंडिवेषं विधाय गतः साहसपतिरिति॥३॥

षडुसीतमे दृष्ट्वा
हृत्वो द्रं अर्जुनो
हरत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वार्थसाधककन्यां प्रेप्सुः ॥४॥ तं आतिथ्येनाभिमंत्र्य गृहमानीय बलेन यच्छ उद्ये । एव हृतं परिदिष्टं तद्द्रैक्ष्यं किलार्जुनो बुभुजे इत्यन्व
यः ॥५॥ भावेन इत्यभिप्रायेण क्षमितं मनो दधे ॥६॥ व्रीडितापांगी सव्रीडकटाक्षी तास्मिन्नेव न्यस्तहृदयमीक्षणं वयसा ॥७॥
अंतरं हर्तुं प्रवसं रप्रेप्सु प्रासमिच्छु कामेन भ्रमच्चितयस्य सर्वांरामादि सन्मान निमित्तं सुखं ॥८॥९॥ आसमंतादुधता आवरणं कु
तत्रैव वार्षिकान्मासान्न्यवासी स्वार्थसाधकः ॥ पौरैः सभाजितोभीक्ष्णं रामेणाजानता च सः ॥४॥ एकदा गृहमानीय आति
थ्येन निमंत्र्य तां ॥ श्रद्धयोपहृतं भैक्ष्यं बलेन बुभुजे किल ॥५॥ सोपश्यत्तत्र महतीं कन्यां वीरमनोहरीं ॥ प्रीत्युत्फुल्लेक्षणस्त
स्यां भावक्षुब्धं मनो दधे ॥६॥ सापि तं चकमे वीक्ष्य नारीणां हृदयंगमं ॥ हसंती व्रीडितापांगी तन्न्यस्तहृदयेक्षणा ॥७॥ तां परं स
मनुध्यायन्नंतरं प्रेप्सुरर्जुनः ॥ न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ॥८॥ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गतां ॥ ज
हारानुमतः पित्रोः कृष्णस्य च महारथः ॥९॥ रथस्थो धनुरादाय शूरांश्चारुंधतो भटान् ॥ विद्राव्य क्रोशतां स्वानां स्वभागं
मृगराडिव ॥१०॥ तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः ॥ गृहीतपादः कृष्णेन सुहृद्भिश्चानुसांत्वितः ॥११॥ प्राहिणो
त्पारिबर्हाणि वरवध्वोर्मुदा बलः ॥ महाधनोपस्करेभरथाश्वनरयोषितः ॥१२॥ श्रीशुक उवाच ॥ कृष्णस्यासीत् द्विज
श्रेष्ठः श्रुतदेव इति श्रुतः ॥ कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः ॥१३॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी ॥
अनीहयागताहार्यनिर्वर्तितनिजक्रियः ॥१४॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथो

र्वत ॥१०॥११॥ पारिबर्हाणि वरवध्वोः प्रीतिदेयानि ॥१२॥१३॥ अनीहया अनुद्यमेनैव आगतं यदाहार्यं भोज्यं तेन निर्वर्तिता निजाः क्रिया
येन सः ॥१४॥ यात्रामात्रं शरीरादिनिर्वाहमात्रं भोज्यं उपनमति तं प्रसागच्छति ॥१५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०उ० मिथिलस्य जनकस्य वंश्या मैथिलाः ॥१६॥ प्रभुरेव स्वयं विदेहान् देशान् प्रययौ ॥१७॥ कृष्णो व्यास रामो भार्गव अहं शुकः एवमादि
१०० भिः सह ॥१८॥१९॥ आनर्त्तादयो देशा तात्स्थ्याद्देशवर्त्तिन्यो नृनार्यः ॥ उदारहासं स्निग्धमीक्षणं यस्मिन् तत् दृशिभिर्नेत्रैः ॥२०॥ स्ववीक्ष

तथा तद्राष्ट्रपालोंऽग बहुलाश्व इति श्रुतः ॥ मैथिलो निरहंमान उभावप्यच्युतप्रियौ ॥१६॥ तयोः प्रसन्नो भगवान् दारुकेणा
हृतं रथं ॥ आरुह्य साकं मुनिभिर्विदेहान् प्रययौ प्रभुः ॥१७॥ नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः ॥ अहं बृहस्पतिः क
ण्वो मैत्रेयश्च्यवनादयः ॥१८॥ तत्र तत्र तमायांतं पौरा जानपदा नृपाः ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितं ॥१९॥
आनर्त्तधन्वकुरुजांगलकंकमत्स्यपांचालकुंतिमधुकेकयकोशलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहासस्निग्धे
क्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥२०॥ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृ
ण्वन् दिगंतधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥२१॥ तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा न्
प ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥२२॥ दृष्ट्वा तमुत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभि
र्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥२३॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुं ॥ मैथिलः श्रुतदेवश्च पादयोः पेततुः
प्रभोः ॥२४॥ न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत्संहतांजली ॥२५॥ ॥ ॥ १००

णेनैव विनष्टतमिस्रा दृशो येषां तेभ्यः क्षेमं अभयं अर्थदृशं तत्त्वज्ञानं च ॥२१॥ अभियुः प्रत्युज्जग्मुः ॥२२॥ प्रीत्या उत्फुल्लानि
आननानि आशयाः अंतःकरणानि च येषां ते कैः शिरोभिः ॥२३॥२४॥२५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभिप्रेत्य अंगीकृत्य तत्तदा उभाभ्यामपि ताभ्यामहादन्यस्यगेहं याति। यत्लक्षितः आविंदितः। यद्वा उभाभ्यां रूपाभ्यां तदलक्षितता
भ्यां अलक्षित इति॥२६॥२७॥ उंद्धर्षं उद्गत वर्षं हृदयं यस्य अस्रैः रविलैः क्लिन्ने ईक्षणे यस्य स एवंसच॥२८॥ ईश्वरान् ईश्वरं तत्तु
ल्यां श्रीयर्थे॥२९॥ प्रीणन् प्रीणयन्। संस्पृशन् संमर्दयन्॥३०॥ आत्मा चेतयिता साक्षी प्रकाशकः। स्वदृक् स्वप्रकाशः अथ

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया॥ उभयोराविशद्गेहमुभाभ्यां तदलक्षितः॥२६॥ श्रोतुमप्यसतां दूरान् जनकः स्व
गृहागतान्॥ आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः॥२७॥ प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः॥ नत्वा तदंघ्रीन्
प्रक्षाल्य तदपो लोकपावनीः॥२८॥ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान्॥ गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृ
षैः॥२९॥ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान्॥ पादावंकगतौ विष्णोः संस्पृशन् शनकैर्मुदा॥३०॥ राजोवाच॥
भवान्हि सर्वभूतानां आत्मा साक्षी स्वदृक्प्रभो॥ अथ नस्त्वत्पदांभोजं स्मरतां दर्शनं गतः॥३१॥ स्ववचस्तदृतं कर्तुमस्म
द्दृग्गोचरो भवान्॥ यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः॥३२॥ कोन्नु त्वच्चरणांभोजमेवंविद्विसृजेत्पुमान्॥ निः
किंचनानां शांतानां मुनीनां यस्त्वमात्मदः॥३३॥ योवतीर्य यदोर्वंशे नृणां संसरतामिह॥ यशो वितेने तच्छांत्यै त्रैलोक्यवृजि
नापहं॥३४॥ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे॥ नारायणाय ऋषये सुशांतं तप ईयुषे॥३५॥ दिनानि कतिचिद्भूमन्
गृहान्नो निवस द्विजैः॥ समेतः पादरजसा पुनीहीदं निमेः कुलं॥३६॥ इत्युपामंत्रितो राज्ञा भगवान् लोकभावनः॥ उवास कु
र्वन् कल्याणं मिथिलानरयोषितां॥३७॥

अत्र कारणात्॥३१॥ अनंतो बंधुरपि श्री भार्यापि अज पुत्रोपि॥३२॥३३॥ तच्छांत्यै संसारोपशमाय॥३४॥३५॥ गृहान् गृहेषु इत्यर्थः॥
॥३६॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० धुन्वन्नुपरि भ्रामयन् ॥३८॥ अवनिजे अवनिर्निजे प्रक्षालितवान् ॥३९॥४०॥ फलै राम लकादिभिरर्हणेन उशीरैस्तृणविशेषपल्लैसु
१०१ वासितैः शिवैरमृतवत्स्वादुभिरंबुभिः सुरभ्या मृदा कस्तूरीप्रमुखया सपर्यया पूजया यथोपपन्नया नाया सेनसंपन्नया भर्ता
नुपद्रव लब्ध्वा वा सत्वविवर्द्धनं यदंध अत्रं तेन च ॥४१॥ अस्य कृष्णस्य सामूर्त्तिः सस्या निकेते भूमेरैश्वसर्वतीर्थास्पदरेण
भिः ॥ कृष्णादिभिर्यसंगमसममकुतोन्चभूदिति अचिति विस्मये यद्वा ॥ आ इति केनु इति विस्मये ॥४२॥ उपस्थितसमीपउ

श्रुतदेवोच्युतं प्राप्तं स्वगृहान् जनको यथा ॥ नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त्त ह ॥३८॥ तृणपीठ वृषिघेतानां
नीतेषूपवेश्य सः ॥ स्वागतेनाभिनंद्यांघ्रीन् सभार्यो वनिजे मुदा ॥३९॥ तदंभसा महाभाग आत्मानं स्वगृहान्वयं ॥
स्नापयां चक्रु उद्धर्षो लब्धसर्वमनोरथः ॥४०॥ फलार्हणोशीरशिवामृतांबुभिर्मृदा सुरभ्या तुलसी कुशांबुजैः ॥
आराधयामास यथोपपन्नया सपर्यया सत्वविवर्द्धनांधसा ॥४१॥ सतर्कयामास कुतो ममान्वभूत् गृहांधकूपेप
तितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः ॥४२॥ सूपविष्टान् कृतातिथ्यान्
श्रुतदेव उपस्थितः ॥ सभार्यः स्वजनापत्य उवाचांघ्यभिमर्शनः ॥४३॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तं परं
परमपूरुष ॥ यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥४४॥ ॥ ॥ ॥ ॥ १०१

पविष्टभार्या भर्त्तव्यास्वजना अपत्यानि च तैः सहितः श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दयतीति संघ्यभिमर्शनः ॥४३॥ यर्हीदं प्रविष्ट
स्तदैव दर्शनं प्राप्तं इति स एव सन्मात्रो घट नीभूत स्वाभिप्रायः ॥ यद्वा न अस्माभिरद्यैव प्राप्तं इति न किंतु तदैव प्राप्तं यर्हीदं वि
श्वं शक्तिभिः सत्वादिभिः सृष्ट्वा स्वसत्तया नु प्रविष्टः स्वांदर्शनं तु परं केवलेऽद्यैव प्राप्तं इति ॥४४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायासृष्टिप्रवेशयोरविद्यास्टष्टिप्रवेशौ दृष्टांततयाह। यथेति। आत्ममायया स्वादिव्येव सृष्टैः। यद्वा आत्मनस्तत्त्वमापयेति॥४५॥ किंच। शृण्वतामिति। नित्यं श्रवणकीर्त्तनादिपराणां मम लोकानां मपि हृद्येव त्वं भासि मम तु लोके च नो चरस्त्वं अहो भाग्यमिति भाव॥४६॥
ननु सर्वेषां हृदि स्थितके थं केषां चिदेव हृदि भातिमेघेस्सूर्यवत् जीवोपाधिभिरंतरितत्वादिति यदुच्यते तर्हि निकस्या पिभायादित्य आद
त आह। हृदिस्थोपीति कर्मभिर्विक्षिप्तं वे तो येषां तेषां मात्मशक्तिभिरहंकारादिभिरग्राह्यश्च वाहितोपि उपेतगुणप्राप्तश्रवणकीर्त्त
नादिसंस्कारआत्मा अंतःकरणं येषां तेषां मंतिसमीपेऽव्यवहितस्त्वमित्यर्थः॥४७॥ एतदेवप्रपंचयन्नमस्यति नमो स्त्विति तितेतुभ्यं
यथा शयानपुरुषो मनसैवात्ममायया॥ सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते॥४५॥ शृण्वतां गदतां शश्वदर्चतां त्वाभिवं
दतां॥ नृणां संवदतामंतर्हृदि भास्यमलात्मनां॥४६॥ हृदिस्थोप्यतिदूरस्थः कर्मविक्षिप्तचेतसां॥ आत्मशक्तिभिरग्राह्यो
प्यंत्युपेतगुणात्मनां॥४७॥ नमोस्तु तेध्यात्मविदां परात्मने ह्यनात्मने स्वात्मविभक्तमृत्यवे॥ सकारणाकारणलिंगमीयुषे
स्वमायया संवृतरुद्धदृष्टये॥४८॥ स त्वं शाधि स्वभृत्यान्नः किं देव करवाम ते॥ एतदंतो नृणां क्लेशो यद्भवानक्षिगोचरः हे
॥४९॥ श्रीशुकउवाच॥ तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा॥ गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह॥५०॥ राम ॥
नमोस्तु अध्यात्मविदां निरत्तदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन प्रकाशमानायमोक्षप्रदायेत्यर्थ॥ अनात्मने देहाद्यभिमानि
ने जीवाय परत्वेनाप्रकाशमानत्वात् स्वात्मनः सकाशात् विभक्तसमर्पितो मृत्युः संसारो येन तस्मै कुत एतत्तत्राह सकारणं महदादिकार्यं अ
कारणं प्रकृतिस्तदुभयलिंगमुपाधिं नियम्यतया ईयुषे प्राप्तवते अतउभयं नियंतुस्त्वत्सकाशान्न दुभयवश्यापजीवाय विभक्तमृ
युरित्यर्थः। नियंतृनियम्यत्वे कारणं वदन्नाह स्वमायया संवृतेति। अतो तुस्से श्वर्यत्वान्नियंत्रे तुभ्यं नमः किंचारुद्धदृष्टये मायाविवादेव
अन्येषां रुद्धा आवृता दृष्टिर्येन तस्मै यद्वा स्वमायया स्वस्त्वस्यासंवृता अन्येषां च रुद्धा दृष्टिर्येन तस्मै इत्येकं पदं॥४८॥ स एवं भूतपर
मेश्वरस्त्वं नो स्मान्स्वभृत्याननुशाधि अनुशिक्षय॥४९॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्मिन्नादरमत्यधिकं ब्राह्मणे पुमं दर्शयिवा लक्ष्यलोकसंग्रहपरो भगवान्मत्तोपि ब्राह्मणेषु श्रद्धातिरेकं कुर्वित्येवं तमनुशास्ति ब्रह्मन्निति
सत्तभिमपाहृदिस्थेन ॥५१॥ देवाद्भ्योपि ब्राह्मणाः श्रेष्ठा इत्याह देवा इति ते शनैः पुनंति एते तु सद्य किं चादेवादीनियत्य नंति तदप्यर्हत्तमा
नामीक्षया ॥५२॥ ममैकलोपरिकल्पनमुपास्तिस्तया युत ॥५३॥ किंच । ब्राह्मणाराधनमेव मम प्रेष्टमित्याह । वेतिहेतुमाह । सर्ववेदमयो

श्रीभगवानुवाच ॥ ब्रह्मंस्तेनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् ॥ संचरंति मया लोकान्पुनंतः पादरेणुभिः ॥५१॥ देवा
क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः ॥ शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया ॥५२॥ ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्रा
णिनामिह ॥ तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ॥५३॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं ॥ सर्ववेदमयो विप्रः
सर्वदेवमयो ह्यहं ॥५४॥ दुष्प्रज्ञा अविदित्वैवमवजानंत्यसूयवः ॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥५५॥
चराचरमिदं विश्वं भावा ये चास्य हेतवः ॥ मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ॥५६॥ तस्माद्ब्रह्मऋषीनेतान्ब्र
ह्मन्मच्छ्रद्धयार्चय ॥ एवं चेदर्चितोस्म्यद्धा नान्यथा भूरिभूतिभिः ॥५७॥ श्रीशुक उवाच ॥ स इत्थं प्रभुणादिष्टः सह
कृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिं ॥५८॥ एवं स्वभक्तयो राजन्भगवान्भक्तभक्ति गद
मान् ॥ उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥५९॥ इति श्रीभागवते महापुराणे दशमस्कंधे षडशीतितमो १०२
ध्यायः ॥८६॥छ॥

विप्र इति प्रमाणाधीनत्वात् प्रमेयस्यापि वेदमयो विप्रो देवमयादस्मात्कृपाश्रेष्ठ इत्यर्थः ॥५४॥ असूयवो दोषदृष्ट्यपूज्यबुद्धयः ॥
॥५५॥ अस्य विश्वस्य हेतवो भावा महदादय मदीक्षया ममैव सर्वं नेक्षया ॥५६॥५७॥५८॥ सन्मार्गं सितावेदानां त्रिकांडविषयाणां
प्रवृत्तिप्रकारमादिश्य ॥५९॥ दशमे षडशीतितमोध्यायः ॥८६॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्ताशीतितमे नारायण नारद वादतः॥ वेदैः स्तुतिर्गुणालंबा निर्गुणावधि वर्ण्यते॥ ॐ नमो भगवते वासुदेवाय॥ वागीशा यस्य वदने लक्ष्मी
र्यस्य च वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥१॥ संप्रदायविशुद्ध्यर्थं स्वीयनिर्बंधयंत्रितः॥ श्रुतिस्तुतिमितव्याख्यां करिष्यामि
यथामतिः॥ श्रीमद्भागवतं पूर्वैः सारतः सन्निषेवितं मया तु तदुपस्पृष्टमुच्छिष्टमुपचीयते॥ पूर्वाध्यायांते एवं स्वभक्तयो राजन्भगवा
न्भक्तभक्तिमान्। उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात्। इ तत्र सन्मार्गं सतां स्वतः प्रमाणभूतानां प्रमप्रमाण्यकारणरहिता
नां वेदानां मार्गं ब्रह्मपरत्वमुपदिश्य भगवानगादित्युक्तं। तत्र वेदानां ब्रह्मपरत्वमघटमानं मन्वानः पृच्छति। ब्रह्मन्निति। तत्र तावं
न्मुख्या लक्षणा गुणभेदवत्त्रिधा शब्दप्रवृत्तिः। मुख्यापि रूढियोगभेदेन द्विधा रूढिश्च स्वरूपेण जात्या गुणेन वा निर्देश्यार्हं वस्तुति
संज्ञासंज्ञिसंकेतेन प्रवर्त्तते॥ यथा डित्थः गौः शुक्ल इति लक्षणा च तेनैव संकेतेनाभिहितार्थसंबंधिनि यथा गंगायां घोष इति। गौणी

राजोवाच॥ ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः॥ कथं चरंति श्रुतयः साक्षात्सदसतः परे॥१॥

चाभिहितार्थलक्षितगुणयुक्ते तत्सदृशे यथा सिंहो देवदत्त इति यथाहुः। अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते। लक्ष्यमाणगुणे
र्योगाद्वृत्तिरिष्टा तु गौणता। योगवृत्तिः स्मृता एतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन यथा पंकजं औप
गवः पाचक इत्यादि। तत्र तावद्ब्रह्मणि रूढिवृत्तिर्न संभवतीत्याह। साक्षात्कथं चरंतीति तत्र हेतुः। अनिर्देश्य इति। अनिर्देश्यत्वेपि हे
तुं वदन् गुणवृत्तिं निराकरोति। निर्गुणे गुणवृत्तय इति। गुणे वर्त्तमाना अपि निर्गुणे कथं चरंतीत्यर्थः। निर्गुणत्वे च हेतुं वदन् लक्षणां
योगं च निराकरोति सदसतः पर इति कार्यकारणाभ्यां परस्मिन्नसंगे केनचिदपि संबंधाभावान्न लक्षणा योगवृ
त्ती संभवत इत्यर्थः। एवं पदार्थत्वायोगादपदार्थस्य च वाक्यार्थत्वायोगान्न श्रुतिगोचरत्वं ब्रह्मण इत्यभिप्रायः॥१॥ राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०३०
१०२

उत्तरमाह। बुद्धींद्रियेति बुद्ध्यादीनुपाधीन्। जनानामनुग्राहिणां जीवानां मात्रार्थं प्रभुरीश्वरोऽसृजत्। मीयंत इति मात्रा विषयात
दर्थं भवार्थं भवो जन्मलक्षणं कर्मतत्प्रभृतिकर्मकारणार्थमित्यर्थः। आत्मने लोकांतरगामिने। आत्मनस्तत्तल्लोकभोगायेत्यर्थः। अक
ल्पनाय कल्पनानिवृत्तये मुक्तये इत्यर्थः। अर्थधर्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्यार्थः। जनानामिति वदन् जीवार्थमीश्वर
स्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति। प्रभुरितीश्वरस्योपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति अयमभिप्रायः॥ सगुणमेव गुणै
रनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं सच्चिदानंदभगवंतं
श्रुतयः प्रतिपादयंति यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरः। सोऽका
मयत बहुस्यां स ऐक्षत तत्तेजोऽसृजत। सत्यं ज्ञानमनंतं ब्रह्मेत्याद्याः। तथाभूतेश्वरतो तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वम
सीत्यादिवाक्यानि बोधयंतीति तत्र च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते॥ तत्र प्रकारांतरेण घटमानं ब्रह्मणि पर्यवसानं गमयंतीति तथा

श्रीशुक उवाच। बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः॥ मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च॥२॥

हि। न तावद्वैश्वदेव्यामिक्षेति वदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं तथोक्तं। आमिक्षां देवतायुक्तां वदत्येव तद्धितः। आमिक्षाप
दसान्निध्यात्तस्यैव विषयार्पणमिति। कुतः भिन्नार्थत्वात्। न चाऽजहत्स्वार्थया तिरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमि
तिवत्। यथोक्तं। स्वबुद्ध्यारच्यते येन विशेष्यं तद्विशेषणमित्यादि। कुतः विरुद्धार्थत्वेन तद्योगात्। न च जहत्स्वार्थत्वेन संबंधिलक्षण
या कुसुमितद्रुमा गंगेतिवत्। कुतः एकार्थत्वस्य विवक्षितत्वात्। अतो जहदजहत्स्वार्थलक्षणयासो यं देवदत्त इतिवद्विरुद्धांशत्यागेना १०२
नुगतचिदंशेनैकार्थेन सामानाधिकरण्येन निर्गुणे न पर्यवसानं॥ अस्थूलादिवाक्यानां तु साक्षात् साक्षादुपाधिनिषेधेन तत्पदार्थबोध.
न उपयोगात् निर्गुण एव पर्यवसानं तथा चात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादिना विशिष्टमालंबनं वक्ष्यति। अंते च श्रुतयस्त्वयि हि फल
तन्निरसनेन भवन्निधना इत्युपसंहरिष्यति उपासनादिवाक्यानां त्वन्यथा प्रवृत्तस्यैवात्र दर्शनेन ज्ञानसाधनेन तत्परत्वमित्येषा दिक्॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र चानादिशिष्टपरंपरागतत्वान्नसंदेहो युक्त इत्याह। सैषेति यथोक्तालंबना ब्राह्मी ब्रह्मपरा श्रद्धया आदरेण वैतंडिकतर्कानभिनिवेशेन
यः श्रवणादिना धारयेत्तस्य अकिंचनः निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति।३। एतदेव सर्वश्रुत्यर्थं निरूपेतत्प्रपंचयितुमिति
हासं प्रवर्तयति अत्र ते नारायणान्विता नारायणः प्रवक्तृत्वेनान्वितो यस्यां तां गाथां मितिहासं॥४॥ पा॥ छ॥ ७॥ ८॥ ब्रह्मसत्रमिति यथा य
१०क जमाना ऋत्विगादिरूपेण यत्र कर्म कुर्वंति तत्कर्म सत्रं प्रसिद्धं॥ तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्ममीमांसंते तद्ब्रह्मसत्रं॥ १॥ ह्यहं न
सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः॥३॥ अत्र ते वर्णयिष्यामि गाथां नारायणा
न्वितां॥ नारदस्य च संवादमृषेर्नारायणस्य च॥४॥ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः॥ सनातनमृषिं द्रष्टुं ययौ नारा
यणाश्रमं॥५॥ यो वै भारतवर्षेस्मिन् क्षेमाय स्वस्तये नृणां॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः॥६॥ तत्रोपविष्टमृषिभिः
कलापग्रामवासिभिः॥ परीतं प्रणतोपृच्छदिदमेव कुरूद्वह॥७॥ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदं॥ यो ब्रह्मवादः
सर्वेषां जनलोकनिवासिनां॥८॥ श्रीभगवानुवाच॥ स्वायंभुवे ब्रह्मसत्रं जनलोकेभवत्पुरा॥ तत्रस्थानां मानसानां मुनीनामू
र्ध्वरेतसां॥९॥ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते॥ तत्र हायमभूत्प्रश्नस्त्वं मां य
मनुपृच्छसि॥१०॥ तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे॥११॥ सनंदन
उवाच॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः॥ तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं॥१२॥ ॥ ॥
हिमया कथं तत्तज्ज्ञातमित्यत आह। श्वेतद्वीपमिति तदीश्वरं तत्रस्थमनिरुद्धमूर्तिं॥१०॥ ननु सर्वे ब्रह्मज्ञास्तेषु कस्तत्र वक्ता प्रष्टा वा तत्राह। तुल्यश्रुते
तेति। श्रुतादिभिरविशेषाः। अरिमित्रोदासीनहीनत्वेन निरूपमकरुणाः। अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेनैके प्रवक्तारः ह्यल्पो
न्ये प्रष्टारित्यर्थः॥११॥ स्वसृष्टमिति। स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्रायमाणमिवर्वर्तमानं। तदंते प्रल
यांते तल्लिंगैस्तत्प्रतिपादकैर्वाक्यैः परं ईश्वरं सृष्टिसमये प्रथमनिश्वासप्रसृताः श्रुतयः प्रबोधयामासुः॥१२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०रा०उ० सुश्लोकैः शोभनाः श्लोकाः कीर्त्तयो येषु तैः पराक्रमैः॥१३॥ जय जयेति। भो अजित जय उत्कर्षमाविःकुरु। आदरे वीप्सा। केन व्यापारेण। अ
१०४ गजगदोकसां अगानि स्थावराणि जगंति जंगमानि च ओकांसि शरीराणि येषां जीवानां तेषां अजामविद्यां जहि नाशय। किमिति गुणव
ती हंतव्येत्यत आह दोषगृभीतगुणां दोषाय आनंदाद्यावरणाय गृहीता गुणा यया तां। हृग्रहोर्भः छंदसीति भकारः। इयं स्वैरिणीव पर
प्रतारणाय गुणान्गृण्हातीति अतो हंतव्येति तर्हि मय्यपि दोषमावहेदिति मयापि तत्र का शक्तिः स्यात्। अत आह त्वमिति यत् यस्मात्त्वमा
त्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योसि वशीकृतमायत्वादिति भावः। ननु स्वयमेव ते ज्ञानवैराग्यादिना किं
नेहमुरित्येत आह। अखिलशक्त्यावबोधकेति। तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधकः। अतो न ते ज्ञानादौ स्वतंत्रा इति भावः॥

यथा शयानं सम्राजं वंदिनस्तत्पराक्रमैः॥ प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयंत्यनुजीविनः॥१३॥ श्रुतय ऊचुः॥ जय जय जह्य
जामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः॥ अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजे
यात्मना च चरतोऽनुचरेन्निगमः॥१४॥ ॥१॥

अहमकुंठज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादिशक्त्यवबोधेन नाविद्यां हंतेत्यत्र किं प्रमाणमिति चेत्। अहमेव प्रमाणमित्याह।
निगमः वेदः ननु एवंभूते मयि कथं श्रुतीनां प्रवृत्तिस्तत्राह। क्वचिदिति कदाचित्सृष्ट्यादिसमये अजया मायया चरतः। क्रीडतः
नित्यं चालुप्तभगतया स्वज्ञानानंतानंदैकरसेनात्मना च चरतो वर्त्तमानस्य निगमोनुचरेत् प्रतिपादयेत्। कर्मणि षस्यो यतो १०४
वा इमानि भूतानि जायंते। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणं प्रपद्ये य आ
त्मनि तिष्ठन्। सत्यं ज्ञानमनंतं ब्रह्म। यः सर्वज्ञः सर्ववित् इत्याद्यागमकदंबस्त्वामेवंभूतं प्रतिपादयतीत्यर्थः॥ जय जयाजित ज
गमाद्यनित्यजामुपनीतमृषागुणां। नहि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवता तव॥१४॥ ॥ ॥ ॥

जग

नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेकथं मामेव प्रतिपादयंतीयत इंद्रो जगतो वसितस्य राजेत्यादिभिरिंद्र जगतो जंगमस्य अवसितस्य स्थावरस्य च राजेति प्रतिपाद्यते। तथा अग्निर्मूर्द्धा दिव इत्यादिभिश्चाग्निरुक्तस्तेनाग्न्यादयः प्रतिपाद्यंते तत्राह। बृहदुपलब्धमेतदिति अयमर्थः एतदुपलब्धं इदमिंद्रादि सर्वं बृहत् ब्रह्मत्वमित्येवावयंति जानंति कथं बृहत एवावशेषतया वाशिष्यमाणत्वेन कुतः यतो बृहतः सर्वस्योदयास्तमयौ उत्पत्तिलयौ सर्वोपादानत्वात् तर्हि किं विकारित्वं बृहतः न अविकृतात् विवर्ताधिष्ठानत्वेनाविकारादित्यर्थः॥ वाक्यद्वयं उपमार्थः। यथा घटादेर्विकृतेर्मृदि उदयास्तमयौ तद्वत्। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिभिस्तया प्रति

बृहदुपलब्धमेतदवयंत्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदि वाविकृतात्॥ अत॥
ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवंति भुवि दत्तपदानि नृणाम्॥१५॥

पादनादित्यर्थः। अतः कारणादृषयो मंत्रास्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः। मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवंतः न पृथग्विकारेष्वित्यर्थः अत्र निदर्शनं कथमयथेति नृणां भूचराणां यत्र कुत्रापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंति अदत्तानि भवंति। अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं न व्यभिचरंति तथा यत्किमपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयंतीत्यर्थः॥ द्रुहिणवह्निरवींद्रमुखामरा जगदिदं न भवेत्पृथगुत्थितं। बहुमुखैरपि मंत्रगणैरजस्त्वमुरुमूर्त्तिरतो विनिगद्यसे॥१५॥ ॥२॥ ॥ ॥ ॥

द०स्कं०उ०
१०५
त्वमेवं सर्वनिगमगोचर इति सतो प्ररसाहुर्द्यंति॥ इति त वोति त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा भो अधिपते।
त्रिगुणमायामगीनर्त्तकसूरयो विवेकिनस्त्वखिललोकमलक्षपणकथामृताब्धिं सकलजनवृजिनानिरसनहेतुं की
र्त्तिसुधासिंधुमवगाह्य तिसुव्यतपंतीति तपांसि पापानि दुःखानि वा जहुस्त्यक्तवंतः॥ त्वदीयकथापात्रेण यदा पापत्यागः
तदा किमुवक्तव्यं ये पुनः स्वधाम विधुतारायकालगुणाः स्वधाम्ना स्वरूपस्फुरणेन विधूता सत्कारायगुणा अंतःकरण

इति तवसूरयस्त्र्यधिपते खिललोकमलक्षपणकथामृताब्धि
मवगाह्य तपांसि जहुः॥ किमुत पुनः स्वधामविधुताशयकाल
गुणाः परम भजंति ये पदमजस्रसुखानुभवं॥१६॥ ॥३॥ ॥

धर्मारागादयः। कालगुणा जरादयश्च ये स्ते तथा॥ हे परम तवाजस्रसुखानुभवं अखंडानंदानुभवं पदं स्वरूपं भजंति से १०५
वं ते तथाभूता दुःखानि त्यजंतीति। तद्यथा पुष्करपलाश आपो नाश्लिष्यंते एवमेवं विदितपापं कर्म न श्लिष्यते। न कर्मणा लि
प्यते पापकेन तत्सुकृतदुष्कृते विधुनुते एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति स्मादिश्रुतेरित्यर्थः।
सकलवेदगणेरितसद्गुणस्त्वमिति सर्वमनीषिजनारताः। कृपि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः॥१६॥३॥
जयंती

॥ येतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवोपयंति॥

असुर्या नाम ते लोका अंधेन तमसावृताः। तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः। तथा न चेदवेदीन्महती विनष्टिरित्याद्याः श्रुतयः पूर्वश्लो
कोक्तो भयविधो भजनहीनान्निंदंति। इतरद्देवेति। असुभृतो नराः यदि तेऽनुविधा अनुविदधतीत्यनुविधाः अनुवर्तिनो भक्ता इतियाव
त्। तर्हि श्वसंति जीवंति सफलजीवना भवंति इतरथा इतरद्देवभस्त्रा इव वृथा सा इत्यर्थः। न चाभक्तानामपि कामादिफलमस्त्येव।
कार्यकारणानुग्राहकत्वेन जीवनहेतोस्तस्याभजनेऽस्तु तथापि तदपि नास्ति आदित्याशयेनाह। महदहमाद्य इति महानहंकारश्च
आदिर्येषां ते यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्याः संतः अंडं देहं समष्टिव्यष्टिरूपं सृजंतः तत्र च पंचापि कोशानन्नमया
दीनाविश्य तत्तदाकारः सन्नयः चेतयते सत्वं तदाह पुरुषविध इति पुरुषस्यान्नमयादेर्विधेव विधो विधिराकारो यस्य स तथा
ननु चिदेकरसस्य कथं तत्तदाकारता॥ अतआह। अन्वयोऽत्रेति अत्र येष्वन्नमयादिष्वेतीत्यन्वयः अतस्तत्तदाकारतेति। ए

इतरद्देवस्वसंस्यऽसुभृतो यदि तेऽनुविधा महदहमादयोऽम्भस्य जन्यदनुग्रहतः॥ पुरुष
विधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतम्॥१७॥ ॥४॥

वं तर्हि सत्य प्रसंगात्वं च कथं तत्राह चरमोऽन्नमयादिषु य इति। अन्नमयादिषूपादिष्टप्राणेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेनो
क्तः स त्वमेवेति संबंधः। ननु तथापन्नमयादिष्वन्वितत्वेऽसंगत्वव्याहतिरेव तत्राह सदसतः परं त्वमथ यदेष्ववशेषमृतमिति।
सदसतः। स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तं तत्साक्षिभूतं। अवशेषं अवशिष्यतइत्यवशेषमबाध्यं॥ अथ अतएव ऋतं सत्यं।
तर्हि किमर्थं तेष्वन्वयउक्तः शाखाचंद्रवच्छुद्धस्वरूपलक्षणार्थं तथाहि। स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिर इत्यादिना स्थू
लसूक्ष्मपंचकोशानुपदिश्य तस्य पुरुषविधतामन्वेयं पुरुषविध इति पुनः पुनरत्वंदन्वितं तद्ब्रह्म पुच्छं प्रतिष्ठेति सर्वसाक्षिशुद्ध
स्वरूपनिरूपणमिति नवद्यं॥ नरवपुः प्रतिपद्य यदि त्वयि श्रवणवर्णनसंस्मरणादिभिः। नरहरे न भजंति नृणामिदं दृतिवदुच्छ्वसितं विफ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰उ॰ एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन संकृतनीयत्वमुक्तं अभक्तनिंदया च तदेव द्रढीकृत्येदानीमतत्त्वगाह्य महिमनि
१०६ प्रथमं तावदुपाध्यालंबनमुपासनमुदरं ब्रह्मेति शार्कराक्ष्या उपासते। हृदयं ब्रह्मेत्यारुणयो ब्रह्माहैवैतादि। उर्द्ध्वं त्वेवोदसर्प्पत्तच्छि
रोऽश्रयते स्यापाद्याः श्रुतयो विदधतीत्याह। उदरमुपासत इति। ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कूर्पदृशास्ते उदरालंबनं मणि
पूरकस्थं ब्रह्मोपासते ध्यायंति शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पशर्करा रजो विद्यते दृक्षु आक्षिषु येषां ते त
था रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत्। उदरस्य हृदयापेक्षया स्थूलत्वात्। यद्वा। कूर्प्पं सूक्ष्मं पश्यंत्या दृशा इत्यर्थः। तदा हृदय

उदरमुपासते य ऋषिवर्त्मसु कूर्प्पदृशाः परिसरपद्धतिं हृदयमारुणयो दहरं॥ तत उदगाद
नंत तव धाम शिरः परममं पुनरिह यत्समेत्य न पतंति कृतांतमुखे॥१८॥ ॥१८॥ ॥

स्थसूक्ष्मपेक्षालक्ष्यत्वप्रवेशाय प्रथममुदरस्थं उपासत इति भावः॥ आरुणयस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते॥ हृद
यविशेषणं परिसरपद्धतिमिति परितः सरंति प्रसर्प्पंतीति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः। विशेषण
स्य फलमाह। तत इति ततो हृदयात् भो अनंत तव धाम उपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्द्धानं प्रति १०६
उदगात् उदसर्प्पत्। मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरंध्रं प्रस्फुटितं इत्यर्थः। कथंभूतं धाम। यत्समेत्य प्राप्य पुनरिह कृ
तांतमुखे मृत्युमुखे संसारे न पतंति। तथा च श्रुतिः। शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नम
मृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति। उदरादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः हंति मृत्युभयं देवो हृद्गतं तमुपास्महे॥१८॥
॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ईश्वरस्यापि तर्हि जीववत् दूदरादि संबंधे तदनुप्रविष्टस्य तत्तारतम्ये ऽसति सविशेषेणोपास्यत्वमिति मामाशंकां परिहरंत्यः। एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ इत्याद्याः श्रुतयः श्रुवंतीत्याह स्वकृतविचित्रयोनिष्विति स्वयंकृतासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशात् तारतम्यहीनो ऽपि कार्यानुसारेण तथा प्रसंभवात्। विशन्निव वर्त्तमानस्तरतमतो न्यूनाधिकभावेन च काश्यस्यवभासते। स्वकृतायोनीरनुकरोतीति स्वकृतानुकृतिः अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनो ऽपि का

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः॥ अथवि
तथास्वमूष्ववितथं तवधामंविरजधियो ऽन्वयंत्यभिविपस्यव एकरसं॥१२॥ ॥६॥ ॥

ष्ठानुसारेण तथा प्रकाशते तद्वत्॥ अथामुमिथ्याभूतास्वभूतेषु योनिषु अवितथं सत्यं यत् ऽसमप्रविशेषं अतः सत्यं तव धामस्वरूपं विरजधियो निर्मलमतयः। अन्वयंति जानंति। नु इति पृथक् पदं वा। अत्र हेतुः॥ अभिविपन्यव इति अभितो विगतं व्यवहारः पण व्यवहारे इत्यस्य रूपं पन्युरिति। ऐहिकामुष्मिकफलकर्मरहिता इत्यर्थः। अविशेषत्वाद्देवैकरससन्मात्रं अतस्त्वोपाधिकृत तारतम्याभावादप्रच्युतैश्वर्यस्योपास्यत्वमिति भावः। स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं। सर्वानुस्यूतसन्मात्रं भगवंतं भजामहे॥११॥ ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० १०७

अपि च कुतो नियम्यमाशंका स्यात्। भगवतो देहाद्युपाधिकृतदोषाप्रसंग इति ये तो ऽविद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भावं
लक्षणया बोधयंत्यस्तद्दोषं निषेधयंति। सत्यं श्रायं पुरुषेयश्चासावादित्ये स एकः। तत्त्वमसीत्याद्याः श्रुतयः। ननु क्रत्वर्थस्यात्म
नस्तोति रियमीश्वरत्वेन क्रियते न तु तस्येश्वरत्वं बोध्यते नैतद्युज्यते यतस्तान्त्रे यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथि
ता ह्यर्थाः प्रकाशंते महात्मन इत्याद्याः श्रुतयः कृतीवतारस्य भगवतश्चरणभजनमुपायं वदंतीत्याहुः। स्वकृतपुरेष्विति स्वकर्मोपा
र्जितेषु पुरेषु देहेषु अमीषु नरादिषु भोक्तृत्वेन वर्त्तमानं पुरुषं आखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णस्य तवांशकृतं वदंति। अं

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंऽशकृतं॥ इति नृगतिं वि
विच्य कवयो निगमावपनं भवत उपासतेंघ्रिमभवं भुवि विश्वासिताः॥ २०॥ ॥७॥ ॥

शइव अंशः कृत इव कृतः। तद्रूपं वदंतीत्यर्थः॥ ननु कार्यकारणसंबंधस्य कुत एवंभूतत्वं। तत्राह। अबहिरंतरसंवरणमिति। ब
हिः कार्यमंतरं कारणं वस्तु तस्तदावरणश्च्छन्यं तयोरसत्त्वादित्यर्थः। इति एवं नृगतिं नुर्जीवस्य गतिं तत्त्वं विविच्य विशेध्य कवयः
अन्यथेदं न प्राप्यत इति जानंतः। निगमावपनं निगमोक्तकर्मणा मावपनं आसमंतादुप्यंते ऽस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्प
णविषयमित्यर्थः। यत्रार्पितानि कर्माणि मुक्तिफलं फलंतीति भवतोंघ्रिमभवं भवति वर्त्तके। विश्वसिताः कृतविश्वासाः। उपास
ते अर्चनवंदनादिभिः सेवंते भुवीति परलोके इदमेवोचितं दर्शयति॥ त्वदंशस्य ममहेशा न तन्मायाकृतबंधनं॥ त्वदंघ्रिसेवा मादिश्य १०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तेरन्यसाधनमपीतिवचनमनुचितमित्याशंक्याह भक्ति... दुरवगमे... र दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञा
पनाय तवात्ततनोराविःकृतमूर्त्तेः। चरितमहामृताब्धिपारवर्त्तपरिश्रमणाः चरितमेव महानमृताब्धिस्तस्मिन्परिवर्त्तोवगा
हस्तेन परिश्रमणाः परिवर्जनार्थः श्रमणं श्रमः गतश्रमा इत्यर्थः। अपवर्गमपि केचिन्न परिलषंति नेच्छंति कुतोन्यत्। इंद्रपदादि।
केचिदिति एवंभूता भक्तिरसिका विरला इति दर्शयति न केवलमेतन्नेच्छंति किंतु गृहा इति। तवचरणसरोजहंसकुलसंगविसृष्ट

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः॥ नप
रिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः॥२१॥ ॥८॥ ॥

गृहा इति। तवचरणसरोजहंसकुलसंगविसृष्टगृहा इति। तवचरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं तेन संगस्तेन वि
सृष्टा गृहा यैस्ते तथा अनेन श्रवणकीर्त्तने दर्शिते श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति॥ यथाह॥ यं सर्वे देवा नमंति मुमुक्षवो
ब्रह्मवादिनश्चेति॥ व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलया विग्रहं कृत्वा भजंत इति॥ ॥त्वत्कथामृतपाथोधौ विहरं
तो महामुदः। कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमं॥२१॥ ॥८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्क० उ०
१०८

आत्मा प्रमस्य पश्यंति न ते पश्यति कश्चन। न तं विदाथ य इमा जजा नान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्प्या च। सुतृप उक्थशा

सश्चरंतीत्याद्याः श्रुतयः अनुक्रोशेशेषोऽज्ञाद्यात्मनीश्वरेऽति मुपदिशंतीत्याह। त्वदनुपथमिति त्वदनुवर्त्तित्वात् त्वत्सेवोपयिकमिदं

कुलायं कौ लीयत इति कुलायं शरीरं आत्मसुहृत्प्रियवत्। आत्मा च सुहृच्च प्रियश्च तद्वत्। चरति स्वाधीनतया वर्त्तत इत्यर्थः। अ

तथापि त्वयि उन्मुखे हिते प्रिये आत्मनि च अप्यर्थे च कारः। एवंभूते तं सुसेव्येपि त्वयि बत अहो कष्टं न रमंति न सख्यादिना भजंति। अ

सदुपासनया देहाद्युपलालनेन आत्महनः प्रमादिनः कुतः यदनुशयाः यस्या असदुपासनायां अनुशयो अनुशयो वासना येषां कु

शरीरभृतः संतः उरुभये संसारे भ्रमंति परिवर्त्तते। अत आत्महन इति भावः। त्वय्या [illegible] जगन्नाथ मन्मनो रमतामिह। कदा मम द

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च॥ न बत रमंत्यहो असदुपासनयात्महनो य

दनुशया भ्रमंत्युरुभये कुशरीरभृतः॥२२॥ ॥९॥ ॥ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्म

रणात्॥ स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः॥२३॥ ॥१०॥ ॥

[illegible]जन्मना नु संभविष्यति॥२२॥ ॥९॥ ॥ इदानीमात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्याद्याः श्रुतयो ध्यानमं

गत्वेनोपदिशंतीत्याह। निभृतमरुन्मनोक्ष दृढयोगयुज इति। मरुतः प्राणः मनश्च अक्षाणींद्रियाणि च निभृतानि नियतानि येषां ते दृढयो

गं युंजंतीति दृढयोगयुजस्ते तथाभूता मुनयो हृदि यत्तत्त्वमुपासते तत्ते देवा अरयोपि तव स्मरणात् ययुः प्रापुः। स्त्रियोपि कामतः उ

रगेंद्रभोगभुजदंडविषक्तधियः अहींद्रदेहसदृशौ यौ भुजदंडौ योर्विषक्ता धीर्यासां ताः परिच्छिन्नदृष्टयः समदृशः सम अपरिच्छि

न्नं त्वां पश्यंत्यो वयं श्रुतयोपि निमा नित्या देवता अपि ते समाः [illegible] षयतया अंघ्रि [illegible] तत्सुधाः अंघ्रिसरोजं सुष्ठु धारयंत्यः इत्य

र्थः अयं भावः। इत्थं तव स्मरणत्वभावः। ये योगिनः [illegible] नं उपास [illegible] ता [illegible] याम [illegible] याः स्त्रियः कामतः प १०८

रूकरोति ॥ ति। नोईश्व

यतो वाचा निवर्त्तंते अप्राप्य मनसा सह। को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथाको वेद यत आबभूव। अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत्। तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति। श्रुतयः। भगवन् दुर्ज्ञेयं वदन्तो महिमेवो शरीकुर्वतीत्याह। कइह नु वेदेति। वत अहो भगवन् इह जगति अग्रसंभवं पूर्वसिद्धं। अवर जन्मलयः अर्वाचीनो सन्ति नाम्नवानुदे तु पुमान्वेद जानाति। ईश्वरस्य पूर्वसिद्धावन्यस्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणभाव माह। यत उदगादिति। यतः त्वत्तः ऋषिर्ब्रह्मा उत्पन्नः यं ब्रह्माणमनु उभये अध्यात्मिकाधिदैविका देवगणी उत्पन्नाः। ततोऽर्वाचीनाः सत्सु भवान् सर्वमपलोप्य उपसंहृत्य शायी तर्हि तदा अनुशायिनां जीवानां ज्ञानसाधनं नास्ति॥ यतस्तदा न सत् स्थूलं आका

कइह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये॥ तर्हि न सन्न चासदुभयं

न च काल जवः। किमपि न तत्र शास्त्रमवसृज्य शयीत यदा॥२४॥ ॥११॥ ॥ ॥

शादि। न चासत् सूक्ष्मं महदादि। न च उभयं सदसदात्मकं शरीरं। न च कालजवः तन्निमित्तभूतं कालवैषम्यं एवं सति तत्र तदा न किमपि इन्द्रियप्राणाद्यपि। न च ज्ञापकं शास्त्रमपि। अयमभिप्रायः। अवकाशस्थूलिंगतानां देहाद्युपाधिकृता तरायाणां कालकर्मवासनाविद्याकर्मलिनसत्त्वानां न तावत् ज्ञानसामर्थ्यं। तथा च श्रुतिः। न तं विदाथ य इमा जजान्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥ तदापि साधनाभावान्न भगवत् ज्ञानं॥ अतस्त्वदेकशरणतया श्रवणकीर्त्तनादिभक्तिरेव वस्तुतुपलयसमये न बलवत्तरमस्ति।

करेति॥ ॥ क्वाहं बुद्ध्यादिसंरुद्धः क्व च भूमन्महस्तव॥ दीनबंधो दयासिंधो भक्तिं मे नृहरे दिश॥२४॥ ॥११॥ ॥

दशा०उ०
१०९

इतोऽपि ज्ञानं सुशाक्यं उपादिशतामपि भ्रमबाहुल्यादित्याह। आनिमसत इति। असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो वदंति।
असत एव ब्रह्मलस्योत्पत्तिं ये च पातंजलादयः सत एवेकविंशति प्रकारस्य दुःखस्य नाशं मोक्षं वदंतिये नैयायिकाः। उत अपि
ये च सांख्यादय आत्मनि भिदां भेदं ये च मीमांसकाः विपण कर्मफल व्यवहारमृतं सत्यं स्मरंति वदंति। ते सर्वे आहापितैः आरोपि
तैर्भ्रमैरेवापदिशंतिन तत् वदृष्यासदेवसोम्येदमग्रआसीत्। ब्रह्मैवसन्ब्रह्माप्येति। अनीशयाशोचतिमुह्यमानः। अविद्या
यामंतरे वर्त्तमानाः स्वयंधीराः पंडितंमन्यमानाः जंघन्यमानाः परियंति मूढाः अंधेनैव नीयमाना यथांधाः॥ एकमेवाद्वितीयंब्र

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरंत्युपदिशंति त आरूपितैः॥ त्रिगुण
मयः पुमानितिभिदा यदबोधकृता त्वयि नः परत्र सभवेदवबोधरसे॥२५॥ ॥१२॥ ॥

ह्म। एक एवाहि भूतात्मा भूते भूते व्यवस्थितः॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादि श्रुति विरोधात्। किंच। वस्तुतः पुरुषस्य त्रि
गुणमयत्वे सर्वमिदं संगच्छेत न तु तदस्तीत्याह त्रिगुणमयः पुमानीति भिदा यदबोधकृता त्वयीति त्रिगुणमयः पुमानित्येनेनहे
तुना या भिदा। उपलक्षणमेतद्विद्वादि। सा यस्मात्त्वयि विषये अवबोधकृता त्वद्विषयाज्ञानविजृंभिता। तर्हि किमज्ञानमस्ति वस्तु
तः पुंसि नैवेत्याह ततः अबाधात् परे असंगे ऽवबोधरसे ज्ञानघने सः अबाधो न भवेत् न संभवतीत्यर्थः॥ ॥मिथ्यातर्कसुक
र्कशेरितमहावादांधकारांतरभ्राम्यन्मंदमतेरगाधमहिमंस्त्वद् ज्ञानवर्त्मास्फुटं॥ श्रीमन्माधववामनत्रिनयनश्रीशंकरश्रीपते

ननु यद्यसन्नोत्पद्यते यदि चात्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपंचजातं पुरुषश्चैतद्यथास्तीत्येकं स्यात् कथं तयोः सत्वेन प्र
तीतिरत आह सदिव मन इति मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातमसदेव सदिव विभातीति कथमिति चेत्त
त्राह। त्वयीति त्वय्यधिष्ठाने अधिष्ठानसत्तया सद्वत् प्रतीयत इत्यर्थः। न केवलमिदं काशास्पदं। किंतु आमनुजात् मनुजः पुरु
षः अभिविधावाकारः। पुरुषमभिव्याप्येति पुरुषस्यापि पृथक्सत्वप्रतीतिर्मनोमात्रविलसितेत्यर्थः। तथा च श्रुतिः। असतो
धि मनोऽसृजत मनः प्रजापतिमसृजत प्रजापतिः। प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति नन्वात्मविदः

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः॥ नहि विकृ
तिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं॥२६॥ ॥१३॥ ॥

मपि नि विश्वे सदेव स्फुरति॥ अतः कथमसत्स्यादत आह सदभिमृशंतीति आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं विश्वमा
त्मतयैव सदभिमृशंति सदिति जानंति॥ आत्मकार्यत्वादात्मरूपमित्यर्थः॥ तथा हि यदुपादानं कं यत्कार्यं भवति तत्तेनैव रू
पेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति। नहि विकृतिमिति। कनकं कनकस्य विकृतिं कुंडलादि कनकार्थिनो नहि
त्यजंति। अत्र हेतुः। तदात्मतया कनकरूपत्वेनेत्यर्थः। अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं
निश्चितं॥ यस्त्वतः सदाभाति जगदेतदसत्स्वतः। सदाभासमसत्यास्मिन् भगवंतं भजामतं॥२६॥ ॥१३॥ ॥

द०श०३०
११०

ननु सत्संज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिश्रुतिभिरेवंभूतस्य भगवतः प्रतिपाद
नात्। तत्त्वज्ञानं सुकरमेवेति कृतं भजनयात आह। तव परिचर्यां चरंतीति। तवेति कर्मणि षष्ठी त्वां ये परिचरंति। छंदसि व्यवहि
ताश्चेति यच्छब्देन व्यवधानप्रदोषः। केन रूपेण अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि निकेतो यस्य स तथा तस्य भावस्त
त्तया। सर्वभूतावासतयेत्यर्थः। उत एव अपवर्गं गच्छति स्फुरत्यतएव निःशंकं ते मृत्योः शिरः मूर्ध्नि पदं पादे नाक्रमंति मृत्यो
र्मूर्ध्नि पदं दधाति तं तरंति मुच्यंत इत्यर्थः। ये पुनर्विमुखा अभक्तास्तान् गिरां वाचां पशूनिव विबुधानपि विदुषोऽपि वयसेव
ध्नासि। कुतः त्वयि कृतसौहृदाः त्वयि कृतं सौहृदं प्रेम यैः ते खलु निःश्रेयसं पुनंति पादेनयति। आलानं अभक्तास्तान् गिरां तान् पीति

तव परिचर्यां चरं सखिल सत्त्वनिकेततया तत उत पदाक्रमंत्य विगणय्य शिरो निर्ऋतेः॥ परिवयसे पशू
निव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः॥ २७॥ ॥ १४॥ ॥

न दोषः। नेतरे। तथा च श्रुतिः। तस्य वाक्तंतिर्नामानि तदस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितमिति अयमभिप्रायः। सत्यमेवं ब्र
ह्मात्मा नेश्रुतयः प्रतिपादयंति तत्र च यद्यपि वस्तुतोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते। तथाप्यसंभावनाविपरीतभाव
नातिरस्कृतत्वात्मालिन्यचित्तेषु परोक्षमिव भवतीति नापरोक्षसंसारभ्रम निवर्तते इत्यर्थः॥ भगवत्परिचर्यया तु सम्यग्गतमल
त्वान्तःप्रसादेन लब्ध्वा परोक्षज्ञानो नामयत्नत एवाकरकलितो मोक्ष इति तथा च श्रुतयः देहांते देवः परं ब्रह्म। तारकं व्याचष्टे
यमेवैष वृणुते तेन लभ्यः। यस्य देवे परा भक्तिरित्याद्यतः यं तु तापैः प्रयतं तु पर्वतादृढं तु तीर्थानि पठं तु चागमान्। यजंतु योगे ११०

ननुयद्यपि वत्सलस्तन्निकेतनसेवनेन भगवतः सेव्यत्वमुच्यते तर्हि तत्तत्कारणसंबंधात् कर्तृत्वभोक्तृत्वे प्रसज्येयातां। न वस्तुतस्तथा
त्वमिति चेत्। तर्हि जीवानामपि तत्तुल्यत्वमिति केन विशेषेण पुनः सेव्यसेवकत्वमिति तामाशंकां परिहरंस्तुः। अपाणिपादो जवनो
ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयः स्तुवंतीत्याह त्वमकरण
इति करणसंबंधरहित एवाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इंद्रियाणि तेषां शक्तिं धारयति प्रवर्त्तयतीति
तथाभूतः। स्वराट् यतः स्वेनैव राजसे दीप्यसे। नहि स्वतःसिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः॥ अतस्तव बलिमुद्वहंति पूजां कुर्वंति अज
या अविद्यया सहितास्त्वया दत्तामित्यर्थः॥ अनिमिषा देवा इंद्रादयः तत्सृज्या विश्वसृजो ब्रह्मादयोऽपि यथा सर्वलोका एवं किंकराः।

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयाऽनिमिषाः॥ वर्षभुजोऽ
खिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः॥ २८॥ ।१५५। ॥

स्वामिनं सेवंते। यथाऽविद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः। समदंतीति च मनुष्यैर्दत्तं हयकव्यादिलक्षणं बलिं भक्षयंति। अत्र दृष्टां
तः। वर्षभुजोऽखिलक्षितिपतेरिवेति। यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्य स्वप्रजादत्तं बलिं भुंजो बलि
मुद्वहंति तद्वदिति। कथं बलिं हरंति तदाह विदधति यत्र ये त्वधिकृता भवतश्चकिता इति त्वत्तो भीताः संतो यस्मिन् कर्माणि येन नियुक्ता
स्तत्र कुर्वंतीति त्वदाज्ञापालनमेव बलिवहनमित्यर्थः। तथा च श्रुतिः। भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः। भीषास्मादग्निश्चें
द्रश्च मृत्युर्धावति पंचम इति अनिंद्रियोऽपि यो देवः सर्वकारकशक्तिधृक्। सर्वज्ञः सर्वकर्त्ता च सर्वसेव्यं नमामि तं॥ २८॥ ।१५५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०उ० तेदैवकारणंप्रवर्त्तकमीश्वरंकरणपरतंत्रानराभजंतीसक्ता। नकेवलमियंदैवकारणंततउपसन्नत्वेनापिततत्परतंत्रत्वादितिवदंति
१११ यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंतिएवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिसर्वएतआत्मानोव्यु
च्चरंतीत्यादिश्रुतयइत्याह। स्थिरैचरजातयइतिहेविमुक्तेति। यमुक्तयदितवअजयामायया। विहरःक्रीडाभवति। तदास्थिर
चरजातयःस्थिराश्चचराश्चजातयःजात्यालिंगितादेहायेषांतेजीवाःस्युःभवेयुः। कथंभूतस्यततःअजातःपरस्यःहरेवर्त्त
मानस्यासंगस्येत्यर्थः। कथंविहारःउदीक्षणलेशेन। ननुमपिलीनानांजीवानांकथंजन्मस्यात्तत्राह। उत्थनिमित्तयुजइति।
ईक्षयैवउत्थानिउत्थितानिआविर्भूतानिनिमित्तानिकर्माणितद्युक्तानिलिंगशरीराणिकस्यवियतइवआकाशात्तेयुंजंतइ

स्थिरचरजातयःस्युरजयोत्थनिमित्तयुजो। विहरउदीक्षयायदिपरस्यविमुक्तततः॥ नहिपरमस्य
कश्चिदपरोऽपरश्चभवेद्वियतइवापदस्यतवशून्यतुलांदधतः॥२९॥ ॥१७६॥ ॥

तितेतथा। ननुकिंनिमित्तोत्थानेनप्रदिक्षयैवभवतु। नत्वयिवैषम्याभावात्विषमस्यस्वेच्छयोगादित्याह। परमस्येति। तवपरमस्यउ
त्तमस्यपरमकारुणिकस्यवियतइवआकाशसदृशस्यसमस्येत्यर्थः। कश्चिदपरःस्वीयःपरोऽस्वीयश्चनभवेत्। नसंभवतीत्य
र्थः। असद्वाइदमग्रआसीत्ततोवैसदजायतेत्यादिश्रुत्याशून्यपूर्वत्वकत्वमिवप्रतीयेते। तदर्थंपुनर्विशिनष्टि। शून्यतुलांदध
तःशून्यसाम्यंभजतः॥ तदेवदर्शयितुंपुनर्विशिनष्टिअपदस्येति। नपद्यतइत्यपदस्तस्यवाङ्मनसयोरगोचरस्येत्यर्थः॥ त्वदी १११
क्षणवशात्क्षोभमायाबोधितकर्मभिः। जातान्संसरतःखिन्नान्नहरेपाहिनःपितः॥२९॥ ॥१७६॥ ॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरंती भजंतीत्युक्तं। तत्र यद्येकाऽविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसंगः। अथ नानाऽविद्यास्तर्हि तस्या एवांशांतरेण संसारानपगमादनिर्मोक्षः स्यादि तर्कबलेन वस्तुत एव नानात्मानः। तत्र च तेषामणुत्वे देहव्यापिचैतन्यं न स्यात्॥ देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात्। अतः सर्वगता नित्याश्चेति केचन मन्यंते तत्र न तावद्बद्धमुक्तदोषप्रसंगः। अविद्याभेदेन तच्छक्तिभे

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि
नशाम्यतेति नियमो ध्रुव नेतरथा॥ ॥

देन वा बद्धमुक्तव्यवस्थासंभवात्॥ ईश्वरस्य तु नकेनाऽप्यंशेन संसारशंकेत्युक्तमेव प्रसिद्धं चात्मैक्यं सर्वश्रुतिषु। किं चैवं पक्षमंतर्यामिब्राह्मणमपि न सहत इत्याह। अपरिमिता इति। वस्तुत एवानंता ध्रुवास्तेनैव रूपेण नित्याः सर्वगताश्चेत्तनुभृतो जीवा यदि स्युः तर्हि तेषां समत्वात् शाम्यता न घटत इति कृत्वा हे ध्रुव नियमनं त्वया न स्यादितरथा तु घटेत॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० ३०
११२

कथं यन्मयं उपाधितो यद्विकारप्रायं यज्जीवाख्यं अजनिजातं तत्तस्य स्वविकारस्य नियंतृ नियामकं भवेत्। अविमुच्य
कारणतया अपरित्यज्य किं तत्। सममनुस्मृतं॥ ननु किं यत्तच्छब्दैः ज्ञायते चेदुच्यतां इदं तदिति। अत आह। अनुजानंता
यदमतमिति जानीम इति वदंतां यदमतमविज्ञातप्रायं अविषयत्वात्। तथा च श्रुतिः। यस्यामतं तस्य मतं मतं यस्य न वेद सः।

अजनि च यन्मयं तदविमुच्य नियंतृ भवेत्सममनु
जानतां यदमतं मतदुष्टतया॥ ३०॥ ॥९७॥ ॥

न

अविज्ञातं विजानतां विज्ञातमविजानतां। अपच च नेनैव प्रोवाच। सहतूष्णीं बभूवेत्यादि। किंच। मतस्य ज्ञातस्य दुष्टतया दोषश्र
वणात्। तथा च श्रुतिः। यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेषु इत्यादि तस्माद्व्यक्तच्छ ११२
ब्दैः वक्तुं यन्मतं कथं किमपि सर्वानुस्यूतत्वेन संप्रतिपत्तिं यत् भवेदित्यर्थः॥ ॥अंतर्यंता सर्वलोकस्य गीतः श्रुत्या युक्त्या चैवमेवाव
सेयः। यः सर्वज्ञः सर्वशक्तिर्नृसिंहः श्रीमंतं तं चेतसैवावलंबे॥ ३०॥ ॥९७॥ ॥ सा ॥ ॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु च यदि परमात्मनो जीवा जायंते इति नियंतृनियम्यभाव उच्यते। तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृताभ्या
गमप्रसंगः स्यात्। किंच। तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात्। स्वप्रकाशानंदात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य मो
क्षत्वाभ्युपगमादित्याशंक्याह। जन्म नैव जन्म जीवेनामुच्यते न स्वतोऽघटनादित्याह। न घटत इति। तत्र किं प्रकृतेः जीवरूपे
णोद्भवः स्यात् पुरुषस्य वा उभयोर्वा। आद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारत्वप्रसंगः। अत एवैनं तृतीय इत्याशये
नोक्तं प्रकृतिपुरुषयोः स्रष्टा वा न घटत इति श्रुत्या ऽजत्वप्रतिपादनादपीत्याह। अजयोरिति तथा च श्रुतिः। अजामेकां लोहितशु
क्लकृष्णां बह्वीः प्रजां जनयंतीं सरूपां। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्य इति। उभययुजा तु भवंति उभयं

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवंत्यसुभृतो जलबुद्बुदवत्॥

च तद्युज्यत इति युक्तं संबद्धं परस्पराध्यस्तमिति यावत् तेन॥ असुभृतः प्राणाद्युपाधयो जीवा जायंत इत्यर्थः। जलबुद्बुदवदि
ति यथा केवलेनानिलेन वा जलबुद्बुदो न भवति किंतु मिलिताभ्यां तद्वत्। तत्र च यथाऽनिलो निमित्तं जलमुपादानं एवमत्रापि
प्रकृति निमित्तं पुरुष उपादानं॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः॥ सोऽकामयत बहु स्यां प्रजायेयेति यथाऽग्नेः क्षु
द्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीत्यादि
श्रुतिषु। चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात् न च विकारित्वं परिणामानंगीकारात्॥ केचित्तु नः परिणाममंगीकृ
त्यात्मनो विकारं प्रियाविपरीतं निमित्तोपादानभावमिच्छंति। सर्वथा तावत् प्रकृतिपुरुषे स्याद्भवतीति सिद्धं॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० उ० ११३ तदेवमेकमेवाद्वितीयं ब्रह्म अजामेकां अविनाशीवा अरेयमात्मेत्यादि श्रुतिबलात् । उत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्म न वस्तु
त इत्युक्तं । उपाधिलयेन परमात्मनि पुनर्लयश्रवणादपि न वास्तवं जन्मेत्याह । त्वयि त इति त्वयि कारणात्मनि तद् इमे जीवाः । तत इति । य
तो न वास्तवं जन्म तस्माद्विविधनामगुणैरनेकप्रकारकार्योपाधिभिः सह लिल्युः लीना बभूवुः तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा
इव लीयते । यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते एवं स्वोपादेयविशेषमात्रलयात्
कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्ते । मुक्तौ तु कारणस्यापि लयात्तयि परमे निरुपाधौ सरित इवार्णवे लीयंत इति । विवेकः । त

क्वथित इमे ततो विविधं नामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥३१॥ ॥१८॥ ॥

थाच श्रुतयः । यथा सौम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयंतीति तेयथा तत्र न वि
वेकं लभंते अमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति यथा नद्यः स्यं
दमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमित्याद्याः । यस्मिन्नुद्यद्विल ११३
यमपि यज्जाति विश्वं लयादौ जीवोपेतं गुरुकरुणया केवलात्मावबोधे । अत्यंतांतं व्रजति सहसा सिंधुमध्ये च नद्यस्तं त्रिभुवनगुरुं भाव
यते नृसिंहं ॥३१॥ ॥१८॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावत्परमेश्वरात् जीवा जायंते तद्वशेन च कर्माणि कुर्वंति। पुनस्तत्र लीयंत इति संसारचक्रभ्रमणमुक्तं। इदानीं तन्निवृत्तये।
परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्याद्या भगवदनुवृ
त्तिं विदधतीत्याह। नृषु तवेति। नृषु जीवेषु अमीषु तव मायया भ्रममुक्तलक्षणं प्रवगत्य तत्त्वज्ञा वा सुधियः भृशं त्वयि अभवे भवनिव
र्तके भावं स्वभावमनुवृत्तिं दधति कुर्वंति। अनुप्रभवं अनु अनुप्रभवो यस्मिन् तं भवं॥ ततः किमत आह। कथमिति। अनुवर्त्ततां

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम्॥ कथमनु
वर्त्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम्॥ २२॥ ॥१९॥ ॥

अनुवर्त्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवेत् न कथंचिदपीत्यर्थः। कुतः यद्यस्मात्तव भ्रुकुटिः भ्रूभंगरू
पस्त्रिणेमिः त्रिसंख्या नेमय इवावच्छेदाः शीतोष्णवर्षकाला यस्य संवत्सरात्मकस्य सः। अभवच्छरणेषु न भवाच्छरणं रक्षिता ये
षां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति। अत एवाहृतं संसारमाकल्प्य तन्निवृत्तये सुधियस्त्वयि भावं दधतीति॥
संसारचक्रक्रकचैर्विदीर्णं नानाभवतापतप्तं। कथंचिदापन्नमिह प्रपन्नं त्वामुद्धर श्रीनृहरे नृलोकं॥ २२॥ ॥१९॥ ॥ ॥

उद्दीर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सच भगवति भावो मनो नियमे सति भवति सोपि गुरुप्रसादनादिति गुरूपसदनं विदधाति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठं यं आचार्यवान् पुरुषो वेद। नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतय इत्याह। विजिता
नि हृषीकाणींद्रियाणि वायुश्च प्राणो यैः तैरपि अदांतमदमितं मन एव तुरंगः दुर्दमत्वसाम्यात् तं ये यंतुं नियंतुं यतंते अतिलोल
मति चंचलं गुरोश्चरणं समवहाय अनाश्रित्य उपायेषु खिद्यंते क्लिश्यंतीति उपायखिदः संतः व्यसनशतान्विताः बहुव्यसनाकु

विजितहृषीकवायुभिरदांतमनस्तुरंगं य इह यतंति यंतुमतिलोलमुपायखिदः॥ व्यसनश
तान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यकृतकर्णधरा जलधौ॥३३॥ ॥२०॥ ॥

ला इह संसारसमुद्रे संतिष्ठंति दुःखमेव प्राप्नुवंतीत्यर्थः॥ हे अज। अकृतकर्णधराः अस्वीकृतनाविका वणिजो यथा तद्वत्। उक्तं
च। नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा। प्रा ११४
कृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा। देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः गुरुणोपदर्शितभगवद्भजनसुखानुभू
तौ तु स्वत एव मनो निश्चलं भवति नान्यथेति भावः॥ ॥यदा परानंदगुरो भवत्पदे पदं मनो मे भगवल्लभेत। तदा निरस्ताखिलसा
धनश्रमः श्रयेय सौख्यं भवतः कृपातः॥३३॥ ॥२०॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

स चि

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तथा यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः। अथ मर्त्यो ऽ
मृतो भवत्यत्र ब्रह्म समश्नुत इत्याद्या वैराग्यप्रसंगं विवक्ष्यतीत्याह। स्वजनसुतेति। आत्मा देहः धाम गृहं असवः प्राणः स्वजनादिभिः किं।
सर्वरसे सर्वैः रसाः सुखानि विचिंते यस्मिन् त्वयि परमानंदे। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः। श्रयतः त्वां
सेवमानस्य पुंसः आत्मनि सति नृणां तुच्छैः एतैः किं। क उपयोगः। इति॥ सत्सत्यं परमार्थसुखमजानतां अत एव मिथुनतः स्त्रियो

स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे॥ इतिसद्
जानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे॥ ३४॥ ॥२१॥ ॥

मिथुनीभूय रतये मायासुखाय चरतां प्रवर्तमानानां कर्माणि नश्वरोऽव्यजानतः श्वरैः पुरुषान् को नु अर्थः। सुखयति आनंदयति
न कोपीत्यर्थः। इह संसारे कथंभूते। स्वविहते स्वत एव नश्वरे स्वनिरस्तभगे स्वत एव गतसारे। पाठांतरे को न्विह स्वयं तद्विशेषण
द्वयं। अतस्त्वद्भजनमेवोचितमित्यर्थः॥ ॥भजतो हि भवान्नृणां आत्मरमानंदविधूननः॥ आत्मैवाकिंचनैः तैः कैः संतुच्छसारसु
तादिभिः॥ ३४॥ ॥२१॥

लेश परिग्रहा

दश॰ उ॰ एवं गुरूपदेशो न तत्त्वमवगम्यसारासारविवेकेन च सर्वतो निर्विघ्नते देवमहत्संगेनोपपत्तिभिः सम्यगवधारयितुं तीर्थसदना

११५ नि मुनयः पर्यटंतीति। मंतव्य इत्यादि श्रुत्यर्थमाह। भुवि पुरु पुण्यतीर्थसदनानीति। उक्तलक्षणा ऋषयो विमदा निरहंकाराः यतो

भगवत्पदांबुजहृदः भवतः पदांबुजं हृदि येषां ते अतः स्वयमेव अघभिदंघ्रिजलं येषां ते। उत अपि तथाविधा अपि पुरूणि बहूनि

पुण्यानि तीर्थानि सदनानि क्षेत्राणि तान्येवोपासते सेवंते प्रायस्तत्रैव महत्संगो भवतीति। अथवा पुरु अधिकं भगवज्जनलक्षणं

पुण्यं येषां तानि च तानि तीर्थानि च गुरवः महांत इत्यर्थः॥ तेषां सदनान्याश्रमान्। यथाह। परसिंहः। निपातागमेयोः तीर्थमपि।

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः॥ दधति स

कृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्॥ २५॥ ॥२२॥ ॥

जुष्टे जले गुराविति। न पुनः पुरुषसारहरावसथानुपासते। पुरुषाणां सारं विवेकस्थैर्यधैर्यक्षमाशांतिप्रमुखं हरंतीति तथा ते च ते आ

वसथा गृहाः तान्। न च तेषां गृहादिभयकुत्सितसुखापेक्षेत्याह। दधति सकृन्मन स्त्वयि य आत्मनि नित्यसुख इति। सकृदपि ११५

त्वयि येन नो दधति तेपि गृहाद्यासक्ता न भवंति किं पुनरेवं रता इत्यर्थः। मुं च त्वं गतदंगसंगमनिशं तापेदसां चिंतयन्नुसंततः

सांतियतो यतो गतमदास्तान्नाश्रमानावसन्। नित्यं त न्मुखपंकजाद्विगलितत्वत्पुण्यगाथामृतस्रोतः पंप्लवः संप्लुतो नरहरेन

[illegible]

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां। तद्भूतानां क्रियार्थेन समाम्नायः इति तत्र तत्र जैमिनिना वेदस्य क्रियापरत्वाभिधानदुप
निषदामपि तदेवयुक्तं यथोक्तं तत्रकार्ये निःफलत्वात् एतेन कर्तृत्वार्थकर्तृ प्रतिपादने नापि निषेदो नैराकांक्ष्यं व्याख्यातमिति न। एकमेवाद्विती
यं विज्ञानमानंदं ब्रह्म अचक्षुरश्रोत्रमित्येवं तद्विपरीतात्म प्रतिपादनात् न ह्यद्वितीयपरमानंदरूपस्य कर्मांगत्वमुपपद्यते। अननुमतं
चैतद्वार्तिककृतः। कथं। सर्वत्रैव हि विज्ञानसंस्कारत्वेन गम्यते परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति तेनोक्तत्वात्। एतद
र्थमेवमननाय मुमुनयः पर्यटंतीत्युक्तं तत्र तावत् द्वैतस्य सत्यत्वे भवेदप्येवं तदेव तु न संभवतीति प्रश्नो त्तरमयं प्रमेनेनतत्त्वावधार
णप्रकारमाह। सत इदमुत्थितं सदिति।। इदं विश्वं धर्मि सदिति साध्यो धर्मः सत उत्पन्नत्वात् हेतुः यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टं
यथा कनकादुत्पन्नं कुंडलादि तदात्मकं तद्वदिति तत्र यदि सदभेदः साध्यते तदा ओपदीनतत्त्वं निर्दिष्टो नैव भेदप्रतीतेर्विरुद्धो हेतु
सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति कृचक्र चर्मसषा न तथोभययुक्।।
रित्याह। ननु तर्कहतमिति। तन्नु न भेदं साधयामः किंतु तदुत्पन्नत्वेन कुंडलादिवदभेदं प्रतिषेधयामः। तत्र अभेद एवस्यादित्याशंक्या
नैकांतिकत्वेन दूषयति कृचेति पितृपुत्रादिषु मुहुरघटध्वंसादिषु च तथादर्शनादिति भावः। ननु तदुत्पन्नत्वं न मतदुपादान
त्वे ननु तन्निमित्तत्वं अतो नानैकांतिकत्वमित्याशंक्य दूषयति कचर्मषेति गुणोपादानस्यापि फलिनो न गुणत्वं किंतु मिथ्यात्वं। अ
न्यथा कुंडलादिवदबाधप्रसंगात्। अतः पुनरप्यनैकांतिकत्वमेवेति भावः। ननु तत्र न केवलं गुणमात्र फणिन उपादानं किंतु अविद्या
यक्तं तथाभूतस्याकस्मकसत्यत्वात्। युक्तं फणिनो मिथ्यात्वमित्याशंक्य तत्तुल्यमत्रापीति दूषयति न तथोभययुगिति अयमर्थः।
अत्रापि सत उपादानत्वं एवेरतस्य च न च सत्कसत्यत्वं अतः सदुपादानत्वमसिद्धमिति न दस्त्कसत्वं प्रपंचयिष्यति।। ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०उ० ननु माभूदनेन हेतुना प्रपंचस्य सत्वं हेत्वंतरेण तु साधयामः। तथाहि सदिदं अर्थक्रियाकारित्वात् नयदेवं यथाशुक्तिरजतमिति तत्राह।
११६ व्यवहृते ये विकल्पैर्दूषित इति। व्यवहाराय अर्थक्रियार्थं विकल्पो भ्रमः दूषितः दृष्ट एव कुटकार्षापणादिनापि क्वचिद्व्यवहार
दर्शनात्। नन्वेकत्र सतोऽन्यत्रारोपो भ्रमः प्रसिद्धः असत्वात् सत्वे कथं प्रपंचभ्रमः स्यात् सत्वे वा नाद्वैतसिद्धिः। उक्तं च भट्टैः। अ
ध्यस्यते खपुष्पत्वम सत्कथमवस्तुनि प्रज्ञातगुणसत्ता॥ कमथ्यारोप्यते तवानवेति। नेत्याह अंधपरंपरयेति। अंधपरंपरयां
यो विकल्पदूषितसंचयः। अयं भावः। संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते न वस्तुसत्वं। प्रतीतौ सत्यां
वस्तुसत्यत्वाभावेन भ्रमव्यतिरेकादर्शनात्। अतो नादित्वात् पूर्वपूर्वभ्रमदृष्ट्या तरोत्तरआरोपो भविष्यति। अंधपरंपरा
न्यायेन तेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति॥ नन्वक्षस्य हकैवातुर्मास्यया जिनः सुकृतं भवति। अयामसो मम

व्यवहृते ये विकल्पदूषितोऽन्धपरंपरया भ्रमयति भारतीत उरे कृथ जडान्॥२६॥ ॥२२॥

मृतात् अमूमेत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनादसत्वं न घटते न हि नित्यं वस्तु असद्भवति। तस्माद्वेदप्रतिपादितत्वात्
द्वैतं सदेवेत्याशंक्याह भ्रमयतीति। हे भगवन् एतत्तव भारती वेदलक्षणां उरु वृत्तिभिः वक्रीभिर्गौणलक्षणादिवृत्तिभिः उपयज्ञ
जान् कर्मश्रद्धाभराक्रांतमंदमतीन् भ्रमयति मोहयति। अयं भावः॥ नहि वेदः कर्मफलस्य नित्यत्वमभिप्रैति किं तु लक्षणया प्र
शंसामात्रं विध्येकवाक्यत्वात्। अन्यथा वाक्यभेदप्रसंगात्। तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः ११६
क्षीयत इति न्यायोपबृंहितश्रुत्यंतरविरोधाच्च। अतः कर्मजडानामिदं भ्रममात्रमिति। एते नैव तस्माद्वा एतस्माद्वापि नैव एतस्मा
दात्मन आकाशः संभूत इत्यादीनामप्यनन्यपरत्वं दर्शितं भवति॥ ॥उद्धृतं भवतः सतोपि भुवनं सन्नैव सर्पः स्रजः कुर्वन् कार्य
मपीह कूटकनकं वेदोपि नैवंपरः॥ अद्वैतं तव सत्परं तु परमानंदं पदं तन्मुदा वंदे सुंदरमिंदिरानुत हरे मा मुंच मामानतं॥२६॥ ॥२३॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं प्रपंचस्य सत्त्वे साधकं नास्तीत्युक्तं इदानीं असत्त्वे सृष्टिप्रलयश्रुतयो यतो वा इमानि भूतानि जायंते इत्याद्यास्तन्मूलं चानुमानं प्र-
माणमित्याह नयदिदमिति यत् यस्मात् इदं विश्वं अग्रे सृष्टेः पूर्वं न आस आसीत् सदेव सोम्येदमग्र आसीत् । आत्मा वा इदमेक एवा-
ग्र आसीदित्यादिश्रुतेः । न च निधनात् प्रलयात् अनु अनंतरं भविष्यत् भविष्यति नासदासीत् नो सदासीत्तदानीमित्यादिश्रुतेः ।
अतः कारणात् अंतरा मध्ये ऽपि एकरसे केवले त्वयि मृषा मिथ्या रूपमेव विभातीति मितं निश्चितं । यत एवं अतः श्रुत्या सो ऽद्रविणजा-
तिविकल्पपथैर्द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पा भेदा घटकुंडलादयः तेषां पंथानो मार्गाः प्रका-
राः तैरुपमीयते सदृशतया निरूप्यते ॥ यथा तत्तत्कार्यकारणं नामधेयमात्रता कारणं मृदाद्येव तु सत्यं । तथात्राप्याकाशादीनां

नयदिदमग्र आस न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे ॥ अत उपमीय-
ते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ॥ ३७ ॥ ॥२४॥ ॥

नामधेयमात्रता अस्त्येव सत्यं । तथा च श्रुतिः । वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञा-
तं भवति यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् । यथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसंमित्यादि । तस्मादस्य स-
त्त्वे प्रमाणाभावादसत्त्वे प्रमाणस्य विद्यमानत्वात् । वितथं मनोविलासमृतं सत्यमिति ये अवयंति जानंति ते अबुधाः अज्ञा इत्यर्थः ।
अत्रैव प्रयोगः । विवादाध्यासितं न सत् आद्यंतयोरविद्यमानत्वात् विकारित्वाद् दृश्यत्वाद्वा शुक्तिरजतादिवत् इत्यन्वये आ-
सवस्त्वेति व्यतिरेके दृष्टांतः ॥ मुकुटकुंडलकंकणकिंकिणीपर्यंतं कनकं परमार्थतः ॥ महदहं क्षितिरवप्रमुखं तथा नरहरे न

परं परमार्थतः ॥ ३७ ॥ ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शी०उ०
११८
ननुचयदि प्रपंचो नाम नास्त्येव वन्चासत्ता तेन चैतन्यस्य संबंधगंधोपि तर्हि किमपराद्धं जीवेनयतः अयं संसरति। किं वा बहुपुण्यमी
श्वरस्य यतो नित्यमुक्तः॥ किंविषयं च तदाकर्मकं ऽमित्यपेक्षायां जीवेश्वरविशेषः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजा
ते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीतीति। अजामेकां लोहितशुक्लकृत्स्नां मित्याद्याश्च वदती त्याह॥ सयदजयेति। सतुजीवः
२
विषयस्तुत्वं
यत् यस्मादजया मायया अजां अविद्यां अनुशयीत आलिंगेत ततः गुणांश्च देहेंद्रियादीन् सेवमानः आत्मतया ऽध्यस्य तदनंतरं स
रूपतां तद्धर्मयोगं च जुषन् अपेतभगः पिहितानंदादिगुणः सन्मृत्युं संसारं भजति प्राप्नोति। तद्विषयमेवेच्चकर्मकोऽपीति भावः। त्व
मुत त्वं तु जहासि तामजां मायां॥ ननु सामर्थ्ये वास्ति कथं तत्त्यागस्तत्राह॥ अहिरिव त्वचमिति॥ अयं भावः। यथा भुजंगः स्वग

सयदजयात्वजामनुशयीत गुणांश्च जुषन्भजति सरूपतां तदनुमृत्युमपेतभगः॥ त्वमुत तां
जहासि तामहिरिव त्वचमात्तभगो महीयसे ऽष्टगुणितेऽ परिमेयभगः॥ ३८॥ ॥२५॥ ॥

तमपि कंचुकं गुणबुद्ध्या नाभिमन्यते तथा त्वमजां। नहि निरंतराल्हादसंवितकामधेनुर्वंदपतेरजया कृत्यमिति मायां तामुपे
क्षसइति। कुत एतत्तदाह। आत्तभगः नित्यप्राप्तैश्वर्यः॥ महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिमतीमहीयसे पूज्य
से विराजसे। कथंभूतः अपरिमेयभगः अपरिमितैश्वर्यः। नत्वन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यं। अपि ११८
तु परिपूर्णस्वरूपानुवर्धि तस्मादपरिमितमैश्वर्यं॥ ॥ न संतीतववीक्षणांगणगताकालस्वभावादिभिर्भावास्सत्वरजस्तमो
गुणमयानुन्मीलयंतीबहून्॥ मामाक्रम्यपदाशिरस्यतिभरं संमर्दयंत्या तुरं मायाते शरणंगतो ऽस्मि नृहरे त्वामेवतां वारय॥ ३८॥
॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे क्षितिधर त्वं नवदसि न चलसि अतो नूनं महांतमर्थं चिंतयसे वत तर्हि अपि किं यथास्तनैर्विधर्त्तुं वयं कामयामहे तथा त्वं स्तनतुल्यैः शृंगै
र्वोढुं कामयसे। ओमिति चेत् तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः॥ २२॥ भोः सिंधुपत्न्यः नद्यः संप्रति ग्रीष्मे सिंधुर्मधुद्वारा अमृतवस्या
युष्मान्नानंदयतीव तत् अहो कष्टं। अतः शुष्यंतो ह्रदायासंताः। अपगतकमलश्रीकाः भोः क्लेशाश्च वयं यथा प्रियतमस्य भर्त्तुर्मधुपतेः सम्प्र
सिद्धः॥ २३॥ तदैव देवादेवागतहंसं हृतकल्पयित्वाहुः हे हंसेति। नः अस्मान् प्रति पुरा रहसि उक्तं किंवा न चलसो हृदः स्मरति स्म तैव मा प्रस्यापि
न चलसि नवदस्युदारबुद्धे क्षितिधर चिंतयसे महांतमर्थं॥ अपि तेबवसुदेवनंदनांघ्रिं वयमिव कामयसे स्तनैर्विधर्त्तुं॥
॥२२॥ शुष्यद्ध्रदाः करशिता वत सिंधुपत्न्यः संप्रत्यपास्तकमलश्रिय इष्टभर्त्तुः॥ यद्वद्वयं यदुपतेः प्रणयावलोकमप्राप्य मु
ष्टहृदयाः पुरुकर्शिताः स्म॥ २३॥ हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग शौरेः कथां दूतं त्वां नु विदाम कच्चिदजितः स्वस्त्या
नः स्त उक्तं पुरा॥ किं वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं क्षौद्रालापय कामदं श्रियमृते सैवैकनिष्ठा स्त्रियां॥ २४॥ कथामृतं
तवानिति चेत् अत आहुः। हे क्षौद्र क्षुद्रस्य दूतकासि। ततं वयं भजामः। कामार्थमाकर्षयति युष्मदानेति चेत्। अत आहुः। अहो तर्हि तं इह लो
पप आकारय। ओमिति गच्छंतमिव तं पुनराहुः। यो ऽस्मान्वंचयित्वा एकाकी निरमते त्री श्रियमृते तमेवालापपसा त देकनिष्ठा कथं परिहर्त्तुं
शक्यत इति चेदत आहुः। स्त्रियां जातौ वेकञ्चनं। अस्मासु स्त्रीषु मध्ये किं सैवैकनिष्ठा न तु वयमित्यर्थः। पाठांतरे तु क्षौद्रं मधुरालापमात्रं
यस्य तं। अकामदं अरतिप्रदं श्रियमृते वयं कस्माद्भजामः किं तु अनादृतापि सतीपुनः सैव भजतु यतोऽस्माद्दृश्यो मानिन्यः स्त्रिय एकनिष्ठाः
एकत्रैव स्वयमानसि द्वौ निष्ठा पासामीति॥ २४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशं०उ० ॥२५॥ तासां कृष्णे एवं भूतो भावो नातिविचित्र इत्याह। श्रुतमात्रोपीति। उरुभिर्गायैर्गीतैः उरुधा गीतो वा यैः कैश्चिदपि गीतैः यथा
१२९ कथंचिदपि गीतो वेत्यर्थः ॥२६॥२७॥ पदं स्थानं ॥२८॥२९॥ या रुक्मिणीप्रमुखा अष्टौ उदाहृताः प्राक् ॥३०॥ एवमष्टोत्तरश

श्रीशुक उवाच ॥ इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे ॥ क्रियमाणेन माधव्यो लेभिरे परमां गतिं ॥२५॥ श्रुतमा
त्रोपि यः स्त्रीणां प्रसह्याकर्षते मनः ॥ उरुगायो उरुगीतो वा पश्यंतीनां कुतः पुनः ॥२६॥ याः सपर्याचरन्प्रे
म्णा पादसंवाहनादिभिः ॥ जगद्गुरुं भर्तृबुध्या तासां किं वर्ण्यते तपः ॥२७॥ एवं वेदोदितं धर्ममनुतिष्ठन्सत
तां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयत्पदं ॥२८॥ आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनां ॥
आसन्षोडशसाहस्रं महिष्यश्च शताधिकं ॥२९॥ तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः ॥ रुक्मि
णीप्रमुखा राजन्स्तत्पुत्राश्चानुपूर्वशः ॥३०॥ एकैकस्यां दशदश कृष्णोजीजनदात्मजान् ॥ यावत्य आ
त्मनो भार्या अमोघगतिरीश्वरः ॥३१॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ आसन्नुदारयश १२९
सस्तेषां नामानि मे शृणु ॥३२॥

ताधिकषोडशसहस्रमहिषीणां पुत्राः लक्षमेकमशीत्युत्तरैकषष्टिसहस्राणि च भवंति। ३१॥३२॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावद्युक्तसाधनकदंबेन ये भगवंतं भजंति ते मृत्युं तरंति इतरे संसरंतीत्युक्तं। इदानीं ये बहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्ता
अपि कथंचिदंतर्वासनाश्रिताः कामान्न मुंचंति ते। न भगवंतं प्राप्नुवंति न चेह सुखं लभंते केवलं कुयोगिन एव प्राप्नुवंतीत्याह। तान्। शेषाश्च नकृ
मान्यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्रेत्यादिश्रुत्यर्थमाह। यदि न समुद्धरंतीति हे भगवन् ये यतयः हृदि स्थिताः का
मजटाः कामस्य जटाः मूलानि वासनाः यदि न समुद्धरंति नोत्पाटयंति तेषामसतां भवान् हृदिगतोपि दुरधिगमः दुःप्रापः। कु
तः अस्मृतकंठमणिर्विस्मृतकंठमणिस्तत्तुल्यः स यथा कंठे वर्त्तमानोप्यस्मृतश्चेदप्राप्त इव भवति तद्वदिति न केवलमेतावत्॥ किंतु

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदिगतोऽस्मृतकंठमणिः॥ असुतृप
योगिनामुभयतोप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः॥ २९॥ ॥२६॥ ॥

असुतृपयोगिनामिंद्रियतर्पणपराणां योगच्छद्मनामुभयतोप्यसुखं इहामुत्र च दुःखमेवेत्याह। अनपगतांतकात् अनिवृत्ता
मृत्योः। लोकाराधनधनार्जनादिक्लेशान् भोगवैभवप्राक्प्रभवाच्चैव तावत्। दुःखं भवतः ईश्वरादपि दुःखं। कथंभूतात्। अ
नधिरूढपदात्। अनधिरूढं पदं स्वरूपं यस्य तस्मात्। तत्स्वरूपप्राप्त्यभावादविद्यावद्विषयत्वेन प्राप्तनिजधर्मीति कर्म
निर्बंधनबद्धं उरूपुनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः॥ दंभन्यासमिषेण वंचितजनं भोगैकचिंतातुरं संमुह्यंतमहर्निशं
विरचितोद्योगक्लमैकाकुलं॥ आज्ञालंघिनमज्ञमज्ञजनतासन्माननासन्मदं दीनानाथ दयानिधान परमानंद प्रभो पाहि मां
॥२९॥ ॥२६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०उ० ११८

ननुयतेर्न किमपि लभ्यमस्ति प्रारब्धमेव सुखाय भोगेनापक्षिप्यते अतः किमिति वृथाश्राम्यते उभयतोप्यसुखमिति। श्रूयते च एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानित्यादि तत्राह। त्वदवगमीति॥ हे सगुण षड्गुणैश्वर्ययुक्त त्वदवगमी त्वत्ज्ञानवान् भवदुत्थ शुभाशुभयोः भवतः कर्मफलदातुरीश्वरादुत्थितोः। उत्थयोरिति विभ्रंतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्मणोः फलभूतात् गुणविगुणान्वयान् सुखदुःखसंबंधान् न वेत्ति नानुसंधत्ते। तर्हि तदानीं च देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरी गिरः विधिनिषेधलक्षणा न वेत्ति विगतदेहाभिमानतया कार्यबाधाभावान्न नियुज्यत इत्यर्थः॥ युक्तं चैतत्। यतः क

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः॥ अनुयुगमन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः॥४०॥ ॥२७॥ ॥

रणात्मनुजैः अन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि धृतः त्वं तेषामपवर्गगतिः। अपवर्गरूपा गतिर्भवसि कथं। श्रवणभृतः अनुयुगं प्रतियुगं या गीतपरा उपदेशसंततिः तया संप्रदायानुसारेणेत्यर्थः। एतदुक्तं भवति। ये तावत्त्वज्ज्ञानिनः न तेषां कर्माधिकारशंकारशंकापि ये चानवरतं त्वत्कथाश्रवणादिनिष्ठास्तेषां अपयोसन्नभवत् पदानां न विधिनिषेधबाधः इतरेषां तु योगच्छन्नेंद्रियलालनलालसानामुभयतोप्यसुखमिति॥ ॥अवगमं तव मे दिशमाधव स्फुरति यन्न सुखासुखसंगमः॥ श्रवणवर्णनभावमथापि वा न हि भवामि यथा विधिकिंकरः॥४०॥ ११८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवगर्भो न वोन्ति सुखदुःखेन च विधिनिषेधा विस्फुरन्ते। तत्र न नु कथमपवर्गं तु शक्यं दुरवगाहत्वस्योक्तत्वादित्येवमाशंक्य सत्यमेवम
नगाधमहिम्नो वाङ्मनसागोचरत्वाद् विषयत्वेनैव ज्ञानमिति दर्शयन्। यद् द्युगार्गादि बोधितस्वाकूपार्थिव्यापदन्तराणां पृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्यादिश्रुतिप्रतिपादितमपरिमितं महिमानमाह द्युपतय एवेति हे भगवन् ते अन्तं द्युपतयः स्वर्गादिलो
कपतयो ब्रह्मादयोऽपि न ययुः न प्रापुः। यदन्तं त्वत्तः किमपि त्वं न भवति। आस्तां द्युपतयो न ययुरिति यस्मात्त्वमपि आत्मनो तेन
यासि कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वा। अत आह। अनन्ततया अन्ताभावेन न हि शशविषाणज्ञानेऽसार्वज्ञ्यं तदप्राप्तिर्वाऽशक्तिर्वै
भवं विहन्ति॥ अनन्तत्वमेवाह। यदन्तरेति। यस्य तव अन्तरा मध्ये ननु अहो सावरणाः उत्तरोत्तरं दशगुणसप्तावरणयुक्ता अण्डनिच

द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः। ख इव रजां
सि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः॥ ४१॥ ॥२४॥ ॥

या ब्रह्माण्डसमूहाः वान्ति परिभ्रमन्ति वयसा कालचक्रेण। खे रजांसीव। सह एकदैव न तु पर्यायेण हि यस्मादेवं अतः श्रुतयस्त्व
यि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति न तु साक्षाद्वदन्ति अयमेतावानिति। सगुणस्य गुणानन्त्यात् निर्गुणस्यागोचरत्वात्। कथं त
र्हि पदार्थता पर्यमिति तत्र विधिमुखवाक्ये भवेदयं नियमः पदार्थस्य वाक्यार्थत्वमिति निषेधमुखे तु नायं नियम इत्याह। अत
न्निरसनेनेति। अन्यदेव तद्विदितादथो अविदितात्। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अस्थूलमनण्वित्यादि
प्रकारेण लक्षणया च तत्त्वमसीत्यादयः पर्यवस्यन्ति न च वाक्यनिषेधैः शून्यमेव ज्ञाप्यत इति। यतो भवन्निधनाः भवति त्वयि नि
धनं समाप्तिर्यासां तास्तथा तर्हि निरवधिनिषेधः संभवति संभवति च अतो अवधिभूते त्वयि फलन्तीत्यर्थः॥ ॥ द्युपतयो विदुरन्तम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०टी०उ० ॥४२॥ इत्यशेषसमाम्नायपुराणोपनिषद्रस इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥४३॥ ब्रह्मदायादेति। ब्रह्मैव दायः पित्र्यधनंप्रत्य
११९ त्वं प्राप्य आत्मनि सेवत इति तथा। ब्रह्मपुत्रेतिवा ॥४४॥ पूर्णः कृतकृत्यः श्रुतधरः श्रुतमर्थं मनसि धारयन्। धीरव्रतः नैष्ठिकः ॥४५॥

श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिं।
॥४२॥ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥४३॥ त्वं चैतद्ब्र
ह्मदायाद श्रद्धयात्मानुशासनं ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणां ॥४४॥ श्रीशुक उवाच ॥ एवं स
ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥४५॥ नारद उवाच ॥
नमस्तस्मै भगवते कृष्णायामलकीर्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥४६॥ इत्याद्यमृ
षिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥४७॥ सभाजितो भग
वता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतं ॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः
कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेत् ॥४९॥ ॥ ॥ ॥ ११९

नम इति कृष्णावतारतया नारायणं नमस्यति। उक्तं हि। एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति ॥४६॥ साक्षात्पितुरि
ति योनिव्यवधानं विना जनकस्य अग्निमथनावसरे कथंचिदरणौ रेतः पतितं प्रमथ्य व्यासस्तद्देवतत उत्पन्नः शुक इति हि। वदंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समस्तवेदस्तस्यार्थसंग्रहेणानुस्मारयति योऽस्योत्प्रेक्षक इति। यः अस्य विश्वस्य उत्प्रेक्षकः एवमिदमनुशासितेति समस्तपुरुषार्थसिद्धये सृष्टिस्थितिप्रलयादि प्रापणीयमित्यालोचकइत्यर्थः। अनेन निमित्ततमुक्तं। एवमालोच्यास्यादिमध्यनिधने। आदिर्जन्म मध्यं पालनं। निधनं अंतः। एतेषु कर्मसु यो वर्तते अनेनोपादानत्वमुक्तं। ननु प्रकृतिपुरुषयो रूपादाननिमित्तत्वेप्रसिद्धे। सत्यं तयोरपि तत एवोद्भूतत्वान्मूलकारणं स एवेत्याह योऽव्यक्तजीवेश्वर इति। प्रवेशनियमनेदर्शयति पूर्वोक्तप्रकारेणेदं सृष्ट्वा यदर्थमेतत्सृष्टं तेन ऋषिणा सृष्टे कार्ये अहमिति दर्शिना दृष्टिर्जीवः तेन सहानुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे ताः पुरः शास्ति तस्य भोगं ददत् परिपालयति॥ उपासकस्य च कैवल्यरूपो भवतीत्याह। यं संपद्येति। यं संपद्य प्राप्य अनुशयी अन्वनुदंडवत्रणा।
योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ता। यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं॥ ५०॥ इति श्रीभागवते महापुराणे दशमस्कंधे सप्ताशीतितमोऽध्यायः॥ ८७॥ ॐ ॥ ॥ ॥ ॥
मैश्वरणमूले शेत इति तथा स जीवः अजां कार्यकारणलक्षणामविद्यां सजति। ननु अलसपत्रस्यापि जीवतस्तत्संबंधो दृश्यते अत आह सुप्तः कुलायं यथेति। अयं भावः॥ यथा सुप्तं शरीरवंतमन्ये पश्यंति स तु नात्मानं तथा पश्यति एवं जीवन्मुक्तमप्यन्ये देहवंतं पश्यंति स तु नाकिंचित्पश्यतीति। तं हरिं अजस्रं अनवरतं ध्यायेत्। किंभूतमाह। अभयं न भयं यस्माद्भयनिवर्तकमित्यर्थः कुत एतत् कैवल्यनिरस्तयोनिं कैवल्येन अप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन तं॥ ॥
सर्वश्रुतिशिरोरत्नं नीराजितपदांबुजं॥ भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः॥ इति दशमे सप्ताशीतितमोऽध्यायः॥ ८७॥ धू॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा०उ० १२२ प्रायशः पुंभिर्धूर्तैर्भवान्स्वार्थान्समीहते साधयितुमिच्छति। अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयति अतो नः कथ्यता

यदि नः श्रवणायालं युष्मच्छ्वसितं विभो॥ भण्यतां प्रायशः पुंभिर्धूर्तैः स्वार्थान्समीहते॥३०॥ श्रीशु
कउवाच॥ एवं भगवता पृष्टो वचसाऽमृतवर्षिणा॥ गतक्लमोऽब्रवीत्तस्मै यथा यथापूर्वमनुष्ठितं॥३१॥
श्रीभगवानुवाच॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाच
राट्॥३२॥ यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ॥ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां॥३३॥ य
द्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ॥ तदैनं जह्यसद्वाचं न यद्वक्ताऽनृतं पुनः॥३४॥ इत्थं भगवतश्चित्रै
र्वचोभिः ससुपेशलैः॥ भिन्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात्॥३५॥ अथापतद्भिन्नशिराव
ज्राहत इव क्षणात्॥ जयः शब्दो नमः शब्दः साधुशब्दोऽभवद्दिवि॥३६॥ मुमुचुः पुष्पवर्षाणि हते पापे १२२
वृकासुरे॥ देवर्षिपितृगंधर्वा मोचितुः संकटाच्छिवं॥३७॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः॥
अहो देव महादेव पापोऽयं स्वेन पाप्मना॥३८॥

मिति॥३०॥३१॥ पैशाच्यं पिशाचानामिव वर्त्तति॥३२॥ यत् यथा वक्ता वदिष्यति॥३४॥ चित्रैर्भ्रामकैः सुपेशलैः अतिरम्यैर्भिन्न
धीः॥ भ्रंशितमतिः॥३५॥३६॥३७॥३८॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं नु वक्तव्यं विश्वेश्वरे त्वयि कृतागाः कृतापराध इति॥३९॥ अव्याकृतरा(?)त्सुद न्वतवाऽञ्जसागोचरशक्तिसमुद्रस्य गिरित्रमोक्षं
शिवमोचनरूपं चरित्रं स्तुतिभिर्नानारूपसंचारैः॥४०॥ इति दशमेऽष्टाशीतितमोऽध्यायः॥८८॥ ॥नवाशीतितमे देवः को महा

कृतः को नु महत्त्वीशं जंतुर्वै कृतकिल्बिषः॥ क्षेमी स्यात्किं नु विश्वेशे कृतागस्को जगद्गुरौ॥३९॥ य एवम
गि व्याकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः॥ गिरित्रमोक्षं कथयेत् शृणोति वा विमुच्यते संसृतिभि
स्तथारिभिः॥४०॥ इति श्रीभागवते महापुराणे दशमस्कंधे वृकमोक्षणं नामाष्टाशीतितमोऽध्यायः॥८८॥
॥ ॥श्रीशुक उवाच॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु
को महान्॥१॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप॥ तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद्ब्रह्मणः सभां॥ श
॥२॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्वपरीक्षया॥ तस्मै चुक्रोध भगवान् प्रज्वलन्स्वेन तेजसा॥३॥ स आ
त्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणा प्रभुः॥४॥ ॥

नितिसंशये॥ परीक्ष्य विष्णोरुत्कर्षं मुनिभ्योऽर्णयद्भृगुः॥ इतिहासांतरमाह। सरस्वत्या इति॥१॥२॥३॥ स्वयोन्यास्वस्यैव
रूपांतरेणाभिव्यक्तिस्थानेन स्वकार्येण सर्वथा। ते न यथा कश्चिद्वह्निं शमयाति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामा
सेत्यर्थः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०३०
१२३ ॥१०॥ तीर्थकारिणा तीर्थत्वनिमित्तेन ।११॥ तस्मान्मंद्रया गंभीरया गंभीरया गिरा निर्वृतस्तस्तूष्णीं बभूवेति शेषः ॥१३॥१४॥ विस्मि

ततः कैलासमगमत्स तं देवो महेश्वरः ॥ परिरब्धुं समारेभ उत्थाय भ्रातरं मुदा ॥ नैच्छत्त्वमस्युत्पथग इति देवश्चु
कोप ह ॥५॥ शूलमुद्यम्य तं हंतुमारेभे तिग्मलोचनः ॥ पतित्वा पादयोर्देवी सांत्वयामास तं गिरा ॥६॥ अथो जगा
म वैकुंठं यत्र देवो जनार्दनः ॥ शयानं श्रिय उत्संगे पदा वक्षस्यताडयत् ॥७॥ तत उत्थाय भगवान् सह लक्ष्म्या
सतां गतिः ॥ स्वतल्पादवरुह्याथ ननाम शिरसा मुनिं ॥८॥ आह ते स्वागतं ब्रह्मन्निषीदात्रासने क्षणं ॥ अजा
नतामागतान्वः क्षंतुमर्हसि नः प्रभो ॥९॥ अतीवकोमलौ तात चरणौ ते महामुने ॥ इत्युक्त्वा विप्रचरणौ मर्दयन्स्वे
न पाणिना ॥१०॥ पुनीहि सर्वलोकं मां लोकपालांश्च मद्गतान् ॥ पादोदकेन भवतस्तीर्थानां तीर्थकारिणा ॥११॥
स अद्याहं भगवँल्लक्ष्म्या आसमेकांतभाजनं ॥ वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः ॥१२॥ श्रीशुक उवाच ॥ एवं हतां
ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा ॥ निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठोऽश्रुलोचनः ॥१३॥ पुनश्च सत्रमाव्रज्य मु
नीनां ब्रह्मवादिनां ॥ स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥१४॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंश १२३
याः ॥ भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभयं ॥१५॥

ताः अपराधातिरेकेऽपि निर्विकारित्वेन भूयांसं श्रद्दधुः महत्तमं निश्चितवंतः । यतः यस्मिन् ॥१५॥ श्रीरामसमर्थ ॥ श्रीकृष्ण ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैराग्यंच चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं दृष्ट्यं विषयांस्त्यक्तुमशक्नुवतोपि सन्मानेच्छा त्यागोन्रामाद्य वैराग्यं ततो विषयाणां
ति मध्ये लवणादिव्यरेकेणापि रुचिर्द्वितीयं तथा रुचावपि मनसि रागश्चेत्स्थितस्त्येनवाह्येंद्रियैरेव विषयसेवनं तृतीयं ततश्चाप्योदासी
न्यं चतुर्थं तथाहुः। वैराग्यमाद्यं यतमानसंज्ञं व्यतिरेकसंज्ञः। एकेंद्रियाख्यं हृदि रागसेवा क्षय्यं तस्याप्यभावस्तु व

धर्मः साक्षाद्यतो ज्ञानं वैराग्यंच तदन्वितं॥ ऐश्वर्यंचाष्टधा यस्मादतस्त्वात्समलापहं॥१६॥ मुनीनां न्यस्त
दंडानां शांतानां समचेतसां॥ अकिंचनानां साधूनां यमाहुः परमां गतिं॥१७॥ सत्वं यस्य प्रिया मूर्त्ति र्ब्राह्म
णास्त्विष्टदेवताः॥ भजंत्यनाशिषः शांता यं वा निपुणबुद्धयः॥१८॥ त्रिविधाकृतयस्तस्य राक्षसा असु
राः सुराः॥ गुणिन्या मायया सृष्टाः सत्वं तत्तीर्थसाधनं॥१९॥ श्रीशुकउवाच॥ एवं सारस्वता विप्रा नृणां
संशयनुत्तये॥ पुरुषस्य पदांभोजसेवया तद्गतिं गताः॥२०॥ सूतउवाच॥ इत्येतन्मुनितनयास्यपद्मगं
धपीयूषं भवभयभित्परस्य पुंसः॥ सुश्लोक्यं श्रवणपुटैः पिबंत्यभीक्ष्णं पांथोध्वभ्रमणपरिश्रमं जहाति
॥२१॥
शीकृताख्यमिति।१६।१७॥यस्य भगव॥१८॥ यद्यपि त्रिविधा आकृतयः तत्रापि सुसत्वमेव तीर्थसाधनं। पुरुषार्थहेतुः
॥१९॥ इत्थं निश्चित्य नित्यं सरस्वतीतीरवासिनो विप्राहरिसेवया मुक्तिं प्रापुरिति॥२०॥ व्यासनंदनस्य मुखपंकजादुद्गतं
धयुक्तं पीयूषं तुल्यं हरेः प्रशस्तं यः संसारी सेवते स मुक्तो भवतीति॥२१॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स चोक्तलक्षणो भगवान्कृष्ण एवेति दर्शयितुमाख्यातं तरमाह एकदेति ॥२२॥२३॥२४॥२५॥ ब्रह्मद्विष इत्यादिकां तां गाथां वाक्यं मपि नकाश्चिद्दोषः अतो राजदोषेणैव मत्पुत्रा म्रियंत इति वारं वारं चुक्रोशेत्यर्थः ॥२६॥२७॥ ब्रह्मन्नु किंस्विदिति किमर्थं रथारोदिषि

बादरायणिरुवाच ॥ एकदा द्वारवत्यां तु विप्रपत्न्याः कुमारकः ॥ जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥२२॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः ॥ इदं प्रोवाच विलपन्नातुरो दीनमानसः ॥२३॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः ॥ क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोर्भकः ॥२४॥ हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियं ॥ प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः ॥२५॥ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च ॥ विसृज्य स नृपद्वारि तां गाथां समगायत ॥२६॥ तामर्जुन उपश्रुत्य कर्हिचित्केशवांतिके ॥ परेते नवमे बाले ब्राह्मणं समभाषत ॥२७॥ किंस्विद् ॥ब्र॥ ह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः ॥ राजन्यबंधुरेते वै ब्राह्मणाः सत्र आसते ॥२८॥

यत्त्वन्निवासे धनुर्धरमात्रराजन्यबंधुरपि नास्ति ब्रह्मण्यस्य तु का वार्त्ता। एते तु सत्रयागे इव ब्राह्मणा मिलिता भवितुमर्हतीत्यर्थः ॥२८॥ १२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह धनदारात्मजापृक्ता इति धनादिभिर्वियुक्ता यत्र येषु जीवत्सु शोचंति ते ते जीवंति केवलं जीविकां संवादयंति ॥२९॥ हतकल्मष इति । अग्निप्रवेशेन ब्राह्मणविलापश्रवणपातकात्पूतो भवेयमित्यर्थः । अहतकल्मषश्रद्दितिवा ॥३०॥३१॥ न श्रद्दध्महे न सं

धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः ॥ ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः ॥२९॥ अहं प्रजां वां भगवन् रक्षिष्ये दीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञो ग्निं प्रवेक्ष्ये हतकल्मषः ॥३०॥ ब्राह्मण उवाच ॥ संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः ॥ अनिरुद्धो प्रतिरथो न त्रातुं शक्नुवंति यत् ॥३१॥ तत्कथं नु भवान्कर्म दुःकरं जगदीश्वरैः ॥ चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयं ॥३२॥ अर्जुन उवाच ॥ नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च ॥ अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः ॥३३॥ मावमंस्था मम ब्रह्मन्वीर्यं त्र्यंबकतोषणं ॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥३४॥ एवं विश्रंभितो विप्रः फाल्गुणेन परंतप ॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥३५॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः ॥ पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥३६॥ स उपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं ॥ दिव्यान्यस्त्राणि संस्मृत्य सज्यं गांडीवमाददे ॥३७॥

प्रतीमः ॥३२॥३३॥३४॥ एवं प्रोदितवादे विश्रंभितः विश्वासं प्रापितः निशामयन्स्मरन् ॥३५॥३६॥ ब्राह्मणोपेक्षकत्वेन कृष्णस्यावज्ञाय महेश्वरं नमस्कृत्य ॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०उ० न्यरुणत् आवृतवान्। ते देवाहति तिर्यगूर्ध्वमिति ॥३८॥ अदर्शो होपि नावशिष्ट इत्यर्थः ॥३९॥४०॥ यस्य प्रजाः त तत्र ॥४१॥४२॥
१२५ ॥४३॥४४॥ प्रत्यक्तः वारितः उपपत्तिभिः प्रतिषेधं कुर्वता ॥४५॥ मावज्ञ मावजानीहि ये निंदंति त एव मनुष्यानः कीर्त्ति

न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः ॥ तिर्यगूर्ध्वमधः पार्थश्चकार शरपंजरं ॥३८॥ ततः कुमारः
संजातो विप्रपत्न्या रुदन्मुहुः ॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥३९॥ तदाह विप्रो विजयं विनिं
दन्कृष्णसन्निधौ ॥ मौढ्यं पश्यत मे योहं श्रद्दधे क्लीबकत्थनं ॥४०॥ न प्रद्युम्नो नानिरुद्धो न रामो न च के
शवः ॥ यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ॥४१॥ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः ॥ दै
वोपसृष्टं यो मौर्ख्यादानिनीषति दुर्मतिः ॥४२॥ एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः ॥ ययौ संयम
नीमाशु यत्रास्ते भगवान्यमः ॥४३॥ विप्रापत्यमचक्षाणस्तत ऐंद्रीमगात्पुरीं ॥ आग्नेयीं नैरृतीं सौम्यां वा
यव्यां वारुणीमथ ॥ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥४४॥ ततोऽलब्धद्विजसुतो ह्यनिस्ती
र्णः प्रतिश्रुतः ॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥४५॥ दर्शये द्विजसूनूंस्ते मावज्ञात्मानमा
त्मना ॥ ये ते हि कीर्त्तिं विमलां मनुष्याः स्थापयंति नः ॥४६॥ १२५

स्थापयिष्यंति निर्मलां करिष्यंति। पाठांतरं तु छंदोभंगभयादागंतुकमिति ॥४६॥ श्रीकृष्णार्पणमस्तु ॥ श्रीरामसमर्थ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४७॥ सप्तसप्तसंख्या गिरयो येषु द्वीपेषु तान् ॥४८॥ ४९ ॥५०॥ कृतमिति प्रकृतिपरिणामरूपं नालोकाभावमात्रं ॥५१॥ चक्रानु
पथेन चक्रमनुगतेन द्वारेण तत्तमः परं तस्मात्तमसः परं दूरे वर्त्तमानं परं श्रेष्ठं भागवतं ज्योतिः । समश्नुवानं व्याप्नुवत् प्रसमीक्ष्य

इति संभाष्य भगवानर्जुनेन महेश्वरः ॥ दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥४७॥ सप्तद्वीपान्स
प्तसिंधून्सप्त सप्ताऽगिरीनथ ॥ लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥४८॥ तत्राश्वाः शैव्यसुग्रीवमेघ
पुष्पवलाहकाः ॥ तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥४९॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्वरेश्वरः
सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत्पुरः ॥५०॥ तमः सुघोरं गहनं कृतं महद्विदारयद्भूरितरेण रोचि
षा ॥ मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूं ॥५१॥ द्वारेण चक्रानुपथेन तत्तमः परं
परं ज्योतिरनंतपारं ॥ समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षोऽपिदधेऽक्षिणी उभे ॥५२॥ ततः प्रवि
ष्टः सलिलं नभस्वता बलीयसेजद्बृहदूर्मिभूषणं ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशो
भितं ॥५३॥

प्रताडिताक्षो नेत्रे न्यमीलयदिति ॥५२॥ एजंतः उच्छलंतः बृहंतः प्रहोतः ऊर्म्मयो भूषणं यस्य तत् । तत्र सलिले भवनं महाकालपु
रं द्युमत्तमं द्योतिमत्सु श्रेष्ठं ॥५३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०उ० सहस्रमूर्द्धिभवाः फणाः तासु मणयः तेषां द्युतिभिः द्विसहस्रे नेत्रैरूर्जितं स्फटिकगिरिसंकाशं शितिकंठजिद्वंकं ठश्वजिह्वं श्वशितयः
१२६ नीलः कंठजिह्वायस्य तं ॥५४॥ तद्भोगसुखासनं तस्य भोगो देहः सुखकरमासनं यस्य तं ॥५५॥ महांतो मणिव्राता येषु तेषां किरीटकुं

तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्द्धन्यफणामणिद्युभिः ॥ विभ्राजमानं द्विगुणोल्बणेक्षणं सिताचलाभं शि
तिकंठजिह्वं ॥५४॥ ददर्श तद्भोगसुखासने विभुं महानुभावं पुरुषोत्तमोत्तमं ॥ सांद्राम्बुदाभं सुपिशंगवाससं
प्रसन्नवक्त्रं रुचिरायतेक्षणं ॥५५॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं ॥ प्रलंबचार्वष्ट
भुजं सकौस्तुभं श्रीवत्सलक्ष्म्या वनमालया वृतं ॥५६॥ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्त्तिधरै श्री ग्रं
र्निजायुधैः ॥ पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमानं परमेष्ठिनां पतिं ॥५७॥ ववंद आत्मानमनंतमच्यु
तो जिष्णुश्च तद्दर्शनजातसाध्वसः ॥ तावाह भूमा परमेष्ठिनां प्रभुर्बद्धांजली सस्मितमूर्जया गिरा ॥५८॥ द्विजा
त्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णाववनेर्भरासुरान्हत्वेह भूयस्त्वरये तमंतिमे ॥५९॥ १२६

उलानां प्रभा तया परि सर्वतस्फुरंतः सहस्रप्रपरिमिताः कुंतला यस्य तं ॥५६॥ कीर्त्यजयाकीर्त्तिसहितया अजया अखिलर्द्धिभिरणिमा
दिविभूतिभिः मूर्त्तिधराभिः ॥५७॥ ऊर्जितया गिरा ॥५८॥ मे कलावतीर्णौ विति संबोधनं शीघ्रं मे अंतिसकाशं इतं आगच्छतं ॥५९॥

आचरतो आचरतं। इदं तु भारतयुद्धात् पूर्वमेव कृतमपि श्रैष्ठ्यकथनप्रस्तावेनात्रोक्तं॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥ इति दशमे एको
ननवतितमोऽध्यायः॥८९॥ ॥चरमे तु पुनः प्रोक्ता कृष्णलीला समासतः॥ पुरुवेश प्रस्तुतानामानैत्यं च सकारणं॥ श्रीकृष्ण विहरति स

पूर्णकामावपि युवां नरनारायणावृषी॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं॥६०॥ इत्यादिष्टौ भगवता तौ कृष्णौ
परमेष्ठिना॥ ओमित्यानम्य भूमानमादाय द्विजदारकान्॥६१॥ न्यवर्ततां स्वकं धाम संप्रहृष्टौ यथागतं॥ विप्राय
ददतुः पुत्रान् यथारूपं यथावयः॥६२॥ निशाम्य वैष्णवं धाम पार्थः परमविस्मितः॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानु
कंपितं॥६३॥ इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन्॥ बुभुजे विषयान् ग्राम्यानीजे चात्यूर्जितैर्मखैः॥६४॥ प्र
ववर्षाखिलान् कामान् प्रजासु ब्राह्मणादिषु॥ यथाकालं यथैवेंद्रो भगवान् श्रैष्ठ्यमास्थितः॥६५॥ हत्वा नृपानध
र्मिष्ठान् घातयित्वार्जुनादिभिः॥ अंजसा वर्तयामास धर्मं धर्मसुतादिभिः॥६६॥ इति श्रीभागवते महापुराणे दश
मस्कंधे द्विजकुमारानयनं नाम नवाशीतितमोऽध्यायः॥८९॥ ॥श्रीशुक उवाच॥ सुखं स्वपुर्यां निवसन् द्वारकायां श्रि
यःपतिः॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः॥१॥ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः॥ कंदुकादि
भिर्हर्म्यपृष्ठे क्रीडंतीभिस्तडिद्द्युभिः॥२॥ नित्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः॥ स्वलंकृतैर्भटैरश्वै रथैश्च
कनकोज्वलैः॥३॥

मासेन दर्शयति। सुखं स्वपुर्यामिति। सर्वसंपदादिविशिष्टायां॥१॥२॥३॥ श्रीकृष्णार्पणमस्तु॥ ॥श्रीरामचंद्रार्पणमस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह०उ०
१२७

॥४॥ श्रियः पतिः षोडश सहस्रपत्नीनामेकवल्लभः सन् तासां गेहेपुरे इत्यन्वयः॥५॥ गेहविशेषणं प्रोत्फुल्लेत्यादि श्लोकेन॥६॥ तथा ह
दिनीषु च अंभो विगाह्य विजहार महानुदयो वैभवं यस्य सः या विमां कुच कुंकुमो लिलांगः । यत स्ताभिः परिरब्धः॥७॥ सूतमा

उद्यानोपवनाढ्यायां पुष्पित द्रुमराजिषु॥ निर्विशद्भृंग विहंगैर्नादितायां समंततः॥४॥ रेमे षो
डशसाहस्रपत्नीनामेकवल्लभः॥ तावद्विचित्ररूपोसौ तद्गेहेषु समर्द्धिषु॥५॥ प्रोत्फुल्लोत्पल
कल्हार कुमुदांभोजरेणुभिः॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च॥६॥ विजहार विगाह्यां
भो ह्रदिनीषु महोदयः॥ कुचकुंकुमलिप्तांगः परिरब्धश्च योषितां॥७॥ उपगीयमानो गंधर्वैर्मृ
दंगपणवानकान्॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः॥८॥ सिच्यमानोच्युतस्ताभिर्हसंती
भिः स्मरेचकैः॥ प्रतिसिंचन् विचिक्रीडे यक्षीभिर्यक्षराडिव॥९॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्र
देशाः सिंचंत्य उद्धृतबृहत् कवरप्रसूनाः॥ कांतं स्मरेचक जिहीरषयोपगुह्य जातस्मरोत्सवलस
द्वनाविरेजुः॥१०॥ १२७

गधवंदिभिश्चोपगीयमानः॥८॥९॥ ताः क्लिन्नवस्त्राः। अत एव विवृतो कुरुश्च प्रदेशाः। उद्धृतानि विस्रस्तानि बृहत्कवरेभ्यः प्रसू
नानि यासां ताः। जातेन स्मरेण च उत्सवः तेन लसंतिवदनानि यासां ताः॥१०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासां स्तनेभ्यो विषक्तेन कुंकुमास्त्रग्यस्य सः। क्रीडायां अभिषंगेण अभिनिवेशो न धुतः कंपितः कुंतलवृंदबंधो यस्य सः ॥११॥१२॥
॥१३॥ मुकुंदे कस्यचिद्याः समाहिताः इव क्षणमगिरः सत्यः पुनस्तमेवेशं चिंतयंत्यो जडं यथा भवति तथा याति वाक्यानि ऊचुस्ता निमे
मत्तो गदतः शृण्विदं अर्थः ॥१४॥ ईश्वरः श्रीकृष्णः स्वपिति त्वं तु निद्राभंगं कुर्वती विलपति न शोषे न स्वापिषि तद् अनुचितमिदं अर्थः ॥ अथ
कृष्णस्य स्तनस्तनविषक्तेन कुंकुमस्त्रक् क्रीडाभिषंगधुतकुंतलवृंदबंधः ॥ सिंचन्मुहुर्युवतिभिः प्रतिषिच्यमानो रेमे
करेणुभिरिभपतिः परीतः ॥११॥ नटानां नर्त्तकीनां च गीतवाद्योपजीविनां ॥ क्रीडालंकारवासांसि कृष्णोदात्त
स्य च स्त्रियः ॥१२॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृता धियः ॥१३॥
ऊचुर्मुकुंदैकधियो गिर उन्मत्तवज्जडं ॥ चिंतयंत्योरविंदाक्षं तानि मे गदतः शृणु ॥१४॥ महिष्य ऊचुः ॥ कुररि विलप
सि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ॥ वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननय
नहासोदारलीलेक्षितेन ॥१५॥ नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि ॥ दास्यं गता वय
मिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे कबरेण वोढुं ॥१६॥ ॥ ॥ ॥
वा नापराधस्त्वापीस्याशयेनाहुः। नलिननयनस्य हासेन हसितं उदारं यल्लीलेक्षितं तेन कृश्चिद्गाढं निर्विद्धचेतास्त्वमिति ॥१५॥ न
क्तं रात्रौ अदृष्टबंधुः सती रोरवीषि किं वा नैतावत् अपि तु वयमिव स्पृहयसे ॥१६॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशंगु॰
१२८

अलब्धनिद्रः सदा निष्टनसे क्रोशासि किंवाऽस्माभिः प्राप्तां दशां त्वमपि गतोऽसि अहो कष्टं यथा वयं संभोगेन मुकुंदापहृतकुंकुमादि
लांछनाः। तथा त्वमपि यतोपहृतश्रीकौस्तुभादिलांछनो लक्ष्यसे॥१७॥ मुकुंदगादितानि रहस्यानि विस्मरसि तदेकचिंतया कच्चित्त्वं क्षी
णोसि वयमिव स्थगितगीस्तब्धवाक्। हे इंदो नस्तथैवोपलक्ष्यसे॥१८॥ अप्रियाचरणं विनास्मरो दीरणेन व्यथाजननमलया। नेलत

भोभोः सदा निष्टनसे उदन्वन्न लब्धनिद्रोधिगतप्रजागरः॥ किं वा मुकुंदापहृतात्मलांछनः प्राप्तां दशां त्वं च गतो
दुरत्ययां॥१७॥ त्वं यक्ष्मणा बलवता सिग्रहीत इंदो क्षीणस्तमो न निजदीधितिभिः क्षिणोषि॥ कच्चिन्मुकुंदगदि
तानि यथा वयं त्वं विस्मरस्यभोः स्थगितगीरुपलक्ष्यसे नः॥१८॥ किं वा चरितमस्माभिर्मलया निलतेऽप्रियं॥ गो
विंदापांगनिर्भिन्ने हृदीरयसि नः स्मरं॥१९॥ मेघ श्रीमंस्त्वमसि दयितो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवा
न्ध्यायसि प्रेमबद्धः॥ अत्युत्कंठः शबलहृदयोस्मद्विधो बाष्पधाराः स्मृत्वास्मृत्वा विसृजसि मुहुर्दुःखदस्तत्
प्रसंगः॥२०॥ प्रियरावपदानि भाषसे मृतसंजीविकयाऽनया गिरा॥ करवाणि किमद्य ते प्रियं वद मे वल्गितकंठ को
किल॥२१॥

वानुचितमित्यर्थः॥१९॥ मेघेति। आतयाहरणादिसाम्यान्मन्यते त्वं यादवेंद्रस्य नूनं दयितः सखासि अतो भवांस्तं ध्यायति ध्यानेलिंगान्या
दुः। अत्युत्कंठ इत्यादि अहो कृमिति त्वया तेन सख्यं कृतं यतो दुःखदस्तत्प्रसंग इति॥२०॥ हे कोकिल प्रियरावस्य प्रियंवदस्य श्रीकृष्णप
दानीव पदानि शब्दान्नूनं त्वं भाषसे मृतान्नूसंजीवयतीति तथा तयाऽनया कोमलया गिरा वल्गितकंठरमणीयं कंठमेकथय किं तव प्रियंकर १२८

अनिरुद्धश्चेति। अतः पुत्राणां मध्ये सप्तदशैव ज्ञेयाः। अथवा ऽनिरुद्ध नामापि कश्चित्सुत्र एवेति॥३३॥ सहस्राणां अपरिमितानां कुमा
राणामित्यन्वयः॥४१॥ यदा प्रत्येकं बहून् अध्यापयतामाचार्याणामियं संख्या तदपि श्रुतमात्रं नतु सम्यक् ज्ञायते तदा कुमाराणा

प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान् भानुरेव च। सांबो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः॥३३॥ पुष्करो वेदबाहुश्च श्रुत
देवः सुनंदनः। चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च॥३४॥ एतेषामपि राजेंद्र तनूजानां मधुद्विषः। प्रद्युम्न आसी
त्प्रथमः पितृवद्रुक्मिणीसुतः॥३५॥ स रुक्मिणो दुहितरमुपयेमे महारथः। तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वि
तः॥३६॥ स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः। वज्रस्तस्याभवद्यस्तु मौशलादवशेषितः॥३७॥ प्रतिबाहुरभू
त्तस्मात्सुबाहुस्तस्य चात्मजः। सुबाहोः शांतसेनोऽभूत् शतसेनस्तु तत्सुतः॥३८॥ न ह्येतस्मिन्कुले जाता अधना ऽ
बहुप्रजाः। अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे॥३९॥ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणां। संख्या न श
क्यते कर्तुमपि वर्षायुतैर्नृप॥४०॥ तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च। आसन् यदुकुलाचार्याः कुमा
राणामिति श्रुतिः॥४१॥ संख्यानं यादवानां कः करिष्यति महात्मनां। यत्रायुतानामयुतलक्षेणास्ते सआहुकः॥४२
देवासुराहवे हता दैतेया ये सुदारुणाः। ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता ववाधिरे॥४३॥ ॥ ॥

मेव संख्यानं न कर्तुं शक्यते। कुतः पुनः सर्वयादवानामिति॥४२॥ ते चोत्पन्ना इति प्रत्येकं बहुभी रूपैरिति ज्ञेयं॥४३॥ श्रीरामसमर्थ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०उ० एवमेव यदुकुलेपि देवा इ। तथाप्युक्तं। सहस्रशः समुद्भूता देवा यदुकुले पृथगिति॥४४॥ तस्मात् कृष्णकीर्तेः सर्वतीर्थोत्तमत्वं कृष्णस्य च सर्व
१३० देवोत्तमत्वं न चित्रमित्याह। तीर्थं चक्र इति। इतः पूर्वं स्वः सरिदेव सर्वतोधिकं तीर्थमिन्यासीत्। इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृ
ष्णकीर्तिरूपं एतत् स्वः सरिद्रूपं पादशौचं तीर्थं तु नमत्यं चक्रे स्वयमेव सर्वतीर्थोपरि विराजत इत्यर्थः श्रीकृष्णस्य विद्विषः। स्निग्धाश्च तत्सा
रूप्यं ययुरित्यपि न चित्रं तस्य परमकारुणिकत्वात्। तथेदं च न चित्रं। किं तत्। अजितपरा अजितो कृष्णस्ततः परा सर्वतः परिपूर्णा श्री

तन्नियमाय हरिणा प्रोक्ता देवा यदोः कुले॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप॥४४॥ तेषां प्रमाणं भगवान्प्र
भुत्वेना भवद्धरिः॥ ये चानुवर्त्तिनस्तस्य ववृधुः सर्वयादवाः॥४५॥ शय्यासनाटनालापक्रीडास्नानाशनादिषु॥
२ न विदुः संतमात्मानं कृष्णयः कृष्णचेतसः॥४६॥ तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वः सरित्पादशौचं विद्विट्
स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेन्य यत्नः॥ यन्नामामंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः॥ ध्वं
कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य॥४७॥ ॥ ॥
कृष्णस्यैव नान्यस्येति तदेवाह। यदर्थं अन्येषां ब्रह्मादीनां यत्न इति। ननु निरपेक्षं तमेव लक्ष्मीः श्रयत इति चित्रमेवेति चेत्॥
न हि परममंगलनामयत्वात्तस्येत्याह यन्नामेति। तदपि नार्थस्मरणोपेक्षमित्याह। श्रुतमथ गदितमिति सर्वधर्माश्रयत्वादपी १३०
त्याह यत्कृतो गोत्रधर्म इति गोत्रेषु तत्तद्दपि वंशेषु धर्मो यत्कृतः येन प्रवर्त्तितः तस्य क्षितिभरहरणं नैव चित्रमित्याह। कृष्ण
स्यैतदिति कालचक्रायुधस्येति सर्वसंहारककालमूर्त्तेर्विशेषतो दुरंतप्रभावचक्रायुधस्य। क्रिपदे तदित्यर्थः॥४७॥ ॥

यतएवंभूतश्रीकृष्णः ततःसएव सर्वोत्तम इत्याह जयतीति। जनानां निवासः आश्रयः तेषु वानि वसति अंतर्यामितया तथा स कृष्णो ज
यति देवक्यां जन्मेति वादमात्रं यस्य सः। यदुवराः पर्षत् सभा सेवकरूपा यस्य। इच्छामात्रेण निरसनसमर्थोपि क्रीडार्थं दोर्भिरध
र्ममस्यन् क्षिपन्। स्थिरचरवृजिनघ्नः अधिकारिविशेषानपेक्षमेव वृंदावनगततरुलतादीनां संसारदुःखहंता। तथा विला
सवैदग्ध्यानपेक्षं व्रजवनितानां पुरवनितानां। च सुस्मितो न श्रीमता मुखेनैव कामदेवं वर्द्धयन् कामश्चासौ देवश्चेति विजिगीषति
संसारमिति देवस्तं भोगद्वारा मोक्षप्रदमित्यर्थः॥४८॥ तत्र कार्यविशेषैः स्वीकृतमत्स्यकूर्मादिनानामूर्त्तेर्विशेषतो यदूत्तम

जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं॥ स्थिरचरवृजिनघ्नः सुस्मितः श्रीमुखेन व्र
जपुरवनितानां वर्द्धयन् कामदेवं॥४८॥ इत्थं परस्य निजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि॥ कर्माणि कर्म
कषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन्॥४९॥ मर्त्यस्तयानुसवमेधितया मुकुंदश्रीमत्कथाश्रवणकी
र्तनचिंतयैति॥ तद्धाम दुस्तरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः॥५०॥ चित्रं न चैतद्दुरुगायपवित्र
लीलाविध्वस्तकल्मषकदंबकमुक्तिरूपं॥ स्त्रीणां सुदुस्त्यजकृतांतजवापवर्गग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः॥५१
इति श्रीभागवते महापुराणे दशमस्कंधे श्रीकृष्णलीलाचरितानुवर्णने नवतितमोऽध्यायः॥९०॥ ॥ ॥
स्य सतः परस्य तदनुरूपानुकारीणि कर्मकषणानि कर्माणि चरितानि श्रूयात् यान् शृणुयादित्यर्थः॥४९॥ अनुवृत्तेः फलमाह। मर्त्य इति।
श्रीमत्याः कथायाः श्रवणकीर्त्तनयुक्तं पा चिंतया संवर्द्धितयानुवृत्त्या तया तन्निष्ठत्वेन तस्य धाम लोकमेति लोकत्वेपि कालानाकलि
तमित्याह। दुस्तरेति दुर्लभपुरुषार्थमाहग्रामादिति॥५०॥५१॥ इति श्रीश्रीधरस्वामिविरचितायां दशमस्कंधटीकायां श्रीभागवतभावा
र्थदीपिकायां नवतितमोऽध्यायः॥९०॥ ६९

भा०द०श०उ०
१३१

॥ स्कंदसमासः ॥

॥ पुस्तक गुजावापुराणिकाचे होय ॥ चिमनाजि आबादेशमुखयांस दिल्हे असे ॥

राम०
१३१

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू० श्रीगणेशाय नमः ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥१॥ दशमे दशमं लक्ष्यमाश्रि
१ ताश्रयविग्रहं ॥ क्रीडद्यदुकुलांभोधौ परानंदमुदीर्यते ॥२॥ दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते ॥ धर्मग्लानिनिमित्तस्य निरोधो दु
त्र ष्टभूभुजां ॥३॥ प्राकृतादिचतुर्धा यो निरोधः स तु वर्णितः ॥ तत्रैकांतः सृष्टिसंहारादिनिरूपणैः ॥४॥ कृता नवतिरध्याया दशमे कृष्ण
कीर्तये ॥ आद्यैश्चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयाऽवनेः ॥ भारं हर्तुं हरेर्जन्मप्रसंगं निरूप्यते ॥५॥ गोकुले मथुरायां च द्वारवत्यां ततः क्र
मात् ॥ कृष्णलीला त्रिधा प्रोक्ता तत्र द्वेदेहनेकधा ॥६॥ सपंचत्रिंशता ...ायैर्देहवृंदावनादिषु ॥ गोकुले वसतो लीला वर्ण्यते सुरदुष्क

श्रीगणेशाय नमः ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ राज्ञां चोभयवंश्यानां चरितं प
रमाद्भुतम् ॥१॥ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥२॥ अवती
र्य यदोर्वंशे भगवान्भूतभावनः ॥ कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ॥३॥ ॥ ॥

...ये रा ॥७॥ एकेन यमुनावारिण्यक्रूरेण कृता स्तुतिः ॥ एकादशभिरध्यायैर्लीला मधुवने कृता ॥८॥ शेषैर्द्वारवती लीला तन्निर्माणादि त्रि
वर्ण्यते ॥ एवं नवतिरध्याया दशमे विशदार्थकाः ॥९॥ तत्र तु प्रथमे कंसः स्वमृत्युं देव[...]॥ ...ताभीतो वधीत्तस्याः षड्गर्भा १
...का निति वर्ण्यते ॥१०॥ कृतावतारचरितश्रवणामृतनिर्वृतः ॥ उक्तानुवादेनौत्सुक्या[...]॥ कथितो वंशविस्तार इति
॥१॥ श्रीशेनेति प्रतीत्यभिप्रायेणोक्तं ॥२॥ ननु कानि जातो गतः पितृगृहाद्व्रजमेधितार्थ[...]पुनर्विस्तरेण वदस्वाह ॥ अव
तीर्येति ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२पी

अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये अन्यतमस्याप्यलंप्रत्यय इत्याह॥ निवृत्ततर्षैरिति। गततर्षैर्मुक्तैः स्वार्थः।
मुमुक्षूणां भयप्रदेवोपाय इत्याह। भवौषधादिति। विषयिणां परमो विषय इत्याह। श्रोत्रमनोभिरामादिति। अपगतात्मसुकृ यस्मात्
तस्मात्तेन हंतीयपशुघ्नतस्मात् पशुघातिन इतिवा॥४॥ किंच। अस्मत्कुलदेवतं हलस्य तस्त्र कथे वान्यं श्रोतव्यो सावित्याह येनात्मपितामहा
व इति। अमरान् जयंति यैः तैः देवव्रतो भीष्मः तदाद्यैरतिरथैः तिमिंगिलतुल्यैः दुरत्ययं वत्सपदमिव अत्यल्पं कृत्वा तुच्छीकृत्वातरन् स्मयः श्री

निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात्॥ क उत्तमश्लोकगुणानुवादात् पुमान्विरज्येत विना पशुघ्ना
त्॥४॥ पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः॥ दुरत्ययं कौरवसैन्यसागरं कृत्वातरन् वत्सपदं स्म य
त्प्लवाः॥५॥ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां॥ जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गता
य याः॥६॥ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः॥ प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन्॥७॥

कृष्णप्लवाः प्लवो येषां ते॥ तस्य वीर्याणि वदस्वेति तृतीयश्लोकगतेनान्वयः॥४॥ न केवलं पांडवानेवारक्षत्॥ इदं मम शरीरमपि योऽरक्षितवा
म न्नित्याह। द्रौण्यस्त्रविप्लुष्टमिति। द्रोणेरश्वत्थाम्नो ब्रह्मास्त्रेण दग्धमपीदं शरीरं च कुरूणां च पांडवानां च संतानस्य निदानं मम मातुः कुक्षौ
प्रविश्य धृतचक्रो यो जुगोपेति॥६॥ अखिलदेहभाजां सर्वप्राणिनां अंतश्च बहिश्च पुरुषरूपेण कालरूपैश्च अंशैः अभिप्रायेण बहुव
चनं। मृत्युं संसारं उत अपि अमृतमपि प्रयच्छतो वीर्याणि वदस्व ब्रूहि अयं भावः। अंतर्यामिरूपेण ईशीनां मुक्तिं बहिर्दृशीनां च कालरूपे
णमृत्युं ददातीति यतः अतोऽनंतरद्वस्य तद्वीर्याण्येव श्रोतव्यानीति॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०पु०
२

ननु बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयदिति रोहिण्यास्तनयो रामः प्रोक्तः॥ वसुदेवस्तु देवक्याम
ए पुत्रानजीजनत्। कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ऋजुं संमर्दनं भद्रं संकर्षणं महीश्वरं। अष्टमस्तु तयोरासीत्स्वयमेव हरिः कि
लेति। पुनर्देवक्या गर्भसंबंधस्तस्यैवोक्तः स कुतो घटत इत्याक्षेपः॥८॥ कस्मादिति भगवतः कंसभयशंकासंभवादित्यर्थः॥९॥ मातुर्भ्राति

रोहिण्यास्तनयः प्रोक्तो रामसंकर्षणस्त्वया॥ देवक्यागर्भसंभूति कुतो देहांतरं विना॥८॥ कस्मान्मुकुंदो भगवान्पितुर्गे
हाद्व्रजं गतः॥ क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां पतिः॥९॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः॥ भ्रातरं चावधीत्कं त
ष्णि सं मातुरद्धातदर्हणं॥१०॥ देहं मानुषमाश्रित्य कति वर्षाणि वृ॰ भिः॥ मधुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः॥११॥
एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं॥१२॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदम
पि बाधते॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं॥१३॥ सूत उवाच॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स
भगवानथ विष्णुरातं॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः॥१४॥ श्रीशुक उवाच॥
सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः॥१५॥ वासुदेवकथाप्रश्नः पुरुषां म
स्त्रीन्पुनाति हि॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा॥१६॥

रं कंसं तस्माद्धातनमर्हं॥ अद्धा साक्षात्कस्मादवधीत्॥१०॥११॥१२॥ ननु क्षुत्तृड्भ्यां पीडितस्य तव कुतः श्रवणावकाशस्तत्राह। नैषेति॥
त्यक्तोदकाप्यपि मम जीवने हरिकथामृतपानं निमित्तं तदुपरमे सत्येव जीवितं नस्यादित्यर्थः॥१३॥ एवं साधुवादं संभाव्यैवं प्र
श्रीभागवतप्रधानः भागवतेषु श्रेष्ठः॥१४॥ व्यवसिता कृतनिश्चया यतो यतो बुद्धिः॥१५॥ १६

रथंपो

तत्र तावत्प्रथमं भगवदवतारकारणमाह भूमिरित्यादि नवभिः श्लोकैः दृप्तनृपव्याजायै दैत्यास्तेषामनीकशतानामयुतैर्यो भूरिभारस्तेनाक्रां
ता॥१६॥ विभोरंतिके उपस्थिता सती॥१७॥१८॥१९॥ पौरुषीं पुरुषस्य भगवतो गां वाचं मेमत्तः आशु शृणुत तथा चिरं अविलंबितं तथैव

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः॥ आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ॥१६॥ गौर्भूत्वाश्रुमुखी खिन्ना क्रंदंती क
रुणं विभोः॥ उपस्थितांतिके तस्मै व्यसनं स्वमवोचत॥१७॥ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह॥ जगाम सत्रिनयनस्तीरं क्षी
रपयोनिधेः॥१८॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः॥१९॥ गिरं समाधौ गगने स
मीरितां निशाम्य वेधास्त्रिदशानुवाच ह॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरं॥२०॥ पुरैव पुंसावधृ
तो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां॥ स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि॥२१॥ वसुदेवगृ
हे साक्षाद्भगवान्पुरुषः परः॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः॥२२॥ ऋषयोपि तदादेशात्कल्पंतां पशुरूपिणः॥
पयोदान्पुरैवं नापि रूक्षं तर्पयितुं सुराः॥२३॥ वासुदेवकलानंतः सहस्रवदनः स्वराट्॥ अग्रतो भविता देवो हरेः प्रिय
चिकीर्षया॥२३॥ विष्णोर्माया भगवती यया संमोहितं जगत्॥ आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति॥२४॥ श्रीशु
क उवाच॥ इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ॥२५॥ ॥ ॥

भवधृतोऽवधारितः २१

विधीयतां चेति॥२०॥ विज्ञापनात्पुरैव पुंसा ईश्वरेण ज्वरस्तापः॥२१॥२२॥२३॥ देवकीगर्भसंकर्षणयशोदामोहनादिकार्या
र्थं यशोदायां संभविष्यति॥२४॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰ श्री॰ शौ
३

शौ जेंद्रं बंधनागारे अवतारायप्रस्तावकथामाह। शूरसेन इत्यादिना यावदध्यायसमाप्तिः मथुरां आवसन् मथुरायां वसन् विषयान्
देशान् ॥२६॥२७॥ सूर्यया स्वया प्रयाणे प्रयाणार्थं ॥२८॥ रश्मीन् अग्रहीत् ॥२९॥ पारिबर्हं उपस्करं ॥३०॥३१॥३२॥ आभा

शूरसेनो यदुपतिर्मथुरामावसन्पुरीं ॥ माथुरान् शूरसेनांश्च विषयान्बुभुजे पुरा ॥२६॥ राजधानी ततः साभूत्स
र्वयादवभूभुजां ॥ मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः ॥२७॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देव
क्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् ॥२८॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन् हयानां जग्रा
ह रौक्मै रथशतैर्वृतः ॥२९॥ चतुःशतं पारिबर्हं गजानां हेममालिनां ॥ अश्वानामयुतं साद्धं रथानां च त्रिषट्शतं
॥३०॥ दासीनां सुकुमारीणां द्वे शते समलंकृते ॥ दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ॥३१॥ शंखतूर्यमृदं
उ गाश्च नेदुर्दुंदुभयः समं ॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलं ॥३२॥ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवा
क् ॥ अस्यास्त्वामष्टमो गर्भो हंता यां वहसे बुध ॥३३॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हंतुमा
रब्धः खड्गपाणिः कचेऽग्रहीत् ॥३४॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥३५॥

ष्यरे रे कंसेति संबोध्य हंता हननिष्पत्ति ॥३३॥ कुलपांसनः कुलदूषणः। आरब्धः उद्युक्तः कचे केशबंधे ॥३४॥ नृशंसं क्रूरं महाभाग
इति अयं भावः भुजन्मनि हर्षेण देवतैरानकदुंदुभि घोषणाद्भाविभगवदवतारेण शक्यप्रतीकारता संभवतीति। सांत्वयन् स्तु
ल्ल्पा विजयत्वेनोपपत्तिभिश्च सामभार्गेण संबोधयन् ॥३५॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरणभयेन हंसीति चेत्तथापि मरणस्यापरिहरणीयत्वाद्देहान्तरस्यावश्यंभावित्वात्तत्रापि च भोगप्रदास्यदत्वाद्दीनामर्थे दोषात्ते वि
भूयेन पापा रणमयुक्तमित्यभिप्रेत्याह मृत्युर्जन्मवतां वीर मित्यादिभिर्नो देहेन सहेति विधात्रा ललाटे लिखितत्वादिति ॥ तर्ह्यादि
कालविलंबार्थं हन्मीति चेत्तत्राह । अद्य वेति अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्तमिति भावः ॥३७॥ किं च ॥ आत्मो
न्देहे गते यदि देहान्तरं न स्यात्तदा पुण्यं न पापं नापि तत्फलं न नु तदस्तीत्याह । देहे पंचत्वमापन्न इति आपन्ने प्राये कर्मानुगः

वसुदेव उवाच ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥३६॥
मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥३७॥ देहे पंचत्वमापन्ने
देही कर्मानुगोऽवशः ॥ देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥३८॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति ॥ य
थां तृणजलूकैवं देही कर्मगतिं गतः ॥३९॥

दयल्लुत एव प्रथमं देहान्तरं प्राप्य पश्चात्पूर्वं वपुस्त्यजति ॥३८॥ अत्र दृष्टान्तः । व्रजंस्तिष्ठन्नेकेनाग्रतो निहितेन पदा तिष्ठन्नन्यमुत्क्षिप्य पद
प्य देहविभ्रत्पश्चादन्येन पूर्वपादेनाग्रतोऽप्यपुरो निहितेन गच्छति तद्वत् । अत्र च स्वीकारपरित्यागौ नासन्तभिन्नविषयाविति
स्पष्टं दृष्टान्तान्तरमाह । यथा तृणजलूकेति । सा हि तृणान्तरमेव स्पृष्ट्वा पूर्वं तृणं त्यजति । एवं कर्मपथेवर्तमानो जीवोऽपि ॥३९॥ न्यो ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
४

देहविषयावेवस्कीकारपरिहारौ दर्शयितुं दृष्टान्तांतरमाह। स्वप्न इति। दृष्टं राजादिदर्शनां श्रुतं इंद्रादिश्रवणं ताभ्यामाहितसंस्का
रेण मनसा तदेवानुचिंतयन्। ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरुक्तं पश्यति। क्षणांतरे चाहं देवोहमिति प्रप
द्यते मन्यते। ततश्च जाग्रद्देहादृष्टगतस्मृतिर्भवति पुरुषो यथेति जाग्रत्सेव दर्शयितुं दृष्टांतांतरमाह मनोरथेनेति। अत्रापि दृष्टश्रुता
ति भ्यामित्यादि सर्वं योज्यं तथा च स्वप्ने जं तौ वै कस्यचिद्देहे तो मर्त्यस्करसं [illegible] तिः। जन्मलालतया पुंस [illegible] भावेन भूरिदृशाविषयस्वीह
तिं प्राहुर्यथा स्वप्नमनोरथः। स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसाविसादि तद्वदत्रापि कर्मवशाद्देहांतरं प्राप्य प्राक्तनं त्यज

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः॥ दृष्टश्रुताभ्यां मनसानुचिंतयन्
प्रपद्यते तत् किमपि ह्यपस्मृतिः॥४०॥ यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंच
सु॥ गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते॥४१॥ ॥ ॥

ते तीति॥४०॥ ननु विचित्रदेहहेतूनां कर्मणां कृतत्वाद्देहविशेषप्राप्तौ किं कारणमत आह। यत इति यत इति। देहस्य पंच तत्समये पंच १
चरिते सुभूतेषु मायारचितेषु मायया देहरूपेण रचितेषु दैवेन फलाभिमुखेन कर्मणा चोदितं नानाविकारात्मकं मनो यं यं देहं देवादि नारि
दिरूपं प्रतिधावति धावत्यस्तत्र यं यं आप अभिनिवेशेन प्राप्तं तत्र तत्र असौ देही जायते। ननु मनसः कर्तृत्वे तदेव जायतां ना
कर्त्तात्मेत्यत आह। प्रपद्यमान इति। तदेवाहमिति मिथ्याभिमानेन सह जायत इति॥४१॥ ॥ ॥

प्रपद्यमानस्ते

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

षुदेहे ७ स्वस्तदुःखभोक्ता २

ननु सत्यं भविष्यत्येव किमपि देहमात्रं तथाप्यस्याति प्रियस्य राजदेहस्य रक्षणाया स्त्वमपि किं प्रेत इति चेत्तत्राह ज्योति[illegible]। अदश्श्वादि क्रिय
ज्योतिरुदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेनास्थितं समीरस्य वायोर्वेग[illegible]नुगतं कंप[illegible] प्रयंक
विघा प्रतीयते यथा एवं स्वमायारचितेषु गुणेष्वसौ रागेणानुगत प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति। अयं भावः। आत्मन[illegible]हा[illegible]
ऊजन्मानं सह तेन जायत इति तत्रश्चान्योन्यधर्माध्यासात्। यथा देहधर्माः कार्श्यादय आत्मनि प्रतीयंते एवमा[illegible]प्रेम[illegible]

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते॥ एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागा[illegible]विमुह्यति
॥४३॥ तस्मान्न कस्यचित् द्रोहमाचरेत्स तथाविधः॥ आत्मनश्चोपमन्विच्छन् रोगधुर्वै परतो भयं॥४[illegible]पातवानु
ज्ञा बाला कृपणा पुत्रिकोपमा॥ हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल॥४४॥ श्रीशुक उवाच॥ एवं स्वसामापि भर्ते दे
तं बोध्यमानोपि दारुणः॥ नन्यवर्त्तत कौरव्य पुरुषादाननुव्रतः॥४५॥ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः॥ प्राप्तंका
लं प्रतिव्योढुमिदं तत्रान्वपद्यत॥४६॥

योपि देहादिर्विक्तिरा जस्त्वकर देहयोर्विशेषाभावात् व्यर्थो मृत्युप्रतीकार इति॥४२॥ एवमुक्तं सामोपायमुपसंहरन् भेदमाह। तस्मादि
ति परत इति॥ अभिद्रुह्यमाणान्न संबंधिनश्च यमादपि इहामुत्र भयमिति भेदो दर्शितः॥४३॥ पुनः सामाह एषेति पुत्रिकोपमा दा
रूपपीकप्स्वचेतनप्राया॥४४॥ बोध्यमानः पद्भिरुपमानः स्वयं दारुणः॥ पुनः पुरुषादान् देवानन्नुस्त इति॥४५॥ आनकदुंदुभिरिति
ध्यो पदं महाभाग इत्यत्रोक्ताभिप्रायं प्रतिव्योढुं प्रतिकर्तुमित्यर्थः॥ इदं वक्ष्यमाणमपत्यार्पणं अन्वपद्यत ज्ञातवान्॥४६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विचारयति

१०१० ननु रव लोप्यमेतन्नम न्यते सा त्रां वमा हस्वयमेवं मस्कृरिति ॥४७॥ तस्मादुपेक्षादोषपरिहारायैवं करिष्यामीत्याह । मदायो [illegible] सवेकंसाय ॥

५ नन्विदमपि नैवन्याय्यमित्याशंक्याह ॥ अस्यां यदि सुतापेजायेरन् तदायज्ञावितद्वत्तु जीवितं तनुतावद्भेवदेवीतदंतरा [illegible] प्रेयमेवास्त्रि ये

येत तदानकिंचिदन्याय्यं ॥४८॥ यदि च सुता भविष्यंति नचायं म्रियेत तदा पत्पुत्रादेवास्य मरणमिति विपर्यये वा किं नस्यात् । ननु

गति प्रौदस्य कंसस्य तव बालकात्कथं [illegible] त्यान्तत्राह गतिरिति धीतु अस्या स्वामिष्टभागामेऽर्द नेस्कृकृवते । प्रत इदानीमप स्वार्पण

प्रतिज्ञैवमत्रः ॥ तथाऽसतिऽपास्थितो म्रियेत यतौ वह्नि वर्त्तते । निवृत्तः पुनरकालांतरे आपतेच्चेत तदानोपराध [illegible] मे सर्थः । अथवा प

मत्यकुबुद्धिमता पाद्यायाबहुजिवलोदयं । प्रघसो न निवर्त्तेत नापराधोस्ति देहिनः ॥४७॥ प्रदायन्म [illegible] पुत्रान्मोच [illegible]

स्फुर्वी पणामिमां ॥ सुतामे यदि जाये रन्मृतो वीनाम्रियेत चेत् ॥४८॥ विपर्ययो वा किं नस्यादिति धीतु दुरत्यया । [illegible] यितानि

ते निवृत्तः पुनरापर्ते त ॥४९॥ अग्नेर्यथा दारु वियोगयोगयोरदृष्टतोन्यत्र निमित्तमस्ति ॥ एवं हि जंतोरा [illegible] नदे [illegible]

संयोगवियोगहेतुः ॥५०॥ एवं विमृश्य तं पापं यावदात्मनिदर्शनं ॥ पूजयामास वै शौरिर्बहुमानपु [illegible] ॥

वद्दनौ भोजो नृशंसं निरपत्रपं ॥ मनसा दूषमानेन विहसन्निदमब्रवीत् ॥५२॥

सुत्रादुपस्थितो मृत्युः अस्यावधाध्यो निवर्त्तेत स पुनरनेन सत्यमंत्रेणम वेदेवेतिय ह्यागति दुर्ह्तीतु दुरत्ययेत्येतस् [illegible] ब्रुप [illegible] मा

न्म ॥४९॥ प्राणिनामदृष्टं च दुर्वितर्कमिति सदृष्टांत माह । अग्नेरितिवेन वृक्षाद्वन्दे हन्वह्निः सन्निहितानपि वृक्षान्त्यपि [illegible] वि [illegible]

नापि दहति ग्रामे गृहं न्वान स्वस्य प्राप्यादृष्ट व्यतिरेकेण किंचिन्निमित्तमस्तीयर्थः । एवं जंतोर्जन्ममरणयोरा [illegible] र्वभा [illegible] अपि

स्यः ॥५०॥ यावदात्म निदर्शनं सम्प्रज्ञावधि विचार्य ॥५१॥ तस्य विश्वासाय विकसित मुखं भोज प्रहसन्नब्रवीत् [illegible] ॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन

यन्न यथा अरणी रिणी दारुगा हुतथा हि निश्चितं। अस्यास्सकाशात्तु ते भयं नास्ति पतये भ्यः पुत्रेभ्यः ते भयमुत्थितं अ[illegible]हं ते स्को अन्य
न्यापेक्षयास्सर्वेप्यष्टम भवेयुरित्येकं दृष्ट्वं तं तानस्याः पुत्रान्समर्पयिष्ये ॥५३॥ निववृते निवृत्तः। तद्वाक्यसार उपप[illegible]नम् ॥५४॥ [illegible]रति द्वा
कालेप्राप्ते। सर्वस्सर्वासा भगवानेव देवता यस्यास्सा तथा सर्वदेवतामयीति वा भगवदाश्रयत्वात् ॥५५॥ प्रथमं स[illegible]कृथमर्पित[illegible]
वसुदेव उवाच ॥ न ह्यस्यास्ते भयं सौम्य यद्वै साहाशरीरवाक्। पुत्रान्समर्पयिष्येस्या यतस्ते भयमुत्थितं ॥५[illegible] श्रीशुक उवा
स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित्। वसुदेवोपि तं प्रीतः प्रशस्य प्राविशद्गृहं ॥५४॥ अथ काल उपावृत्ते [illegible]देवकी सर्वदे
पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ॥५५॥ कीर्तिमन्तं प्रथमजं कंसायानकदुंदुभिः। अर्पयामास कृच्छ्रेण [illegible]ऽनृताद्वि
ह्वलः ॥५६॥ किं दुःसहं तु साधूनां विदुषां किमपेक्षितं। किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ॥५७॥ [illegible] सुमहान्
शौरे सत्ये चैव व्यवस्थितिं ॥ कंसस्तुष्टमना राजन् प्रहसन्निदमब्रवीत् ॥५८॥ प्रतियातु कुमारोयं न ह्यस्मा[illegible]त्तो मे भयं
अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥५९॥ तथेति सुतमादाय ययावानकदुंदुभिः। नाभ्यनंदत तद्वाक्यमसतो[illegible]
तात्मनः ॥६०॥ नंदाद्याये व्रजे गोपा याश्चामीषां च योषितः। वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥६१॥ ॥
पेक्षायामाह किं दुःसहमिति। सा[illegible]नां सस्संचानां पुत्रलालनसुखापेक्षा कथं सक्तेति अत आह विदुषामिति भगवानेव तत्संना
न्यदिति जानतामित्यर्थः। ननु स्वयं नीते सति कंसो बालं न हन्यादिति पत्नी नीतवानिति किं न स्यादिति ते[illegible] किमकार्यमिति तेन
तु देवकीपुत्रं कथं त्यजेत्यत आह किं दुस्त्यजमिति वितेध्वतआत्मा हरिर्येषां ॥५७॥ ॥५८॥ ॥५९॥ ॥६०॥ कंसस्य ज्ञाति
देवकार्यानुगुणानुभवतीति नारदस्य श्रेयस्य वस्थानां नंदाद्या इत्यादित्रयेण ॥६१॥

तदा३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० ६

उभयोर्वसुदेवनंदकुलयोः ॥६२॥ वधोद्यमं देवकृतमिति शेषः ॥६३॥६४॥ निगडैः शृंखलैः ॥ अजनो विष्णुस्तां छंकया ॥६५॥६६॥६७॥
६८॥ इति दशमस्कंधे प्रथमोऽध्यायः ॥१॥ ॥छ॥ ॥ द्वितीये कंसघाताय देवक्या गर्भगो हरिः ॥ ब्रह्मादिभिः स्तुतः साचसांत्वितेति

सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ॥६२॥ एतत्कंसाय भगवाञ्छशंसाभ्येत्य
नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ॥६३॥ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभृतं कन्यार
हंसुंचस्व विष्णुं च स्ववधं प्रति ॥६४॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जातमहन्पुत्रं तयोरजनशंकया ॥६५॥ मातरं
पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥६६॥ आत्मानमिह संजातं जानु
न्प्राग्विष्णुना हतं ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥६७॥ उग्रसेनं च पितरं यदुभोजांधकाधिपं ॥ स्वयं निगृ[ह्य]
बुभुजे शूरसेनान्महाबलः ॥६८॥ इति श्रीभागवते महापुराणे दशमस्कंधे प्रथमोऽध्यायः ॥१॥ ॥श्रीशु[क उ]
वाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥१॥ अन्यै[श्चासु]रभूपालै-
र्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥२॥ ते पीडिता निविविशुः कुरुपांचालकै[कया]न्॥ शाल्वा[न्]
विदर्भान्निषधान्विदेहान्कोशलानपि ॥३॥ एके तमनुरुंधाना ज्ञातयः पर्युपासते ॥ हतेषु षट्सु बालेषु देव[क्या] औग्रसेनिना

निरूप्यते ॥ यदुभिः स व्यरुध्यतेत्युक्तं तमेवावरोधं प्रपंचयति त्वरयादेवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवे[...] प्रलंबेत्या
दित्रयेण महाशनो अघासुः ॥१॥२॥३॥ अनुरुंधाना अनुवर्तमानाः ॥४॥

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

म.पु.रा.नि.प्र.

धामकलातदेवसप्तमोगर्भो बभूव। किं तद्धामेत्यत आह। यमनंतमिति हर्षशोकविवर्द्धनः। आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधा
रणं दृष्ट्या शोक इति ॥५॥६॥ ननु सा गोकुले किमित्यास्ते अत आह। अन्याश्चेति न केवलं सैव अन्यो अपीति विवरे पूजलक्षस्थानेषु
॥७॥ जठरे संतं ननु गर्भ आकृष्यमाणः कथं जीवेदत आह। मामकं धामेति ततः ततः ॥८॥ किमर्थमेवं कार्यमित्यत आह। अथेति अनं
तरमेवेत्यर्थः। अंशभागेनेति अंशेनांशैर्ज्ञानादिभिर्भजते अधितिष्ठति सर्वानृत्पन्नादिस्तंबपर्यंतान्नियंशभागस्तेन परिपूर्णेन रूपेणेत्यर्थः।

सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते॥ गर्भो बभूव देवक्या हर्षशोकप्रवर्द्धनः॥५॥ भगवानपि विश्वात्मा विदित्वा
... तं॥ रोहि
कंसाज्जभयं॥ यदूनां निजनाथानां योगमायां समादिशत्॥६॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं॥ रोहि
णी वसुदेवस्य भार्यास्ते नंदगोकुले॥ अन्याश्च कंससंविग्ना विवरेषु वसंति हि॥७॥ देवक्या जठरे गर्भं शेषाख्यं धा
श्री मामकं॥ तत्संनिकृष्य रोहिण्या उदरे संनिवेशय॥८॥ अथाहमंशभागेन देवक्याः पुत्रतां शुभे॥ प्राप्स्यामि त्वं
यशोदायां नंदपत्न्यां भविष्यसि॥९॥

अंशेन
यद्वांशैरंशैर्ज्ञानैश्वर्यबलादिभिर्भजति यो जयति स्वीयानिति तथा तेनेति यद्वा अंशेन पुरुषरूपेण मायायां भागो भजनं ईक्षणं य
स्य तेन। यद्वा अंशेन मायया गुणावतारादिरूपा भागा भेदा यस्य तेन। यद्वा अंशा एव मत्स्यादिरूपाः भजनीया न तु साक्षात्स्व
रूपं यस्य तेन। यद्वा अंशैः ज्ञानबलादिभिर्भजनेनानुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितं भगस्सत्त्वभग
वानस्वयमिति वचनादिति तां प्रोत्साहयति। त्वं यशोदायामिति सार्द्धं च तुष्टयेन॥९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू० सर्वान्पुत्रादीन्कामयंते ये ते तेषां वरां ईश्वरीं श्रेष्ठां निधिं त्री॥ अर्चकानां सर्वान्कामवरान्प्रदद्यामिति यातां॥ ९॥११॥१२॥ तद्दि क्रमेण
७ तस्य व्यपदेशं भविष्यंतीत्याह गर्भसंकर्षणादित्यादिना रामेति च संबोधनं करिष्यंति॥ लयासकृष्टेन तेन लोकस्य रमणात्
रस्कसादनात्॥१३॥ तथेति पुनरपि ओमित्यादरेण प्रतिगृह्य गां पृथ्वीं॥१४॥ विस्रंसितः विभ्रष्टः विस्रस्त इत्यर्थः॥ इति विक्लिकु
वि शुश्रुस्तु तद्विदुरित्यर्थः॥१५॥ ननु त्रैविक्रमं तस्याविर्बभूवाजीवानाम्नि वनधातु संबंध इत्यर्थः॥१६॥ धाम श्रीमूर्तिः॥१७॥ जे

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं॥ धूपोपहारबलिभिः सर्वकामवरप्रदां॥१०॥ नामधेयानि कुर्वंति स्थानानि च न
राभुवि॥ दुर्गेति भद्रकालीति विजया वैष्णवीति च॥११॥ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च॥ माया नारायणीश
नी शारदेत्यंबिकेति च॥१२॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि॥ रामेति लोकरमणाद्बलं बलवदुच्छ्रयात्॥१३॥
दिष्टैवं भगवता तथेत्योमिति तद्वचः॥ प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत्॥१४॥ गर्भे प्रणीते देवक्या रोहिणीं योग
निद्रया॥ अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः॥१५॥ भगवानपि विश्वात्मा भक्तानामभयंकरः॥ [illegible]वेशांशभा
गेन मन आनकदुंदुभेः॥१६॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः॥ दुरासदोति दुर्धर्षो भूतानां संबभूव ह॥
ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं चंद्रमिति॥१८॥
गन्मंगलं जगतो मूर्तिमन्मंगलं अच्युतांशं अच्युताः च्युतिरहिता अंशा ऐश्वर्यादयो यस्य तं यदा अच्यु[illegible] अंशांशे वांशः भक्ता
नुग्रहार्थं परिच्छिन्नवपुरित्यर्थः॥ समाहितं सम्यगभूतं मनवाहितं वेधःसीसमा ऽर्पितं देवी द्योतमाना शुद्धसत्त्वेत्यर्थः॥ सर्व[illegible]कस
वस्यात्मानं अतएव आत्मभूतं स्वस्मिन्नाविर्भावे वसंतां मनस्तः मनसे वदधार धारणया धृतवती॥ अत्रानुरूपं दृष्टांतमाह॥ यथा का
ष्ठा प्राची दिक् आनंदकरं चंद्रमिति॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व

सर्वजगन्निवासस्य श्रीहरेर्निवासभूता सत्यपि नितरां सर्वजनाह्लादकत्तया न रेजे । किंतु स्वयमेवानंदमन्वभूत् । यतः कंसस्य गृहे रुद्धा अन्यैर्न दृश्यते । घटादिषु रुद्धा अग्निशिखा दीपइव तथा सती ईश्वराभिमाना सरस्वती ज्ञानखले ज्ञानवंचके रुद्धा यथा अन्येषामनुपकारिणी राजते तद्वत् ॥१९॥ प्रभया भवनं विरोचयंती अजितः अंतरा कुक्षिमध्ये यस्यास्तां एष विरोचमानः ध्रुवं हरिरेवायं यस्मात् ईदृशी पूर्वं नासीत् ॥२०॥ ननु संति सामादयः उपायाः नेति स्वयमेवाह । अयमर्थः तंत्रो देवकार्यप्रधानः विक्रमं न विहंति मद्ध्ये पराक्रमं करिष्यति

सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे ॥ भोजेंद्रगेहेग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती ॥१९॥ तां वी-
क्ष्य कंसः प्रभयाजितांतरां विरोचयंतीं भवनं शुचिस्मितां ॥ आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥२०॥ कि-
मद्य तस्मिन्करणीयमाशु मे यदर्थतंत्रो न विहंति विक्रमं ॥ स्त्रियाः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हंत्यनुकालमायुः ॥२१॥
नृ एष जीवन्खलु संपरेतो वर्त्तेत योत्यंतनृशंसितेन ॥ देहे मृते तं मनुजाः शपंति गंता तमोंधं तनुमानिनो ध्रुवं ॥२२॥ इति घो-
रतमाद्भावात्सन्निवृत्तः स्वयं प्रभुः ॥ आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधकृत् ॥२३॥ आसीनः संविशंस्तिष्ठन्भुंजानः पर्य-
टन्महीं ॥ चिंतयानो हृषीकेशमपश्यत्तन्मयं जगत् ॥२४॥ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ॥ देवैः सानुचरैः साकं गीर्भिर्वृ

षेत्यर्थः । यद्वा तर्हि हृदयमिव हन्यतामिति विचिंत्याह । अर्थतंत्रोपि मुमान् स्वविक्रमं न विहंति न नाशयति । स्त्रीवधेतु श्री ह्रस्यादिति भावः ॥ तदेवाह स्त्रिया इति गुरुमत्या गुर्विण्याः ॥२१॥ किंचासव एव जीवन्नपि मृतस्यात् । नृशंसेन क्रोधेन यो वर्त्तेत तं जीवंतमेव मनुजाः शपंति दुर्वाक्यैः धिक् कुर्वंति स च देहे मृते तनुमानिनः पापिनो नरकं गच्छंति । अथवान्यापप्रकारमेवाह तनुमानिनोस्य देहे मृते अयं ध्रुवमंधंतमो गमिष्यतीति ॥२२॥२३॥ संविशन्नयानः ॥२४॥ रम्याभिर्गीर्भिर्वृषणं कामवर्षिणमैडयन् तुष्टुवुः ॥२५॥

श्री

१० पू०
८

प्रतिश्रुतं सत्यं कृतमिति दृष्टासत्यत्वे नैव प्रथमं स्तुवंति॥ सत्यव्रतमिति सत्यं व्रतं संकल्पो यस्य तं। सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तं।
त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानंतरं च स्थितिसमये च सत्यं अव्यभिचारेण वर्त्तमानं। तदेवाहुः। सत्यस्य योनिमिति सच्छब्देन पृथि
व्यप्तेजांसि सच्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपंचकं तस्य योनिं याचक्षत इति श्रुतेः॥ तस्य योनिं कारणं। अनेन पूर्वं वर्त्तमान
तोक्ता तथा सत्ये तस्मिन्नेव निहितं अंतर्यामितया स्थितं। अनेन स्थितिसमयेपि सत्यत्वमुक्तं। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पार
मार्थिकं तन्नाशेप्यवशिष्यमाणं रूपं। अनेन प्रलयेप्यवधित्वेन सत्यत्वं दर्शितं एवं त्रिसत्यत्वमुपपादितं तथा ऋतं सत्यं नेत्रं। ऋतं च सूनृ दि
ता वाणी सत्यं च समदर्शनं। तथा भागवता व्याख्यास्यमानत्वात् सत्यं च समदर्शनं ऋतं च सूनृता वाणी कविभिः परिकीर्त्तितेति तयो
र्नेत्रं नयनं सो धनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्वप्रकारेण सत्यात्मकं त्वां भगवान् वयं शरणं प्रपन्नाः स्म इति॥ २६॥ नन्नु भवंतो

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये॥ सत्यस्य सत्यं ऋतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥ २६॥ एकाय
नोसौ द्विफलस्त्रिमूलश्चतुरसः पंचविधः षडात्मा॥ सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः॥ २७॥ ॥

पि लोकेश्वरा मत्तुल्या एव किमिति मां शरणं प्रपद्यंते। मैवं वाच्यं त्वमेवैकः सर्वेश्वरः सर्वस्य सृष्ट्यादिकारणत्वात्। वयं तु ... एवैके शरणं एव लोका
दिरूपं द्वैतं च सर्वं त्वद्व्यतिरेकेण नास्तीति वक्तुं द्वैतप्रपंचं वृक्षरूपकेण निरूपयंति एकायन इति असौ प्रपंचरूप आदिवृक्षः स्वत्वाश्रयत इति वृक्षः।
संसारोपि व्याप्ति देहरूपः। कथंभूतः एकायनः एका प्रकृतिरयनं आश्रयो यस्य सः। द्वे सुखदुःखे फले यस्य सः। त्रयो गुणा मूलानि यस्य सः
धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य सः। पंचेंद्रियाणि विधाः ज्ञानप्रकारा यस्य सः षडूर्मयः शोकादयो आत्मानः स्वभावा यस्य सः। सप्त धातु
तवः त्वचो यस्य सः। पंच भूतानि मनो बुद्धिरहंकारश्चेत्यष्टौ विटपाः शाखा विस्तारा यस्य सः। नवद्वाराणि अक्षाः छिद्राणि यस्य सः।
दश प्राणाः छदाः पत्राणि विद्यंते यस्य सः। दशच्छदी द्वौ जीवेश्वरौ खगौ यस्मिन् सः द्विखगः॥ २७॥ ॥ ॥ ॥

असृङ्मांसमेदोमज्जाशुक्राणि धातवः॥ शोकमोहौ जरामृत्यू क्षुत्पिपासे षडूर्मयः

सन्निधानं

एवंरूपस्य संसारवृक्षस्य सत्कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात् स त्वं कारणमित्यर्थः। त्वं सन्निधानं त्वमेव सम्यङ्निधीयते
स्मिन्निति लयस्थानं त्वमेवानुग्रहश्च अनुगृह्णातीति पालकः। ननु ब्रह्मविष्णुरुद्रा एवं ताप्रसिद्धाः कथमहमेवेति चेत्तत्राहुः। त्वन्माययेति
संवृतेति पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यंति ये तु विपश्चितो विद्वांसस्ते तथा न पश्यंति॥२८॥ ननु देवकीपुत्रं मां कथमेवं वर्णयथेति
चेत्तत्राहुः। बिभर्षीति अवबोधैकस्वरूपः आत्मा त्वमेव रूपाणि मूर्त्तीर्बिभर्षि धत्से न तु त्वं कस्यापि पुत्र इत्यर्थः। क्षेमाय पालनाय। सतां धे
नाम्नां निर्वर्त्तिनीं सुखकराणि खलानामभद्राणि॥२९॥ न केवलं त्वमेतावत् भक्तानां मोक्षार्थमपीत्याहुः। त्वयीति त्वयि समाधिनावेशितं त्वच्चेतसा

त्वमेक एवास्य सतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च। त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चि[तो] ये॥२८॥ बिभर्षि
रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य। सत्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानां॥२९॥ त्वय्यंबुजाक्षा-
खिलसत्वधाम्नि समाधिनावेशितचेतसैके। त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिं॥३०॥ स्वयं समुत्तीर्य सुदुस्त-
रं द्युमन् भवार्णवं भीममदभ्रसौहृदाः। भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान्॥३१॥ ॥ ॥

निमित्तेन त्वत्पादपोतेनाश्रितेनैके मुख्याः विवेकिनः महद्भिः कृतेन सेव्येन तैरासंपादितेन वा यद्वा इदमपि मायामयमिति नादरं परित्यज्य
इदमेव महत्सेव्यं लब्धमिति मनसि कृतेन बहुमतेनेत्यर्थः। भवाब्धिं तुच्छं कुर्वंति। अनायासेनैव मज्जनोन्मज्जनादिनीतेषां मुक्तिरित्यर्थः
॥३०॥ ननु तेन पोतेन पूर्वे चेत्पारं गतास्तर्हीदानीं जनानां का गतिस्तत्राहुः स्वयमिति। अयमर्थः। हे द्युमन् स्वप्रकाश। त्वत्पादपोतसान्नि-
ध्यमात्रेण भवांबुधौ वत्सपदमात्रे जाते अतस्तन्निरपेक्षं स्वयमेवान्येषां भीमं सुदुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदांभोरुहरूपां नाव-
मत्रैव निधाय भक्तिमार्गसंप्रदायं प्रवर्त्येत्यर्थः। पारं याताः स्तात्किं। यतोऽदभ्रसौहृदाः सर्वभूतेष्वपि प्रीतिसंकोः। अतस्ते अन्येषां तरणायेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरस्तो

१०।२। मनु विवेकिनां किं मद्भजने न मुक्ता एव हि ते तत्राहुः। येऽन्य इति। विमुक्तमानिनो न तु विमुक्ता वयमिति मन्यमानाः। त्वयि अस्तो अत
९ एवासन् यो भावः तस्माद्धेतोरभावादित्यर्थः। न विशुद्धा बुद्धिर्येषां ते तथा यद्वा त्वयि अस्तभाव इति छेदः। अस्तमतयः। वादेव
वविशुद्धबुद्धयः। कृच्छ्रेण बहुजन्मतपसा परं पदं मोक्षसंनिहितं सत्कुलतपश्रुतादि आरुह्य प्राप्यः पतंति विघ्नैरभिभूयंतो
न आदृतो युष्मदंघ्रीयैस्ते॥३२॥ त्वदीयास्तु न कदाचिदपि पतंतीत्याहुः। तथा नेति। विनायका विघ्नहेतवस्तेषामनीकानि स्तो

येऽन्येऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः॥ आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधो नादृत
युष्मदंघ्रयः॥३२॥ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः॥ त्वयाभिगुप्ता विचरंति निर्भ
या विनायकानीकपमूर्द्धसु प्रभो॥३३॥ सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेयउपायनं वपुः॥ वेद
क्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते॥३४॥

मास्तानि पांति ये तेषां मूर्द्धसु विचरंति विघ्नान् जयंतीत्यर्थः॥३३॥ सतां सुखावहानि रूपाणि धारयसीत्युक्तं बिभर्षि रूपाणीति तत्के ९
न प्रकारेण सुखावहत्वमित्यपेक्षायामाहुः। सत्त्वं विशुद्धमिति सत्त्वं वपुः श्रयत इत्यन्वयः। श्रेय उपायनं कर्मफलदातृ कथं येन वपुषा
जनस्तवार्हणं पूजां समीहते करोति केः॥ वेदश्च क्रियायोगाश्च तपश्च समाधिश्च तैः चतुराश्रमधर्मैरित्यर्थः। वपुषो नाश्रयणे अर्हणा
संभवान्न कर्मफलसिद्धिः स्यादिति॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

तस्य बुद्ध्याक्षेपा दिनाश्लेपात्कत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामपि स्फुटं। तत्र कर्मफले भक्तिं विना प्राप्तत्वे मोक्षस्य तु ज्ञानैकसाध्यता
तस्ये द्विं भवे तिसानुशयानुशयान्समाहुः। सत्वं न चेदिति हि धातः इदं सत्वं निर्जितं वपुः न भवेत्र्वे तर्हि विज्ञाने विशिष्टमपरोक्षं ज्ञानं न भवे
दित्यनुषंगः। कृष्णर्थंभूतं अज्ञानभिदोपमार्जनं अज्ञाने चेतत्त्वताभिदो च तयोरपमार्जनं निवृत्तिं कार्यं ह्यज्ञानं भिन्नतीयज्ञानभिन्न
नाम्नानं विज्ञानं प्रार्जनं आपप्राप्तमेवेति ननु जडानां बुद्ध्यादीनामतः प्रकाशत्वतूष्णलेति ज्ञानं भवेदेवेत्यगुणप्रकाशैः गुणावृद्धि नैव प्रकाशोऽभि
वानू सर्वसाक्षी पूर्णः केवलमनुमीयते कल्प्यते ननु साक्षात्क्रियत इत्यर्थः। अनुमानप्रकारमाहुः। प्रकाश[illegible]स्य च येन का गुण इति
यस्य संबंधी अयं बुद्ध्यादिर्गुणप्रकाशातेषां गुणसाक्षीयिवां येन वा बुद्ध्याद्यारूढेन प्रमात्रोवीद्यो गुणप्र[illegible]इत इत्यनुमीयत इ बुध्याद्यधिष्ठा त्रा

दि सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं। गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन
न वा गुणः॥२५॥ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः। मनोवचोभ्यामनुमेयवर्त्मनो देव
क्रियायां प्रतियंत्यथापि हि॥२६॥

स्यर्थः। शुद्धसत्त्ववपुषि ताथिसे व्यपाने तु तदाकारं तत्करणे तलसादेन साक्षात्कारो भवेदिति भावः॥२५॥ एवं तावद्भक्तानामभ्युदयाप
म वर्गार्थं रूपाणि विभर्षीत्युक्तं तान्यपि भजनीयानि केवलं न तु ज्ञातुं शक्यंते अनंतत्वादतर्क्यत्वान्मनोवचसोरगोचरत्वादि
त्याहुः। न नामरूपे इति गुणाश्च जन्मानि च कर्माणि च तैर्निरूपितव्ये निरूपणार्हे न भवतः। कुतः अनुमेयं वर्त्म मार्गो यस्य तत्त्वेति त
त्रापि हेतु तस्य साक्षिणः इति नहि साक्षिणस्तत्त्वं मनोवचोगोचरं इत्यर्थः। हे देव बहुधा [illegible] तमानाः अथापि क्रियायां उपास
नादि लक्षणायां त्वां प्रति यंति उपासकाः साक्षात्पश्यंति हि प्रसिद्धं॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०५० तस्माद्भक्त्यैव प्रोक्षइस्कू पसं हरंति शरण्यवान्निति। अन्यानपि संस्मारयन्नू क्रियासु दैवार्च्चेनादिषु॥३७॥ विशेषत श्रीलक्ष्म्यावतारमभि
१० नंदति दिष्ट्येति नः दिष्ट्या भद्रं तव पदपादस्पृष्टतायाः ईश्वरस्य तव जन्ममात्रेण पनीत एवा किं चा लपदकैः कोमलैः पदैः सुशोभि
नैः वज्राकुशादिशुभलक्षणेगां पृथ्वीं चां स्वर्गं च तव त्वया नुकंपितं॥३८॥ ननु तव जन्मना भारापनीत इत्युक्तं सोपमापि किं
जीव वत्संसार उक्तः नहि नहीत्याहुः॥ नेति वत हे ईश अससंसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्कयामः॥ किं चा हे अभया श्रय

श्रृण्वन् गृणन्संस्मरयंश्च चिंतयन्नामानि रूपाणि च मंगलानिते॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेतानभ
वाय कल्पते॥३७॥ दिष्ट्या हरेस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितुः॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनै
धा ईक्ष्याम गां द्यां च तवानुकंपितां॥३८॥ न तेभवस्येश भवस्य कारणं विना विनोदं वत तर्कयामहे॥ भवो निरोधः स्थिति
रप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि॥३९॥ मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यविप्रविबुधेषु कृतावता
तारः॥ त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते॥४०॥ दिष्ट्यांब ते कुक्षि[illegible] तः परः पुमान्
प शेनस्साक्षाद्भगवान्भवाय नः॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः॥४१॥ ॥ ॥ १०
नभयमाश्रयत इति तथात्त संबोधनं हे नित्यमुक्तेत्यर्थः॥ तव जन्मकारणं नास्तीति किं वक्तव्यं यतो जीवानामप्यपि भवादयः। त्वयि
विनयेया अविद्याकृता कृताः न परमार्थतस्संतीति॥३९॥ प्रस्तुतं प्रार्थयंते मत्स्याश्वेति नोस्माकं त्रिभुवनं चान्यदा यथा पासि तथा
धुनापि पाहीति। वंदनं तइति वंदतः सर्वे श्रीशे पि प्रणमंति॥४०॥ देवकीं मत्स्यान्तर्हि दिष्ट्येति नोस्माकं भवाय पाद्भवाय साक्षात्परः
पुमांस्ते कुक्षिंगतः अतो भयं माभूदिति योशेनापि सदास्माकमुद्भवाय भवतीति साक्षात्ते कुक्षिं गातइत्येतदस्मद्भाग्यं॥४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

यस्यरूपमिदं सर्वं प्रपञ्चभूतं यथा यथावत्। अस्माकं चेयं चित्ता एता विहस्यास्य तद् इति मन्यमाना ब्रह्मेशानौ पुरोधाय पुरतः कृत्वा य
युरिति॥४२॥ इति दशमे द्वितीयो ध्यायः॥२॥ ॥ तृतीये निजरूपेण संभूतस्तं हरिः स्वयं॥ पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुलं॥ अथ
यति पंगलार्थं यर्हि सर्वगुणोपेतः कालो बभूव तदा देवक्यां विष्णुराविरासीदिति षष्ठमश्लोकगतेनान्वयः परमशोभन तमेवाहाय र्हीत्यादि
ना॥ अजनात् नारायणात् जन्म यस्य प्रजापतेस्तस्य ऋक्षं रोहिणी नक्षत्रं कथंभूतं शांतानि वीक्षाण्यश्विन्यादीनि ग्रहाश्च तारका
श्रीशुक उवाच॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं॥ ४२॥ इति श्री[illegible]भागवते महापु
गत राणे दशमस्कंदे गर्भविलब्रह्मादिकृतस्तुतिर्नाम द्वितीयोध्यायः॥२॥ ॥ श्रीशुक उवाच॥ अथ सर्वगुणोपेतः [illegible]लः परमशो
भनः॥ यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं॥१॥ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयं॥ महीमंगलभूयिष्टपुरग्रामव्रजा
करा॥२॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः॥ द्विजालिकुलसन्नादस्तबका वनराजयः॥३॥ ववौ वायुः सुखस्पर्शः पुण्यगं
धवहः शुचिः॥ अग्नयश्च द्विजातीनां शांतास्तत्र समिंधत॥४॥ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां॥ जायमानेजने तस्मि
न्नेदुर्दुंदुभयो दिवि॥५॥ जगुः किंनरगंधर्वास्तुष्टुवुः सिद्धचारणाः॥ विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा॥६॥ मुमुचुर्मुन रा
यो देवाः सुमनांसि मुदान्विताः॥ मंदं मंदं जलधरा जगर्जुरनुसागरं॥७॥ ॥ ॥ ॥
श्च यस्मिन् तत्॥१॥ यर्हीति सर्वत्रानुषज्यते। निर्मलानामुडुगणानामुदयो यस्मिन् तत्तथा॥ मंगलभूयिष्टं पुरादयो यस्यां सा॥२॥ जल
रुहैः श्रीः शोभा येषां तो द्विजालिकुलानां सन्नादा येषु ते स्तबकायासु ता॥३॥ समिंधंत आउ आगमोत्रे हूयव्यः समैधंतेति सम्यक् दीप्ता वभि
मूवुरित्यर्थः॥४॥ असुरद्रुहां कंसादिव्यतिरिक्तानां सर्वप्राणिनां देवानां चेति स्वर्गे तु विशेषमाह। जायमान इति अजने जायमाने आसन्नेः

द० पू०
११

तमसा उद्भूते घन तसि निशि थे ॥७॥ यथा यथावत् ऐश्वरेणैव रूपेण ॥८॥ तं अद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीय श्लोकेनान्वयः । अद्भुतत्वे हेतुग
र्भाणि विशेषणानि अंबुजेक्षण मित्यादीनि श्रीवत्स लक्ष्म लक्षणं यस्या गलेन शोभते गलशोभी स कौस्तुभो यस्मिन् ॥९॥ परिष्वक्ताः स
हस्रं कुंतला किरीट कुंडलादीनां त्विषा स्फुरद् परिमित केशा इत्यर्थः ॥१०॥ विस्मयेनोत्फुल्ले विशाले लोचने यस्य सः । गवामयुतम
स्पृशत् मनसा दत्तवान् कंसनिकटे हीतस्य दीतस्य दानासंभवात् स्पर्श हेतुः । कृष्णावतारेति । मुदाप्लुतो व्याप्तः स्नात इति वा ॥११॥
निशीथे तम उद्भूते जायमाने जनार्दने ॥७॥ देवक्यां देवरूपिण्यां विष्णुः सर्व गुहाशयः ॥ आविरासीद्यथा प्राच्यां दिशी
दुरिव पुष्कलः ॥८॥ तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं ॥ श्रीवत्स लक्ष्मं गलशोभिकौस्तुभं पी
तांबरं सांद्रपयोद सौभगं ॥९॥ महार्ह वैडूर्य किरीट कुंडल त्विषा परिष्वक्त सहस्र कुंतलं ॥ उद्दाम कांच्यंगद कंकणादि
भिर्विरोचमानं वसुदेव ऐक्षत ॥१०॥ स विस्मयोत्फुल्ल विलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा ॥ कृष्णावता
रोत्सव संभ्रमोऽस्पृशन् मुदा द्विजेभ्योऽयुतमाप्लुतो गवां ॥११॥ अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृतधीः कृतां
जलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥१२॥ वसुदेव उवाच ॥ विदितो[illegible]सि भवान् सा
क्षात् पुरुषः प्रकृतेः परः ॥ केवलानुभवानंद स्वरूपः सर्वबुद्धिदृक् ॥१३॥
कृतधीः शुद्धबुद्धिः ॥१२॥ वसुदेव प्रथमं पुत्रबुद्ध्या पश्यन् तां परिसज्याह । अहो विदितोसीति । कथं विदितोस्मि भगवान् प्रकृतेः परः
पुरुष इति । ननु किमत्राश्चर्यं पुरुषस्य प्रकृतेरन्यत्वाद्वेति अतश्चाह साक्षादिति प्रत्यक्षत इत्यर्थः । नन्वक्षि संनिकृष्टं प्रत्यक्षतो
उपलभ्यते किंचिन्नापि स्यात आह । केवलेति केवलश्चासावनुभवश्च आनंदश्च तदेव स्वरूपं यस्य सः किंच सर्वबुद्धिदृक् । न ह्येवंभूतो

धा

[illegible] ११

ननु देवकीजठरे प्रविष्टस्य किमियमिति स्तुतिः। क्रियते अत आह। स एवेति। स एव उक्तः स्वरूप एव त्वं न देवकीजठरे प्रविष्ट
इत्यर्थः॥ ननु विश्वं सृष्ट्वा तदनुप्रविष्टस्य किं पेतद्वत् अत आह। स्वप्रकृत्येति। स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति॥
ननु तर्हि कथं श्रूयते तत्सृष्ट्वा तदेवानुप्राविशदिति अत आह प्रविष्ट इवेति भाव्यसे निरूप्यसे प्रत्यक्षतो वा सद्रूपे
ण प्रविष्ट इव लक्ष्यसे॥१४॥ अत्र दृष्टान्तः यथेति। इमे अविकृता भावा महदादयो यथा तथेति। दृष्टान्तेन विवृणो

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं॥ तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे॥१४॥
यथेमेऽविकृता भावा तथा ते विकृतैः सह॥ नानावीर्याः पृथग्भूता विराजं जनयंति हि॥१५॥
सन्निपत्य समुत्पाद्य दृश्यंते नुगता इव॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः॥१६॥

ब्रह्मांड
ति ते विकृतैरिति। ते विकृतैः षोडशविकारैः सह संनिपत्य विराजं जनयंति पतने हेतुः॥ यतः पृथग्भूताः संतो नाना
वीर्या विशिष्ट कार्यसमर्था न भवंति॥१५॥ अतः संनिपत्येति। एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यंते न पुनः प्र
विष्टाः। कुतः उत्पत्तेः प्रागेव कारणतया विद्यमानत्वात् तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेशो इति॥१६॥
न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू० १२ दार्ष्टान्तिके अनिर्दिशति॥ एवं भवानिति। ननु यद्यहमप्रच्युतस्वरूप एवकारणतया कार्येषु वर्त्ते तर्हि तेषामिंद्रियैर्ग्रह्यमाणेष्वहमपि ग्रह
णं किं नास्ति तत्राह। बुद्ध्यानुमेयलक्षणैरिति। बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैः सं
हः हसंनपि वर्त्तमानोपि तद्गुणाग्रैस्तैर्गुणैः सह न गृह्यसे अयं भावः॥ नहि ग्राह्यैः सहभावमात्रं ग्रहणे कारणं किंतु इंद्रियाणां शक्तिः।
सा च कार्यैकसमधिगम्या यथा कार्यमेव कल्प्यते। अतो यथा च चक्षुषा रूपग्रहणे रसादिग्रहणं नास्ति तथैव विषयग्रहणे त्व
ग्रहणमपीति। अविषयत्वेन च ग्रहणानर्हत्वमुक्तमेव सर्वबुद्धिदृगीस त्रा एवं ताव आगेव विद्यमानत्वात् सर्वेऽङ्गा नास्तीस्फकं।

एवं भवान् बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः॥
अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः॥१७॥

किंच परिच्छिन्नस्य नीडेपक्ष्यादेरिव प्रवेशो भवेत्। तव त्वनावृतत्वादपरिच्छिन्नत्वेन बाह्यांतरभेदो नास्ति कुतः प्रवेश इत्या
ह। अनावृतत्वादिति॥ अनावृतत्वे हेतुर्नो हि सर्वस्येति। नहि सर्वस्वरूपस्य अन्यदावरकमस्ति। सर्वात्मनः नत्वेकेनावृतोऽन्यस्य १२
स्याभवेत् आत्मवस्तुन इति आत्मनो वस्तुन श्चेति हेतुद्वयं। अतसातत्यगमन इत्यस्मात् अतति व्याप्नोतीत्यात्मा नहि व्याप
कस्यावरणं घटते। तथा वस्तुनः परमार्थस्य वस्तुन आवरणं न घट इत्यर्थः। तस्मात्त्वं तर्यामितया प्रवेशो न तु मुख्योस्ति। कु
तस्तं रागर्भे प्रवेशः अतः केवलानुभवानंदस्वरूप एवं त्वं विदितो सौ साक्षाच्चर्य्यं मम भाग्यमित्यर्थः॥१७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेतद्धेतुचतुष्टयं प्रपंचस्यावस्तुत्वे घटेत तत्तु न संभवति सत्त्वेन प्रतीतेरित्याशंक्याह य इति। आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यति
रेकतः आत्मव्यतिरेकेण पृथक् सन्नयं देहादिरिति व्यवस्यति निश्चिनोति यः पुमान् सः अबुधः अविद्वान्। व्य
तिरेकदर्शनात्। किंच मनीषितं विचारितं सत् तु देहादि सर्वं यतः विनानुवादं वाचारंभणमात्रं विना सम्यङ् न भवति। अतो वस्तु
त्वेन स्वीकृतं बाधितमेववस्तु बुद्ध्या॥ उपादद् स्वीकुर्वन्नबुध इत्यर्थः॥१८॥ एवं परमेश्वर दृश्यस्य तद्व्यतिरेकेण सत्त्वमुक्तं परमे
श्वरोपादानत्वादपि तद्व्यतिरेकेणासत्त्वमित्याह। त्वत्तोऽस्येति। न चैवं सत्यपि विकारित्वमित्याह अनीहादिति॥ अगुणत्वाद

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्त
न मुपाददत्पुमान्॥१८॥ त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदंत्यनीहादगुणादविक्रियात्॥ त्वयीश्वरे ब्रह्मणि नो
त्व विरुध्यते त्वदाश्रयत्वादुपचर्य्यते गुणैः॥१९॥ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः॥ स
सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये॥२०॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि
व्यु ममाखिलेश्वर॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः॥२१॥

नीहत्वात्ततोऽविकारित्वमित्यर्थः। नन्वनीहत्वे कथं कर्तृत्वं वा कुतोऽविकारित्वं तत्राह त्वयीश्वर इति। ब्रह्मत्वादविकारित्वं
कर्तृत्वं ईश्वरे लोकर्तृत्वमपीति। नन्वेतदपि विरुद्धमेव नेत्याह तदाश्रयत्वादिति। गुणैः कुर्वद्भिः त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणाश्रये
त्वात्। यथोभृत्यकृतं राजनीति॥१९॥ एवंभूतस्येव तव यथा विश्वस्थितिसर्गलयार्थं त्रिवर्णा गुणावतारः। एवमयं भूभारापं
नयनार्थमिति ज्ञात्वमित्याह। स त्वमिति श्लोकद्वयेन॥२०॥ रक्षितुमिच्छुरवतीर्णोऽसि कृष्णेन वर्णेना अतस्मा ध्वनेरक्षणार्थं राजन्यसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० १२

किंतु तथाप्यप्रमत्तेन त्वया भाव्यमित्याह ॥ अयंत्विति ॥ असभ्यः खलः ॥ समर्पितं कथितं ॥२२॥ उपाधावत् अस्तौत् ॥२३॥ त्वयि भयं शं कैव तावन्नास्तीति श्लोकचतुष्टयेनाह देवकी किंचिद्विज्ञापयितुं ॥ रूपमिति ॥ यत्तत्किमपि रूपं वस्तु प्राहुः वेदाः ॥ किं तद्वस्तु प्राहुः वेदाः किं तद्वस्तु तदाह अव्यक्तं ॥ अत्र हेतुः आद्यं कारणं ॥ किंपरमाणवः ॥ न ॥ ब्रह्म बृहत् ॥ किंप्रधानं ॥ न ॥ ज्योतिश्चैतन्यं ॥ किं वैशेषिकाणामिव ज्ञानगुणं ॥ न ॥ निर्गुणं ॥ किं मीमांसकानामिव ज्ञानपरिणामि ॥ न ॥ निर्विकारं ॥ किं पुष्कराक्षादीनामिव ॥ किं विक्षेपेण परिणामि ॥ न सत्तामात्रं ॥ तर्हि किं सामान्यं ॥ न ॥ निर्विशेषं ॥ तर्हि किं कारणतां साक्षिकं ॥ न ॥ निरीहं सन्निधिमात्रेण कारणं ॥ एवंभूतं किमपि का

अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेवतारं पुरुषैः समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः ॥२२॥ श्रीशुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं ॥ देवकी तमुपाधावत् कंसाद्भीता शुचिस्मिता ॥२३॥ देव्युवाच ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारं ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥२४॥

र्यकल्पं यद्वस्तु स एव साक्षात् त्वं विष्णुरिति ॥ अपरोक्षश्चेत्याह अध्यात्मदीप इति ॥ बुद्ध्यादिकरणसंघातप्रकाशक इत्यर्थः ॥ १२
अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यत इत्यव्यक्तं ॥ कथं तर्हि तावद्व्यज्यत इत्याह ॥ आद्यं सर्वस्य कार्यस्याद्यं अनादि इत्यर्थः ॥ तथा ब्रह्मज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः पदैर्देशेन प्रकाशेन च गुणेन च विकारेण च व्यक्तिं निराकरोति ॥ तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति सामान्येन निरीहमिति क्रियया च व्यक्तिं निराकरोति ॥ अन्यत्समानं ॥ एवंभूतस्य तव न भयशंकेति भावः ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु

किंच महाप्रलये व्यवशिष्यमाणस्य कुतो भयमित्याह। नष्टे लोक इति। चराचरे लोके महाभूतेषु लीनेषु तेष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु तस्मि
न्नपि व्यक्ते अव्यक्तं प्रधानं प्राप्ते। अशेषा लक्षके प्रधाने संज्ञा प्रज्ञा यस्य एवं प्रविलीनं भिदा नास्ति पश्चादेवमुद्बोधनीयामिति सः अशेषसं
ज्ञः शेषसंज्ञ इति वा॥२५॥ किंच एवं प्रलयहेतुर्योऽयं काल एनं॥ हे अव्यक्तबंधो प्रकृतिप्रवर्त्तक तस्य प्रलयावधिभूतस्य ते तव चेष्टां ली
लां चेष्टते विपरिवर्त्तते पुनःपुनर्वत्सरादस्या महीयान् द्विपरार्द्धरूपः यस्य चेष्टामाहुः। तं त्वां क्षेमधाम अभयस्थानं प्रपद्ये॥

नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु॥ व्यक्तेव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः
॥२५॥ योयं कालस्तस्य तेव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम गरी त्वं
प्रपद्ये॥२६॥ मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भयं नाध्यगच्छत्॥ त्वत्पादाब्जं प्राप्य यदृच्छया
द्य स्वस्थः शेते मृत्युरस्मादपैति॥२७॥ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहासि॥ रूपं चे
य्य दं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्टाः॥२८॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन॥ समुद्वि
जे भवद्धेतोः कंसादहमधीरधीः॥२९॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकं॥ शंखचक्रगदापद्मश्रिया जुष्टं चतु
र्भुजं॥३०॥

रणं व्रजे॥२६॥ क्षेमधाम त्वमेवाह मर्त्य इति लोकान्प्रति। यदृच्छया केनापि भाग्योदयेन॥ हे आद्य॥२७॥ त्रस्तं त्वं वित्रापयति स त्वमिति
भृत्यानां वित्रासं हंतीति भृत्यवित्रासहा भृत्यवित्रासहा असि विदितानि वाच्छेदः। पौरुषं ऐश्वरं ध्यानधिष्ण्यं ध्यानास्पदं मांसदृशां मांसचक्षुषां प्रत्यक्ष
नेम मा कृथाः॥२८॥ भवत एव हेतोर्निमित्तात्कंसात्समुद्विजे बिभेमि यतः अधीरचित्ता॥२९॥३०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० पू०
१४

किमित्यत आह किं मिह्यरूपसंहर्त्तव्यं एवं भर्तेन मया पुत्रेण तव महती श्लाघास्यादिति तत्राह विश्वमिति ॥ निशांते प्रलयावसाने यथा वन्मात्मसंके
चतः ॥ असंभावितत्वादुपहास्यतैवस्यादित्यर्थः ॥ ३१ ॥ चतुर्भुजरूपेणाविर्भावे कारणं तावदाह त्वमेवेत्यादि चतुर्दशभिः पूर्वसर्गे प्र
थमजन्मनि अग्रेः आसीः पृश्निर्नाम स्वायंभुवे मन्वंतरे तदा अयं वसुदेवः ॥ ३२ ॥ ते पार्थे तपकृतवंतौ ॥ ३३ ॥ ३४ ॥ ३५ ॥ तप्यते तपश्च

विश्वं यदेतत्स्वतनौ निशांते यथावकाशं पुरुषः परो भवान् ॥ बिभर्त्ति सोयं मम गर्भगोभूद् दहो नृलोकस्य विडंबनं तत्
॥ ३१ ॥ श्रीभगवानुवाच ॥ त्वमेव पूर्वसर्गे भूः पृश्निः स्वायंभुवे सति ॥ तदायं सुतपानाम प्रजापतिरकल्मषः ॥ ३२ ॥ यु
वां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः ॥ संनियम्येंद्रियग्रामं तेपाथे परमं तपः ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगु
णानन्नु ॥ सहमानौ श्वासरोधविनिर्धूतमनोमलौ ॥ ३४ ॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा ॥ मत्तः कामान
भीप्संतौ मदाराधनमीहथुः ॥ ३५ ॥ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करं ॥ दिव्यवर्षसहस्त्राणि द्वादशेयुर्मदात्म
नोः ॥ ३६ ॥ तदा वां परितुष्टोहममुना वपुषानघे ॥ तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ ३७ ॥ प्रादुरासं
वरदराड् युवयोः कामदित्सया ॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३८ ॥ अजुष्टग्राम्यविषयावनपत्यौ
च दंपती ॥ न वव्राथेपवर्गं मे मोहितौ देवमायया ॥ ३९ ॥

चरतोः ॥ ईयुर्गतानि ॥ मदात्मनो मच्चित्तयोः ॥ ३६ ॥ अमुना वपुषा ॥ ३७ ॥ प्रादुर्भूतोस्मि ॥ वरदराड् वरदेषु श्रेष्ठ इत्यर्थः ॥ तेन सहकृ
रेण च वां वरं वा स्माविर्भावे कारणमुक्तं ॥ मादृशो मत्सदृशः ॥ कामस्य दित्सया दातुमिच्छया ॥ ३८ ॥ मे मत्तोपि ॥ युवां अपवर्गं न वव्राथे न वृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरं दत्त्वा मायि गते॥४०॥४१॥ अदित्यां कश्यपाद्वामन आसेति यदुक्तं यैस्तद्दर्पित तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः॥४२॥४३॥ प्राक्प्र
थमं तावदेतद्रूपं मे जन्मेति स्मरणाय त्वन्नाय दर्शितं मद्भवं मद्विषयं। अनंतरं त्वं दिदृक्षया बालोपि भविष्यामीति भावः॥४४॥ ननु त्वयि प्रस
न्नेपि कथमावयोः पुनः पुनर्जन्मेत्यत आह परं न भविष्यतीत्याह। युवां मामिति॥४५॥४६॥ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नयामपरे। दायास्वतो से

गते मय्यायुवां लब्ध्वा वरं मत्सदृशं सुतं॥ ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ॥४०॥ अदृष्ट्वान्यतमं लोके शीलौदा
थ र्यगुणैः समं॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः॥४१॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात्॥ उपेंद्र इति विख्यातो
वामनत्वाच्च वामनः॥४२॥ तृतीयेस्मिन्भवेहं वै तेनैव वपुषा युवां॥ जातोम्भूयस्तयोरेव सत्यं मे व्याहृतं सति॥४३॥ एतद्वां द यस्तयो
र्शितं रूपं प्राग्जन्मस्मरणाय मे॥४२॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जन्यते॥४४॥ युवां मां पुत्रभावेन ब्रह्मभावेन चास
दे कृत्॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां॥४५॥ श्रीशुक उवाच॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया॥ पि
त्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः॥४६॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात्॥ यदा
बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि नंदजायया॥४७॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायिते
थ॥ द्वारश्च सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः॥४८॥ ॥ ॥ ॥ लि

कन्यां मन्मायां यामानयेति। प्रथममेव भगवता प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैव अजा या योगमाया सा नंदजायया निमित्तभूत
याजनि जाता॥४७॥ हृताः प्रत्यया अर्थाः सर्वे वा तयो येषां अथवा हृताः प्रत्यया अन्या अस्वसर्वीहृत्तयो येषां जागरणमपि तथाभूते
षु द्वारपालेषु सत्सु। बृहत्सु कपाटेषु लोहकीलकयुक्तश्शृंखलैः। बृहद्भिः कपाटादिभिर्दुरत्यया इति वा॥४८॥ ॥ ॥

यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय। मन्मायामानयाशु त्वं यशोदागर्भसंभ
वां॥४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० १५ स्वयमेव व्यवर्य्यंत विवृताद्व्यर्थः। व्याक्रियंतेति वक्तव्ये गुणाछंदसः। २ वेर्निर्भित्ताव्॥४२॥ गंभीरो यस्तोयौ घस्तस्य जवेनयेडुर्मयस्तैः फे
निलाफेन व्याप्ताभयानकै रावर्त्तशतैर्व्याप्तापि। श्रियःपतेः सीतापतेः॥५०॥ निद्रया अजया॥५१॥ प्रतिमुच्य बध्वापदोः पादयोः
यो ताः हस्तवाहे वसुदेवस्यागतेस्वयं व्यवर्य्यंत पश्चात मोरवेः॥ववर्ष पर्जन्य उपांशु गर्जितः शेषोन्वगाद्वारि निवारयन्फणैः
॥४९॥ मघोनि वर्षत्यसकृद्यमानुजा गंभीर तोयौघजवोर्मिफेनिला॥ भयानकावर्त्तशताकुलानदी मार्गंददौ सिंधुरिव श्रि लिना
श्रियःपतेः॥५०॥ नंदव्रजं शौरिरुपेत्य तत्र तान्गोपान्प्रसुप्तानुपलभ्य निद्रया॥ सुतं यशोदाशयने निधाय तत्सुतामु
पादाय पुनर्गृहानगात्॥५१॥ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः॥५२॥ य
शोदा नंदपत्नी च जातं परमबुध्यत॥ नतल्लिंगं परिश्रांता निद्रयापगतस्मृतिः॥५३॥ इतिश्रीभागवते महापुराणे दशम
स्कंधे कृष्णजन्मनि तृतीयोध्यायः॥३॥ ॥श्रीशुक उवाच॥ बहिरंतः पुरद्वारः सर्वाः पूर्ववदावृताः॥ ततो बालध्वनिं श्रुत्वा
तू गृहपालाः समुत्थिताः॥१॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्मतत्॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते॥२॥
स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्द्धजः॥३॥ तमाह भ्रातरं देवी कृपणा
करुणं सती॥ स्नुषेयं तव कल्याण स्त्रियं माहंतुमर्हसि॥४॥ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः॥ त्वया दैवनिसृष्टेन
पुत्रिकैका प्रदीयतां॥५॥ नन्वहं ते ह्यवरजा दीना हतसुता प्रभो॥ दातुमर्हसि मंद याअंगेमां चरमां प्रजां॥६॥ ॥ १५
लोहं निगडं प्राप्तेस्म॥५२॥ जातं किंचिदिति केवलं अबुध्यत न तु पुत्रः कन्या चेति योगनिद्रया व्यामोहितेति॥५३॥ इति दशमे तृतीयोध्यायः॥३॥
चतुर्थे चंडिकावाक्यमाकर्ण्य तिभयाकुलः॥ दुर्मंत्रिभिर्हितं मेने कंसो बालादिहिंसनं॥१॥ नदद्दृष्टं जन्मार॥ कालोमृत्युः॥३॥४॥५॥ अंगहे भ्रातः॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीनदीनवत्स्त्रीहीनादपि दीनवत्स्नुतथा। पुत्रस्यान्यत्र नीतत्वात्। सा च योगमायेति ज्ञात्वाह। याचितोपि आच्छिद्य अलभ्यजग्रह॥७॥
अपोथयत् बलेन विक्षेप॥८॥ स घुएव देवी भूता॥९॥१०॥११॥ कृपणा किंति अन्या न् श्रीशेष न्नह निष्पतीति ज्ञात्वा वारयति पादांतरे मां
मां कृपणां इत्याहिंसीः हिंसितवान् असीति॥१२॥ बहूनामनिकेतेषु वाराणस्यादि स्थानेषु॥१३॥ परमविस्मित इत्थं देवी वाग् न तावजा
तीं श्रीशुक उवाच॥ उपगुह्यात्मजामेवं रुदत्या दीनदीनवत्॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः॥७॥ तां गृहीता
चरणयोर्जातमात्रां स्वसुः सुतां॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः॥८॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं ग
ता॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा॥९॥ दिव्यस्रगंबरालेपरत्नाभरणभूषिता॥ धनुःशूलेषुचर्मासिशंखचक्र
गदाधरा॥१०॥ सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत्॥११॥ किं मया हत
भा५ या मंद जातः खलु तवांतकृत्॥ यत्र क्वचित्पूर्वशत्रुर्मा हिंसीः कृपणान् वृथा॥१२॥ इति प्रभाष्य तं देवी माया भगवती भुवि
बहुनामनिकेतेषु बहुनामा बभूव ह॥१३॥ तयाभिहितमाकर्ण्य कंसः परमविस्मितः॥ देवकीं वसुदेवं च विमुच्य प्रश्रितो
ब्रवीत्॥१४॥ अहो भगिन्यहो भाम मया वां बत पाप्मना॥ पुरुषाद इवापत्यं बहवो हिंसिताः सुताः॥१५॥ स त्वहं त्यक्त
स्य कारुण्यस्त्यक्तज्ञातिसुहृत्खलः॥ कान् लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन्॥१६॥ दैवमप्यनृतं वक्ति न मर्त्या स्व
एव केवलं॥ यद्विश्रंभादहं पापः स्वसुर्निहतवान् शिशून्॥१७॥ मा शोचतं महाभागावात्मजान्स्वकृतंभुजः॥ जंतवो न वा
सदैकत्र दैवाधीनाः सहासते॥१८॥
तेति॥१४॥ मा महे भगिनी भर्तश्च पुरुषादो राक्षसो यथा स्वापत्यमेव हि नस्ति तद्वत्॥१५॥१६॥१७॥ हे महाभागौ स्वकृतंभुजः स्वार्थ
कर्मभोक्तॄन् किं चा जंतवः प्राणिनः सदा नासते किंतु अल्पकालमेव तदापि एकत्र नासते किंतु वियुज्यंते यतो दैवाधीनाः॥१८॥
कृत

मृतेषु यथा

द०पु०
१६
सदानां सत इत्यनेन यदुक्तं जन्ममरणादि तदपि देहानामेव नात्मन इत्याह भुवीति । भूता निदेहा एव यांति अपयांति च भवंति न भवंति
चेत्यर्थः । यथा भुवि भौमानि घटादीनि तद्वत् । एतेषु जन्मादिभिः विक्रियमाणेषु अपमपरोक्षतया प्रत्यभिज्ञायमानो न आत्मा विपर्ये
ति विपर्ययं न प्राप्नोति । एकरूप एव वर्त्तत इत्यर्थः । भौमेषु विक्रियमाणेषु भूस्तथेति ॥१९॥ एवं विचार्यमाणे सति न शोकाद्यवकाशः
अज्ञानतस्तु न निवर्त्तत इत्याह पथेति पथा पथावत् । अनेवंविदः एवमज्ञानतः आत्मविपर्ययो देहात्मबुद्धिर्भवति यतो विपर्ययाद्
द्वैतं भवति देहोहंकारेण ह्यात्मा निपरिच्छिन्ने सतीहंकारास्पदं भिन्नं भवति यतो भेदात् पुत्रादिदेहैर्योगो वियोगश्चातस्तत्संसृतिः सु
खदुःखे इति यावदज्ञानं न निवर्त्तत इत्यर्थः ॥२०॥ एवमुक्तप्रकारेण नैते न तनवतनयांः अहंतु तान्न यांति तवान् तथापि अज्ञानदृष्ट्या
भुवि भौमानि भूतानि यथा यान्त्यपयांति च ॥ नायमात्मा तथैतेषु विपर्येतियथैव भूः ॥१९॥ यथा नैवं विदां भेदो यत आत्मवि
पर्ययः ॥ देहयोगवियोगौ च संसृतिर्न निवर्त्तते ॥२०॥ तस्मादुद्रे स्वतनया न्मया व्यापादितानपि ॥ मानुशोच यतः सर्वः स्वकृतं
विंदतेवशः ॥२१॥ यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेस्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥२२॥ क्षमध्वं मम
श्रु श्रे दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रो रथाग्रहीत् ॥२३॥ ॥ ॥ ॥
स्वतनया न्मया व्यापादितान् अपि मानुशोचेति सांत्वयति तस्मादिति । अज्ञानाश्रयमेव कर्मवादमाहयत इति ॥२१॥ कथं तर्हि ब्राह्मणा १६
मेवे दिहं तु स्तद्वधस्य च प्रायश्चित्तं न श्रवणं । अज्ञानमूले त्याह यावदिति । अस्वदृक् देहाभिमानी तस्य देहस्य हननमात्मनि अभिम
स्र न्यमान इत्यर्थः ॥२२॥ श्यालकं संस्वस्त्रोरिति स्वसृशब्देन द्विवचनो पपमा पितृणेगुणद्वारा मिथुनलक्षणया स्वसृतत्संयोरभिधानं तु
लिंगं समावायेन प्राणमृतउपर्यधातीति वा व्योर्थस्तस्य समावापः समुदायप्रवेशात् ॥ देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्य
र्थः श्यालः शौरेन के र्थे वंद्यसुदेवाभिधानं ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसौहृदं प्रियवादादिना दर्शयन्॥२४॥२५॥२६॥ स्वपरभेददर्शी नैव किं भवति तदाह शोकहर्षेति। भावैरेव निमित्तभूतैः मिथो भवान् घ्नंतं भा
वमीश्वरं पृथग्दृशस्ते न पश्यंति किंतु अहमेव हंता हतश्चेति मन्यंत इत्यर्थः॥२७॥ विशुद्धं यथा भवति॥२८॥२९॥ नातिकोविदाः दृष्टमात्रमते
यः॥३०॥ न निर्गता निर्दशा दिना येषां ते तान्॥३१॥ अस्यतः क्षिपतः सतः उत्सृज्य रणं सर्वं॥३३॥३४॥ अन्यासक्तो विमुखो न

मोचयामास निगडाद्विस्रब्धः कन्यकागिरा॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं॥२४॥ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी॥
व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह॥२५॥ एवमेतन्महाभाग यथा वदसि देहिनां॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः॥२६॥
शोकहर्षभयद्वेषलोभमोहमदान्विताः॥ मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः॥२७॥ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषि
तः॥ देवकीवसुदेवाभ्यामनुज्ञातो विशद्गृहं॥२८॥ श्रीशुक उवाच॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः॥ तेभ्य आचष्ट
तत्सर्वं यदुक्तं योगनिद्रया॥२९॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः॥३०॥
एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु॥ अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून्॥३१॥ किमुद्यमैः करिष्यंति देवाः सम
रभीरवः॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव॥३२॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः॥ जिजीविषव उत्सृज्य
पलायनपरा ययुः॥३३॥ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दिवौकसः॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः॥३४॥ न
त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान्॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः॥३५॥ किं क्षेमशूरैर्विबुधैरसंयुग
विकत्थनैः॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा॥३६॥

श्चेति न हंसि नहीनास्ति॥३५॥ क्षेमे निर्भयदेशे शूरैः। संयुगादन्यत्र विकत्थनं प्रौढिवादो येषां तैः॥ न तु हरेर्विभेमि शंभोश्चेति श्लेषेणाह॥
रहोजुषेति सर्वस्यांतः प्रविश्य न क्वचिद्बहिर्दृष्ट इत्यर्थः। पुरुषप्रवेशरहितमिलावृतवनमोको यस्य तेन शंभुना॥३६॥ ॥

न

श्रीशुकउ०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मा

द०पू० यद्यप्युद्यमैर्देवा न किंचिदपि कर्तुं समर्थास्तथापि नीतिरनुवर्त्तनीयैवेत्याहुः। तथापीति॥३७॥ रूढपदः बद्धमूलः॥३८॥ देवानां मूलं विष्णुः
१७ सच यत्र धर्मस्तत्रास्ते धर्मस्य मूलं वेदादय इति॥३९॥४०॥४१॥ किंच विप्रादयो हरेरेव तनवो यस्मात् दमनेवोपाय इत्याहुः अयमिति

किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता॥ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे। ततस्तन्मूलखनने नियुंक्ष्वास्मा
ननुव्रतान्॥३७॥ यथामयोंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं॥ यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महा
न्बद्धबलो न चाल्यते॥३८॥ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः। तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः॥३९॥
तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः। तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः॥४०॥ विप्रा गावश्च वेदाश्च
तपः सत्यं दमः शमः॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः॥४१॥ सहि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः॥ तन्मूला
देवताः सर्वाः सेश्वराः सचतुर्मुखाः॥ अयं वै तद्वधोपायो यदृषीणां विहिंसनं॥४२॥ श्रीशुक उवाच॥ एवं दुर्मंत्रिभिः सार्कं
सहसंमंत्र्य दुर्मतिः॥ ब्रह्महिंसां हितं मेने कालपाशावृतोसुरः॥४३॥ संदिश्य साधुलोकस्य संदने दन प्रियान्॥का क
मरूपधरान्दिक्षु दानवान्गृहमाविशत्॥४४॥ ते वै रजः प्रकृतयस्तमसा मूढचेतसः॥ सतां विद्वेषमाचेरुरारादागत नः
मृत्यवः॥४५॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च॥ हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः॥४६॥ इति श्रीभा १७
गवते महापुराणे दशमस्कंधे चतुर्थोध्यायः॥४॥ श्रीकृष्णार्पणमस्तु॥

ति॥४२॥४३॥४४॥ आरात्समीपमागतो मृत्युर्येषां ते॥४५॥ सतां विद्वेषो न मम … किंतु अनर्थकारीत्याह। आयुः श्रियमि
ति॥४६॥ इति दशमे चतुर्थोध्यायः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं॥ गत्वाथ मथुरां प्राप वसुदेवान्मोत्सवं॥१॥ महामना उदारचित्तः॥१॥२॥ नियुते द्वे लक्षे सम्यक्
लंकृतास्ताश्च प्रादात्। कथंभूतान् रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णरसाक्तैः वस्त्रैश्चावृतान्॥३॥ द्रव्याणां गोहिरण्यादीनां संख्ये त
केषांचिद्दानेन वशुद्धिर्यथा तथा दानादियुक्तं जातकर्मादिसंस्कारैर्वालकानां शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दृष्टांत
त्वेनोदाहरति कालेन भूम्यादि। स्नानेन देहादि शौचेनापेध्यलिप्तादि संस्कारैर्गर्भादि तपसा इंद्रियादि। इज्यया ब्राह्मणादि। दानैर्द्र

श्रीशुक उवाच॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः॥ आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलंकृतः॥१॥ वाचयि
त्वा स्वस्त्ययनं जातकर्मात्मजस्य वै॥ कारयामास विधिवत् पितृदेवार्चनं तथा॥२॥ धेनूनां नियुते प्रादात् विप्रेभ्यः समलं
कृते॥ तिलाद्रीन् सप्त रत्नौघशातकौंभांबरावृतान्॥३॥ कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया॥ शुध्यंति
मा दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया॥४॥ सौमंगल्यगिरो विप्राः सूतमागधवंदिनः॥ गायकाश्च जगुर्नेदुर्भेर्यो दुंदु
भयो मुहुः॥५॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः॥६॥ गावो वृषा व कृ
त्सतराः हरिद्रातैलरूषिताः॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः॥७॥ ॥ ॥ ॥

व्याणि संतुष्ट्या मनः॥ आत्मा आत्मविद्ययेति॥४॥ सौमंगल्यगिरः स्वस्तिवाचका विप्राः सूर्या वभूवुः। तत्र सूताः पौराणिकाः प्रोक्ता मागधाः
॥५॥ वंशशंसकाः॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः॥ संमृष्टानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि गृहांतराणि ग
मध्यानि च यस्मिन् सतथा चित्रध्वजेषु पताकानां स्रजश्चैलपल्लवतोरणानि च तैर्भूषितः॥६॥ हरिद्रातैलरूषिताः लिप्ताः॥ विचित्रधा
तवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्चालंकारतया विद्यंते येषां ते तथाभूताः॥ वादयो बहुवरिसर्थः॥७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० १८ आकल्पा अलंकाराः ॥९॥ नवकुंकुमकिंजल्कैः मुखपंकजेषु भूतिः श्रीर्यासां ताः ॥१०॥ सुमृष्टानि उज्वलितानि मणिमयानि कुंडलानि
यासां निष्काः पदकानि कंठेषु यासां ताः श्च शिखाभ्यः च्युतानि माल्यवर्षाणि यासां ताः नंदालयं व्रजतीः व्रजंत्यः पथि विरेजुः । सबलयाः

महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥८॥ गोप्यश्चाकर्ण्य मुदिता यशोदा
याः सुतोद्भवं ॥ आत्मानं भूषयां चक्रुर्वस्त्राकल्पांजनादिभिः ॥९॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरि
तं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥१०॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदा
लयं सवलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ॥११॥ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्रा
चूर्णतैलाद्भिः सिंचंत्यो जनमुज्जगुः ॥१२॥ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरे नंते नंदस्य व्रजमाग
ते ॥१३॥ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥१४॥ नंदो महामनास्तेभ्यो वा
सोलंकारगोधनं ॥ सूतमागधवंदिभ्यो येन्ये विद्योपजीविनः ॥१५॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णो
राराधनार्थाय स्वपुत्रस्योदयाय च ॥१६॥ रोहिणी च महाभागा नंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासस्रक्कंठाभरण
भूषिता ॥१७॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥१८॥ गोपान्गोकु १८
लरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥१९॥ ॥ ॥ ॥

कंठकनभूषिता बालैर्लोलैः कुंडलादिभिः शोभा यासां ताः ॥११॥ जनं सिंचंत्यः जनमुज्जगुः शिदिवा ॥१२॥१३॥१४॥ तेभ्यः प्रादात् ॥१५॥ यथोचित
मन्यानपि अपूजयत् ॥१६॥१७॥ हरेर्निवासेन ये आत्मगुणास्तैः रमायाः आक्रीडं विहारस्थानं ॥१८॥ वार्षिक्यं प्रति वर्षं देयं ॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातरं सखायं तदवमोचनं तस्य वसतिस्थानं ॥२०॥२१॥२२॥२३॥ पुनर्भवस्तु नर्जीत इति तत्र हेतुर्गर्भविरोषणं संसारचक्रे वर्त्तमान इति ॥२४॥
दुर्लभत्वमेवाहानेकत्रेति। प्रियश्चासौ संवासश्च प्रियसंवासः हे प्रियेति वा स्त्रात्तसंख्याचित्तमीयमाना नापुवंतीतिपुवाः तृणकाष्ठादय
स्तेषां यथा एकत्रस्थितिर्नास्ति तद्वत् ॥२५॥ क्वचिदिति पश्व्यादिरूपेतास्मिंच नो नंदो घगोपयो दध्यादिप्रभूते गोपिकास्तान्यादिना पु

वसुदेव उपश्रुत्य भ्रातरं नंदमागतं ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं ॥२०॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं ॥
प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥२१॥ पूजितं सुखमासीनं पृष्ट्वाऽनामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह
विशांपते ॥२२॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥२३॥ दिष्ट्या संसार
चक्रेस्मिन् वर्त्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभं प्रियदर्शनं ॥२४॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां
ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥२५॥ कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधं ॥ बृहद्वनं तदधुनायत्रा
स्से त्वं सुहृद्वृतः ॥२६॥ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥ तातं भवंतं मन्वानो भवद्भ्यामुपलालितः ॥२७॥ पुंसस्त्रि
वर्गो विहितः सुहृदो ह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोर्थाय कल्पते ॥२८॥ नंद उवाच ॥ अहो ते देवकीपुत्राः कंसे
न बहवो हताः ॥ एकावशिष्टावरजा कन्या सापि दिवं गता ॥२९॥ ॥ ॥ ॥ ॥

त्वक्षेमं विवक्षया पृच्छति प्रसक्तधीः स्वात्मजयो रिस्नेहवत्वात् ॥२६॥ भवद्भ्यामुपलालितस्सन् क्वचिद्वर्त्तत इति शेषः ॥२७॥ पुत्रादर्शनक्लेशो
मनु नष्टः पुंस इति सुहृदो बंधून् प्रभावितः संपादितो यस्त्रिवर्गः स हि पुंसो विहितः फलं शास्त्रेण प्रोक्तः। न स्वमात्र पर्यवसितः अतस्तेषु क्लि वा
श्यमानेषु सुखायन भवतीत्यर्थः। नंदो वसुदेवं सांत्वयन्नाह इति। कंसचारभयशंकमानो नंद कटाक्षेण त्वरंदतान्य देवाह ॥२९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू०
१९

अदृष्टे एव निष्ठा समाप्तिर्यस्य सः। यदैव पुत्रादिसुखप्रदं अदृष्टं हीयते तदैव ते पुत्रादयो न भवंतीत्यर्थः॥ अदृष्टपरमस्तथा अदृष्टमेव पर
मं यस्य सः॥ यद्यपि पुत्रादयो वियुक्तास्तथापि तान् दृष्टमेव पुनः संगमयतीत्यर्थः॥ एवमदृष्टमात्मनस्तत्त्वं अव्यभिचारि कारणं सुखदुःख
योर्यो वेद स न मुह्यति तस्मादिदानीं त्वया न दुःखं भावनीयं मत्तो नानापि वियुक्तानामपि च कालांतरे दर्शनयोगयोः संभवात्॥ अस्मद
दिभिरपि कालांतरे तद्वियोगे समसीति नंदस्य देवीवाग्गेषाभाभिसूचिका॥३०॥ तां ब्रुवाणं वसुदेवो हुतं सक्तो नंदमाह करो वै इति ब्रुवाणं

नूनं ह्यदृष्टनिष्ठोयमदृष्टपरमो जनः॥ अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति॥३०॥ वसुदेव उवाच॥ करो वै वार्षिको दत्तो
राज्ञे दृष्टा वयं च वः॥ नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले॥३१॥ श्रीशुक उवाच॥ इति नंदादयो गोपाः प्रोक्तास्ते शौ
गो रिणा ययुः॥ अनोभिरनडुद्युक्तैस्तमनुप्राप्य गोकुलं॥३२॥ इति श्रीभागवते महापुराणे दशमस्कंधे वसुदेव — द —
र्शीगमो नाम पंचमोध्यायः॥५॥ ॥ ॥ श्रीशुक उवाच॥ नंदः पथि वचः शौरेर्न मृषेति विचिंतयन्॥ हरिं जगाम शरण
मुत्पातागमशंकितः॥१॥ कंसेन प्रहिता घोरा पूतना बालघातिनी॥ शिशूंश्चचार निघ्नंती पुरग्रामव्रजादिषु॥२॥ न
यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु॥ कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि॥३॥ सा खेचर्येकदोत्पत्य पूतना नंदगो
कुलं॥ योषित्वा माययात्मानं प्राविशत्कामचारिणी॥४॥ १९

भिः॥३१॥३२॥ इति दशमे पंचमोध्यायः॥५॥ ॥ षष्ठे सर्वपुरी रानंदो व्रजं गच्छन्नंतां पथि॥ दृष्ट्वा तु राक्षसीं तस्या मृतकं श्रुत्वाति विस्मि
तः॥१॥२॥ कुत्र विषयेशो कंसमानं राजानं प्रति अविषये प्रवृत्ता सेवामरिष्यतीति सूचयन्नाह। न यत्रेति यत्र श्रीकृष्णस्य श्रवणादीनि
न संति तत्रैव तासां शक्तिः। सात्वतां स्मिन्नत्र वसति का शंकेति भावः॥३॥ योषित्वा वपुतो परां नारीमिव आत्मानं विधाय ननु निर्ल
ज्जा निर्विशंका सती कथं परसंनिप्रविष्टा अत आह कामचारिणीति नहि कामचारिणी विदं विचारमित्यर्थः॥४॥ ॥ ॥

श्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांवनितां पतिं द्रष्टुं आगतां अनिरूपयंतीं श्रियमिव गोप्यो ऽमंसत इत्युत्तर श्लोकेनान्वयः। श्रीसाम्यार्थे विविशेषणानि केशबंधव्यतिषक्तम
ल्लिकां धम्मिल्लसंसिक्तमल्लिकाकुसुमां बृहता नितंबेन स्तनाभ्यां च उभयत आक्रांतमिव हलक्कलशं मध्यम सुदरं यस्याः तां सुवाससे
रपूर्णीयेवा सुसीमस्यास्तां।। कंपितयोः कर्णभूषणयोः त्विषा उल्लसद्भिः कुंतलैर्मंडितमाननं यस्यास्तां।।५।। वल्गुस्मितापांगविसर्गवी
क्षितैः वल्गु रम्यं स्मितं येषु ते तथाभूता अपांगविसर्गा येषु तैः वीक्षितैः व्रजौकसां मनो हरंतीं अतो गोप्या हृतमनस्केन तां न निवारितवं

तां केशबंधव्यतिषक्तमल्लिकां बृहन्नितंबस्तनकृछ्रमध्यमां।। सुवाससं कंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडि
ताननां।।५।। वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां।। अमंसतांभोजकरेण रूपिणीं गो
प्यः श्रियं द्रष्टुमिवागतां पतिं।।६।। बालग्रहस्तत्र विचिन्वती शिशून् यदृच्छया नंदगृहेऽसदंतकं।। बालं प्रतिच्छन्न
निजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि।।७।। विबुध्य तां बालकमारिकाग्रहं चराचरात्मास निमीलितेक्षणः
अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः।।८।।

तदित्युक्तं भवति। गोप्यः श्रियमिव मत्वा तूष्णीमासन् अतः केनाप्यनिवारितासती प्रविवेशेति भावः।।६।। बालग्रहः पूतना असदंत
कं बालं ददर्श। असतामंतकं दृष्ट्वा कथं न बिभेति तत्राह। प्रतिच्छन्नं निजोरुतेजसं बालमनाद्येन प्रतिच्छन्नं तिरोहितं निजं उरु
तेजो येन तं कमिव भस्मनि भस्मन्याहितमग्निमिवेति।।७।। चराचरात्मा स्वतादेव तां विबुध्य निमीलितेक्षण आसीत् स्वयमनंतं दृष्ट्वा
नापि तं कस्या अंकमारोपयत्। बालं प्रति यथा उरगं सुप्तं अबुद्धिश्चासौ रज्जुधीश्च सः।। अज्ञानेन रज्जुबुद्ध्या गृण्हाति यथा तद्वदिति।।
।।८।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०५० नन्वयशोदारोहिण्यौ तां कथं नन्वधारयेतां तत्राहतामिति। वामे च त्नुजेनन्या इक्वेषिते यस्यास्तां वरस्त्रियं च सहसैव अंतरागन्ह मध्ये वीक्ष्य
२० च अंतस्त्रैष्णो वहिर्मार्दिवैदृश्यंत:॥ कोशापरिछेदासिवत्। मदुचित्रचर्ममयकोशः परिछद आवरणं यस्य अश्मैः स्वदृस्यतद्वत्। तत्रभय
चधर्षिते अभिद्रुते अहमस्य जननी इयंवेति मोहिते च सत्यौ॥ जननी जनन्यौ निरीक्ष्यमाणे एव केवलंमतिष्ठतां ननु निवारितवत्यौ॥१॥
तां तीक्ष्णचित्तां पातिवामचेष्टितां वीक्ष्यं तरा कोशपरिछदासिवत्॥ वरस्त्रियं तत्प्रभयात्व धर्षिते निरीक्ष्यमाणे जनन्यौ स्थितिष्ट
तां॥१९॥ तस्मिन्नस्तनं दुर्ज्जरवीर्य्यमुल्बणं घोरं कमादाय शिरोर्हदावथ॥ गाढं कराभ्यां भगवां प्रपीड्य तत्प्राणैः समं रोषसमन्
न्वितोऽपिबत्॥१०॥ सामुंचमुंचालमिति प्रभाषिणी निपीड्यमानाखिल जीवमर्म्मणि॥ विवृत्य नेत्रे चरणौ भुजौ मुहुर्मुहुः सि
न्नगात्रा क्षिपती रुरोद ह॥११॥ तस्याः स्वनेनातिगभीररंहसा साद्रिर्महीद्यौश्च चचाल सग्रहा॥ रसां दिशश्च प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशंकया॥१२॥ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि॥ प्रसार्य गोष्ठे
निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप॥१३॥ पतमानोऽपि तद्देहस्त्रिगव्युत्यंतरं द्रुमान्॥ चूर्णयामासराजेन्द्र
महदासीत्तदद्भुतं॥१४॥
तस्मिन्स्थाने दुर्ज्जरं वीर्य्यविषं यस्मिन्स्तं तस्तनं तौ श्रीकृष्णं अंकमादाय तस्मै शिशावेददौ॥ अथ अनंतरमेव प्रपीड्य केवलं २०
विषमपथ्यामितिमत्वेव तस्याः प्राणैः सहापिबत्॥१०॥ चरणौ भुजौ च मुहुः क्षिपंती॥ निस्विन्नानि निःस्वेदयुक्तानि गात्राणि य
स्याः सा॥११॥ रसा इरसा तलानिच॥१२॥ व्यादाय मुखं विवृत्य निजरूपमास्थिता मरणसमये कपटमयत्वात्यक्त्वेति शेषः॥१३॥ प
तन्नपि तस्या देहः षट्क्रोशमध्यवर्त्तिनो द्रुमान् चूर्णीचकार॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स
ईषामात्रो ग्रदंष्ट्रास्यं ईषा लांगलदंडः तत्प्रमाणा उग्रा दंष्ट्रा यस्मिन् तत्तथा भूतमास्यं यस्मिन् तत्तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च तत्र सुः
संत्रासहेतुत्वेन पुनरष्टभिः पदैर्विशिनष्टि गिरिकंदरवन्नासिके यस्मिन् तत् गिरेः च्युतौ स्थूलौ तावि वस्तनौ यस्मिन् तत् रौद्रं घोरं।
॥१५॥ प्रकीर्णा अरुणा मूर्द्धजा यस्मिन् तत् अंधकूपाविव गंभीरे अक्षिणी यस्मिन् तत् पुलिनवदारोहौ जघने तयोस्यां भीषणं। बद्धाः सेत
वइव भुजौ ऊरुस्तनौ अंघ्री यस्मिन् तत् शून्यतोयह्रदइव उदरं यस्मिन् तत् ॥१६॥ इति पूर्वमेवत
ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्द्धजं॥१५॥ अंधकूपगभीराक्षं पुलिनारोह
भीषणं॥ बद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरं॥१६॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं॥ पूर्वं तु तन्निःस्वनितभि
म न्नहृत्कर्णमस्तकाः॥१७॥ बालं च तस्या उरसि क्रीडंतं कुतोभयं॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः॥१८॥ यशोदारो सु
हिणीभ्यां ताः सपं बालस्य सर्वशः॥१९॥ रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः॥ गोमूत्रेण स्नापयित्वा पुनर्गोरज
सार्भकं॥ रक्षां च चक्रुः शकृता द्वादशांगेषु नामभिः॥२०॥ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक्॥ न्यस्यात्मन्यथ बा
लस्य बीजन्यासमकुर्वत॥२१॥ अव्यादजोंघ्रिमणिमांस्तव जान्वथोरू यज्ञोच्युतः कटितटं जठरं हयास्यः॥ हृत्केशवस्त
दुरस ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं॥२२॥
१८।१९। स्याश्शब्देन भीताः पुनर्दर्शनेनातित्रसुरित्याह। पूर्वं त्विति तस्याः निःस्वनितं शब्दस्तेन निर्भिन्नानि हृत्कर्ण
मस्तकानि येषां ते॥१७॥ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः। अनात्मवान्ना एवं प्रथममति संभ्रमेणैवं रक्षां कृत्वा किंचित् ॥२०॥
लब्धाश्वासाः पुनस्तास्सर्वेण बीजन्यासमकुर्वतेत्याह। संस्पृष्टसलिलाः आचांताः आत्मनि प्रथममंगेषु करयोश्च पृथक् अजादिका
दश बीजानां मध्ये कर शुद्धौ त्रीणि करयोः संधिषु च त्वारि तथा। अंघ्र्यादावेकैकस्मिन्नंगे अजाद्येकैकं बीजं न्यस्य बालस्याप्यंगेषु त
थैवाकुर्वत॥२१॥ अंघ्रिं अंघ्री जानु जानुनी भुजं भुजौ कं शिरः॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०पू० तथादिक्षु रक्षां कुर्वन्नित्याह। चक्र्यग्रत इति। चक्रसहितो हरिस्त्वाग्रतो। सहगदो गदासहितो हरिस्तव पश्चाद् रक्षतु। त्वत्पार्श्वयोर्द्धनुर्द्धरो
२१ मधुहा। आसिधरो। जनश्च शंखधर उरुगायश्चतुः कोणेषु। क्षितौ अधस्तात्॥२२॥ एवं बहीरक्षां कृत्वांतरंगामपि कुर्वन्नित्याह। इन्द्रिय

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्द्धनुरसी मधुहाजनश्च॥ कोणेषु शंख उरुगाय उपर्युपेंद्रः तार्क्ष्यः क्षितौ
हलधरः पुरुषः समंतात्॥२३॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु
॥२४॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः॥२५॥ व्रजंतमव्याद्वैकुंठः
आसीनं त्वां श्रियः पतिः॥ भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः॥२६॥ डाकिन्यो यातुधान्यश्च कूष्मांडा येऽर्भकग्रहाः
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥२७॥ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः॥ उन्मादा ये ह्यपस्मारा दे
हप्राणेंद्रियद्रुहः॥२८॥ स्वप्नदृष्टा महोत्पाता वृद्धा बालग्रहाश्च ये॥ सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः॥२९॥ इति प्र
णयबद्धाभिर्गोपीभिः कृतरक्षणं॥ पाययित्वा स्तनं माता संन्यवेशयदात्मजं॥३०॥ तावन्नंदादयो गोपा मथुराया व्रजे
गताः॥ विलोक्य पूतनादेहं बभूवुरतिविस्मिताः॥३१॥ नूनं बतर्षिः संजातो योगेशो वा समास सः॥ स एव दृष्टो ह्युत्पातो य
दाहानकदुंदुभिः॥३२॥ कलेवरं परशुभिश्छित्वा तत्ते व्रजौकसः॥ दूरे क्षिप्त्वाऽवयवशो न्यदहन्काष्ठधिष्ठितं॥३३॥ द
ह्यमानस्य देहस्य धूमश्चागुरुसौरभः॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः॥३४॥ ॥ ॥ ॥ २१

॥२५॥ मीति॥२८॥ आत्मानमहंकारं। संन्यवेशयत् शाययामास॥३०॥ विस्मयमेवाह। नूनमिति। बताविस्मये संप्रतं स ऋषिस्तपःप्रभावात्। यो
गेशो ज्ञानी वा समभ्यगासाय तः स एव दृष्ट इति॥३२॥ विस्मयांतरमाह। दह्यमानस्येति। कृष्णेन निर्भुक्तः। अत एव सद्य आहतः पाप्मा यस्याः॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगात् कैमुत्यन्यायेन भक्तिवैभवमाह। पूतनेति॥ ३५॥ श्रद्धया आस्तिक्येन भक्त्या प्रेम्णा रक्ताः स्निग्धाः तन्मातर इति वत्साहरणलीला
यां प्रायेण वृकुक्षव नं गोगोपिकास्तदा मातरो भवन्तीति॥ ३६॥ ३७॥ ३८॥ ३९॥ ४०॥ ४१॥ ४२॥ ४३॥ य एतत् पूतनामोक्षं आर्भकं अर्भ-

पूतना लोकबालघ्नी राक्षसी रुधिराशना॥ जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिं॥ ३५॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमा
त्मने॥ यच्छन् प्रियतमं किंनु रक्तास्तन्मातरो यथा॥ ३६॥ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः॥ अंगं यस्याः समाक्रम्य
भगवानपिबत्स्तनं॥ ३७॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिं॥ कृष्णभुक्तस्तनक्षीराः किमु गावो नुमातरः॥ ३८॥ पयां
नू सि यासामपिबत् पुत्रस्नेहस्नुतान्यलं॥ भगवान् देवकीपुत्रः कैवल्याद्यखिलप्रदः॥ ३९॥ तासामविरतं कृष्णे कुर्वतीनां सुते
क्षणं॥ न पुनः कल्पते राजन् संसारो ज्ञानसंभवः॥ ४०॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः॥ किमिदं कुत एवेति
वदंतो व्रजमाययुः॥ ४१॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकं॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः॥ ४२॥ नू
सा नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह॥ ४३॥ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भु
तं॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं॥ ४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूतनामोचनं नाम षष्ठोऽध्या
यः॥ ६॥ ६॥ ॥

कचरितं किं तत्पूतनामोक्षं इति॥ ४४॥ अतु दैत्यकुलानीशाः पूतनायाः शिशुश्च लातस्तन्यापोङ्गानतः प्राणैः प्राणाहृतिमकल्पय
न तू॥ ४४॥ इति दशमे षष्ठोऽध्यायः॥ ६॥ ॥ उत्क्षिप्य शकटं व्योम्नि तृणावर्तमपाक्षिपन्॥ दर्शयन्विश्वमास्येऽथ कृष्णः क्रीडति सप्तमे॥ १॥ ॥
॥ अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी॥ लेभे गतिं धात्र्युचितां ततो
॥ न्यं कं वा दयालुं शरणं व्रजेम॥ ४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
२२

हृष्टार्भकसुधासिंधुसंप्लवानंदनिर्भरः॥ रूपस्तदेवसंप्रष्टुं राजान्यदपि नंदति॥१॥ येन येनेति येन मत्स्याद्यवतारेणापि यानि यानि कर्माणि करोति तानि नः कर्णसुखावहानि मनःप्रीतिकराणीति च भवं वक्ष्येच॥१॥ तथापि यत् शृण्वतः पुंसः पुरुषमात्रस्य अरतिः मनोग्लानिः तत्र लभ्रता विविधा तृष्णा च अपगच्छति तथा सत्त्वशुद्धिः हरिभक्तिः हरिदासे सख्यं च भवंतीति तदेव हारं हरेश्चरितं मनोहरं वा वदस्वनुग्रहं यदि करोषीति॥२॥ अयोत्सुक्ये न पुनर्विज्ञिनष्टि अथेति अनुरुंधतो नुकुर्वतः॥३॥ उत्थानोन्नीरे रंगपरिवर्त्तनं तत्र करणीये कौतु

राजोवाच॥ येन येनावतारेण भगवान्हरिरीश्वरः॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो॥१॥ यच्छृण्वतोपैत्यरतिर्वितृष्णा सत्वं च शुद्ध्यत्यचिरेण पुंसः॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत्॥२॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतं॥ मानुषं लोकमासाद्य तज्जातिमनुरुंधतः॥३॥ श्रीशुक उवाच॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां॥ वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती॥४॥ नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः॥५॥ औत्थानि
स्त कौत्सुक्यमना मनस्विनी समागतान्पूजयती व्रजौकसः॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत्॥६॥

काप्लवे उत्सवाभिषेके तथा तस्मिन्नेव दिने जन्मर्क्षस्यापि योगे अपि महोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः अभिषेचनं यशोदा चकार॥४॥ अन्नादिभिः सुपूजितैः विप्रैः कृतमंगलं संजातनिद्रं अक्षिणी यस्य तं अशीशयत् शायितवती शकटस्याधस्तात् प्रेंखे॥५॥ उदक्षिपत् ऊर्ध्वं चालितवान्॥६॥ २२

रभाः

तदधः शयानस्य शिशोरल्पकश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतं अनः शकटं व्यवर्त्तत विपरीतमपतत्। कथं विध्वस्तानि नाना
रसवंति कुप्यभाजनानि स्वर्णरजतादिरिक्तकांस्यादिमयानि यस्य तथाभवंतितथा चक्रे च अक्षश्च चक्राक्षौ व्यस्तौ चक्राक्षौ यस्मिन्। वि
तच्चे भिन्नः कूबरो युगंधरो यस्य तच्चैव यथा भवति तथा व्यवर्त्ततेति॥७॥ अद्भुतदर्शनेन आकुला बभूवुः नंदादयः कथमिति। विपर्ययेण

अधः शयानस्य शिशोरनोऽल्पकप्रवालमृद्वङ्घ्रिहतं व्यवर्त्तत॥ विध्वस्तनाना(ना)रसकुप्यभाजनं व्यस्तचक्राक्षविभि
न्नकूबरं॥७॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः॥ नंदादयश्चाद्भुतदर्शनाकुलाः क
थं स्वयं वै शकटं विपर्यगात्॥८॥ ऊचुरव्यवसितमतीन् गोपान्गोपीश्च बालकाः॥ रुदतानेन पादेन क्षिप्तमेतन्न संश
यः॥९॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः॥१०॥ रुदंतं सुतमादाय
यशोदा ग्रहशंकिता॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत्॥११॥ पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदं॥
विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः॥१२॥ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः॥ न तेषां सत्यशीलानाम
शिषो विफलाः कृताः॥१३॥

तद्विपरीतमपतदिति॥८॥९॥ अश्रद्दधिरे विश्वासं न जग्मुः उत अपि बालस्यैतन्न संभवति एते च बालाः किं जानंतीति॥१०॥ रक्षोघ्नैस्सू
क्तैः कृता॥११॥ प्रागेव प्रभावानभिज्ञविप्रवेष्टितं विज्ञं वयनं आह। पूर्ववदित्यादिना बलिभिः शाकैः यद्वा अष्टदिक्षु बलिभिः सहितं सप
रिकरैः यथा पूर्वं स्थापितं विप्रा दध्यादिभिरर्चयामासुः हुत्वा ग्रहादिहोमं विधाय॥१२॥ असूया गुणेषु दोषाविष्करणं ईर्ष्या परसं
तिः। तेषामाशिषः कृताः स्ते प्रयुक्ताः॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्य

द०पू०
२२

इति एवमभिप्रेत्य सामर्ग्यजुर्भिरूपाकृतैः संस्कृतैः पवित्रा ओषधयो येषु जलेषु तैः कृत्वा द्विजोत्तमैः कर्तृभिरभिषिच्य अभिषेकं कारयित्वा ॥१४॥ हुत्वा हावयित्वा ॥१५॥ गा वक्ष्यमाणाः प्रादात्। अन्वयुंजत आशिषो प्रयुयुजुः ॥१६॥ ता तथैव बभूवुरित्यर्थः ॥१७॥ उत्क्षिप्य मृदु पादेन शकटं व्योम्नि लीलया। तृणावर्तं पदा पीड्य मुष्टिपातयदर्भकः ॥ आरोहमुत्संगं तृणावर्तो स्वमृत्युपरिहाराय कृष्णमेनेवालन

इति बालकमादाय सामर्ग्यजुरुपाकृतैः। जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥१४॥ वाचयित्वास्वस्त्ययनं नं
दगोपः समाहितः। हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं ॥१५॥ गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः
आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंजत ॥१६॥ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः ॥ ता निष्फला भ
विष्यंति न कदाचिदपि स्फुटं ॥१७॥ एकदारोहमारूढं लालयंती सुतं सती ॥ गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत्
॥१८॥ भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापुरुषमादध्यौ जगतामास कर्मसु ॥१९॥ दैत्यो नाम्ना तृणा
वर्त्तः कंसभृत्यः प्रचोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकं ॥२०॥ गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणु
श्री भिः ॥ ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः ॥२१॥ मुहूर्त्तमभवद्गोष्ठं रजसा तमसावृतं ॥ सुतं यशोदा नापश्यत्तस्मिन्न्यस्त
वती यतः ॥२२॥ नापश्यत्कश्चनात्मानं परं चापि विमोहितः ॥ तृणावर्त्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥२३॥ ॥

उत्संगादुत्तारयन्तं भारमजानती ॥१८॥ उपासत शंकया महापुरुषमादध्यौ ॥ श्रीकृष्णोदरवर्त्तिनां जगतां भारेण पीडिता विस्मि २३
ता च सती यद्वा जगतां मध्ये कर्मसु आस बभूव न तु जगदुदरं तं वेद इत्यर्थः ॥१९॥२०॥ ईरयन् प्रेरयन्नित्यर्थः ॥२१॥ यतो यत्र
न्यस्तवती तस्मिन्स्थाने नापश्यत् ॥२२॥२३॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खरपवनचक्रात् पांसुवर्षे सति ॥२४॥ उपरि ततः पांसुवर्षस्य वेगो यस्मिन् तथाभूते पवने सति। तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः
॥२५॥ वात्या चक्रवातः तद्रूपधरः संहरन् नृशांतरयः कथंचिन्नभोगः ततः तत्परं गंतुमभूमेः अशक्तो इत्यर्थः ॥२६॥ गुरुमत्तया अश्मयानेव
रूपवंतं पर्वतप्रायं मन्यमानः स्तैमैव आत्मनो गलेग्रहीत बालात् तं स्फुटं भिच्छन्नपि नाशक्नोदित्यर्थः ॥२७॥२८॥ तस्योरसि लंबमानं

इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाविलक्ष्य माता ॥ अतिकरुणमनुस्मरंत्यशोचत् भुवि पतिता मृतवत्सका य
था गौः ॥२४॥ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्य नंदसूनुं पवन उपारतपां
सुवर्षवेगे ॥२५॥ तृणावर्तः शांतरयो वात्यारूपधरो हरन् ॥ कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् ॥२६॥ तमश्मा
नं मन्यमान आत्मनो गुरुमत्तया ॥ गलेगृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं ॥२७॥ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोच
नः ॥ अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥२८॥ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं ॥ पुरं य
था रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः ॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानं ॥२९॥
तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं ॥ गोप्यश्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदं ॥
॥३०॥ अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः ॥ हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वे

लंबमानं आदाय मात्रे प्रतिहृत्य समर्प्य विस्मिता बभूवुरिति ॥२९॥ विहायसा आकाशमार्गेण पुरुषादेन नीतं तथापि मृत्युमुखात्प्रमु
क्तं पुनर्लब्ध्वा मोदं प्रापुरिति ॥३०॥ परस्परं हर्षकथामाहुः अहो बत इति निवृत्तिं गमितो मृत्युं प्रापितः कोऽत्र विस्मयो युज्यते ए
वं तद्दिति ते घेव केचिदाहुः हिंस्र इति ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०पू० नः अस्माभिश्चीर्णं कृतं ॥ पूर्त्तं वापीकूपतडागादिनिर्म्माणं इष्टं पंचयज्ञाग्निहोत्रादि दत्तं दानं यत् यस्मात् तेषु आदेशप्रणयनं हर्षयन्
२४ न् ॥३३॥३४॥३५॥ तृणावर्त्तोगमे दृष्टे गौरवांशंकिनी प्रसूः बोधयंदर्शयामास जंभमाणो मुखे जगत् । पीतप्रायस्य पीतः प्रायस्तो
ऽयेन तस्य ॥३६॥ नगान् गिरीन् । तद्दुहितः नदीः ॥३७॥३८॥ इति दशमे सप्तमोऽध्यायः ॥७॥ ॥ अष्टमे नामकर्मास्य बालक्री
किं स्वित्तपश्चीर्णमधोक्षजार्च्चनं पूर्त्तेष्टदत्तमुत भूतसौहृदं ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून् प्रणयन्नुपस्थि
तः ॥३३॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपा बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मिताः ॥३४॥ एकदार्भकमादाय स्वां
कमारोप्य भामिनी ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥३५॥ पीतप्रायस्य जननी सा तस्य रुचिरस्मितं ॥ मुखं लालयंती सु
पतीं राजन् जृंभतो ददृशे इदं ॥३६॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहि त
तॄर्वनानि भूतानि यानि स्थिरजंगमानि ॥३७॥ सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः ॥ संमील्य मृगशावाक्षी ने
त्रे आसीत्सुविस्मिता ॥३८॥ इति श्रीभागवते महापुराणे दशमस्कंधे तृणावर्त्तमोक्षविश्वदर्शनं नाम सप्तमोऽध्यायः ॥७॥
श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन् यदूनां सुमहातपाः ॥ व्रजं जगाम नंदस्य वसुदेवप्रचोदितः ॥१॥ तं दृष्ट्वा परमप्रीतः
प्रत्युत्थाय कृतांजलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरं ॥२॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं ॥ नंदयित्वा
ब्रवीत् ब्रह्मन् पूर्णस्य करवाम किं ॥३॥ महद्विचलनं नृणां गृहिणां दीनचेतसां ॥ निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ॥४॥ २४
उरुकृत् हली ॥ मृद्भक्षणमिषेण विश्वरूपं निरूप्यते ॥ विश्वरूपादि बालस्य निशम्याशंकिनः पितुः । नामकर्म वाक्येन निजं तत्त्वमसू
सूचत् ॥१॥२॥३॥ पूर्णश्चेत् कथं धावितोऽसि इहागतस्तत्राह महद्विचलनमिति महतां त्वादृशां स्वगृहाद्विचलनं न स्वार्थं किंतु गृहिणां मं
गलायेत्यनुवर्त्तते एवमहं दरी नार्थं किंचिदिति नागच्छतीति त्वाह दीनचेतसां कृपणानां क्षणमपि गृहे सौख्यं कुर्वतामित्यर्थः ॥४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वयाबालयोर्नामकरणादिकरणीयमितिवक्तुं तस्य ज्ञानातिशयमाह ज्योतिषामयनमिति यदतीन्द्रियं ज्ञानसाधनं ज्योतिषामयनं तत्प्रति
पादकं ज्योतिःशास्त्रमित्यर्थः तस्मात्साक्षाद्भवता प्रणीतं येनान्योऽपि पुमान् परावरं संस्कारं पूर्वजन्मकृतं कर्म अवरं कार्यमस्मिन्नु जन्म
नि भाविफलं तद्वेद उक्तं च जातकाय यदुपचितमन्यजन्मनि भाविफलं तद्वेद उक्तं च जातके । यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्ति
दर्शयति व्यंजयति शास्त्रमेतत् तमसि द्रव्याणि दीप इवेति ॥५॥ त्वं वक्ष्यति तमाह त्वं हीति ॥ दैवज्ञो मन्त्रविच्च त्वं अतो नामकरणादि संस्कारान् कर्तुमर्हसीत्य
र्थः । नन्वेतद्गुरुणा करणीयमिति चेत्तत्राह नृणामिति ॥६॥ अत्याप्तोऽसीति तं नन्दं प्रतिगृह्य समेतं कार्यमित्यभिप्रायेण प्रत्याचक्षाण इवाह यदूनामि

ज्योतिषामयनं साक्षात् यत्तज्ज्ञानमतीन्द्रियं ॥ प्रणीतं भवता येन पुमान्वेद परावरं ॥५॥ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि ॥
बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥६॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्य
ते देवकीसुतं ॥७॥ कंसः पापमतिः सख्यं तव चानकदुंदुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥८॥ इति संचिंतयन् श्रु
त्वा देवकीदारिकावचः ॥ अपि हंता गताशंकस्तर्हि तन्नोऽनयो भवेत् ॥९॥ नंद उवाच ॥ अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे ॥ २
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं ॥१०॥ ॥ ॥ ॥ ॥

ति ॥ भवतु तथापि त्वमत्रागत इति कोऽपि विद्यादिति चेदत आह ख्यातश्चेति तर्हि मत आह सुतं मयेति । किं सोऽमन्यत मन्येत कल्पयेदित्यर्थः ॥७॥
ननु यदुकुमार इति कथंचिज्जानातु तत्र वसुदेवस्य पुत्रस्तत्रापि देवक्यां जात इति कुतो जानीयात्तत्राह पापमतिरित्यादि ॥८॥ किं च पाह तया
पं देसादि देवकीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हतीति निःसंशयं संचिंतयन् सामान्येन क्वचिदस्तीति ज्ञात्वा युवयोः श्च स
ख्यं संचिंतयन् त्वद्गृहे भवेदिति संभाव्य मत्संस्कारलिंगेन तत्प्रागतोऽशंकः आग । आशंकाया अभावे अपि यदि हंता हन्यात् तर्हि तन्नो
महानन्यः स्यादिति ॥९॥ द्विजातिसंस्कारं द्विजातीनामादश्यं कर्तव्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्विति ॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
२५
यदूनामपृथग्भावात् कुतश्चिद्धेतोर्विप्रतिपद्यमानानां यदूनामपृथग्भावात् भावो भावनं तस्मात् अन्योन्यश्लिष्टयासैवैकमत्य करणा
दित्यर्थः सम्यक् कर्षति एकीकरोतीति संकर्षणमप्युशन्तीति मन्यंते वदंत्यपीत्यर्थः। गर्भसंकर्षणं तु न प्रकाशयति॥ १२॥ अस्य तव पुत्रस्य
अते लक्ष्म इत्येकं नाम भाविष्यति॥ १३॥ प्रागयं इति सामान्यो चपात्कश्चिदयं जन्मांतरं गतं नाम कथयतीति नंदो मन्यते स्म अत एनं वासुदेव

श्रीशुक उवाच॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत्॥ चकार नामकरणं गूढो रहसि बालयोः॥ ११॥ अयं हि रोहिणीपुत्रो र
मयन् सुहृदो गुणैः॥ आख्यास्यते राम इति बलाधिक्याद् बलं विदुः॥ यदूनामपृथग्भावात् संकर्षणमुशंत्यपि॥ १२॥ आसन्व
र्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनूः॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः॥ १३॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्म
जः॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते॥ १४॥ बहूनि संति नामानि रूपाणि च सुतस्य ते॥ गुणकर्मानुरूपाणि तान्यहं
वेद नो जनाः॥ १५॥ एष वः श्रेय आधास्यद् गोपगोकुलनंदनः॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ॥ १६॥ पुरानेन व्रजप
ते साधवो दस्युपीडिताः॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून् समेधिताः॥ १७॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः॥
नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः॥ १८॥ तस्मान्नंदात्मजोयं ते नारायणसमो गुणैः॥ श्रिया कीर्त्यानुभावेन गोपा
यस्व समाहितः॥ १९॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते॥ नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां॥ २०॥ ॥ २५

इति संप्रचक्षत इति॥ १४॥ गुणानुरूपाणि ईश्वर सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोपतिर्गोवर्द्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि
नो वेद जना अपि नो विदुरिति॥ १५॥ जातकफलमाह एष इति॥ आधास्यत् आधास्यतीति॥ १६॥ अनेन रक्ष्यमाणाः समेधिताः श्वद
स्यून्विजिग्युरिति॥ १७॥ इति चात्मानं प्रति समादिश्य आत्मानं स्वसंवा आशिषां आशीर्भिः॥ १८॥ १९॥ २०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः। परमानंदमाधत्ते व्रजे नंदयशोदयोः॥ पूर्ववन्मेवदर्शयन्नाह। काले नेति। अनुकृष्यपुनः पुनराकृष्य
सरीसृपंतौ अतिशयेन चलंतौ कथं घोषाः कटिपादभूषणकिंकिण्यस्तेषां प्रघोषेण रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टं मनो ययो
स्तौ। लोकं ततस्ततो गच्छंतं जनं अनुसृत्य त्रिचतुराणि पदानि अनुगम्य मुग्धवत् प्रभीतवन्मात्रोरंतिसमीपे उपेयतुरुपजग्मतुः॥२२॥ त
दाचतन्मातरौ निजसुतौ दोर्भ्यामुपगुह्य प्रमोदं ययतुः कथंभूते घृणया कृपया स्नुवंत्यौ पयः स्रवंत्यौ पयःपूरयोधरे स्नैः पंकेनागरागेण रुचिरौ कथं

कालेन व्रजताल्पेन गोकुले रामकेशवौ। जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः॥२१॥ तावंघ्रियुग्ममनुकृष्य स
रीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः॥२२॥
स्नु तन्मातरौ निजसुतौ घृणया स्तुवंत्यौ पंकांगरागरुचिरावुपगुह्य दोर्भ्यां॥ दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्ध
स्मिताल्पदशनं ययतुः प्रमोदं॥२३॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैर्वत्सैरितस्तत
उज्झित उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः॥२४॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिच
लौ स्वसुतौ निषेद्धुं॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोनवस्थां॥२५॥ ॥ ॥

मुग्धं सुमुखं निरीक्ष्य मुग्धं मंदस्मितं यस्मिन् अल्पादशना यस्मिन् तत्तथा तत्॥२३॥ यर्हि अंगनानां दर्शनीयौ कुमारलीलाययोस्तथाभूतौ
स्यः जातौ। तदांतर्व्रजे व्रजस्य मध्ये तदबला अंगनास्तौ प्रेक्षंत्यः प्रेक्षमाणाः विस्मृतगृहसंसारा जहृषुः हृष्टा बभूवुः कथंभूतौ ताभ्यां प्रगृहीता
नि पुच्छानि येषां तैर्वत्सैरितस्ततोनुकृष्यमाणौ॥२४॥ अतिचपलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्तुं यत्र यदा तज्ज
नन्यौ न शेकाते। तदा खलु मनसोऽनवस्थां प्रापतुरिति गृहस्य व्यवस्था परा काष्ठा दर्शिता॥२५॥ ॥ ॥ ॥

कृष्णाः हे

द० पू० २६

२६॥२७॥२८॥ कृष्णचापलचौर्याणि सहैवाखिलसंमतः॥ प्रजल्पंत्यसमागत्य गोप्यो गोप्ये मुदं ददुः॥ असमये अदोहकाले क्रोशसंजातहासस्ते
यं चौर्यार्जितं नतु दत्तं तत्रापि स्वादु नेतरत्। दधिन्वपयश्चौर्ति किंच। मोक्षं नु मर्कीरमर्कटान् प्रतिविभज्य ददाति तेषां मध्ये तस्स तेन कोपि
नास्ति चेत्तर्हि भांडं भिनत्ति क्वचित् द्रव्यस्यालाभे सति सगृहान् धर्ष्यमीति कुपितो याति यद्गृ सगृहाग्र हिणसो प्यकुपितस्तेषां तोकान्यर्य
का दिषु सुप्तानुपक्रोश्य रोदयित्वा याती ति॥२९॥ कल्पितैस्तैः पयोगैरिस्कंतं प्रपंचयति हस्ताग्राह्ये इति। तुंगतीक्ष्णस्य भांडेषु अंतर्निहिते
कालेनाल्पेन राजजर्वरामः कृष्णश्च गोकुले॥ अघृष्ट जानुभिः पद्भिर्विचक्रमतुरं जसा॥२६॥ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबाल
कैः॥ सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं॥२७॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं॥ शृण्वंत्याः किल तन्मातुरिति होचु
न् समागताः॥२८॥ वत्सान्मुंचन् क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः॥ मर्कान्भोक्ष्यन्वि
भजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान्॥२९॥ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छि
द्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित्॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः
॥३०॥ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते॥ इत्थं स्त्रीभिः सभयनयनश्रीमु
खालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत्॥३१॥ ॥ ॥ ॥ ॥
दध्यादौ वायुनं ज्ञानं पस्यसः॥ स्थिद्रं रजयति तद्वित् छिद्रं रचनादिवित्। ध्वांतयुक्ते गृहे स्वांगमेवार्थप्रदीपं रचयति। विशेषतो धृतमणि
दि गणं यर्हि यस्मिन्काले॥३०॥ रेरे चोर इत्युक्ते कृष्ण सनूउशति जल्पति त्वमेव चोर अहं गृहस्वामी त्यादीनि धार्ष्ट्यानि प्राग लभ्यानि अथवा उश ति भो कमनीय प्रचोदो पद्मा उशति वास्तौ स्वच्छे गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते। एवं स्तेयोपायैः विरचिता कृतिः कर्म येन २६
स तु समीपे सुप्रतीकः साधुरिवास्ते सभये नयने यासां नूते ब्रवीतु श्रीयुक्तं मुखं च तदालोकिनीभिः व्याख्यातार्था प्रख्यापित जन्मफलाउ

कदाचिदपराधांतरे उपालभतु तदानुमहदाश्चर्यमभूदिति कथयन्नाह एकदेति ॥३३॥ उपाल[illegible]य निर्भर्त्स्य भयेन संभ्रांते प्रेक्षणे चपले निरीक्षणे
आक्षिणी यस्याः ॥३४॥ अदांतात्मन् चपलगात्र रहः एकांते ॥३५॥ नाहं भक्षितवानिति नि[illegible]यां किंचिन्मया भक्ष्यते मृत्तु स्ता वादावेव सर्वे मत्ती
तिभावं समक्षं प्रत्यक्षं ॥३६॥ व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान् ॥३७॥ तत्र[illegible]न्मुखे विश्वं ददर्श तत्प्रपंचयति जगत् जंगमं स्थास्नु
स्थावरं खं अंतरिक्षलोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः ॥ अग्निर्वैद्युतः इंदुश्चंद्रः तारकाश्च तैः सहि

एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३३॥ सा गृहीत्वा करे कृष्णमुपाल
भ्य हितैषिणी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥३४॥ कस्मान्मृदमदांतात्मन् भवान् भक्षितवान् रहः ॥ वदंति तावका
ह्येते कुमारास्तेऽग्रजोऽप्ययं ॥३५॥ नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ॥३६॥
यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥३७॥ सा तत्र ददृशे विश्वं जगत्स्था
वा स्नु च खं दिशः ॥ साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीदुतारकं ॥३८॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणीं
द्रियाणि मनो मात्रा गुणास्त्रयः ॥३९॥ एतद्विचित्रं सह जीवकालस्वभावकर्माशयलिंगभेदं ॥ सूनोस्तनौ वीक्ष्य विदारितास्ये
व्रजं सहात्मानमवाप शंकां ॥४०॥

तं ॥३८॥ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवान् मन इति वैकारिकशब्देन गृहीतमपि देववैलक्षण्यात् पुनरुक्तं इंद्रियाणि च तैजसानि मात्राः
तामसाः शब्दादयः ॥३९॥ एवमेतद्विचित्रं विश्वं सह एकदेव वीक्ष्य विचित्रतामाह । जीवश्च । गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः
कर्म च तत्संस्कार आशयश्च एतैः लिंगानां चराचरशरीराणां भेदो यस्मिन् भातु तत्र व्रजं च सहात्मानं स्वसहितं च विद्वीक्ष्य सूनोस्तनौ अल्पे वि
दारिते आस्ये शंकामवाप ॥४०॥

८०५
२७

तापाह किं स्वप्न इति परितो विलोक्याह नायं स्वप्नस्तर्हि किं देवस्य हरेर्माया तथा चेदन्ये किं न पश्यंति। तर्हि किं वा मदीय एव कश्चिद् बुद्धिमोहः वि
पर्यासदर्पणे मुखवत्। एवं तर्हि अयं रूपोपि कथमेतः प्रतीयते अंतर्बहिश्चैकरूपेण च कथं जगत्प्रतीयते तथा सति बिंबप्रतिबिंबयो
रेव परस्परं वैपरीत्य न प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति अथो इति अथवा मम अमुष्यार्भकस्यापि सतो यः कश्चन अचिंत्य आत्मयो
गः स्वीय ऐश्वर्य योगः औत्पत्तिकः स्वाभाविकः॥४१॥ चरमं पक्षमाश्रित्यायमीश्वर इति निश्चिनोति आह। अथो इति चेतश्चित्तं लालादिभिर्नवित

किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः॥४१॥
अथो यथावन्न वितर्कगोचरं चेतो मनः कर्मवचोभिरंजसा॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्प
दं॥४२॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती॥ गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कु
मतिः स मे गतिः॥४३॥ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः॥४४॥ ॥

र्कगोचरं जगत् यदाश्रयं यदधिष्ठानं येन कारणेन अधिष्ठात्रा यतो बुद्धिवृत्त्यभि[illegible]त् न विद्मो वितर्क्यमपि तु तत्पदं कीदृक् अतस्ता
दृशं सुदुर्विभाव्यमिति॥ इदमलं तमचिंत्यमित्यर्थः॥४२॥ एवं प्रपंचप्रतीत्सा[illegible]पुनर्जीवसंसृतिहेतुमायाश्रयत्वेन नयंत्या २७
हुः अहं ममेति यशोदा नामाहं। असौ मम पतिः। अमुष्य व्रजेश्वरस्याखिलवित्तपा अखिल[illegible] अधिष्ठात्री अहं सती जाया एष रूपो मे सुत
गोप्यादयश्च मदीया इतीत्थं कुमतिर्यन्मायया स एव मे शरणं इति॥४३॥ वैष्णवीं स[illegible]या॥४४॥ ॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्ररूढेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरेवासीत् ॥ ४५ ॥ प्रायाबलोद्रेकं पाह त्रय्येति । त्रय्या हृद्यादिरूपेण उपनिषद्भिः ब्रह्मेति ।
सांख्ये पुरुष इति । योगे परमात्मेति सात्वतैर्भगवानिति उपगीयमानं माहात्म्यं यस्य तं बालं अतिविस्मयेन पृच्छति नंद इति । महोदयं प
हानुदय उद्भवो यस्य तत् ॥ ४७ ॥ यद्यप्यसौ प्राप्तावतीर्णस्तथापि तरां वपि यन्नान्वविंदेतां तौ आसुंतो रूपस्योदारं महत् अर्भकेहितं बालली न

सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं ॥ प्ररूढस्नेहकलिल हृदयासीद्यथा पुरा ॥ ४५ ॥ त्रय्या चोपनिषद्भिश्च सांख्ययो
गैश्च सात्वतैः ॥ उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ॥ ४६ ॥ राजोवाच ॥ नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं ॥ य
शोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४७ ॥ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं ॥ गायंत्यद्यापि कवयो यल्लोकशमला
पहं ॥ ४८ ॥ श्रीशुक उवाच ॥ द्रोणो वसूनां प्रवरो धरया सह भार्यया ॥ करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ॥ ४९ ॥ जातयोर्नौ
महादेवे भुवि विश्वेश्वरे हरौ ॥ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ॥ ५० ॥ अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महाय
शाः ॥ जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ॥ ५१ ॥ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ॥ दंपत्योर्नितरामासीद्गोपगो
पीषु भारत ॥ ५२ ॥ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५३ ॥ इति श्रीभा
गवते महापुराणे दशमस्कंधे विश्वरूपदर्शनं नामाष्टमोऽध्यायः ॥ ८ ॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

लोयच्च कवयो गायंति तत् यो विंदत स किं श्रेयोऽकरोदिति ॥ ४८ ॥ ब्रह्मण आदेशान् गोपालनादिलक्षणात् ॥ ४९ ॥ ५० ॥ स एवेह द्रोणो ज
ज्ञे स च नंद इति ख्यातः सा च धरा यशोदाऽभवत् ॥ ५१ ॥ गोपगोपीनामपि वस्तुस्वभावादस्त्येव भक्तिः तयोः पुनर्नितरामिति ॥ ५२ ॥ स्वलीलया
पुत्रभावानुकारिण्या ॥ ५३ ॥ इति दशमे अष्टमोऽध्यायः ॥ ८ ॥ श्रीरामार्पणमस्तु ॥ छ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०
२८

नवपेपप उत्सिक्ते गवां गोप्यथ तत्कृते ॥ विलोक्य भांडभंगादि हसंतं दाम्ना बंधते ॥१॥ तन्नूदराश्रियं तं विश्वं दृष्ट्वा विस्मितचेतसः ॥ बंधनूघं
गुलापूर्णतामनुदर्शयत् ॥२॥ स्वयं दधि निर्ममंथ ॥१॥ तदाचा गायतेति चकारान्वयः ॥२॥ सूत्रनद्धं कांचिवद्धं रज्ज्वाकर्षेण
श्रांतौ यौ यौ तयोर्भुजयोश्चलंतौ कंकणौ च कबराद्विगलंती माला यस्याः सा ॥३॥४॥ अधिश्रिते चुल्लीमारोपिते उत्सिच्यमा

श्रीशुक उवाच ॥ एकदा गृहदासीषु यशोदा नंदगेहिनी ॥ कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि ॥१॥ यानि यानीह गी
तानि तद्बालचरितानि च ॥ दधिनिर्मंथने काले स्मरंती तान्यगायत ॥२॥ क्षौमं वासः पृथु कटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नु
त कुचयुगं जातकंपं च सुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ॥३॥
तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः ॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥४॥ तमंकमारूढमपाययत्स्तनं स्ने
हस्नुतं सस्मितमीक्षती मुखं ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥५॥ स जातकोपः स्फुरिता
रुणाधरं संदश्य दद्भिर्दधिमंथभाजनं ॥ भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरंगतः ॥६॥ उत्तार्य गोपी
सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं ॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥७॥ उलूख
लांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं ॥ हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥८॥ २८

नेऽप्यतितापेनोद्रिच्यमाने ॥५॥ दृषदश्मना शिलापुत्रेण अंतरं गृहमध्यं गतः । रहः एकांते नवनीतमभक्षयत् ॥६॥ सुशृतं सुतप्तं दधि
मंथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ॥७॥ उलूखलांघ्रेरुपरि वर्तितस्योपरि शिचि शिक्ये चौर्येण विशंकितं चंचलमीक्षणं यस्य तं ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपसा एकाग्रेण ईरितं तदाकारतां नीतं अत एव क्षमं योग्यं प्रवेष्टुं योगिनां मनोपि अप्राप तां तं अनुधावन्ती अन्वधावत् केवलं न तु प्राप यतो योगिनां मनोपि यं प्रवेष्टुं न क्षममिति ॥९॥ अन्वंचमाना एवं लुप्तमनुगच्छंती रहसोः श्रोण्योर्भरेण आक्रांता सती गतिर्यस्याः सा विस्रंसितात् केशबंधनात् च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा यद्वा जवेन कंपितात् केशबंधात् पुरःपतितानि प्रसूनानि अनुपश्चाद्गतिर्यस्याः

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ॥ ९ ॥ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा ॥ १२ ॥ न चांतर्न बहिर्यस्य न पूर्वं नापि चापरं ॥ पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ १३ ॥

सा परामृशत् धृतवती ॥ १० ॥ अंजन्मषिणी अंजती सर्वतः प्रसरंती मषी ययोस्ते अक्षिणी स्वपाणिना कषंतं संमर्दयंतं भिषयंती कृत्स्नं दंडं दर्शयंती भयमुत्पादयंती । अवागुरत् अभर्त्सयत् ॥ ११ ॥ इयेष ऐच्छत् अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा ॥ १२ ॥ अकोविदत्वमेवाह न चांतरिति पंचभिः । बंधनं हि बहिः परिवृतेन दाम्ना अंतरावृतस्य भवति तथा पूर्वापरविभागवतो वस्तुनः सर्वतो दाम्ना मध्यतः परितः परिवेष्टनेन भवति न त्वेतदस्तीत्याह । न चांतरिति । किंच व्यापकेन व्याप्यस्य बंधो भवति तच्च विपरीतमित्याह पूर्वापरमिति । किंच । तद्व्यतिरिक्तस्य चाभावान्न बंध इत्याह । जगच्च य इति ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०.१० तं मर्त्यलिंगं अधोक्षजं आत्मजं मत्वा बबंधेति ॥१४॥ द्व्यंगुलोनं द्वाभ्यामंगुलाभ्यामसंपूर्णं ॥१५॥१६॥ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्म
२९ य प्राप ॥१७॥१८॥ न चैवं स्वातंत्र्यमंग इत्याह । एवं संदर्शितेति सेश्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः ॥१९॥ भगवत्प्रसादमन्येपि भ

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं ॥ गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥१४॥ तद्दाम बध्यमानस्य स्वार्भकस्य कृ
तागसः ॥ द्व्यंगुलोनमभूत्तेन संदधेन्यच्च गोपिका ॥१५॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यंगुलं न्यूनं यद्य
दादत्त बंधनं ॥१६॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् ॥१७॥ स्व
मातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१८॥ एवं संदर्शिता ह्यंग हरि
णा भृत्यवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥१९॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं
लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥२०॥ नायं सुखापो भगवान् देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा
भक्तिमतामिह ॥२१॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥२२॥ पु
रा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥२३॥ इति श्रीभागवते महा
पुराणे दशमस्कंधे गोपीप्रसादो नाम नवमोध्यायः ॥९॥ श्रीरामसमर्थ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
क्तालभ्यं तेइदं त्वति चित्रमिति सरोमांचितमाह नेममिति ॥ विरंच्यपुत्रोपि भवः स्वात्मापि ॥ श्रीर्जायापि ॥२०॥ फलितमाह नायमिति । देहि
नां देहाभिमानिनां तापसादीनां ज्ञानिनां निरस्ताभिमानिनामपीति ॥२१॥ भक्तैर्बद्धस्याप्यमोघकृत्वमाह कृष्णस्त्विति ॥२२॥२३॥ इति दश० २९

भा० स्कं० ॥ १० ॥

दशमे पातयद्विंगत्वंतरायमलार्जुनौ ॥ तत्र ताभ्यां च देवाभ्यां कृष्णस्कन्दनतीर्यते ॥१॥ यद्विगर्हितं कर्म येन वा देवर्षेर्भगवतोऽत्र मस्यापि
तमःक्रोधस्तदेतत्कथ्यतामिति ॥न॥२॥३॥ गंगायामंतर्मध्ये कथंभूतेऽम्भोजानां वनानि तेषां राजयस्ता विघूर्णते यस्मिन् ॥४॥ अ
पश्यंत दृष्ट्वा च क्षीबाणौ मत्तौ स प्रबुध्यत ॥५॥ कुतः इत्यत आह तं दृष्ट्वेति ॥६॥ अनुग्रहार्थाय अनुग्रहश्च मदनाशोऽर्थश्च श्रीरूप मदरी

राजोवाच ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥१॥ श्रीशुक उवाच ॥
रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ ॥२॥ वारुणीं मदिरां पीत्वा मदाघूर्णित
लोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥३॥ अंतः प्रविश्य गंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युव
तिभिर्गजाविव करेणुभिः ॥४॥ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥५॥
तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः ॥ वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥६॥ तौ दृष्ट्वा मदिरामत्तौ श्री
मदांधौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥७॥ श्रीनारद उवाच ॥ न ह्यन्यो जुषतो जोष्यान्बुद्धि
भ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ॥८॥ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ॥ मन्यमानैरिदं
देहमजरामृत्यु नश्वरं ॥९॥

नं तदर्थत्विदं वक्ष्यमाणं न ह्यन्य इत्यादि ॥७॥ जोष्यान् प्रियान् विषयान् जुषतः सेवमानस्य पुंसः श्रीमदादन्यः आभिजात्यादिः सत्कुल
विद्यादिजनितो मदः । अन्यो वा रजोगुणः रजःकार्यं हास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किंतु श्रीमद एवेति तदा
हाय त्रेत्यादि चतुर्भिः यत्र श्रीमदे ॥८॥ इदं नश्वरं देहं अजरामृत्यु अजरश्च अमृत्युश्च यथा तथा मन्यमानैः ॥९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० नरदेवभृद्देवसंज्ञितमपि श्वादिभिर्भक्षितं विट् संज्ञितं दग्धं भस्मसंज्ञितं अन्यदा कृमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् भूतद्रोहं धायते भूतद्रोहा
३० न्निरयो भवति स किं स्वार्थं वेद नैव वेदेत्यर्थः॥१०॥ निषेक्तुः पितुः पितुर्मातुर्वा मातामहस्य पुत्रिकाकरणे॥११॥ अव्यक्तप्रभवाप्ययं अव्यक्तो प्रभ
वस्तस्मिन्नेवाप्ययो यस्य तं। आत्मसात्कृत्वा आत्मेति मत्वा असतो मूढा हंते॥१२॥ एवं श्रीमदचेष्टितमुक्त्वा तत्प्रतीकारं निश्चिनोति असत इति त्रिभिः॥ परं

देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥१०॥ देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा॥ मातुः
पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा॥११॥ एवं साधारणं देहमव्यक्तप्रभवाप्ययं॥ को विद्वानात्मसात्कृत्वा हंति मां ऋते ततः॥१२॥
असतः श्रीमदांधस्य दारिद्र्यं परमांजनं॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते॥१३॥ यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां॥ जीव
साम्यं गतो लिंगैर्न तथाविद्धकंटकः॥१४॥ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह॥ कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः॥१५॥ नित्यं
क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः॥ इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्त्तते॥१६॥ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः।
सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति॥१७॥ साधूनां समचित्तानां मुकुंदचरणैषिणां॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः॥१८॥
तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः॥ तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः॥१९॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लु
तौ॥ न विवाससमात्मानं विजानीतः सुदुर्मदौ॥२०॥

दारिद्र्यमेव केवलमिति वा कुत इत्यत आह॥ आत्मौपम्येनेति ततो न द्रुह्यतीति भावः॥१३॥ सदृष्टांतमाह यथेति मुखम्लान्यादिलिंगैः सर्वेषां ३०
जीवानां सुखदुःखे समे इति ज्ञातवानित्यर्थः॥१४॥ किंच दारिद्र्यं मोक्षमपि साधयतीत्याह। दरिद्र इति श्लोकचतुष्टयेन। निरहंस्तंभः निर्ग
तः अहंकाररूपस्तंभो यस्मात्सः॥१५॥१६॥ कल्प्यंते स्वत एव संगच्छंते तान् तर्षं तृष्णां॥१७॥ ननु साधूनामपि धनिक एव प्रियः स्यान्न दरिद्र इति
तत्राह साधूनामिति धनेन स्तंभो गर्वो येषां तैः॥१८॥ तमो मदं अज्ञानकृतं मदं॥१९॥ तमःप्लुतौ तमो व्याप्तौ॥२०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

तु

शापतिअतोर्हतइति। अनुगृह्णातिस्यात्तां नैवाभिस्यादिनामत्प्रसादेनस्मृतिस्यात्॥२१॥ स्वर्लोकतां देवत्वं पुनर्लब्धामदनुग्रहात्लब्धमत्कीभवि
ष्यतइति॥२२॥२३॥ प्रसक्तं तमाहऋषेरिति॥२४॥ किमितितिसंसंकर्तव्यं तत्राहदेवर्षिरिति। यद्धततत्तनेः॥२५॥ यमयोर्यमलयोःसहजातयोः
आत्मानं कृष्णस्यप्रतन्मध्यप्रवेशमात्रेण॥२६॥ अनुं अंचतीत्यन्वक्। तत्रहेतुः। दामोदरेणेति उत्कलितउत्पाटितः अंघ्रिबंधोमूलवंधोययोस्तौ
परमस्य श्रीकृष्णस्यविक्रमितं विक्रमस्तेनातिवेपः कंपोयेषुतेस्कंधप्रवालविटपायमोस्तौ॥२७॥ ककुभःप्रातिसर्वतःस्फुरंतावित्यर्थः यद्वा

अतोर्हतःस्थावरतांस्यात्तांनैवंयथापुनः॥ स्मृतिःस्यान्मत्प्रसादेन तत्रापिमदनुग्रहात्॥२१॥ वासुदेवस्यसान्निध्यंलब्ध्वादिव्यश
रच्छते। वृत्तेस्वर्लोकतांभूयोलब्धभक्तीभविष्यतः॥२२॥ श्रीशुकउवाच। एवमुक्त्वासदेवर्षिर्गतोनारायणाश्रमं॥ नलकूबर
मणिग्रीवावासतुर्यमलार्जुनौ॥२३॥ ऋषेर्भागवतमुख्यस्य सत्यंकर्तुंवचोहरिः॥ जगामशनकैस्तत्र यत्रास्तांयमलार्जुनौ
॥२४॥ देवर्षिर्मेप्रियतमोयदिमौधनदात्मजौ॥ तत्तथासाधयिष्यामियद्गीतंतन्महात्मना॥२५॥ इत्यंतरेणार्जुनयोःकृष्णस्तु
यमयोर्ययौ॥ आत्मनिर्वेशमात्रेणतिर्यग्गतमुलूखलं॥२६॥ बालेननिःकर्षयतान्वगुलूखलंतत् दामोदरेणतरसोत्कलितां
घ्रिबंधौ॥ निपेततुःपरमविक्रमितातिवेपस्कंधप्रवालविटपौकृतचंडशब्दौ॥२७॥ तत्रश्रियापरमयाककुभःस्फुरंतौसिद्धावु
पेत्यकुजयोरिवजातवेदाः॥ कृष्णंप्रणम्यशिरसाखिललोकनाथं बद्धांजलीविरजसाविदमूचतुःस्म॥२८॥ कृष्णकृष्णमहा
योगिंस्त्वमाद्यःपुरुषःपरः॥ व्यक्ताव्यक्तमिदंविश्वंरूपंतेब्राह्मणाविदुः॥२९॥

यं दिशःप्रकाशंतौविति कुजयोर्वृक्षयोः। स्थितोग्निर्यथामूर्तिमानुपेतितथोपेत्यविरजसौनिर्मलौ॥२८॥ गोपालंमांयुवांदेवौकिमितिप्रण
लं तौविति चेत्तत्राहतुः। हेकृष्णकृष्णमहायोगिन् अचिंत्यप्रभावस्त्वं नगोपालः किंतुपरःपुरुषस्यतःआद्यःकारणभूतः। तत्रापिनानिमित्तमा
त्रंकिंतूपादानमपित्वमेवेत्याशयेनतुष्टुवतुः। व्यक्ताव्यक्तमितिस्थूलसूक्ष्ममिदंतेरूपंविदुः॥२९॥

उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
३१
त्रियं तापि तमेवेत्सूच तुत्वमेक इति। देहअसवःप्राणाः॥आत्मा अहंकारः इंद्रियाणि च तेषामीश्वरः॥३०॥ न चास्य कालो निमित्तं प्रकृतिरूपा
दानं प्रकृते र्जातो महान् विश्वात्म तया परिणामतो पुरुषः क्षेत्रनियंता चक्रि मत्राहं अतआहतुः। त्वमेव काल इत्यादि नासाद्रे नासाद्रे ना
यतो भगवानीश्वरो विष्णुस्त्वं अतः कालो नाम तत्रैव लीलाप्रकृतिः त्रिगुणः पुरुषो महान् कार्यं अतस्त्वमेव सर्वमित्यर्थः॥३१॥ न च हमेवं चे
त्सर्वं तर्हि घटादिज्ञानेमत्तो नं किं न भवति। भवति चेत्सर्वोपि ब्रह्मवित्स्यात् तत्रआहतुः गृह्यमाणैरिति दृश्यत्वे नवर्तमानैः बुद्ध्यहं

त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः॥ त्वं महान् प्रकृतिः सूक्ष्मा रजः
सत्वतमोमयी॥ त्वमेव पुरुषोध्यक्षः सर्वक्षेत्रविकारवित्॥३१॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः॥ को
न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः॥३२॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे॥ आत्मद्योतगुणैश्छन्नमहि
श्री म्ने ब्रह्मणे नमः॥३३॥ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः॥३४॥ स भवा
न्सर्वलोकस्य भवाय विभवाय च॥ अवतीर्णोंशभागेन सांप्रतं पतिराशिषां॥३५॥ नमः परमकल्याण नमः परम
मंगल॥ वासुदेवाय शांताय यदूनां पतये नमः॥३६॥ ॥ ॥ ॥ ॥

सं कारेंद्रियादिभिर्दृश्यैर्न गृह्यस इति भावः ननु तर्हि जीवो जानातु नैवेत्याहतुः। को न्विहेति जीवाः कस्त्वत्तः प्रागेव प्रकाशात्मा सिद्धं त्वां ३१
को वा जानाति॥ गुणासंवृतः देहाद्यावृतः॥३२॥ अतो दुर्ज्ञेयत्वात् केवलं प्रणमतः। तस्मै तुभ्यमिति आत्मनः स्वस्मात् द्योतः प्रका
शो येषां तैर्गुणैश्छन्नो महिमा यस्यात्मनैर्वरवे तस्मै॥३३॥ अहो अहमीश्वर इति कुतो ज्ञानं तत्राहतुर्यस्येति॥३४॥ भवाय उद्भवा
य विभवाय विगतो भवो यस्मिन् तस्मै कैवल्याय इत्यर्थः॥३५॥३६॥ ॥ ॥ ॥

मोक्षाय

नौ आवां अनुचरः कुबेरो नारदो वा तस्य किंकरौ भगवत्तस्त्वद्दर्शनं ॥३७॥ तत्रगतयोरावयोः रावयोः पूर्वस्वभावो माभूत् । किंतु वाणीगु
णानुकथन इत्यादिना ॥ अस्मदो द्वयोश्चेति द्विवचनस्थाने बहुवचनं अस्मत्संगिनां सर्वेषामपीति वा बहुवचनं तवनिवासभूतं य
जगत् तस्य प्रणामे तन्निवासभूतामिति बहुधा नेन जगतः प्रणामे शिरोस्त्वित्यर्थः ॥ भवत्तनूनां भवतो मूर्तीनां ॥३८॥ संकीर्त्तितसंस्कृतः ॥३९
वाग्भिः न स्पृष्टा जुषतो ज्योत्स्नानि सा दिग्भिः श्रीविभ्रंशात्कृपानुग्रहः कृत इति ॥४०॥ यत्तामैवेतदित्याह ॥ साधूनां स्वधर्मावर्त्तिनां सम

अनुजानीहि नौ भूमंस्तवानुचर किंकरौ ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥३७॥ वाणीगुणानुकथने श्रवणौ क
थायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवास जगत्प्रणामे दृष्टिः सतां दर्शनेस्तु भवत्तनूनां ॥३८॥
श्रीशुक उवाच ॥ इत्थं संकीर्त्तितस्ताभ्यां भगवान् गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥३९॥ श्रीभ
गवानुवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोनुग्रहः कृतः ॥४०॥ साधूनां समचि
त्तानां सुतरां मत्कृतात्मनां ॥ दर्शनान्नो भवेद्बंधः पुंसोक्ष्णोः सवितुर्यथा ॥४१॥ तद्गच्छतं मत्परमौ नलकूबर सादनं ॥
संजातो मयि भावो वामीप्सितः परमोभवः ॥४२॥ श्रीशुक उवाच ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखल
मामंत्र्य जग्मतुर्दिशमुत्तरां ॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे यमलार्जुनभंगो दशमोध्यायः ॥१०॥ छ ॥ छ ॥

चित्तानां आत्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां रूपातिरेकात्सुतरामित्युक्तं सवितुर्दर्शनात् नृचक्षोर्यथा भवेत्तद्वत् ॥४१॥ द
प्राधान्यादेकस्य संबोधनं हे नलकूबर आवां तत्तस्मात्सादनं स्वनिकेतनं मत्परमौ संतौ गच्छतं युवयोरपेक्षितो मयि प्रेमा जात एव अ
भवः जन्मवो यस्मिन्सः ॥४२॥ बद्धोलूखलं बद्धं उलूखलं यस्मिन् तं ॥४३॥ इति दशमे दशमोध्यायः ॥१०॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीः

द० भा०
३२

एकादशे समागत्य वृंदावनमथार्भकैः ॥ वत्सान्पालयतानेनहतौ वत्सबकासुरौ ॥१॥ निर्घातो वज्रपात इति भयेन शंकिताः ॥१॥ तल्ल
क्ष्यं प्रसक्षतं पुरतो हृद्द्वयमपि वृक्षं न कारणमविज्ञाय बभ्रमुः ॥२॥ लक्ष्यं कारणं दर्शयति उलूखलमिति भ्रमप्रकारमाहाकस्येदं राक्षसादेः
कर्मकुतो वा कारणात् ॥ आश्चर्यो उत्पात इति कातरा भीतास्संतो बभ्रमुरित्यर्थः ॥३॥ मध्यगेन रक्षयोर्मध्यगतेनानकेवलमेतावत्

श्रीशुक उवाच ॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः ॥१॥ भूम्यां निपति
तौ तत्र ददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञाय लक्ष्यं परमकारणं ॥२॥ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकं ॥ कस्ये
भयकातराः
दं कुत आश्चर्यमुत्पात इति कातराः ॥३॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलं ॥ विकर्षता मध्यगेन पुरुषावप्यप
क्ष्महि ॥४॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥५॥ उलूखलं विक
र्षंतं दाम्ना बद्धं स्वमात्मजं ॥ विलोक्य नंदः प्रहसद्वदनो विमुमोच ह ॥६॥ गोपीभिः स्तोभितो नृत्यद्भगवान्बालव
त्क्वचित् ॥ उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयंत्रवत् ॥७॥ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं ॥ बाहुक्षेपं
च कुरुते स्वानां च प्रीतिमावहन् ॥८॥ ॥७॥ ॥९॥ ॥७॥ ॥७॥

क्षाभ्यां निर्गतौ दिव्यौ पुरुषावप्यपश्यामहि दृष्टवंतो वयमिति ॥४॥ केवलं तार्किका न जगृहुरेव अन्ये तु संदेहयुक्ताश्चिंताबभूवुरिति ३२
॥५॥ भगवन्मायामोहितस्य नंदस्याचरितमाह उलूखलमिति ॥६॥ नास्यं ते मामिति शांकर्णौ अतीव ग्याल्पम् अनुकरोति स्मेतरा
ह गोपीभिरिति स्तोभितं करतलादिना प्रोत्साहितः ॥७॥ इदमानये माहत्स आनेतुमसमर्थ इव बिभर्ति केवलं पीठादि उन्मानं प्रस्था
दि बाहुक्षेपं करचालनं च तद्विशेषे चेति चकारस्यान्वयः ॥८॥

ताडवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततऽऐश्वर्यं विदंति ये तेषां एवं व्रजस्य हर्षस्तु वो हेति॥१०॥ ९०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥ रंतुं वृंदावनं गंतुं मंत्रं कृष्णेन यंत्रिताः॥ स्वतंत्रा इ
दृशीयं स्तन्यं छिदितं लोक आत्मनो भ्रस्य च स्यतां॥ व्रजस्यो वा हवै हर्षभगवान्बालचेष्टितैः॥९॥ क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्यु
तः॥ फलार्थी धान्यमादाय ययौ सर्वफलप्रदः॥१०॥ फलविक्रयिणी तस्य च्युतधान्यं करद्वयं॥ फलैरपूरयद्रत्नैः फलभांडमपूरि
च॥११॥ सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत्॥ जन्मर्क्षं मद्य भवतो विप्रेभ्यो देहि गाः शुचिः॥१२॥ पश्यपश्य वयस्यांस्ते
मातृमृष्टान् स्वलंकृतान्॥ त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः॥१३॥ नोपेयातां यदाहूतौ क्रीडासंगेन पुत्रकौ॥ यशो
दां प्रेषयामास रोहिणी पुत्रवत्सलां॥१४॥ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप॥ हस्ते गृहीत्वा सहराममच
कृ च्युतं नीत्वा स्ववाटं कृतवत्यथोदयं॥१५॥ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजं॥ यशोदाजोहवीत्कृष्णं पुत्रस्नेहस्नुतस्तनी
॥१६॥ कृष्ण कृष्णारविंदाक्ष तात एहि स्तनं पिब॥ अलं विहारैः क्षुत्क्षांतः क्रीडाश्रांतोसि पुत्रक॥ हे रामागच्छ ताताशु सानुजः कुल
नंदन॥ प्रातरेव कृताहारस्तद्भवान्भोक्तुमर्हति॥१८॥ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः॥ एह्यावयोः प्रियं धेहि स्वगृ
हान्यांतु बालकाः॥१९॥ इत्यानीय गते कृष्णे यशोदा मंगलाहर्णैः॥ अभ्यर्च्य भोजयित्वा तु मुदमाप यशस्विनी॥२०॥ श्रीशुक उ
उवाच॥ गोपवृद्धा महोत्पातान् अनुभूय बृहद्वने॥ नंदादयः समागम्य व्रजकार्यममंत्रयन्॥२१॥ तत्रोपनंदनामाह गोपो ज्ञान
वयोधिकः॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः॥२२॥ उत्थातव्यमितोस्माभिर्गोकुलस्य हितैषिभिः॥ आयांत्यत्र महोत्पा
ता बालानां नाशहेतवः॥२३॥ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालकोह्यसौ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत्॥२४॥
व नंदाद्यामंत्रमेतममंत्रयन्॥ व्रजकार्यं गोकुलस्य हितं कृष्णं॥१८॥ १९॥ २०॥ २१॥ २२॥ २३॥ २४॥ ॥ ॥

द०पू०
३३

विपदं वीनां पक्षिणां पदं विहारस्थानं वियत् विगतप्रतिष्ठं वा अपरिछिन्नमित्यर्थः ॥२२॥ अन्यतमो वा कश्चिद्बालः । अच्युते नैव रक्षणमासीत् ॥२३॥ अरिष्टश्च अनर्थ इत एवा नात् ॥२४॥ पश्चाद्वत्सपसुभ्यो हितां नवां निकाननान्यगां तराणि विंध्यते यस्मिंस्तात् ॥२५॥२६॥ एकधिय

चक्रवातेन नीतोयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥२२॥ यन्नाम्नियेत द्रुमयोरंतरं प्राप्य बालकः ॥ असावन्यतमो वापि तदप्यच्युतरक्षणं ॥२३॥ यावदौत्पातिकोरिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामो न्यत्र सानुगाः ॥२४॥ वनं वृंदावनं नाम पशव्यं नवकाननं ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं ॥२५॥ तत्तत्राद्यैव यास्यामः शकटान्युंक्त मा चिरं ॥ गोधनान्यग्रतो यांतु भवतां यदि रोचते ॥२६॥ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वा

नू दिनः ॥ व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिछदाः ॥२७॥ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च ॥ अनःस्वारोप्य गोपालाः यत्ता आत्तशरासनाः ॥२८॥ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वतः ॥ तूर्यघोषेण महता ययुः सहपु

लै रोहिताः ॥२९॥ गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः ॥ कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ॥३०॥ तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥३१॥ वृंदावनं संप्रविश्य सर्वकालसुखावहं ॥ तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रवत् ॥३२॥ वृंदावनं गोवर्द्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥३३॥ ३३

विप्रतिपत्तिरहिताः ॥ व्रजान् शकटव्यूहान् ॥ रूढा शकटान्यारोपिता परिछदा यैस्ते ॥२७॥ यत्ता कृतप्रयत्नाः ॥२८॥२९॥ नूत्नैः कुचगतैः कुंकुमैः ॥ कांतिर्यासां ताः ॥ नूत्नेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासामिति वा ॥३०॥३१॥ व्रजावासं गोकुलवसतिस्थानं ॥३२॥३३॥

नै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वकालेन तद्योग्यकालेन ॥३४॥ कौमारलीलां निरूपयति । अविदूर इत्यादिना ॥३५॥ क्षेपणैर्विल्वामलकादिभिः किंकिणीयुक्तैः पादैः क्षिप
तस्ताडयतः वत्सपालाः एव वद्धिआकं बलादिपिहिता वृषरूपमनुकुर्वंति तैः सह ॥३६॥ स्वयमपि तथैव वृषायमाणौ नर्दंतौ तदनुकारिशब्दं

एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥३४॥ अविदूरे व्रजभुवः सह गोपालदार
कैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ॥३५॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किंकिणी
भिः क्वचित्कृत्रिमगोवृषैः ॥३६॥ वृषायमाणौ नर्दंतौ युयुधाते परस्परं ॥ अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ॥३७॥ कदा
चिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥३८॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथ
गतं हरिः ॥ दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत् ॥३९॥ गृहीत्वापरपादाभ्यां सहलांगुलमच्युतः ॥ भ्रामयित्वा कपित्था
ग्रे प्राहिणोद्गतजीवितं ॥४०॥ स कपित्थैर्महाकायः पात्यमानैः पपात ह ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति
देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥४१॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ
विचेरतुः ॥४२॥ स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ॥ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलं ॥४३॥ ॥ ॥

नुकुर्वंतौ युयुधाते इत्यर्थः रुतैः शब्दैर्जंतून् हंसमयूरादीन् ॥३७॥३८॥ मुग्ध इवाज्ञानीव आसदत् समीपमागमत् ॥३९॥ अपरपादा
भ्यां सहलांगूलं यथा भवति तथा गृहीत्वा ॥४०॥ ४१॥ सर्वेषां लोकानां एकौ मुख्यौ पालकौ । प्रातराशः प्रातर्भोज्यं अन्नं तत्सहितौ ॥४२
अभ्याशं समीपं ॥४३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० ४४॥४५॥ राम आदिर्येषां ते न तु रामः ॥४६॥४७॥ तुंडयोश्चंच्वोर्वीरणवद्ग्रंथिलतृणविशेषवत् ॥४८॥ समीडिरे तुष्टुवुः ॥ आनकैः शंखैः अ
३४ न्यैश्च संस्तवैः सह ॥४९॥ स्वस्थानमागतं प्राणमिव वत्सान्वा प्रणीय एकीकृत्य ॥५०॥ अतिप्रियेण प्रीत्या आदृतास्तादरा प्रेत्यागत

ते तत्र ददृशुर्बाला महासत्त्वमवस्थितं ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतं ॥४४॥ स वै बको नाम महानसुरो ब
करूपधृक् ॥ आगत्य सहसा कृष्णं तीक्ष्णतुंडोऽग्रसद्बली ॥४५॥ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ॥ बभूवुरिंद्रि
याणीव विना प्राणं विचेतसः ॥४६॥ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः ॥ चच्छर्द सद्योतिरुषाक्ष
तं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ॥४७॥ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः ॥ पश्यत्सु
बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ॥४८॥ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिका
दिभिः ॥ समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥४९॥ मुक्तं बकास्यादुपलभ्य दारका रामादयः स
वि. प्राणमिवेंद्रियो गणः ॥ स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ॥५०॥ श्रुत्वा तद्विस्मिता
गोपा गोप्यश्चातिप्रियादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षंत तृषितेक्षणाः ॥५१॥ अहो बतास्य बालस्य बहवो मृत्य ३४
वोऽभवन् ॥ अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयं ॥५२॥ ॥ ॥ ॥

मिव लोकांतरादागतमिव तृषितान्यतृप्तानीक्षणानि येषां ते ॥५१॥ अहो बतेत्यादिश्लोकत्रयस्य इति नंद
स्य इत्यनेनान्वयः ॥ अपि एवमपि तेषामेवानिष्टमासीत् न च तत्स्ते पूर्वमन्येषां भयं कृतं ॥५२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ घोरदर्शनां अपि नाभिभवंति न धर्षयंति न धर्षयंति॥३॥ गर्गो यदाह तस्मान्नंद सजोयं ते नारायणसमो गुणैरित्यादि॥५४॥५५॥
वत्सपूयगतं हत्वा वत्सं दंभासुरं हरिः॥ मुनिष्वगतं चाहत तत्परायंद भिन्नां वकं॥५६॥ इति दशमे एकादशोध्यायः॥११॥ ७॥ द्वाद
शे तु महासर्पवपुर्हरमघासुरं॥ वत्सबालगिलं लक्ष्यो गलेहन्निति वर्ण्यते॥ महाबकगलक्रीडाकेवलस्यन कौतुकं॥ इति चाघासुरस्तु

अथाप्यभिभवंत्येनं नैवं ते घोरदर्शनाः॥३॥ जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत्॥५३॥ अहो ब्रह्मविदां वाचो ना
सत्याः संति कर्हिचित्॥ गर्गो यदाह भगवानन्वभावि तथैव तत्॥५४॥ इति नंदादयो गोपाः कृष्णरामकथां मुदा॥
नू कुर्वंतो रममाणाश्च नाविंदन्भववेदनां॥५५॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे॥ निलायनैः सेतुबंधैर्म
र्कटोत्प्लवनादिभिः॥५६॥ इति श्रीभागवते महापुराणे दशमस्कंधे वत्सबकासुर नामैकादशोध्यायः॥११॥ ७॥
श्रीशुक उवाच॥ क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान्॥ प्रबोधयंच्छृंगरवेण चा
रुणा विनिर्गतो वत्सपुरःसरो हरिः॥१॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः॥ स्व
कान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा॥२॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान्
चारयंतोर्भलीलाभिर्विजह्रुस्तत्र तत्र ह॥३॥ फलप्रवालस्तबकसुमनःपिच्छधातुभिः॥ काचगुंजामणिस्वर्णभूषिता अप्य

रेव ससरवत्साविशद्धरिः॥ क्वचित्कदाचिद्वनाशाय वन एव प्रथमं भोजनं कर्तुं॥१॥ तेनैव शृंगरवेण श्रीकृष्णेन वा पृथुका बाला स्निग्धा
स्नेहयुक्ताः शिक्शिक्यं रम्या शिग्वेत्रादयो येषां ते सहस्राधिकसंख्यायुक्तान्वत्सान्॥२॥३॥ काचादिभिः पूर्वं मातृभिर्भूषिता
अपि फलादिभिरात्मानमभूषयन्नित्यर्थः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० मुष्णंतश्चोरयंतः ॥५॥ यदि दूरं गतः कृष्णो भवति तर्हीति ॥६॥ ध्मांतो वादयंतः शृंगैः सह ॥७॥ विच्छायाभिः पक्षिच्छायाभिः कलापिभिर्मयूरैः
३५ ॥८॥ कीशबालान्वृक्षशाखासु लंबमानान्वानरलांगूलानि आकर्षंतः लांगूलमुंचंतैस्तैः सह द्रुमानारोहंतः किं कुर्वंतः दंतदर्श
नभ्रूविजृंभादिभिस्तैः सह विकारान्कुर्वंतः पलाशिषु वृक्षेषु प्लवंतः शाखायाः शाखांतरं मुहुर्गच्छंतः ॥९॥ प्रतिच्छायाः प्रतिबिंबानि ॥१०॥

मुष्णंतोन्योन्याशिक्यादीन् ज्ञातानाराच्च विक्षिपुः ॥ तत्रत्याश्च पुनर्दूराद्धसंतश्च पुनर्ददुः ॥५॥ यदि दूरं गतं कृष्णो
वनशोभेक्षणाय तं ॥ अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥६॥ केचिद्वेणून्वादयंतो ध्मांतश्शृंगाणि केचन ॥ के
चिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ॥७॥ विच्छायाभिः प्रधावंतो गच्छंतः साधुहंसकैः ॥ बकैरुपविशंतश्च न
क त्यंतश्च कलापिभिः ॥८॥ विकर्षंतः कीशबालानारोहंतश्च तैर्द्रुमान् ॥ विकुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु ॥
साकं भेकैर्विलंघंतः सरितः स्रवसंप्लुताः ॥ हसंतश्च प्रतिच्छायाः शपंतश्च प्रतिस्वनान् ॥१०॥ इत्थं सतां ब्रह्मसु
खानुभूत्या दास्यं गतानां परदैवतेन ॥ मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुंजाः ॥११॥ ॥

ताननतिविस्मितः श्लोकद्वयेनाभिनंदति इत्थमिति । एतौ विदुषां ब्रह्मत्वेन तत्सुखं च अनुभूतिश्च तथा स्वप्रकाशपरमसुखेनेत्य ३५
र्थः । भक्तानां परदेवतेन आत्मप्रदेन नाथेन मायाश्रितानां तु नरदारकतया प्रतीयमानेन सह विजह्रुः ॥ कृतानां पुण्यानां पुंजा
राशयो येषां ते ब्रह्मविदां तदनुभव एव भक्तानां मतिगौरवेणैव भजनं एते तु तेन सहसख्येन अजह्रुः अहोभाग्यमिति भावः ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहुजन्मभिलब्धैः धृतआत्मा पुण्यैस्तैरपि ॥१२॥ सुखक्रीडनवीक्षणेन क्षमा यस्य स सकथं भरतपस्यां तअंतरं छिद्रं पीताम्रतैर
पिततोम्रस्कर्मौतैरमरैः प्रतीक्ष्यते कथं रिष्यति कदा वेतिय द्वा कथं भरतं सुखक्रीडकां पतत् अंतर्हृदये अमरैः प्रतीक्ष्य तेविचिंत्य
तो पीताम्रतैरपि पुनर्निजजीविते स्तुभिः ॥ अयं भावः । नामृतपानमात्रेण जीवनं सफलं भवति । किंतु भगवल्लीलानुस्मरणेनैति
तदेव निस्पृतत श्रिंस्यत इति ॥१३॥ कृष्णमुखानर्भकान् दृष्ट्वा स इति व्यवस्य निश्चिंसा जनरं वपुध्वलातेषां ग्रसना ग्राथ्यापाथि व्यरो

य स्मादपां सुबहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्या । स एष यद्दृग्विषयः स्वयंस्थितः किं वर्ण्यते दिष्टमहो व्र
जौकसां ॥१२॥ अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ॥ नित्यं यदंतर्निजजीवितेप्सुभिः
पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥१३॥ दृष्ट्वार्भकान् कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ॥ अयं
तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥१४॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौ
कसः ॥ प्राणे गते वर्ष्मसु का नु चिंता प्रजासवः प्राणभृतो हि ये ते ॥१५॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाः
ममहाद्रिपीवरं ॥ धृत्वाद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः ॥१६॥ ॥ ॥

तैतित त्तीये नान्वय कंसेनानुशिष्ट प्रहित बकी पूतना कथं व्यवस्यत दाह अयं बिति सार्द्धं नामप्रतयो द्वयोः सोदरयोस्थाने एनं
कृष्णं सबलं ससैन्यं वत्सान् सालसहितं हनिष्यामि ॥१४॥ ननु तथापि व्रजस्यास्त्वविशिष्टिर नन्ते स्याह एत इतितिलाप कृतातिलो दकत
या कल्पिता वर्ष्मसु देहेषु प्रजाः एनासवायेषांते तथा ॥१५॥ स योजनाया मयो जनप्रमाणेन दैर्घ्येण यक्तंच तन्महाद्रिवत् पीवरं च । व्यात्तं

नं प्रसारितं गुहातुल्यमाननं यस्मिन्नूतनं ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू० अद्भुतमितियदुक्तं एतद्दर्शयितुंविशिनष्टि धरायामधरोष्ठे यस्यसजलदेषुत्तरोष्ठेयस्यसदर्य्याविवआननस्यांतोसृक्किणीयस्यसगि
३६ रेश्रृंगाणिवदंष्ट्रायस्यसः। ध्वांतवदंतरास्यंयस्यसवितताध्वजिह्वायस्यसपरूषानिलवत्श्वासोयस्यसदववह्नीक्षणयोरूग्र
दाववत्दृष्टिरित्यर्थः। परूषानिलश्वासश्चासौदवेक्षणौग्रश्चतथा॥ १७॥ वक्त्रतोजगरमेवव्यात्ततुंडंदृष्ट्वादंदावनस्यश्रीसंपदे
षेतिभ्रांत्यापलाविपरितंव्यात्ताजगरतुंडस्यादृश्येनोल्लंघितवंतः॥ १८॥ उत्प्रेक्षामेवप्रश्नोत्तराभ्यांवाहुअहोइतिसलकूटंसला
मासमिदंनवातत्राप्यस्मत्संग्रसनायव्यात्तंयद्व्यालतुंडंतद्दुराचरतिवानवा॥ १९॥ निश्चितंतथैवेत्याहसत्यमितिअर्ककरैरार
धराधरोष्ठेजलदोत्तरोष्ठेदर्य्याननांतोगिरिश्रृंगदंष्ट्रः॥ ध्वांतांतरास्योविततध्वजिह्वः परूषानिलश्वासदवेक्षणो
ग्रः॥ १७॥ दृष्ट्वातंतादृशंसर्वेमत्वावंदावनश्रियं॥ व्यात्ताजगरतुंडेनह्युल्लंघंतेस्मलीलया॥ १८॥ अहोमित्राणिग
दतसत्वकूटंपुरस्थितं॥ अस्मत्संग्रसनव्यात्तव्यालतुंडायतेनवा॥ १९॥ सत्यमर्ककरारक्तमुत्तराहनुवद्घनं॥ अध
राहनुवद्रोधस्तत्प्रतिछाययारुणं॥ २०॥ प्रतिस्पर्द्धेतेसृक्किभ्यांसव्यासव्येनगोदरे॥ तुंगश्रृंगालयोप्येतास्तद्दंष्ट्रा
भिश्चपश्यत॥ २१॥ आस्तृतायामपमार्गोयंरसानांप्रतिगर्जति॥ एषामंतर्गतध्वांतमेदमप्यंतराननं॥ २२॥ दावोग्र त
खरवातोयंश्वासवद्भातिपश्यत॥ स्तद्दग्धसत्वदुर्गंधोप्यंतर्गामिषगंधवत्॥ २३॥ ॥ ॥ ॥
तघनेउत्तरोष्ठवत्सन्ध्यातस्यघनस्यप्रतिछाययाअरुणंरोधस्यलंअधरोष्ठवत्सन्ध्यतेति॥ पश्यतेतिसर्वत्रान्वेति॥ २०॥ सृक्कि ३६
भ्यामोष्ठप्रांताभ्यांप्रतिस्पर्द्धेतेतुल्यतयावर्त्तेतेनगोदरेगिरिदर्य्यौतस्यदंष्ट्राभिस्पर्द्धमानः॥ २१॥ आस्तृतायामपमार्गविस्तृतोदे
र्घ्यवान्मार्गप्रतिगर्जतिप्रतिस्पर्द्धतोएषांश्रृंगाणांअंतर्गतंमध्यगतंध्वांतंएतत्अंतराननंआननस्यमध्यंप्रतिगर्जति॥ २२॥
दावेग्रसखरवातोयंतोनवनाग्निनादग्धानांसत्वानांयोदुर्गंधसएवसर्पस्यांतर्गतामिषगंधवद्भाति॥ २३॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं स समये वाजगारं अन्यथा ते क्ष्य निर्भयाय युः ॥ किं ग्रसिता ग्रसिष्यति अनेन श्रीकृष्णेन हंत्रा बकारे रुशा क्रम नीयं मुखं ॥२४॥ अस्य मु
षा वस्के तसर्प वपुर सुर एवम् षायता स्वानां सर्पस्य दन्त्य गोचरत्वेन प्रतीयत इति ता त्रिषद्ध वारयितुं यावन्न नोदधे तावत्प्रविष्टा इत्य
न्तरेणान्वयः ॥२५॥ प्रविष्टा एव कफेवलं न तु ते नागीर्णा गिलिता जीर्णा इति पाठे पिस एकर्थ कथं नहतैन हतयो स्वकपोरं तं स्मरतीति तथा ते

अस्मान्किमत्र ग्रसिता निविष्टा नर्पं तथा चेद्धक वदिनं क्ष्यति ॥ क्षणाद नेनेति बकायुं शान्मुखं वीक्ष्य क्रुसंतः करताडनै
र्ययुः ॥२४॥ इत्थं मिथो तथ्य मतं तभाषितं श्रु त्वा विचिंत्येस्य मृषा मृषायुते ॥ रक्षो विदित्वा रिवलभृत् तद्धास्थितः स्वानां नि
षेद्धुं भगवान्मनो दधे ॥२५॥ तावत्प्रविष्टास्त्व सुरोदरांतरं परं नगीर्णा शिशवः सवत्साः ॥ प्रतीक्ष्यमाणेन बकारिवेशनं
हतस्वकांतस्मरणे नरक्षसा ॥२६॥ तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्च मृ
त्योर्जठराग्निघासानुघृणार्द्दितो दिष्टकृतेन विस्मितः ॥२७॥ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां
विहिंसनं ॥ द्वयं कथं स्यादिति संविचिंत्य तं ज्ञात्वाविशत्तुंडमशेषदृग्घरिः ॥२८॥ तदा घनच्छदा देवा भयाद्धाहेति चु
क्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौणपास्त्व घबांधवाः ॥२९॥ ॥ ॥ ॥ ॥

नाज्ञत एव बकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्ष्यमाणेन ॥२६॥ स्वकरादयपदच्युतान्वित्रिस्तानु विस्मितसन् ॥ २७॥ कृत्यं किमत्रेत्या
दि विचिंत्य तत्रोपायं ज्ञात्वा स्वयमपि प्रविवेशादिसन्वयः ॥ कथं विविचिंत्य अस्य जीवनं अमीषां वा विहितं सना पितिद्वयं वै निश्चितं क
थं न स्यादिति ॥२८॥ घनच्छदा मेघांतरिता कौणपा कुणपाशिनो राक्षसा कौणपो निकेति स्वादीया इतिवा ॥२९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०पू० ३७ चूर्णिं कर्तुं मिच्छोस्तस्य गले आदावेन तरसा बद्धे अवर्द्धत ॥ ३० ॥ विरुद्धो मुखादीनां मार्गो भूतकं टोपस्यास्तिस्तस्य उद्गीर्णदृष्टे र्वहिर्नि
र्गते लोचने तस्य अंतरंगे देहमध्ये पूर्ण परिभृते मूर्द्धन् मूर्द्धनि ब्रह्मरंध्रं निर्भिद्य बहिर्गत इति ॥ ३१ ॥ प्राणेषु रिंद्रियेषु स्वधाम्न तव वि
ण्यादृष्ट्यैव ॥ ३२ ॥ अहि देहोस्थितं शुद्धं सत्समयं ज्योतिर्निर्गतं खे वस्थितं तस्मिन् दृशोदिवे रा ॥ ३३ ॥ स्वकृत स्वकार्यकृत श्रीकृष्णस्याह
तच्छुत्वा भगवान् कृष्णस्त्वव्ययः सार्भवत्सकान् ॥ चूर्णी चिकीर्षी रा त्मानं तरसा ववृधे गले ॥ ३० ॥ ततोतिकायस्य नि
रुद्धमार्गिणो ह्युद्गीर्णदृष्टे र्भ्रमत स्त्वितस्ततः ॥ पूर्णोतरंगे पवनो निरुद्धो मूर्द्धन्विनिपाट्य विनिर्गतो वहिः ॥ ३१ ॥ तेनैव सर्वे
षु वहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् ॥ दृष्ट्या स्वयोत्थाप्य तदान्वितः पुनर्वक्त्रान्मुकुंदो भगवान्विनिर्ययौ ॥ ३२ ॥
पीनाहिभोगोत्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खे वस्थितमीशनिर्गमं विवेश तस्मिन्मि
षतां दिवौकसां ॥ ३३ ॥ ततोतिहृष्टाः स्वकृतो कृताहणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ॥ गीतैः सुगा वाद्यधराश्च वाद्यकैः
स्तवैश्च विप्रा जयनिस्वनैर्गणाः ॥ ३४ ॥ तदद्भुतस्तोत्रसुवाद्यगीतिका जयादि नैकोत्सवमंगलस्वनान् ॥ श्रुत्वा स्व
धाम्नोंत्यज आगतो चिराद्दृष्ट्वा महीशस्य जगाम विस्मयं ॥ ३५ ॥ राजन्नाजगरं चर्म शुष्कं वृंदावनेद्भुतं ॥ व्रजौकसां ब
हुतिथं बभूवाक्रीडगह्वरं ॥ ३६ ॥
णा महत पूजाम कुर्वन् खुगा सुरु गायंतीति गंधर्वादयः ॥ ३४ ॥ किंच ॥ तेषां यान्यद्भुत स्तोत्रादीनि नैकोत्सवायमंगलस्वनास्तान् ॥ ३७
स्वधाम्न अंतिस मीपो श्रुत्वा अजो ब्रह्मा अचिरा दागतः ॥ ईशस्य श्रीकृष्णस्य महिमहिमानं दृष्ट्वा विस्मयं प्रापेति ॥ ३५ ॥ बहु तिथं ब
हुकालं आक्रीडगह्वरं क्रीडार्थं महाबिलं ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यच्चातिविचित्रं दर्त्तमित्याह एतदिति कौमारं पंचमाब्दांतं पौगंडं दशमाब्दावधि कैशोरं आपंचदशात् यौवनं तु ततः परं हरेः कौमार
जं पंचमाब्दकृतं कर्म तद्देवदृष्ट्या पौगंडके षष्ठेब्दे बाला अघैववत्तदिवमित्यूचुः। किं तत्कर्म मृत्योः सकाशाद्दासनामहेश्च मोक्षणं आत्म
नां प्रसिद्धात्मत्योः अहेः स्तु संसाररक्षणात् अघासुरस्य ज्योतिषः श्रीकृष्णे प्रवेशमपि तदा दृष्टं कथितवंत इत्यर्थः॥३७॥ नैतद्विचित्रं दि

एतत्कौमारजं कर्म हरेरात्माहिमोक्षणं॥ मर्त्योः पौगंडके बाला दृष्ट्वोचुर्विस्मिता व्रजे॥३७॥ नैतद्विचित्रं मनुजार्भमायि
नः परावराणां परमस्य वेधसः॥ अघोपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभं॥३८॥ सकृद्यदंगप्र
तिमां तराहिता मनोमयी भागवतीं ददौ गतिं॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायः परमोंगकिं पुनः॥३९॥ सूत
उवाच॥ इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रं॥ पप्रच्छ भूयोपि तदेव पुण्यं वैयासकिं यन्निगृही
तचेताः॥४०॥ राजोवाच॥ ब्रह्मन् कालांतरकृतं तत्कालीनं कथं भवेत्॥ यत्कौमारे हरिकृतं जगुः पौगंडकेर्भकाः
॥४१॥ तद्ब्रूहि मे महायोगिन् परं कौतूहलं गुरो॥ नूनमेतद्धरेरेव माया भवति नान्यथा॥४२॥ वयं धन्यतमा लोके
गुरोपि क्षत्रबंधवः॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतं॥४३॥ ॥ ॥ ॥

नदि(?) यत्पदप्राप्तमाह अघोपीति आत्मसाम्यं स्वसमानरूपतां॥३८॥ यस्यांगं मूर्तिस्तस्य प्रतिमा प्रतिकृतिर्मत्रापि देवलं मनोमयी।
सापि बलादंतराहिता सती भागवतीं गतिं ददौ प्रल्हादादिभ्यः स एव साक्षात्स्वयं अंतर्भत किं पुनर्नित्यात्मसाम्ये स्वसुखानुभूति
श्वाभयाभिनिवेशो व्युदस्तमाया येन सः॥३९॥ येन भ्रवणे नितितरां भगुहीतं वशीकृतं चेतो यस्य सः॥४०॥ कालांतरे कौमारे कृतं पौगंडके

[illegible]॥४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
३८

तेन यस्मारितोनंत तेन हृतान्यखिलेंद्रियाणि यस्य स तथाभूतोपि कृच्छ्रात् लब्धबहिर्दृष्टिः। हे भागवतोत्तम शौनक॥४४॥ इति दशमे
द्वादशोध्यायः॥१२॥ ॥छ॥ ॥ त्रयोदशे हरत् ब्रह्मा वत्सान् पालांश्च मायया॥ तदा तत्सर्वरूपो सं कृष्णः पूर्ववदाचरत्॥१॥ नूतनय
सि नव्यवत्करोषि॥१॥ तथा हि सारभृतां सारग्राहिणां अयं निसर्गः स्वभावः कोसौ अच्युतस्य वार्त्ता प्रतिक्षणं साधु नव्यवद्भवतीति यत्
स विटानां स्त्रैणानां स्त्रियाः कामिन्या वार्त्ता कथंभूतानामपि सतां॥ या अच्युतस्य वार्त्ता विषया अर्था येषां तानि वाणी श्रुति चेतो

सूत उवाच॥ इत्थं स्म पृष्टः स तु बादरायणिः स स्मारितानंत हृताखिलेंद्रियः॥ कृच्छ्रात्पुनर्लब्धबाहिर्दृशिः शनैः
प्रत्याह तं भागवतोत्तमोत्तमं॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे – पा – र – र्थे – मद्वादशोध्यायः॥१२॥
श्रीशुक उवाच॥ साधु पृष्टं महाभाग त्वया भागवतोत्तम॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः॥१॥ सता
मयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि॥ प्रतिक्षणं नव्यवदच्युतस्य यत् स्त्रिया विटानामिव सा
धु वार्त्ता॥२॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत॥३॥ तथा
घवदनान्मृत्यो रक्षित्वा वत्सबालकान्॥ सरित्पुलिनमानीय भगवानिदमब्रवीत्॥४॥ अहोतिरम्यं पुलिनं व
यस्याः स्वकेलिसंपन्मृदुलाच्छबालुकं॥ स्फुरत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलं॥५॥

सि येषां तथाभूतानामपि॥२॥३॥४॥ भोजनविधानाय पुलिनं स्तौति। अहो इति। स्वियानां केलीनां संपदो विद्यंते यस्मिन् तत ३८
त्। मृदुला अच्छा वालुका यस्मिन् तत्। किंच स्फुटद्विकसत्सरसिजबाहुल्येनोपचारतः सर एव विकसदित्युक्तं
तस्य गंधस्तेन हृता आकृष्टा अलयः पत्त्रिणश्च तेषां केउद्धकध्वनयः तेषां प्रतिध्वानैर्लसंतो द्रुमास्तैर्व्याकुलं व्याप्तं॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवारूढं वेलानीतेत्यर्थः॥५॥ आरुध्य संरुध्य शाड्वले हरिततृणदेशे॥७॥ तदा ते विरेजुः कृष्णस्य विष्वक् परितः पुरुराजिमंडलैः बहुभिः
पंक्तिमंडलैः सह नैरंतर्येणोपविष्टाः श्रीकृष्णाभिमुखान्याननानि येषां ते फुल्लदृशो विकसितनयनाः कमले कर्णिकायाः परितः पत्राणि
यथेति॥८॥ पुष्पैस्तद्दलैः अन्यैश्च पत्रैः कृतानि भाजनानि यैस्ते॥९॥ रुचिं स्वादुविशेषं अभ्यवजहुः बुभुजिरे सहेश्वराः श्रीकृष्णसहि
ताः॥१०॥ यज्ञभुग् अपि तेषु बुभुजे बालानां प्रियकेलिर्यस्य स तदा हा उदरवस्त्रयोर्मध्ये वेणुं बिभ्रद्धदिति सर्वत्र संबंध्य वामद

अथो भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः॥ वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणं॥६॥ तथेति पाययित्वार्भा वत्सा
नारुध्य शाड्वले॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा॥७॥ कृष्णस्य विष्वक् पुरुराजिमंडलैरभ्याननाः फुल्ल
दृशो व्रजार्भकाः॥ सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः॥८॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकु
रैः फलैः॥ शिग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः॥९॥ सर्वे मिथो दर्शयंतः स्वस्वभोज्यरुचिं पृथक्॥ हसंतो हासयंतश्चाभ्य
वजह्रुः सहेश्वराः॥१०॥ बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु॥ तिष्ठ
न्मध्ये स्वपरिहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः॥११॥ भारतैवं वत्सपेषु भुंजानेष्व
च्युतात्मसु॥ वत्सास्त्वंतर्वने[illegible]रं विविशुस्तृणलोभिताः॥१२॥ ॥ ॥ ॥ ॥

ति कक्षपाण्योर्विक्षेपणं मसृणं स्निग्धं दध्योदनकवलं तदुचितानि बिल्वादिफलानि अंगुलीसंधिषु कर्णिके वस्त्रर्वाभिमुखे मध्ये
तिष्ठन् स्वस्य परितः उपविष्टान् सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः स्वर्गे स्वर्गनिवासिनि जने आश्चर्येण पश्यति सति लोके जनानां
मध्ये बुभुजे॥११॥१२॥

क्
सु
३
केचित्

द०रु० भीमयं भयहेतुभ्यो भयं अस्य अपास्य यद्वा अस्य विश्वस्य प्रियोऽपि भयं यः श्रीलक्ष्म्याः आश्रात् भोजनात् अस्मिन्पादे अक्षराधिक्यमार्षं ॥१३॥
३९ अद्रिषु तद्दरीषु कुंजेषु लतादिपितोदरविवरेषु गह्वरेषु संकटस्थानेषु च ॥१४॥ अंभोजन्मजनिः प्राज्जनिर्यस्य स ब्रह्मा तदंतरे तस्मि
न्नवसरे गत आगतः ततच्छिद्रं प्राप्तो वा अन्यदपि महि त्वं महिमानं द्रष्टुं तस्य वत्सानितस्थानात् वत्सपांश्च अन्यत्र नीला स्वयं तिरोबभूव

तान्दृष्ट्वा भयसंत्रस्तान्चेलुर्लोकोऽस्य भीभयं ॥ मित्राण्याशान्माविरमतेहानेष्ये वत्सकानहं ॥१३॥ इत्युक्त्वाद्रिदरीकुंज
गह्वरेष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णस्सपाणिकवलो ययौ ॥१४॥ अंभोजन्मजनिस्तदंतरगतो मायार्भक
मन्य स्येशितुर्द्रष्टुं मंजु महित्वमप्यतद्वत्सानितो वत्सपान् ॥ नीत्वान्यत्र कुरूद्वहांतरदधात्खेवास्थितो यः पुरा दृष्ट्वाघासु
रमोक्षणं प्रभवतः प्राप्तः परं विस्मयं ॥१५॥ ततो वत्सानदृष्ट्वैत्य पुलिनेपि च वत्सपान् ॥ उभावपि वने कृष्णो विचिका
य समंततः ॥१६॥ क्वाप्यदृष्ट्वांतर्विपिने वत्सान्पालांश्च विश्ववित् ॥ सर्वं विधिकृतं कृष्णः सहसावजगाम ह ॥१७॥ ततः कृ वि
ष्णो मुदं कर्तुं तन्मातॄणां च कस्य च ॥ उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥१८॥ ॥ ॥ ॥ ३९

वा प्रभवतः श्रीकृष्णस्य ॥१५॥ उभावपि वत्सान्वत्सपांश्च विचिकाय अन्वीक्षितवान् ॥१६॥ विधिकृतं ब्रह्मणा कृतं ॥१७॥ उभयायितव
त्सतत्पालरूपेण वर्त्तमानमित्यर्थः ॥ अयं भावः ॥ यदि तूष्णीमासे तर्हि तन्मातॄणां विषादः स्यात् यदि च तानेवानयिष्यामि तर्हि ब्रह्म
णो मोहो न स्यादिति तदुभयप्रीतये तथा चक्रे इति ॥१८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव दर्शयति यावदिति वत्सपानां वत्सकानां चाल्पकं वपुः प्रमाणमनतिक्रम्य पवपुः पर्य्यपि यो ऽङ्घ्र्यायद्वा यावद्वत्सपादि वपुस्तावत्सर्वस्वरूपो जग
हैमो बभावेति। उत्तरस्मात्प्ये वांसर्वं विष्णुमयं जगदिति प्रसिद्धा यागी तस्या अंगवत् सागीरे वार्थस्वरूपेण प्रसक्षा यथा तथा बभूवेत्यर्थः॥१९॥
एवं सर्वात्मा सन् व्रजं प्राविशत्। कथं स्वयमात्मैव प्रयोजकः आत्मरूपान् गोवत्सान् प्रति कर्मापि स्वयमेवेत्यत्कां आत्मरूपैर्वत्सपैः प्रतिवार्य्य
प्रयोज्यकर्त्तापि स्वयमेवात्मा स्वविहारैः क्रीडन्निति क्रियापि कारका एव पि स्वयमेवेत्यर्थः॥२०॥ तत्तदात्मा तत्तद्गोपबालरूपो भगवतत् ततस्तत्त
त्सद्म प्रविष्टः॥२१॥ गोपिकामोहनमाह। तन्मातर इति तन्मातरो वेणुरवेण त्वरया उत्थितास्सत्सुतान्मत्वा परब्रह्मैव द्वोर्भिः स्थाव्योद्धृत्य पयः सुधा

यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषांबरं। यावच्छीलगुणाभिधाकृतिवयो
वे यावद्विहारादिकं सर्वं विष्णुमयं गिरोंगवदजः सर्वस्वरूपो बभौ॥१९॥ स्वयमात्मात्मगोवत्सान्प्रतिवार्यात्मवत्सपैः॥ क्रीडन्नात्मविहारैश्च
व्र सर्वात्मा प्राविशद्व्रजं॥२०॥ तत्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः॥ तत्तदात्माभवद्राजंस्तत्तत्सद्म प्रविष्टवान्॥२१॥ तन्मातरो
भा३ वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरं॥ स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन्॥२२॥ ततो नृपो
न्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः॥ संलालितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः॥२३॥ न॥ ॥

सवं पयएव सुधा वत्स्वादु आसव वन्मादकं पाययामासुरित्यर्थः॥२२॥ एवं यामयमेन तत्तत्काल क्रीडानियमेन सायं गतप्रा स्वाचरितैः स्व
स्याभ्चरितैः शोभनैरा चरितैर्वा मातॄः प्रहर्षयन् तत्तस्ताभिः उन्मर्दनादिभिरुपलालित इति॥२३॥ अथ चित्सुखीकथां गिरोंगवदजः यथा अजका
दौ गिरोंगवत् अंगावयववत्सकलवर्णरूपेण भातीत्यर्थः। तद्व्याख्या शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार
एवेदं सर्वमिति श्रुतेः अथवा सर्वं विष्णुमयं कलावाजः श्रीलक्ष्मं सर्वस्वरूपो बभौ कथं गिरोंगवत् यथा सकलशब्दजातं मात्रानयेण व्याप्य
ओंकारो भातितद्वत् वारणव्यतिरेकेण वेदाध्ययनादेरसंभवाच्चात्तस्य गिरोंगत्वं तद्वत्सर्वसमूहवद्व इति चित्सुखरवीव्याख्या इति पाठः॥२३॥

भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश०पू० गावो मोहनमहागाव इति परिहूता आहुताश्च ते संगताश्च तान्॥२४॥ एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमासीदित्याह गोगोपीनामिति ग
४० वां गोपीनां चास्मिन्कृष्णे मातृता उपलालनादिरूपा पुरोवदेवासीत्। किंतु स्नेहर्द्धिकां विना स्नेहाधिक्यं पालितदानीं विशेष इत्यर्थः॥ आ
सु गोगोपासु हरेस्तोकता च बालभावना पि पूर्ववदेवासीत्। किंतु मायया विना मम मेयं माता अहं अस्याः पुत्र इति मोहं विनेत्यर्थः॥२५॥ स्ने
हर्द्धिमेव दर्शयति व्रजौकसामिति यथा कृष्णे यद्वा द्वादानंदने स्वपुत्रेभ्योपि स्नेहाधिक्यं पूर्वमासीत् इदानीं स्वतोकेष्वपि तथैव वर्द्धते

गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसंगतान्॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यस्त्रवदौधसं प
त यः॥२४॥ गोगोपीनां मातृतास्मिन्सर्वा स्नेहर्द्धिकां विना॥ पुरोवदास्वपि हरेस्तोकता मायया विना॥२५॥ व्रजौकसां स्व
तोकेषु स्नेहवल्ल्याब्दमन्वहं॥ शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्॥२६॥ इत्थमात्मात्मनात्मानं वत्सपालमिषेण सः॥
पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः॥२७॥ एकदा चारयन्वत्सान्सरामो वनमाविशत्॥ पंचषासु त्रियामासु हायना
पूरणीष्वजः॥२८॥ ततो विदूराच्चरतो गावो वत्सानुपव्रजं॥ गोवर्द्धनाद्रिशिरसि चरंत्यो ददृशुस्तृणं॥२९॥ ॥ ॥

त्यर्थः। आब्दं यावद्वत्सरं निःसीमं यथा भवति॥२६॥ एवमात्मा श्रीकृष्णः वत्सपो भूत्वा तत्रापि वत्सानां पालनीनां च मिषेण आत्मानमात्म
ना पालयन् क्रीडितवानित्यर्थः॥२७॥ एतावत्पर्यंतरामस्यापि मोह एवासीत् संवत्सरांते तु कथंचित् ज्ञातवानिति दर्शयन्नाह। ४०
एकदेति पंचषासु पंच वा षट् वा रात्रिषु हायनस्य पूरणीषु पूरकतया अवशिष्टास्वित्यर्थः॥२८॥ ततो दूरत एव गोवर्द्धन
शिरवरे चरंत्यो गावो व्रजसमीपे चरतो वत्सान् ददृशुः॥२९॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदैव सर्गो व्रजः गवां कलापः। तत्स्नेहवशः। तेषां वत्सानां स्नेहे नाकृष्टः अत एव नस्मृत आत्मा येन सः। जवेन उपव्रजमगात्। कथं भूतः अ
त्यात्मपदुर्गमार्गः आतिक्रांत आलया न गोपालनयः सो त्यो नयः तथा दुर्गमो मार्गो यस्य स च स च। थाकृतो ऽभ्यां पद्भ्यां धावन् द्विपा
द्विव प्रतीयमानः ककुदि आकुंचिता ग्रीवा यस्य सः। उदास्यपुच्छः उदास्यपुच्छः उदास्यपुच्छः उन्नामिता न्यास्यानि पुच्छानि च येन सः।
आस्रु यया सर्वतः स्रवति ययांसि यस्य सः। आस्रुपया इत्यपि पाठे स एवार्थः। गोव्रज इत्यनेन वृषभावयोप्यगुरिष्कृतौ। २॥ तत

दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैरास्रुपयो ज
वेन॥३०॥ समेत्य गावोधो वत्सान् वत्सवत्योप्यपाययन्॥ गिलंत्य इव चांगानि लिहंत्यः स्वौधसं पयः॥३१॥ गोपास्त
द्रोधनायासमौघ्यलज्जोरुमन्युना॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृशुः सुतान्॥३२॥ तदीक्षणोत्प्रेमरसाप्लुताश
याजातानुरागा गतमन्यवोऽर्भकान्॥ उदूह्य दोर्भिः परिरभ्य मूर्द्धनि घ्राणैरवापुः परमां मुदं ते॥३३॥ ततः प्रवय
सो गोपास्तोकाश्लेषसुनिर्वृताः॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः॥३४॥ ॥ ॥ ॥

अक्रिशोघतो धेनूनां चेष्टितमाह समेत्येति। गोवर्द्धनस्याधः। वत्सवत्साः पुनः प्रसूता अपि॥३१॥ रामेण दृष्टं वत्सेषु गवां स्नेहातिश
यमुक्त्वा गोपानामपि दर्शयितुमाह। गोपा इति। तासां गवां रोधनेन आयासेन तस्य मौघ्येन मोघत्वेन लज्जया सहितो रुमन्युना दुर्ग
मार्गजनितकृच्छ्रेण चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः॥३२॥ ततश्च तेषामीक्षणेनोद्भूतो यः प्रेमरसस्तेनाप्लुता निमग्ना आ
शया येषां ते। लज्जामन्युकृच्छ्रैस्तान् पिताऽपिनुमागताः संतोपिगतमन्यवः अर्भकं तजातोऽनुरागो येषां तो मूर्द्धनि घ्राणैः अव
घ्राणैः परमां मुदमवापुः॥३३॥ कृच्छ्रात्ततोऽपगताः तेषां सुतानां अनुस्मरणात् उद्गतं स्रवदश्रूणि येषां ते॥३४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८०८ प्रेमद्भैरौत्कंठ्यमति शयं। मुकुंदस्ततेषुप्रपश्यत्सेषुवीक्ष्य हेतुमज्ञानन्नचिंतयत्॥३५॥ चिंतामेवाह किमेतदिति द्वाभ्यां। वासुदेवे यथा पुराप्रेम
४१ तथ्यास्वतौ केषपि व्रजस्य प्रेम वर्द्धते किमेतदद्भुतमितिा किंच सात्मनः प्रसहितस्य व्रजस्य मम तेषु प्रेमे कारणं किमिभावः॥३६॥ किंयंमा
यादेवानां वा नराणां वा असुराणां वाकुतो वा कस्मात्प्रयुक्तौ। तत्रान्यमायानसंभवति। यतो ममापि मोहोवर्त्तते अतः प्रायशो मत्स्वा
मिनः श्रीकृष्णस्यैवमायेयमस्त्विति संभावयति॥३७॥ सवयसान्स्वरवीनपि वपुनेन हा नमपेन चक्षुषा वैकुंठं श्रीवत्सवापश्यत्॥३८॥

व्रजस्य रामः प्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणं॥ मुकुंदस्तनेषपश्ये प्रपश्य हेतुविदचिंतयत्॥३५॥ किमेतदद्भुतमिव वासुदे
वे खिलात्मनि॥ व्रजस्य सात्मनस्तोके षपूर्वं प्रेम वर्द्धते॥३६॥ केयं वाकुत आयाता देवी वा नार्युतासुरी॥ प्रायो मायाा
स्तु मे भर्त्तुर्नान्या मेऽपि विमोहिनी॥३७॥ इति संचिंत्य दाशार्हो वत्सान्सवयसानपि॥ सर्वानाचष्ट वैकुंठं चक्षुषाव
युनेन सः॥३८॥ नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्रयेऽपि॥ सर्वं पृथक् त्वं निगमात्कथं वदेत्युक्तेन वृत्तं
प्रभुणा बलो वैत्॥३९॥ अस्तापि स्वासनस्थेन चतुरास्येन शौरिणा॥ मोहितैः स्वपुरद्वास्थैः परिभूतोन्यवर्त्तत॥४०॥
अंन्ना तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा॥ पुरोवदाब्दं क्रीडंतं ददृशे सकलं हरिं॥४१॥ ॥ ॥ ॥

एवंकृष्णरूपान्सामान्यतो ज्ञात्वा लल्ल दृष्ट्वा कस्योपदेशो न विशेषतो ज्ञातवानित्याह नैते इति॥ अयमर्थः। यात्स्यमानास्तावद्वत्सा
ऋषीणामंशाः पालाश्च देवानामंशा इति तावदहं वेद्मि। इदानीं तु न तथा किंतु। आस्मिन्भिदाश्रयेपि त्वमेव भासि। अतस्त्वं सर्वं इ ४१
यक्विविच्य कथं वृत्तमिति वदेत्युक्तेन प्रभुणा वक्त्रा निगमात्संक्षेपत एवोक्तं वृत्तं बलः अवैत् विदितवानित्यर्थः॥३९॥ ततः कि
द् त्रोमिसपेक्षायामाह तावदिति। वर्षेजाते आत्मनो मानेन त्रुट्यनेहसात्रुटिमात्रेण कालेन सकलं सानुचरं हरिं ददर्श॥४०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा च व्यतर्कयदित्याह यावंत इति द्वाभ्यां मेमयाशये मन्मान्या तल्पे ॥४१॥ मन्मायामोहितेभ्य इतरे कुत्रत्याः ॥४२॥ इतिवितर्कयन्न मुह्यदि
त्याह । एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूरिति पाठः ॥४३॥४४॥ न तु मायाश्रयस्य तस्य कुतो मोह इत्यत आह । तम्यामिति । महामा
यो विनिमग्नावति अन्यमायया आवरणविक्षेपकत्वाभावे दृष्टांतद्वयमाह । तम्यां तमिस्रायां रात्र्यां नैहारं हिमकणभवेत मइव । तद्विनार्यो
पसर्जनस्यापि तमसो नैहारमिति विशेषणं छादसां तन्न मोयथा पृथगावरणं न करोति किंतु तत्रैव लीयते । यथा च खद्योतार्चिरहति

यावंतो गोकुले बालाः सवत्साः सर्व एव हि ॥ मायाशये शयाना मे नाद्योपि पुनरुत्थिताः ॥४१॥ इत एतेत्र कुत्रत्या मन्मायामो
हितेतरे ॥ तावंत एव तत्राब्दं क्रीडंतो विष्णुना समं ॥४२॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे
कथंचन ॥४३॥ एवं संमोहयन्विष्णुं विमोहं विश्वमोहनं ॥ स्वयैव माययाजोपि स्वयमेव विमोहितः ॥४४॥ तम्यां तमोवन्नैहा
रं खद्योतार्चिरिवाहनि ॥ महतीतरमायैश्यं निहंत्यात्मनि युंजतः ॥४५॥ तावत्सर्वे वत्सपालाः पश्यतोजस्य तत्क्षणात् ॥
व्यदृश्यंत घनश्यामाः पीतकौशेयवाससः ॥४६॥ चतुर्भुजाः शंखचक्रगदाराजीवपाणयः ॥ किरीटिनः कुंडलिनो हा
रिणो वनमालिनः ॥४७॥ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः ॥ नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः ॥४८॥

पृथक् प्रकाशं न करोति । एवं महति पुरुषे युंजतः पुंसः इतरा नीचा माया तत्र न किंचित्करोति । किंतु आत्मनि स्वाश्रये लीयत एवैश्यं सामर्थ्यं
निहंतीति ॥४५॥ अन्यदप्याश्चर्यमाह । तावदिति । वत्सपालाः वत्साः पालाश्च सर्वे यष्टिविषाणादयश्च ॥४६॥४७॥ श्रीवत्स प्रभा यु
क्तान्यंगदानि दोःषु येषां । रत्नमयानि कंबुवत् त्रिधा राजीनि कंकणानि पाणिषु येषां ते च ॥४८॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पृ०
४२

तथापि भूरिभुजनार्जितं पुण्यं तथकलैर्जनैरर्पितैः ॥ ४९ ॥ चंद्रिकाविशदस्मितयुक्तैः सहारुणगुणेन वर्त्तमानाये अपांगास्तैर्विहितैः

स्वकार्थीतोस्वभक्तमनोरथानां रजः स ताभ्यां स्वष्टुपालका इवन्य दृश्यंत। स एव हि शदास्मितेन पालका इव रजो वदरुणगुणेन स्व

स्वारइवतादक्कृकटाक्षेर्घोतमानाहृत्यर्थः ॥ ५० ॥ आत्माब्रह्मातदादिस्तंबपर्यंतैरनेकोर्हैरनेकार्हणैः ॥ ५१ ॥ अजाद्यादिभिर्माया अ

विद्यादिभिः विभूतिभिः। शक्तिभिर्महदादिभिरितिमहत्त्वेयोः एथ कश्चिदक्ष्याच्चतुर्विंशतितत्त्वैर्जगत्कारणैः ॥ ५२ ॥ कालादिभि

अंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः ॥ कोमलैः सर्वगात्रेषु भूरिपुण्यावदर्पितैः ॥ ४९ ॥ चंद्रिकाविशदस्मे

रैः सारुणापांगवीक्षितैः ॥ स्वकार्थानाभिवरजः स ताभ्यां स्वष्टपालकाः ॥ ५० ॥ आत्मादिस्तंबपर्यंतैर्मूर्त्तिमद्भि

श्चराचरैः ॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिता ॥ ५१ ॥ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः ॥ च

तुर्विंशतिभिस्तत्वैः परीता महतादिभिः ॥ ५२ ॥ कालस्वभावसंस्कारकामकर्मगुणादिभिः ॥ स्वमहिध्वस्तमहि

स भिर्मूर्त्तिमद्भिरुपासिताः ॥ ५३ ॥ सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः ॥ अस्पृष्टभूरिमाहात्म्या अपिह्युपनिषद्दृशां ॥ ५४ ॥ स

श्च तत्सहकारिभिः। तत्रस्वभावः परिणामहेतुः। संस्कार उद्बोधकः स्वमहिध्वस्तमहिभिः भगवन्महिम्ना तिरस्कृतस्वातंत्र्यैः ॥ ५३ ॥

नेकैः सर्वे अणिमाद्यैः सर्वेषां मूर्त्तिमत्वेपि विशेषमाह सत्यज्ञानेति सत्याश्च ज्ञानरूपाश्च अनंताश्च आनंदरूपाश्च तत्रापि तदेकमा

त्रा विजातीयसंभेदरहिताः। तत्रापि चैकरसाः सदैकरूपा मूर्त्तयो यांते यद्वा सत्यज्ञानानंदिमात्रैकरसं यद्वस्तु तदेव मूर्त्तयो येषामिति।

अतएव उपनिषदात्मज्ञानं सैव दृक् चक्षुर्येषां तेषामपि हि निश्चितं अस्पृष्टभूरिमाहात्म्यानस्पृष्टं स्पर्शयोग्यं। भूरिमाहात्म्यं येषां। तत्

॥ईशे॥ तैर्देवैः संस्तुतः [illegible]
४२

एवं सत्यत् सह एकदैव ददर्श। परब्रह्मणो विशेषणं। यस्येति॥५५॥ अतिकुतुकेनाश्चर्येण उद्धृत्य दृष्टीः परावृत्य हंसपृष्ठेति पास्येव॥ कुतुकशब्दे तृतीया
योः छांदसो लुक् यद्वा उद्धृत्य इति छेदः। अतिकुतुके नीद्धृत्यः विचार्यः विलोऽपः विपर्यस्तत्तास्मिन्निति यावत् पावत् पाठांतरे तु अतिकुतुको
नोद्धृतः क्षुभितः तेषां धाम्नां तेजसां तत्र सर्वेंद्रियो ब्रह्मलोकलक्ष्मीमभूत् विश्वलोभूतां अत्र दृष्टांतः पूर्देवी प्रजाधिष्ठात्री काचिद्देवता तस्या अंति
समीपे पुत्रिका चतुर्मुखीकृतकप्रतिमेव॥५६॥ एवं मोहमज भुज्जो हारे सा हरौ सरस्वती तस्या ईशो ब्रह्मणो किमिदमिति मुह्यतीति सति। पश्चात् दृष्टु
मयानीशोऽसति परमोऽजः श्रीकृष्णः सपदि अजो जवनिकां मायारूपां तिरस्कारिणीं। यया अद्भुत दर्शितं तां च छादनं तां तिरोधत्त अपसारित

एवं सल्लदृद्दर्श अजः परब्रह्म सोमनोखिलात्॥ यस्य भासा सर्वमिदं विभाति सचराचरं॥५५॥ ततोऽतिकुतुको द्वृत्य स्तिमितै
काद्दशेंद्रियैः॥ तद्धाम्नाभूदजस्तूष्णीं पूर्देव्यंतीव पुत्रिका॥५६॥ इतीरेशेतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजा
तोऽतन्निरसनमुखब्रह्मकमितौ॥ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोजा
जवनिकां॥५७॥ ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः॥ कृच्छ्रादुन्मील्य वै दृष्टीराचचक्षेदं सहात्मना॥५८॥ ॥

वाविस्पर्शः॥ अथवा अयं लोकाभिमानी मम ऐश्वर्यं द्रष्टुमयोग्य इति तस्योपरि मायां प्रसारितवानिति किमिमुह्यति। अतर्क्ये तर्कागोचरे
निजः असाधारणो महिमा यस्य तस्मिन्। इति मोहे हेतुरुक्तः। दर्शनायोग्यतायत्रीणि विशेषणानि। स्वप्रमितिके प्रकाशश्च तर्कसु
मुखेन स्वचय यस्मिन्॥ अतएव न एवं स्वजातः प्रकृतेः परत्र परस्मिन्। अतएव अतात्रिरस नैर्ब्रह्मकैः श्रुतिशिरोभिर्मितिः ज्ञानं यस्मिन् तस्मिन्
स्वरूपे॥५७॥ अर्वाक् बहिः प्रतिलब्धानि अक्षाणि येन सः परेतवत् मृतो यथा दपुनः कथंचिदुत्तिष्ठति तथा दृष्टीः नेत्राणि॥५८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
४२

जनानामाजीव्यैर्द्रुमैराकीर्णं समाप्रियं संततानि आसमंतात् प्रियाणि यस्मिन् तत् ॥५९॥ तदाह यत्रेति । नैसर्गदुर्वैराः स्वाभाविकाप्रीतिका पर्व
वैरवंतोपि नराः सिंहादयश्च मित्राणीव यत्र सहवासन् । अजितस्यावासेन द्रुताः पलायिताः रुट् तर्षादयः क्रोधलोभादयो यस्मात् तथा
भूतं वृंदावनमपश्यदिति ॥६०॥ तत्र च परमेष्ठी ब्रह्माद्वयं पुरा पूर्ववद्वत्सान् सखींश्च अपश्यत् । कथंभूतं पशुपवंशशिशुत्वनाट्यमु
द्वहत् । नाट्यमुद्वहत् । नाट्यमित्यत्र हेतुः । अद्वयमित्यादि । अद्वयश्च वत्सान्विचिन्वत् । एकं च सखीन् । अगाधबोधं च विचिन्वत् । अनं

सपद्येवाभितः पश्यन् दिशोऽपश्यत् पुरःस्थितं । वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियं ॥५९॥ यत्र नैसर्गदुर्वैराः सहा
सन्नृमृगादयः ॥ मित्राणीवाजितावासद्रुतरुट्तर्षकादिकं ॥६०॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परम
नंतमगाधबोधं ॥ वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥६१॥ दृष्ट्वा त्वरेण निजधोरण
तोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवाभिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृता
भिषेकं ॥६२॥ उत्थायोत्थाय कृष्णस्य चिरस्य पदयोः पतन् ॥ आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥६३॥ शनै
रथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः ॥ कृतांजलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलं
या ॥६४॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रयोदशोऽध्यायः ॥१३॥ ॥ ॥ ॥

तं च परितो विचिन्वत् । परं च शिशुत्वमुद्वहत् अतः च सपाणिकवलमिति नाट्यमेवोद्वहदित्यर्थः ॥६१॥ निजधोरणतः स्ववाहनात् त्वरेण
वेगेनावतीर्य हंसादवतीर्य चतुर्णां मुकुटानां कोटिभिः अंघ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैः आनंदाश्रुरूपैः सुजलैः अभिषेकं कर्णं दत्तेति ॥६२॥ चि
रस्य चिरं पादयोः पतन्नास्ते ॥६३॥ सवेपथुः सकंपः अतएव गद्गदया अनुकरणमेतत् । इलया वाचा । ऐलत अस्तौत् ॥६४॥ इति दशमेत्र ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्दशेऽद्भुतं दृष्ट्वा पूर्वांगं तु कनिश्चयं ॥ अनीशः कर्तुमस्तौषीललसंब्रह्मा विमोहितः ॥१॥ स्वकृतापराधेन भिया सकंपतया भगवन्महिमानमनवगाह
मानोऽपि यथादृष्टस्वरूपमेव कीर्तयन्नाह ॥ नौमीति । हे ईड्य स्तुत्य ते तुभ्यं नौमि द्वितीयार्थे चतुर्थी । अथवा नौमीत्युक्ता प्रस्तुतस्य भगवतः कर्मत्वेन
नैव प्रयोजनायेप्साया मेवं भूतो भगवानेव प्रयोजनमिति तादर्थ्ये चतुर्थ्यः ॥ यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमीत्यर्थः ॥ अभ्रवद्वपुर्यस्य तस्मै ।
तडिद्वदंबरे यस्य तस्मै । गुंजाभिरवतंसो कर्णभूषणे यस्य परितः पिच्छं च बर्हापीडं तैर्लसन्मुखं यस्य तस्मै । वन्याः स्रजो यस्य तस्मै । कवलादिभिः
श्रीः शोभा यस्य तस्मै । मृदुपादौ यस्य तस्मै । पशुपस्यांगजाय ॥१॥ ननु नौमीतिज्ञात्वा किं स्वरूपानुवादमात्रं क्रियते अत आह । अस्यापीति ॥ मो

ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये
मृदुपदे पशुपांगजाय ॥१॥ अस्यापि देववपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि । नेशे महि त्ववसितुं मन
सांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥२॥ ॥ ॥ ॥

देव । अस्यापि तु लभमेतेन प्रकाशितस्यापि तव वपुषः अवतारस्य महिमहिमानमवसितुं ज्ञातुं कोऽपि कः ब्रह्माऽहमपि नेशे न शक्तोऽस्मि यद्वा क
श्चिदपि नेशो न समर्थ आसीत् । सुलभत्वाय विशेषणद्वयं मदनुग्रहस्य ममानुग्रहो यस्मात् तन्मदनुग्रहं तस्य । किं च स्वेच्छामयस्य स्वीया
नां भक्तानां यथा यथेच्छा तथा तथा भवतः । तर्हि किमिति ज्ञातुं न शक्यते अत आह । न तु भूतमयस्य अचिंत्यशुद्धसत्वात्मकस्य यदा एवं
तदा कथं पुनः साक्षात्तव केवलस्यात्मसुखानुभूतेः स्वसुखानुभवमात्रस्यावतारिणो गुणातीतस्य महिमानं अंतरेण निरुद्धेनापि म
नसा कोवा ज्ञातुं समर्थो भवेत् । अथ भूतमयस्यापि तु विराड्रूपस्य तव तन्नियम्यस्य वपुषः महि अवसितुं कोऽपि नेशः । तदा साक्षात्तवैवा
साधारणस्य नियम्यानियंतृभेदरहितस्य उक्तलक्षणस्य अस्य मोहिमहिमानमवसितुं कोऽपि नेशः इति किमु वक्तव्यमित्यर्थः ॥२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू०
४४

तर्हि अज्ञाः कथं संसारं तरेयुरत आह। ज्ञान इति। उदपास्य ईषदप्यकृत्वा सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयां वार्त्तां स्वस्वस्थाने ए
व स्थिता मत्तत्त्वं निधिमात्रेण स्वत एव श्रुतिगतां श्रवणमात्रगतां तनुवाङ्मनोभिर्नमंतः सत्कुर्वंतो ये जीवंति केवलं। यद्यपि नान्यत्कुर्वंति
तैः प्रायशः त्रिलोक्यामन्यैरजितोऽपि त्वं जितः प्राप्तोऽसीति किं ज्ञाने श्रमेणेत्यर्थः॥३॥ भक्तिं विना ज्ञानं तु नैव सिध्येदित्याह। श्रेयः श्रुतिमि
ति। श्रेयसामभ्युदयापवर्गलक्षणानां स्रुतिः स्रवणं यस्याः सरस इव निर्झराणां। तां ते तव भक्तिं व्युदस्यासत्का। श्रेयसां मार्गभूतामि

मू ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्त्तां॥ स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशो
ऽजितजितोऽप्यसि तैस्त्रिलोक्यां॥३॥ श्रेयः श्रुतिं भक्तिमुदस्यते विभो क्लिश्यंति ये केवलबोधलब्धये॥ तेषामसौ क्लेशल
एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनां॥४॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया॥ विबु
ध्य भक्त्यैव कथोपनीतया प्रपेदिरेंऽजोऽच्युत ते गतिं परां॥५॥ ॥ ॥ ॥

तिवा। तेषां क्लेशलः क्लेश एवावशिष्यते। अयं भावः। यथा अल्पप्रमाणं धान्यं परित्यज्य अतः कणहीनान् स्थूलान् धान्याभासान् तु
षान्नेव घ्नंति तेषां नार्किंचित फलं। एवं भक्तिं तुच्छीकृत्य ये केवलबोधाय प्रयतंते तेषामपीति॥४॥ भक्त्यैव ज्ञानं नान्यथेत्याहं सदा ४४
चारं प्रमाणयति। पुरेति हे भूमन्निह लोके पूर्वं योगिनोऽपि संतः योगे ईशानत्र प्राप्य पश्चात् त्वदर्पितेहाः त्वय्यर्पिता लौकिका अपि ई
हा चेष्टा यैस्ते निजकर्मलब्धया त्वदर्पितैः निजैः कर्मभिः लब्धया। त्वय्यर्पिता ईहा चानि लौकिककर्माणि च तैर्लब्धये स्वकं पदं वा। कथोपनी
तया कथया त्वत्समीपं प्रापितया भक्त्यैव विबुध्य आत्मानं ज्ञात्वा अंजः सुखेनैव ते परां गतिं प्राप्ताः॥५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६५॥

एवं तावत्सगुणनिर्गुणयो रूपयोरपि ज्ञानं दुर्घटमिति तत्कथा श्रवणादिनैव तत्साक्षित्वेन्यो ध्येय स्यात्। इदानीं यद्यपयोरविशेषेण दुर्ज्ञेयत्वमुक्तं तथापि गु
णातीतस्य ज्ञानं कथंचिद्भवतु न तु सगुणस्य तव अचिंत्यानंतगुणत्वादिति सैति श्लोक क्रयेन। अतीतेति। हे भव मनु अपरिच्छिन्न अगुणस्य ते महिमा अप
ले रंतरा समिः प्रसादितोद्भियैः विबोद्धुं बोधगोचरीभवितुं अर्हति योग्यो भवति। अथवा विबोद्धुं ज्ञातुम् अर्हति अर्थं ते शक्यं कथं तदर्थः। यद्वा महिमेति महि
मानं कश्चिद्बोद्धुमर्हतीत्यर्थः। कथं स्वानुभवान्न्या साक्षात्कारात्तेः करणसाक्षात्कारात्। नन्वेतः करणमपि सविकारमेव विषयीकरोतीति कथं नाम साका
रं तातस्येत्यत आह अविक्रियादिति विक्रियाविशेषाकारस्तद्रहितात् विशेषपरित्यागएवात्साकारतेत्यर्थः नन्वेतः करणसाक्षात्कारविषयत्वेऽनात्मत्व
प्रसंगः स्यादेत आह। अविक्रियाविशेषाकारस्तद्रहितात् विशेषपरित्यागएव त्साकारतेत्यर्थः। नन्वेतः करणसाक्षात्कारविषयत्वे नाम तत्प्रसंगः स्यादत
आह। अरूपतदिति। रूपं विषयः अविषयात् वृत्तिविषयत्वेपि वा मनो न फलविषयत्वमतो नायं दोष इति भावः। कथं तर्हि स्फूर्तिः। अनन्यबोधात्मतया
स्वप्रकाशत्वेनेवानुत्वन्यथा इदं तदिति विषयत्वेनेत्यर्थः। अथवा मासवर्ततरंगालक्ष्मीरपि अगुणस्य ते महिमहिमानं अमलैरंतरातीति विरिंचि

तथापि भूमन्महिमा गुणस्य ते विबोद्धुमर्हत्यमलांतरात्मभिः॥ अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा॥ ५॥

ध्येरपि तथा या अप्युक्तं नेमां नरूपेण विबोद्धुं किमर्हति नाहत्येवेत्यर्थः। तर्हि किं तदाह स्वानुभवादित्यादिना उक्तार्थमेवैतत्॥६॥ चित्सुखी। ननु परमेश्व
र महिमानुभवे निरशेर्जभाव्यं नेत्याह। तथापि भूमन्निति यद्यपि भक्तिहीनानां दुर्घटस्तथापि। अमलांतरात्मभिस्तव महिम महिमानं विबोद्धुमर्हति। क
थं अनन्यबोध्यात्मतया। अनन्य अव्यतिरिक्तो बोध्य प्रतिपाद्यो यस्तत्पदार्थस्ततः परमात्मा तद्रूपेण। कस्मादनन्यः अविक्रियात् अविक्रियत्वात् यत्
यत् विक्रियावत् तत्तदन्यत्। यथा देह घटादिः। न चाविक्रियत्वमसिद्धमिति चेत्तत्राह। स्वानुभवादितियत् यत् अस्वानुभवं तत्तद्विक्रियावत्। यथा देह
घटादिः। ननु स्वानुभवत्वमप्यसिद्धमिति चेत्तत्राह। अरूपत इति यत् रूपवत्तदस्वानुभवं यथा देह घटादिः। अयं तु तव महिमा अशब्दमस्पर्शमरूपमित्या
दिश्रुतेः। अरूपः अतः स्वानुभवत्वादेव अविक्रि। अतः अनन्य इत्यर्थः। न चान्यथा भेदेन विबोद्धुमर्हति। अथयोऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मी
ति न स वेद यथा पशुरिति श्रुतेः। बुद्धितत्स्याचिदाभासो द्वावपि व्याप्नुतो घटं। तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्। इत्यनात्मसु। आत्मनि तु असत्त्व

८०पू० गुणात्मनः गुणानामात्मनः गुणाधिष्ठातुस्ते तव पुनर्गुणान्विमातुं एतावंत इति गणयितुमपि के ईशिरे समर्था बभूवुः॥ दूरतस्तादृशो सर्वा
४५ र्तो। कथंभूतस्य तवास्य विश्वस्य हिताय पालनाय बहुधा बहुगुणाविष्कारेणावतीर्णस्य। ननु कालेन निपुणैः किमशक्यम् तत्राह का
लेनेति। वा शब्दो वितर्के सुकल्पैरति निपुणैः बहुजन्मनां कालेन भूपरमाणवो विमिता विशेषेण गणिता भवेयुः। तथा खे मिहिका
हिमकणा अपि। तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवोपि॥७॥ तस्माद्भक्तिरेव संगच्छत इत्याह तत्तेनुकंपामिति। प्रसमी

गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः
खे मिहिका द्युभासः॥७॥ तत्तेनुकंपां प्रसमीक्षमाणो भुंजान एवात्मकृतं विपाकं॥ हृद्वाग्वपुर्भिर्विदधं
न्नमस्ते जीवेत यो मुक्तिपदे स दायभाक्॥८॥ पश्येश मेऽनार्यमनंत आद्ये परात्मनि त्वय्यपि मायिमायि
नि॥ मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ॥९॥ ॥ ॥ ॥

नं३

क्षमाणः कदा भविष्यतीति द्रष्टुमन्यमानः स्वार्जितं च कर्मफलमनासक्तः सन्भुंजान एव नातीव तप आदिना क्लिश्यन् एवं यो जीवतमु
क्तौ दायभाक् भवति। भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदपेक्ष्यत इति भावः॥८॥ तदेवं स्तुत्वा भगवंतं क्षमाप ४५
यितुं स्वापराधं निवेदयति। पश्येति। हे ईश मे अनार्यं दौर्जन्यं पश्य। यदहं मायिनामपि मोहके त्वय्यपि स्वमायां प्रसार्य आत्मैश्व
र्यमीक्षितुमैच्छं अभिलषितवान्। अहो एवं कर्तुं त्वयि अहं कियान्न किंचित्। यथाग्नेरुद्गतो ज्वाला अग्नौ न किंचित्तद्वदिति॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोभुवः रजसो जातस्य। अतः अजानतः। अत एव अजावलेपांधतमोंधचक्षुषः। अजो जगत्कर्त्ताऽहमिति मदेन गाढतमोरूपेण धीरूपनेत्रस्य। अतस्त्वत्तः पृथगीशमानिनः। अन्यत्व प्रभुत्वेन वर्त्तमानोपि नाथे सति नाथवान् मद्भृत्य एव। अत एषोऽनुकंप्य इति मत्वा क्षमस्वेत्यर्थः॥१०॥ प्रसादविग्रहस्त्वमपि ईश्वर सर्ववेत्ति चेत्तत्राह क्वाहमिति। तमः प्रकृतिः। महान्। अहंकारः। खं। चरो वायुः। अग्निः। वार्जलं। भूः पृथ्वी प्रकृत्यादि पृथिव्यंतैरेतैः संवेष्टितो योऽंडघटः स एव तस्मिन्वास्वमानेन सप्तवितास्तिः कायो यस्य सोहं क्व। क्व च ते महित्वं। कथंभूतस्येदृ

अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः॥ अजावलेपांधतमोंधचक्षुष एषोनुकंप्यो मयि नाथवानिति॥१०॥ क्वाहं तमो महदहंखचराग्निवार्भूसंवेष्टितांडघटसप्तवितस्तिकायः॥ क्वेदृग्विधाविगणितांडपराणुचर्य्यावाताध्वरोमविवरस्य च ते महित्वं॥११॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे॥ किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनंतः॥१२॥ ॥ ॥ ॥

दृग्विधा नियान्यविगणितान्यंडानि त एव परमाणवः तेषां च परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव। अतः अतितुच्छत्वात्तयाऽनुकंप्योहमिति॥११॥ अपि च गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति लोके। अस्ति नास्तिव्यपदेशाभ्यां भावाभाव शब्दाभ्यां स्थूलसूक्ष्मकार्य्यकारणशब्दैर्वा भूषितमभिहितं। एतेषां शब्दानां भावविषये अपि तं स्थितमिति वा सर्वं वास्तीत्यर्थः। हे अधोक्षज। तव कुक्षेः अनंतः वहिः कियदपि किंचिन्मात्रमपि किमस्ति न किंचिदस्तीत्यर्थः। अतः सर्वस्य त्वत्कुक्षिगतत्वमभापितत्था लोन्मात्त्वदपराधः सोढव्य इति भावः॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०
४६

किंच विशेषतोपि त्वत्तो मम जन्म प्रसिद्धमित्याह जगत्त्रयेत्यादि। जगत्त्रयस्यांते प्रलये य उदधीयानौ संप्लवः सश्लेषः तस्मिन्नुदे उदके नारायणस्योदरे नाभिः तस्य नालात् अरजो निर्गत इतीयावाक् सा तान्मृषा न भवति। वै निश्चितं। तथापि तु हे ईश्वर त्वत्तः अहं किं न विनिर्गतः नोत्पन्नोस्मि अपि तु त्वत्त एवोत्पन्न इत्यर्थः॥१३॥ तर्हि नारायणस्य पुत्रस्त्वं मम किमायातं तत्राह नारायणस्त्वमिति। नहीति। काक्वा त्वमेव नारायण इत्यापादयति कुतोहं नारायण इति चेदत आह सर्वदेहिनामात्मासि एवमपि किं नारायणो न भवसि। नारं जीवसमूहः अयनमाश्रयो यस्य स तथेति। त्वमेव सर्वदेहिनामात्मत्वान्नारायण इति भावः। हे अधीशात्वं नारायणो नहीति पुनः काकुः अधी

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात्। विनिर्गतोजस्त्विति वाङ्नवैमृषा किंत्वीश्वर त्वन्नविनिर्गतोस्मि॥१३॥ नारायणस्त्वं नहि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी॥ नारायणोंगं नरभूजलायनात्तच्चापि सत्यं न तवैव माया॥१४॥

शः प्रवर्तकः। ततश्च नारस्यायनं प्रवृत्तिर्यस्मात् स तथेति पुनस्त्वमेवासाविति॥ किंच। त्वमखिललोकसाक्षी। अखिलं लोकं साक्षात् पश्यसि। अतो नारमयसे जानासीति त्वमेव नारायण इत्यर्थः। ननु चैवं नारायणपदव्युत्पत्तो भवेदेवं तत्तन्यन्या प्रसिद्धमित्याशंक्याह हे नारायणोंगमिति। नराद्भूतान्ये अर्थाः चतुर्विंशति तत्त्वानि तथा नराज्जातं यज्जलं तदयनाद्वा नारायणः प्रसिद्धः सोपि तवैवांगमूर्तिः। तथा च स्मर्यते। नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः। तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत इति तथा। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति च न तु मन्मूर्तेः परिच्छिन्नायाः कथं जलाश्रयत्वं। अत आह तच्चापि ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरिच्छेद प्रेवोपपत्ति। तेच्छ्र्वदिति। जगदाश्रयभूतं तव तद्वपुः जलस्थमिति चेद्यदि सत्यं स्यात्तर्हि तदैव कमलनालमार्गेणांतः प्रविश्य संव
त्सरशतं विचिन्वतापि मया हे भगवन् अचिंत्यैश्वर्य तत्र किमिति न दृष्टं ननु न बाह्यं दृश्यं सद्वपुः किंतु अंतःकरण दृश्यं तदा हृद्यपि किमिति
नो व्यदर्शि न दृष्टं तदैव तपःकरणानंतरं सपद्येव च सुदृष्टं। अतो मायामात्रमेव अतस्त्वन्मूर्त्तेः देशाविशेषपरिच्छेदः सत्यो न भवतीत्यर्थः।।१४।। अ
पि च यदि जलादिप्रपंचः सत्यः स्यात्तर्हि तेन तव परिच्छेदोपि भवेत्। स तु मायाविलसितमिति त्वयैव दर्शितमित्याह। श्लोकत्रयेण। हे मायाप्रम ध
मायोपशमन। अत्रैवावतारे बहिःस्फुटस्यापि आत्मनो जठरमध्ये जनन्याः प्रदर्शनेन।।१६।। ननु बहिःस्थतएवांतर्जठरे प्रतिबिंबोस्तु कु

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव।। किं वा सुदृष्टं हृदि मे तदैव किं नो सपद्येव पुनर्व्यदर्शि।।१५।। अत्रैव मा
याधमनावतारे ह्यस्य प्रपंचस्य बहिःस्फुटस्य।। कृत्स्नस्य चांतर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते।।१६।। यस्य कुक्षावि ग
दं सर्वं सात्मं भाति यथा तथा।। तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना।।१७।। अद्यैव त्वदृते स्य किं मम न ते मायात्वमादर्शित
मेकोसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि। तावंतोसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावंत्येव जगंत्यभूस्तद
मितं ब्रह्माद्वयं शिष्यते।।१८।।

तः सर्वथा मायात्वं तत्राह यस्य तव कुक्षौ सर्वमिदं यथा भाति तत्सर्वं इहापि बहिरपि तथैव भाति। किंच सात्मं त्वत्सहितं। तदिदं त्वयि मायया
विना किं घटेत। अयंभावः। त्वपि प्रतिबिंबश्चे तर्हि बाह्यादि लोप तयाप्रतीयेत न तु तदस्ति। तव चाद्रष्टृ स्थानीयस्य त्वयि प्रतीतिर्न स्यात्। अ
तः सर्वथा मिथ्या त्वमेवेति।।१७।। अपि च न केवलं जनन्याः मयापि तथैव दर्शितमित्याह। अद्यैवेति। त्वदृते त्वां विना। अस्य विश्वस्य मायात्वं त
या मम मेव च तदपि च द्यैव किं न दर्शितं किंतु दर्शितमेव। तथाहि। एकोसीत्यादि ततो मया सहाखिलैस्तैर्ब्रह्मादिभिरुपासिताः तावंतश्च चतुर्भुजा अ
स्ति। जगंति अभूस्तावतीत्रिशृगनुक्तमपि द्रष्टव्यमिति ज्ञातव्यं।।१८।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० ननु ब्रह्मन् नूतनमया दर्शितं शुद्धमेव चैतन्यं कथं प्रपंचवन्मायेत्युच्यते। सत्यं। किंतु। अद्वितीये त्वयि नानात्वं गुणावतारमत्स्याद्यवतारेष्वि
४७ वकार्यवैचित्र्येण स्वतंत्रमायानिबंधनमित्याह श्लोकद्वयेन। अजानतामिति। त्वत्पदवीं तव स्वरूपमजानतां। अनात्मनि प्रकृतौ स्थितः आ
त्मैव त्वं। आत्मनैव स्वातंत्र्येण मायां वितत्य आभासि। कथं जगतः सृष्टावहमिव ब्रह्मेव। विधाने पालने एष त्वमिव। अंते त्रिनेत्र इव॥१९॥२०॥
ननु च स्वातंत्र्ये कथं कुत्सितेषु मत्स्यादिषु जन्म। कथं वा वामनाद्यवतारे याच्ञादि कार्पण्यं। कथं वास्मिन्नेव कृष्णे त्वद्रूपपलायनादि।

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायां॥ सृष्टाविवाहं जगतो विधाने इव त्वमेषोंत इव त्रिनेत्रः॥१९॥
सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादःस्वपि तेऽजनस्य॥ जन्मासतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय॥२०॥
को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्यां॥ क्व वा कथं वा कति वा कदेति विस्तारयन्क्रीडसि योगमायां॥२१॥
तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखं। त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यद
पि यत्सदिवावभाति॥२२॥

अत आह। को वेत्तीति। अन्वयार्थः। संबोधनैर्दुर्ज्ञेयत्वमेवाह। भूमन्नित्यादिभिः। भवत ऊतीर्लीलास्त्रिलोक्यां को वेत्ति। क्व वा कथं वा कदा वा ४७
कति वेति। अचिंत्यं तव योगमायावैभवमिति भावः॥२१॥ ननु भवत्त्ववताराणामचिंत्यो महिमा प्रपंचस्य असत्त्वे कथं सत्त्वप्रतीतिरिति
मायाशंकां सपरिकरामुपसंहरन्परिहरति अस्तधिषणं निरस्तप्रतिभासं। त्वय्येव उद्यत उद्भवत्। अपि यत् नश्यत् सदिवेत्युपल
क्षणमेतत्। नित्यमिव। सुखमिव चेतनमिव च। अधिष्ठानभूतस्य तव गुणैस्तथा भातीत्यर्थः॥२२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेव तु सत्याह। एकस्त्वं सत्यः। कुतः। आत्मा। दृश्यप्रपञ्चसंबन्धेन चात्मा द्वयः अतः सत्यः किंच यद्विकारवत्तदसत्यं। न च त्वयि जन्मादयो विका
राः संतीत्याह। आद्यः कारणं अतो न जन्म। आद्यत्वे हेतुः पुराणः पुरापि नवः। कार्यात्पूर्वमपि वर्त्तमान इत्यर्थः। अत्र हेतुः। पुरुष इति। तथा
च श्रुतिः। पूर्वमेवाहमिहासमिति तत्पुरुषत्वमिति। जन्माभावेन तत्प्राप्तिलक्षणं विकारं वारयति। नित्य इति सनातन इत्यर्थः। पूर्णः अजस्रसु
खः अक्षरः अमृत इति चतुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति। पूर्णत्वे हेतुरनंतः। अद्वय इति चेद्देशकालपरि
च्छेदरहितः वस्तुपरिच्छिन्नोपि। अमृतत्वोपवादनाय स्वचतुर्विधक्रियाफलं वारयति। स्वयंज्योतिः। निरंजनः उपाधितो मुक्त इति पदत्रयेण।

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः॥ नित्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मु
क्त उपाधितोऽमृतः॥२३॥ एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मतया विचक्षते॥ गुर्वर्कलब्धोपनिष
त्सुचक्षुषा ये ते तरंतीव भवानृतांबुधिं॥२४॥

त्रयं भावः। तत्रोत्पत्त्याप्तिरापि इत्यनेनैव निराकृता। प्राप्तिरपि क्रियया ज्ञानेन वा भवेत्। क्रियया प्राप्तिराप्तपदेनैव निराकृता। ज्ञानतः प्राप्तिं वा
रयति॥ स्वयंज्योतिरिति॥ विकृतिरपि तुषायाकरणेनावघातेन व्रीहीणामिव उपाध्यपाकरणेन भवेत्। तच्चासंगत्वान्नसंभवतीह
मुक्त उपाधितइति इति। संस्कारोपि किंमतिशयाधानेन मलापाकरणेन वा। तत्रातिशयाधानं पूर्णत्वेनैव निराकृतं। मलापाकरणं वार
यति। निरंजन इति निर्मल इत्यर्थः॥२३॥ तस्मादेवंभूतज्ञानान्मुच्यंत इत्याह एवंविधमिति त्वां ये विचक्षते सम्यक्प्रपश्यंति। कथं आत्मा
त्मतया। आत्मा प्रत्यक् तस्य स्वरूपत्वेन। न चैतत्पुत्रादिष्विव गौणमित्याह सकलात्मनामपि स्वात्मानं केन गुरुरेव अर्कः तस्माल्लब्धा
उपनिषत् ज्ञानं तदेव सुचक्षुस्तेन। भव एव अनृतांबुधिस्तं ते तरंतीव॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पृ० ४८ तत्र ज्ञानेन तरंतीति। तच्चेतरंतीवेति। तत्त्वात्मात्मतया ज्ञानेनेत्यर्थ इत्ययं प्रतिज्ञातं क्रमेणोपपद्यते। तत्रात्मानमेवात्मतयेत्यनेन श्लोके
न ज्ञानेन तरंतीत्युपपाद्यते। अज्ञानसंज्ञावित्यनेन न तरंतीवेत्येतत्। त्वादि श्लोकद्वयेन तु आत्मात्मतयेत्येतदुपपाद्यते। ननु ज्ञानेन
कथं भवं तरंतीति तस्याह ज्ञानमूलत्वादित्याह। आत्मानमेवेति। तेनैवाज्ञानेनैव प्रपंचितं प्रपंचः। रज्ज्वामहे भोगिभवाभवावितीति। सर्प
प शरीरस्याध्यासोऽबवाधो यथेति॥२५॥ ननु ज्ञानेन न तरंत्येव किमिदमुच्यते तरंतीवेति तत्राह। अज्ञानसंज्ञाविति। अज्ञानेन संज्ञाय
यो तौ भवबंधमोक्षौ भवेन बंधस्तस्मान्मोक्षश्च तौ द्वौ नाम प्रसिद्धौ क्लृप्त इवाभातः क्लृप्तश्चासौ द्वयोभावस्तस्मादन्यो नस्तः। न

आत्मानमेवात्मतयाऽविजानतां तेनैव जातं निखिलं प्रपंचितं। ज्ञानेन भूयोऽपि च तत्प्रलीयते रज्ज्वामहे भोगिभवाभवौ यथा॥२५॥ अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्योऽस्त्यृतज्ञभावात्। अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी॥२६॥ त्वामात्मानं परं मत्वा परमात्मानमेव च। आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताज्ञता॥२७॥

ननु कथं महानपलायः क्रियते परमार्थविचारादित्याह। अजस्रेति। अखंडानुभवरूपे परे शुद्धे आत्मनि नाज्ञानं न बंधः। अत एव न ४८
ज्ञानं न च मोक्षः। तरणौ सूर्ये रात्र्यहनी इवेति॥२६॥ ननु परमार्थज्ञानादज्ञानकृतो बंधो निवर्त्ततोऽनात्मात्मतयैव ज्ञानादिति को
यमाग्रह इत्याशंक्याध्यासाद्यात्मनः पररूपास्फूर्त्तितद्रूपवादेन तत्रैव आत्मस्वरूपे ज्ञानं फलमिति समर्थं विस्मयेनाक्रोशा
न्निवारयत्यामिति। त्वामात्मानं परं देहादिमत्वा आत्मनि देहादिमध्यस्य। तथा परे देहादि आत्मानं मत्वा देहाद्यात्मानमध्यस्य। अ
त्रेनष्ट आत्मा वहिर्मृग्य इति चित्रं नाहं गृहे नष्टं वने मृग्यत इत्यर्थः॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेकिनस्तु प्रत्यक्स्वरूप एव परमात्मानं विचिन्वंतीत्याह। अंतर्भव इति। भवतीति भवः चिज्जडात्मकं शरीरं तन्मध्य एव त्वां मृगयंति
अतत्‌ जडं त्यजंतः। अयमर्थः। ननु सतो ज्ञानेनालौकिकमसतो यत्नादेनेति शंक्यम् अस्त्वाय वादं विना अधिष्ठानतत्वं न ज्ञायत
इति सतो व्यवहारः असंतमपीति समीपे। असंतमपि अहिमंतरेण तन्निषेधं विनेत्यर्थः। संतं गुणं रज्जुं संतः किमु यांति जानंति। अंति
संतमपि गुणमिति वा न जानंतीत्यर्थः। तस्मादात्मतत्त्वेव ज्ञानान्मुक्तिरिति भावः॥२८॥ नन्वेवं ज्ञानैकसाध्यो मोक्षः किमिति भक्तिरु ध्यो

अंतर्भवेऽनंत भवंतमेव ह्यतत्त्यजंतो मृगयंति संतः॥ असंतमप्यंत्यहिमंतरेण संतं गुणं तं किमु यंति संतः॥२८॥ अथा
अथापि ते देवपदांबुजद्वयप्रसादलेशानुगृहीत एव हि॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचि
न्वन्॥२९॥ तदस्तु मे नाथ स भूरिभागो भवेऽत्र वान्यत्र तु वा तिरश्चां॥ येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे त
व पादपल्लवं॥३०॥

पि तां। अत आह अथापीति। यद्यपि हस्तप्राप्यमिव ज्ञानमुक्तं तथापि हे देव। तव पादांबुजद्वयमध्ये एकदेशस्यापि यः प्रसादलेशो
पि तेनानुगृहीत एव भगवतस्तव महिम्नः तत्त्वं जानाति। हे भगवन्‌ ते महिम्नस्तत्त्वमिति वा। एकोऽपि कश्चिदपि चिरमपि विचिन्व
न्नपि अतद्दशापवादेन विचारत्रयीत्यर्थः॥२९॥ तत्तस्मात्‌ भूरिभागः महद्भाग्यं। अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये यज्जन्म त
स्मिन्‌ वा येन भाग्येन भवदीयानां जनानां एकोऽपि यः कश्चिदपि भूत्वा निषेवे इत्यर्थः सेवेय॥३०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
४९

देवादिजन्मतोपियत्रकुत्रचित्त्वद्भक्तिमज्जन्मैव श्रेष्ठमिति योत्सुक्येन सततभिक्षोकैरभिनंदति। अहोतिधन्या इत्यादिभिः। व्रजगोरमण्यः व्रजस्यागावो रमण्यो गोप्यश्च। ते त्वया वत्सतरात्मजात्मसेतेरात्मना। वत्सानामात्मजानां च रूपेण यस्य तव तृप्तये सर्वेपियज्ञाः अद्यापि न शक्ताः। तेन त्वया प्रतिक्षणं तृप्यतासां स्तन्यममृतरूपं पीतमिति ॥३१॥३२॥ किंच। एषां भाग्यस्य तावन्महिता महिमा आस्तां वकुं शर्वादयः। शर्वो अहंकाराधिष्ठाता आदिर्येषां चंद्रादीनामेकादशानां ते। तथा वयं च वयमप्रियात्मानमेव बहुमन्यमान आह।

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः॥३१॥ अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनं॥३२॥ एषां तु भाग्यमहिमाऽच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः॥ एतद्धृषीकचषकैरसकृत्पिबामः शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते॥३३॥

एवं मनोबुद्ध्यहंकारचक्षुराधिष्ठातारस्त्रयोदशदेवा एव तावत्। वत अहो भूरिभागाऽयस्मादेतेषां हृषीकाणींद्रियाण्येव चषकोर्त्तिसौदर्प्यसौगंध्यानि पात्राणि तैः तेच तुर्दशास्याचित्ताधिष्ठातुरंघ्रीएव उदंजे वारिजे तयोर्मधु मकरंदः तदेवामृतं स्वादुआसवं च मादकं पिबामः। एतदुक्तं भवति। यदा प्रत्येकमिंद्रियाभिमानिनो वयं कीर्त्तिसौदर्प्यसौगंध्याद्येकैकदशासेविनो पिकृताथास्तदा सर्वेंद्रियैः सर्वसेविनामेषां किं वर्ण्यते भाग्यमिति। ३३॥ ॥ ॥ ॥ ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतो मया प्रार्थितं तदस्तु मे नाथ स भूरिभाग इति यत् तदेतदेवेत्याह। तद्भूरिभाग्यमिति। किं तत्। इह मनुष्यलोके यत्किमपि जन्म तत्राप्यटव्यां यत्। तत्रापि गोकुले यत्। अहो सत्यलोकं विहायात्र जन्मनि जाते को लाभ इत्यत आह। अपि कतमांघ्रिरजोभिषेकमिति। गोकुलवासिनां मध्ये कतमस्य यस्य कस्यापि अंघ्रिरजसा अभिषेको यस्मिन्भूतं तत्। ननु कुतो गोकुलवासिन एवातिधन्यास्तत्राह। यदिति येषां जीवितं निखिलं मुकुंद इति मुकुंदपरमेव जीवनमित्यर्थः। दुर्लभतामाह। अद्यापीति। श्रुतिमृग्यं वेदैरपि मृग्यत एव न तु दृश्यत इत्यर्थः

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेपि कतमांघ्रिरजोभिषेकं॥ यज्जीवितं तु निखिलं भगवान्मुकुंदस्त्व-
द्यापि यत्पदरजः श्रुतिमृग्यमेव॥३४॥ एषां घोषनिवासिनामुत भवान्किं देव रातेति नश्चेतो विश्वफलात्फलं
त्वदपरं कुत्राप्ययन्मुह्यति। सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाश-
यास्त्वत्कृते॥३५॥

॥३४॥ अपि च। किं वर्ण्यते। कृतार्थत्वमेषां भक्त्या भवानपि ऋणी वास्ते। ननु किं दातुमसमर्थोहं येन ऋणी स्यां। अत आह। उत अपि भवान् एषां कुत्रापि किं विश्वफलात् सर्वफलात्मकात् त्वत्तः परं फलं राता दास्यतीति नश्चेतः अयन् सर्वत्र गच्छन् विचारयन् मुह्यति ननु आत्मानमेव दत्वा अनृणः स्यामिति चेत्। नहि। नहि। सद्वेषादिव सतां भक्तानां यो वेषस्तदनुकारमात्रेण पापिष्ठा पूतनापि त्वामेवापिता प्रापिता। तर्हि एतत्संबंधिनां अपि दास्यामीति चेत्तत्राह। सकुलेति। बकाघासुरसहिता। एषां त्वपि तावदेव चेन्न पर्याप्तमित्याह। यदिति येषां धामादयस्त्वत्कृते त्वदर्थमेवेत्यर्थः॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
५०

ननु विगतरागादिदोषाणां संन्यासिनामपि नमतः परं किंचिदस्ति कथमेषामपवर्गः स्यादिति आह। तावदिति। हे कृष्ण रागादयस्तावदेव स्ते
ना श्चोरा भवंति। तथा तावद्गृहमपि कारागृहं बंधनागारं मोहोपि तावदेवांघ्रिनिगडः पादशृंखला। यावत्ते त्वदीया जना न भवंति त्व
दीया नातु रागादयोपि त्वात्रिदृष्टाः मोचका एवेति नयतिभ्योऽविशेषः। भजनत्वधिकमिति भावः॥३६॥ नन्वत एवाहमेषां पुत्रादिरूपे
ण वर्त इति चेत्तत्राह। प्रपंचमिति प्रपन्नाया जनताजनसमूहस्तस्या आनंदानां संदोहं समूहं प्रथयितुमिति। नहि कपटपुत्रत्वादि
ना तादृक् भक्तेः शरण्यं संपद्यत इत्यर्थः॥३७॥ तदेवमादित आरभ्य आचिंत्यानंतगुणत्वेन स्तवं दुर्ज्ञेयत्वमुक्तं। केचित्तु जानीम इति स्थि [illegible]

तावद्रागादयस्तेनास्तावत्कारागृहं गृहं॥ तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनाः॥३६॥ प्रपंचं निःप्रपंचोपि विडं
बयसि भूतले॥ प्रपन्नजनतानंदसंदोहं प्रथितुं प्रभो॥३७॥ जानंत एव जानंतु किं बहूक्त्या न मे प्रभो॥ मनसो वपुषो
वाचो वैभवं तव गोचरं॥३८॥ अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक्॥ त्वमेव जगतां नाथो जगदेतत्तवार्पितं॥३९॥

तान्प्रत्युपहसन्निवाह जानंत इति। न तु मे मनआदीनां तव वैभवं विषय इति॥३८॥ जगदीशत्वाद्यभिमानं परित्यज्याह अनुजानीहीति।
स्वमहिम्ना नमस्मदादीनां चक्षानवलादि सर्वं त्वमेव वेत्सि। यतः सर्वदृक्। जगतां नाथस्त्वं। त्वमेव देवेतावत् ज्ञातं। अतो मत्प्रतास्पदं जग- ५०
देतच्छरीरं च तवार्पितं॥३९॥ हे प्रभो धार्ष्ट्यतया ग्रे मया बहु प्रलपितं। त्वं सर्वेश्वरमजानता तन्मे क्षमस्व। ननु जानं तदहमिति कथं मां सर्वे
जानंत्येवेति चेत्। किं मया बहूक्तेन येन तव वैभवं मनआदीनां गोचरं जानंतो वर्तंते ते पंडितंमान्यास्ते जानंतु। गोचर इति पाठे इति जानंत इत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं किंकरं प्रस्य्या पयेति अत्यादरेण नमस्करोति। श्रीकृष्णेति। वृष्णिकुलपद्मस्य प्रीतिदातः हे नहे सूर्योपम। क्ष्मा च निर्जरा देवाश्च द्विजा
श्च पशवश्च तत एव उदधयः तेषां वृद्धिकारिन् हे चंद्रोपम। उद्धर्मः पाषंडधर्मः तदेव शार्वरं तमः तं हरतीति तथा अनेन दृष्टोपम। हे क्षितिरा
क्षसधुक् क्षितौ राक्षसाः कंसादयः तेभ्यो द्रुह्यतीति पुनः सूर्योपम। सूर्य्यादपुपमापि न्यूनेति मत्वाह। आर्कं अर्कमभिव्याप्य स
र्वेजामर्हन् पूज्य भगवन् आकल्पं कल्पपर्यंतं ते तुभ्यं नमः इति॥४०॥ ससखवत्सकमो व्यक्षण कौतुकहुतविलंबितपुत्रमुदेकुतं निरिखल

श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मा निर्जरद्विजपशूदधिवृद्धिकारिन्॥ उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्प
मार्कमर्हन् भगवन्नमस्ते॥४०॥ श्रीशुक उवाच॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः॥ नत्वाभीष्टं जगद्धाता स्वधाम प्र
त्यपद्यत॥४१॥ ततोनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान्॥ वत्सान्पुलिनमानिन्ये यथापूर्वसखं स्वकं॥४२॥ एकस्मिन्न
पि याते ऽब्दे प्राणेशं चांतरात्मनः॥ कृष्णमायाहता राजन् क्षणार्द्धं मेनिरेर्भकाः॥४३॥ किं किं न विस्मरंतीह मायामोहितचे
तसः॥ यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकं॥४४॥ ॥ ॥ ॥

कृपेता दधदच्युताऽवतुसवः कयलन् व्रजमंगलं। पादयोर्नत्वा अभीष्टं सर्वतः पूजितं अभिप्रेतं वा॥४१॥ अनुज्ञाप्य अनुज्ञां प्रदाप्य एष्द्वेस
र्थः। स्वभुवं ब्रह्माणं। यथापूर्वसखा यो यस्मिन् तत् स्वकं पुलिनं॥४२॥ नन्वेतावंतं कालं कथं तत्रैवोपविष्टाः कथं च क्षुत्पिपासादि विस्म
रणमत आह। एकस्मिन्निति श्लोकद्वयेन। अब्दे पियाते प्राणेशं कृष्णं अंतरए कावि नापि प्रियाविरहक्षणोपि वर्षाधिको भवति तथापि
मायाहताः क्षणार्द्धं मेनिरे॥४३॥ यत् यया मायया मोहितं जगदभीक्ष्णं पुनः पुनर्विस्मृतात्मा स्वैव येन तत्तथा॥४४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०.पू०
५१
अतएव मन्दचुम्बिते त्वया अतिवेगेन स्त्वागतं एकोपि ग्रासस्त्वां विना अस्माभिर्नाभोजित भुक्तः। इत एहि। साधु अविक्षेपेण भुज्यतामिति। ४५।
आभ्य हसन्भुक्त्वा। ४६। श्रीदामाद्यो वेणुवादिरवैरूत्सवस्तेन्ताघः संपन्नः गृहाणउपलालनैः आदयन्। गोपीदृगुत्सवहारिः गोपी
नां दृशां उत्सवरूपा दृशिर्दर्शनं यस्य सः। ४७। यशोदानंदसूनुना इति बहूनां मुक्तिः सहैव दाद्दिति। केचिदाहुः यशोदासूनुना।
अपरे नंदसूनुनेति। यशोदानंदयतीति यशोदानंदः स चासौ सनुश्चेति तथा तेन। अस्मा महाव्यालोद्वयं चावितारक्षिता। ४६।
उच्चुस्त्वसुहृदः कृष्णस्वागतं तेतिरंहसा। नैकोप्यभोजि कवल एहीतः साधुभुज्यतां। ४५। ततो हसन्हृषीकेशोऽभ्य
वहृत्य सहार्भकैः। दर्शयंश्चर्मा जगरंन्यवर्ततवनाद्व्रजं। ४६। वर्हप्रसूनवधातुविचित्रितांगः श्रीदामवेणुदलशृं
स.बा. गरवोत्सवः। वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेशगोष्ठं। ४७। अद्यानेन महाव्यालो यशो
दानंदसूनुना। हतो विता वयं चास्मादिति बाला व्रजे जगुः। ४८। राजोवाच। ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत्।
योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यतां। ४९। श्रुकउवाच। सर्वेषामपि भूतानां नृपस्वात्मैव वल्लभः। इतरेऽपत्यवित्ताद्या
स्तद्वल्लभतयैव हि। ५०।
व्रजौकसां स्वतोकेषु स्नेहव - दृष्टमन्वहं। श्रीनैर्न्निःसीमवद्धेयथा कृष्णे भूतपूर्व वदिताः स्वतोकेभ्योपि परपुत्रे कृष्णे प्रेमाधिक्यमुक्तं। त ५१
त्र पृच्छति ब्रह्मन्निति। ४९। श्रीकृष्णः स्यसाक्षादात्मत्वात्रास्मित्रात्मीयोपः प्रेमाधिक्यं फाऽज्यत इतिवक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठ
त्वमन्येषां तु तदुपाधिकमिति दर्शयति पंचभिः सर्वेषामिति। ५०। ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुतः तथा दर्शनादिसाहतादिति। तस्मादेव कारणात् स्वस्य कात्मनि अहंकारास्पदेपि देहे ॥५१॥ आत्माध्यासतारतम्येन प्रेमतारतम्यं दृश्य
मानं तन्निबंधनं वेति दर्शयितुं मूढामूढभेदेन विशेषमाह। आत्मवादिनामिति द्वाभ्यां। तं देहमनु भवति ये पुत्रादयस्ते तु न तथा प्रियतमा इत्य
र्थः ॥५२॥ यत् यस्मात् जीर्यत्यपि आसन्नमरणेपि जीविताशा भवति। अयं भावः। न जीविष्यतीति निश्चितेपि देहे यत्प्रेमास्य दृढं तदात्म
गतमेव संगच्छत इति। अथवा यत् यस्मिन् देहे जीर्यत्यपि जीविताशा अविवेकदशायासीत्सापि विवेकिनो यदा ममताभाग्भवति। तदात्म

तद्राजेंद्र यथा स्नेहः स्वस्वकात्मनि देहिनां ॥ न तथा ममतालंबि पुत्रवित्तगृहादिषु ॥५१॥ देहात्मवादिनां पुंसामपि राजन्यसत्त
म म ॥ यथा देहः प्रियतमस्तथा न ह्यनु ये च तं ॥५२॥ देहोपि ममताभाक् चेत्तर्ह्यसौ नात्मवत्प्रियः ॥ यज्जीर्यत्यपि देहेस्मिन् जीवि
ताशा बलीयसी ॥५३॥ तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनां ॥ तदर्थमेव सकलं जगदेतच्चराचरं ॥५४॥ कृष्णमेनमवेहि
त्वं स्वात्मानमखिलात्मनां ॥ जगद्धिताय सोप्यत्र देहीवाभाति मायया ॥५५॥ वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च ॥ भग
वद्रूपमखिलं नान्यद्वस्त्विह किंचन ॥५६॥ सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः ॥ तस्यापि भगवान् कृष्णः किमतद्वस्तु रूप्यतां ॥२७॥

वत् प्रियो न भवत्यनुस्तत्र नातीवास्येति ॥५३॥ तदर्थमेव सकलं प्रियमित्यर्थः ॥५४॥ प्रस्तुतमाह कृष्णमेनमवेहीति ॥५५॥ न केवलमात्मना
मात्मा अपितु जडानामपीत्याह वस्तुत इति। सर्वजगत्कारणप्रीतिलक्षणं जानतां पुंसां स्थावरजंगमं च सर्वं भगवद्रूपं भगवानेव स्वरूपं य
स्य तत् नान्यत् ॥५६॥ कुत इति तत्राह। सर्वेषां प्रीति। भावार्थः परमार्थः। भवति। भवत्परिणामं प्राप्नुवत् कारणं तस्मिन् तस्यापि भव
तः कारणस्यापि भगवान् कृष्णः कारणं। अतः किं ततः श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यतां ॥५७॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पु० तस्मात् श्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानामयत्नसिद्धो मोक्ष इति प्रकरणार्थमुपसंहरति समाश्रिता इति। पुण्यं यशो यस्य स पुण्ययशाः
५२ स चासौ मुरारिश्च तस्य पल्लवप्लव एव प्लवस्तं ये सम्यगाश्रिताः। महत्पदं महतां पदमाश्रयं यद्वा महच्च तत्पदं चेति तथा। तेषां भवांबुधिर्व
त्सपदमात्रं भवति। किंच। परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति। विपदां यत्पदं विषयस्तत्तु नः कदाचिदपि तेषां न भवति न ततः पुन

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः॥ भवांबुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषां॥५८॥ एतत्ते स
र्वमाख्यातं यत्पृष्टोहमिह त्वया॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं॥५९॥ एतत्सुहृद्भिश्चरितं मुरारेरघार्दनं शा
द्वलजेमनं च॥ व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन्गृणन्नेति नरोऽखिलार्थान्॥६०॥ एवं विहारैः कौमारैः कौमारं
जहतुर्व्रजे॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः॥६१॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्दशोध्यायः॥१४॥

रावर्त्तेत इत्यर्थः॥५८॥५९॥ सुहृद्भिश्चरितं मुख्यं तोन्यपरिशिक्ष्यादीनि सादिनोक्तं। अघार्दनं च शाद्वले जेमनं भोजनं च। व्यक्तेतरत् व्य ५२
क्तादजातत्प्रपंचात् इतरत् शुद्धसत्वात्मकं वत्सतत्पालरूपं। यद्वा व्यक्तेतरत् चिद्विलासः तद्रूपं तदिति रूपं। अजस्योरुमहिमानमिष्ट
वस्तौ ब्रह्मस्तुतिस्तुतिं एतत् शृण्वन्गृणन्नरः सर्वपुरुषार्थानाप्नोति॥६१॥ इति श्रीपरमानंदनसिंहपदमद्पदः॥ व्याकरोच्छ्री
धरस्वामी यथामतिः विधेः स्तुति॥ दशमे चतुर्दशोध्यायः॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पंचदशे धेनुपालनं धेनुकार्दनं ॥ कालियस्य खलतो गोपरक्षणं च निरूप्यते ॥१॥ अहिवक्त्रप्रवेशेन वृथा खिन्नान्सखीनूतः ॥ कृष्णः प्रा
वेशाय सक्तफलं तालालिकाननं ॥२॥ पशुपालसंमतौ पशुपालने संमतौ पशुपालानां वा मतौ ॥ ईषद्वयो बलातिरेकमनुत्कलितवंतावि
त्यर्थः ॥ अतीव चक्रतुः सर्वतः प्रसर्पणेन ॥१॥ स्वयशोगणद्भिः सात्वनं प्राविशत् ॥२॥ तद्वनं निरीक्ष्य रंतुं मनो दध्ये । कथंभूतं । मंजुघोषायेष्व
लिमृगद्विजाः भ्रमरमृगपक्षिणः तैराकुलं व्याप्तं । महन्मनः प्रख्यपयः सरस्वता । महतां मनसा प्रख्यं तुल्यं स्वच्छपयो यस्मिन् तत्सरस्त्वा

श्रीशुक उवाच ॥ ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं
पुण्यमतीव चक्रतुः ॥१॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविश
द्विहर्तुकामः कुसुमाकरं वनं ॥२॥ तन्मंजुघोषालिमृगद्विजाकुलं महन्मनः प्रख्यपयः सरस्वता ॥ वातेन जुष्टं शतपत्र
गंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ॥३॥ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वी
क्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥४॥ श्रीभगवानुवाच ॥ अहो अमी देववराऽमरार्चितं पादांबुजं ते सुम
नःफलार्हणं ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतं ॥५॥ ॥ ॥ ॥

श्रयसे नास्ति यस्य तन वातेनेति शैत्यमुक्तं शतपत्रगंधिनेति परिमलं सं जुष्टं वनमिति मांद्यं च सूचितं ॥३॥ अरुणपल्लवश्रिया सह स्पृशंत्यः
शिखाः शाखाग्राणि येषां तान् ॥४॥ तरुजन्म येन कृतं तस्य तमसः पापस्यापहत्यै नाशाय । अथ वा येन त्वया ईश्वरेण सर्वोपकारकं त
रुजन्म कृतं तं त्वां नमंति एतं श्लोघेपि जन्म निरयदं ज्ञानरूपं तमोस्ति तस्यापहत्यै ॥५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० ५३ हे अनघ वने गूढमपि त्वां न त्यजंति। त्वमपि मनुष्यवेषेण निगूढे सति मुनयो ऽप्यलिवेषेण निगूढास्त्वां भजंतीत्यर्थः॥६॥ इयान् हि सतां नि
सर्ग इति यदस्ति स्वस्मिन् तत् गृहमागताय महते समर्प्पयंतीति॥७॥ तृणवीरुधश्च तव पादौ स्पृशंतीति तथा करजाभिमृष्टाः न
रेवैः स्पृष्टाः सदयैरवलोकनैः श्रीरपि यस्मै स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति॥८॥ एवं प्रीम

एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायंति आदिपुरुषानुपदं भजंते॥ प्रायो अमी मुनिगणा भवदीयमुख्या
गूढं वनेऽपि न जहत्यनघात्मदैवं॥६॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्ष
णेन॥ सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निःसर्गः॥७॥ धन्येयमद्य धरणी तृ न्ये
णवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः॥ नद्यो द्रयः खगमृगाः सदयावलोकैर्गोप्यो ऽंतरेण भुज
योरपि यत्स्पृहा श्रीः॥८॥ श्रीशुक उवाच॥ एवं वृंदावनं श्रीमत्प्रीतः प्रीतमनाः पशून्॥ रेमे संचारयन्नद्रेः स
रिद्रोधःसु सानुगः॥९॥ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः॥ उपगीयमानचरितः स्रग्वी संकर्षणा
न्वितः॥१०॥ क्वचिच्च कलहंसानामनुकूजति कूजितं॥ अभिनृत्यति नृत्यंतं बर्हिणं हासयन् क्वचित्॥११॥ ॥ ५३

तद्वृंदावनं प्रविश्य प्रीतः सन् अद्रेः अभीपवर्तिसरिद्रोधेषु संचारयन् सानुगः प्रीतमना रेमे॥९॥ तामेव रतिमाह। क्वचिदित्यादि
दशभिः॥१०॥ बर्हिणां नृत्यंतं अनुचाभिनृत्यति। बर्हिणमभिमुखे नृत्यति वा। सखीन् हासयन्॥११॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ चकोरादीननुकरोति। कदाचित्सत्त्वानां मध्ये व्याघ्रसिंहयोस्ताभ्यां भीतवदनुवर्तते। स्वेष्वेवोपलायमानेषूपलायत इत्यर्थः।
तयोः सत्त्वानां बलोद्रेकाणामिव भीतवदनुवर्तितवान्॥१३॥ आर्यमग्रजं। विश्रामयति विगतश्रमं करोति।॥१४॥ मिथो नृत्यादीन्कुर्वतो गोपा

मेघगंभीरया वाचा नामभिर्दूरगान्पशून्॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया॥१२॥ चकोरक्रौंचचक्रा
ह्वभारद्वाजांश्च बर्हिणः॥ अनुकरोति स्म सत्त्वानां भीतवद्व्याघ्रसिंहयोः॥१३॥ क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपब
र्हणं॥ स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः॥१४॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः॥ गृहीतहस्तौ गोपा
लान्हसंतौ प्रशशंसतुः॥१५॥ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्शितः॥ वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्ह
णः॥१६॥ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः॥ अपरे हतपाप्मानो व्यजनैः समवीजयन्॥१७॥ अन्ये तदनुरू
मनो — पाणि मनोज्ञानि महात्मनः॥ गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः॥१८॥ एवं निगूढात्मगतिः स्वमायया गोपा
त्मजत्वं चरितैर्विडंबयन्॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः॥१९॥ श्रीदामा नाम गोपा
लो रामकेशवयोः सखा॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन्॥२०॥ राम राम महाबाहो कृष्ण दुष्टनिबर्ह
ला — ण॥ इतोऽविदूरे सुमहद्वनं तालालिसंकुलं॥२१॥ फलानि तत्र भूरीणि पतंति पतितानि च॥ संति किं त्ववरुद्धानि धेनुकेन दु

पानुप्रशशंसः॥१५॥१६॥ व्यजनैः पल्लवादिनिर्मितैः॥१७॥ ईशचेष्टित इति निगूढस्वभाव एवांतरा ईशस्येव चेष्टितानि दृश्यंते यस्मिन्नसः
॥१९॥ ईशचेष्टितमेवदर्शयितुमाह। श्रीदामेति। स्तोककृष्णः कश्चित॥२०॥ तालालिसंकुलं तालानां पंक्तिभिर्व्याप्तं॥२१॥२२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०५० ५४

॥२३॥२४॥ विषूचीतः सर्वतः प्रसृतः॥२५॥२६॥२७॥२८॥ सनगांसरक्षं॥२९॥ प्रसभभ्यां पार्श्वप्रभ्यां॥ काशीत्यपि॥ गर्दभाजातिरीद्दा
तुकरणं पर्य्यसरत परितो धावदित्यर्थः॥३०॥ उपक्रोशः गर्दभः परावृत्तप्रतिभुरवः॥ अपरौ पार्श्वभुवौ॥ फलायबलं हंतुं॥३१॥ त्वणराजस्तालः

सोंति वीर्यो सुरो रामहे रूक्ष्मस्वररूपधृक्॥ स्यासतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः॥२३॥ तस्मात्कृतनराहारा ज्ञीतैर्न
भिराभित्रहन्॥ नसेव्यते परशुगणैः पक्षिसंघैर्विवर्जितं॥२४॥ विघ्नते ६ भुक्तपूर्वाणि फलानि सुरभीणि च॥ एष वै सुरपि श्री
गंधो विषूचीनो विगर्हते॥२५॥ प्रयच्छतानि नः हृष्टगंधलोभितचेतसां॥ वांछोसीन्महतीश्चापगम्यतां यदि रोचते
॥२६॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया॥ प्रहस्य जगमतुर्गोपौ तौ तालवनं प्रभू॥२७॥ बलः प्रविश्य बाहुभ्यां
तालौ संपरिकंपयन्॥ फलानि पातयामास मतगंज इवौजसा॥२८॥ फलानां पततां शब्दं निशम्यासुररासभः॥
अभ्यधावत क्षितितलं सनगं परिकंपयन्॥२९॥ समेत्य तरसा प्रत्यक् द्वाभ्यां पद्भ्यां बलं बली॥ निहत्योरसि काशब्दं
मुंचन्पर्य्यसरत्खलः॥३०॥ पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः॥ चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा॥३१॥
सतं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना॥ चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं॥३२॥ तेनाहतो महातालो वेप
मानो बृहच्छिराः॥ पार्श्वस्थं कंपयन्भग्नः सचान्यं सोपि चापरं॥३३॥ बलस्य लीलयोत्सृष्टखरदेहहताहताः॥ तालाश्चकंपि हता ५४
रे सर्वे महावातेरिता इव॥३४॥

॥३२॥३३॥ उत्सृष्टेन खरदेहेन हतैस्तैरिहताश्चकंपिरे चकंपयन्॥३४॥ श्रीरामसमर्थ॥ श्रीकृष्णार्पणमस्तु॥ श्रीहरिसमर्थ॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन् इदं विश्वं ओतं ऊर्ध्वं तंतुषु पट इव ग्रथितं। प्रोतं तिर्यक् तंतुषु पट इव संग्रथितं तं सर्वतोनुस्यूतं वर्त्तत इत्यर्थः॥ ३५॥ ३६॥ ३७॥
घनैर्नभ इव भुवस्तलं रराज। तिन्तफलप्रकरसंकीर्णमिति। देयं देहे श्वसता लाग्नैः संकीर्णमिव रणश्वेत नीलघनसादृश्यसंपाद
नं॥ ३८॥ ३९॥ आदन् अभक्षयन्॥ ४०॥ ४१॥ गोरजोभिः छुरितैः छुरितेषु कुंतलेषु बद्धबर्हं वन्यानि प्रसूनानि च यस्य स चिरमीक्षणै

नैतद्विचित्रं भगवति ह्यनंते जगदीश्वरे॥ ओतं प्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः॥ ३५॥ ततः कृष्णश्च रामश्च ज्ञातयो धेनुक
सं स्यये। क्रोष्टारोन्ये द्रुवन्सर्वैरवध्याहतबांधवाः॥ ३६॥ तांस्तानापततः कृष्णो रामश्च नृपलीलया॥ गृहीतपश्चाच्चर
णान्प्राहिणोत्तृणराजसु॥ ३७॥ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलं॥
॥ ३८॥ तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः॥ ३९॥ अथ तालफलान्या
दन्मनुष्या गतसाध्वसाः॥ तृणं च पशवश्चेरुर्हतधेनुककानने॥ ४०॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्त्तनः॥
स्तूयमानोनुगैर्गोपैः साग्रजो व्रजमाव्रजत्॥ ४१॥ तं गोरजः छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासं॥ कुंत
म वेणुं क्वणंतमनुगैरनुगीतकीर्त्तिं गोप्यो दिदृक्षितदृशोभ्यगमन्समेताः॥ ४२॥ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं ज
हुर्विरहजं व्रजयोषितोह्नि॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षं॥ ४३॥ ॥ ॥
चारुहासश्चारुतं च तं वदिदृक्षितदृशो दिदृक्षिता दृशो नेत्राणि याभिस्ताः॥ ४२॥ मुकुंदस्य मुखपद्मगतं सारघं मधु अह्नि यो
विरहस्तस्माज्जातं तापं तत्यजुः। सा सत्कृतिः पूजा कां सत्कृतिं कथं बालतो पाहसव्रीडेति सलज्जेन हासेन विनयो यथा भवति तथा
यदेतत। किं। अपांगमोक्षं कटाक्षदर्शनं॥ तथा तां सत्कृतिं प्राप्येति॥ ४३॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८०ट० ॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥ संप्रतिसद्य एव हृता प्राप्तास्स्मृतिर्यैस्तेसंप्रतीतस्स्मृतयः यद्वा सम्यक् प्रतीता प्रतिप्राप्तास्स्मृति
५५ प्रार्यैस्तेतथेति॥५१॥५२॥ इतिदशमेपंचदशोध्यायः॥१५॥ छ छ॥ येोऽयंमो कालियस्योक्तोनिग्रहोयमुनाहृदे॥ तत्रत्लीभि हि

तेयोर्यशोदारोहिण्योपुत्रयोः पुत्रवत्सले॥ यथाकामंयथाकालंव्यधत्तांपरमाशिषः॥४४॥ गताध्वानश्रमौतत्र
त्रमज्जनोन्मर्दनादिभिः॥ नीवींवसित्वा रुचिरां दिव्यस्रग्गंधमंडितौ॥४५॥ जनन्युपहृतंप्राश्यस्वाद्वन्नमुपलालि
तौ॥ संविश्य वरशय्यायां सुखंसुषुपतुर्व्रजे॥४६॥ एवंसभगवान्कृष्णो वृंदावनचरः क्वचित्॥ ययौरामम्रतेराज
न्कालिंदींसखिभिर्वृतः॥४७॥ अथगावश्चगोपाश्चनिदाघातपपीडिताः॥ दुष्टंजलंपपुस्तस्यास्तृषार्ताविषहसि दुषितं
तं॥४८॥ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः॥ निपेतुर्व्यसवः सर्वेसलिलांतेकुरूद्वह॥४९॥ वीक्ष्यतान्वैतथा
भूतान्कृष्णोयोगेश्वरेश्वरः॥ ईक्षयाऽमृतवर्षिण्यास्वनाथान्समजीवयत्॥५०॥ तेसंप्रतीतस्मृतयः समुत्थाय
जलांतिकात्॥ आसन्सुविस्मिताः सर्वेवीक्षमाणाः परस्परं॥५१॥ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितं॥ पी
तस्य त्वाविषंपयः समुत्थपुनरुत्थानमात्मनः॥५२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचदशोऽध्यायः॥१५॥ ५५
॥ छ छ॥ श्रीशुकउवाच॥ विलोक्यदूषितांकृष्णां कृष्णः कृष्णाहिनाविभुः॥ तस्याविशुद्धिमन्विच्छन्सर्पंतमुदवासयत्॥

कृतेनाथेकृष्णेनानुग्रहः पुनः॥१॥ हत्वारासभदैतेयान्जग्ध्वातालफलान्यलं॥ प्रीतोऽनंतफणारंगेकालियस्यकलानिधिः॥ उद्वा
सयतनिः सारितवान्॥१॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहूनियुगान्यावासो यस्य तमहिं। स वै अहिः अजलचलोपि तस्मिन्नंतर्जले यथा येन प्रकारेणासीत्॥ अथ वा बहूनि युगान्यावासो यथा भवेति तथा केन प्रकारेण स वै तत्रासीदिति कथ्यतामिति॥२॥ गोपाले न यदुदारमाचरितं तदेवामृतं॥ अतः कस्तृप्येतामिति॥३॥ श्रप्यमाणं पच्यमानं पयो यस्य सः॥ अत उपरिगच्छतः खगा अस्मिन्पतंति॥४॥ किंच विप्रुष्मता अंबुकणयुक्तेन विषोदकतरंगस्पर्शीमारुतेन स्पृष्टा यस्य तीरगा म्रियंते स ह्रद आसीदिति॥५॥ तं कालियं चंडो वेगो यस्य तं दृष्ट्वा विषेनेव वीर्यं यस्य तं। कदंबमिति भाविना श्रीकृष्ण

राजोवाच॥ कथमंतर्जलेऽगाधे न्यगृह्णाद्भगवानहिं॥ स वै बहुयुगावासं यथासीद्विप्र कथ्यतां॥२॥ ब्रह्मन्भगवत
स्तस्य भूम्नः स्वच्छंदवर्तिनः॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन्॥३॥ श्रीबादरायणिरुवाच॥ कालिंद्यां
कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना॥ श्रप्यमाणपया यस्मिन्पतंत्युपरिगाः खगाः॥४॥ विप्रुष्मता विषोदोर्मि रा० ४
मारुतेनाभिमर्शिताः॥ म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः॥५॥ तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं
च खलसंयमनावतारः॥ कृष्णः कदंबमधिरुह्य ततोऽतितुंगमास्फोट्य गाढरशनो न्यपतद्विषोदे॥६॥ सर्पह्र ६५
दः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः॥ पर्यक्प्लुतो विषकषायबिभीषणोर्मिर्धावन्ध
नुःशतमनंतबलस्य किं तत्॥७॥

चरणस्पर्शभाग्येन स एकस्तीरे न शुष्कः। अमृतमाहरन्गरुडः सस्ताकं तत्रावदिति पुराणांतरं। आस्फोट्य बाहुं करतलेनाहत्य। गाढा दृढं बद्धा रशना येन सः॥६॥ तदा सर्पस्य ह्रदः पुरुषश्रेष्ठस्य पतनभारेण संक्षोभितानां उरगाणां विषैरुच्छ्वसितो अंबुराशिर्यस्य सः। विषेण कषायीकृता भयंकरा ऊर्मयो यस्य सः पर्यक्परितः धनुःशतं प्लुतः प्रसृतः। नैतच्चित्रमित्याह। अनंतबलस्येति॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
५६
भुजदंडाहतोदकघोषश्रुत्वाततःस्वसदनादभिभवंच निरीक्ष्य तदसहमानः सर्पः समरं तस्मा जगाम॥८॥ प्रेक्षणीयश्च कुमारश्च घ
नपदुज्वलश्च तं। श्रीवत्सपीतवसनं। हृदरतश्रीवत्सेनसंयुक्तं मुक्ताकलसीतंवस्त्रंयस्यतं। भुजयाभोगेनच छादयामास॥९॥ सःप्रि
यो येषां ताः प्रियाः ते च ते सखायश्चेति तथा॥१०॥११॥ तथा भुवि भूकंपादयः दिवि तुल्कापातादयः। आत्मनि वामनेत्रस्फुरणादयः।

तस्य ह्रदे विहरतो भुजदंड घूर्णवार्घोषमंग वरवारणविक्रमस्य॥ आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः स
मसरन्तदमृष्यमाणः॥८॥ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं॥ क्रीडंतमप्रतिभ
यं कमलोदराघ्रिं संदश्य मर्म्मसुरुषाभुजयाचछाद॥९॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखाः
पशुपाभृशार्त्ताः॥ कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियोनिपेतुः॥१०॥ गावो वृषा वत्स
तर्य्यः क्रंदमानाः सुदुःखिताः॥ कृष्णेन्यस्तेक्षणाभीता रुदंत इव तस्थिरे॥११॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदा
रुणाः॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः॥१२॥ तानालक्ष्य भयोद्विग्नागोपानंदपुरोगमाः॥ विना रामेण गा
ऽकृष्णं ज्ञात्वा चारयितुं गतं॥१३॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः॥ तत्प्राणास्तन्मनस्कास्ते दुःखशोकभयातुराः
॥१४॥ आबालवृद्धवनिताः सर्वेंगपशुवृत्तयः॥ निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः॥१५॥ तांस्तथाकात ५६
रान्वीक्ष्य भगवान्माधवो बलः॥ प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः॥१६॥ ॥ ॥
आसन्नंभयंशंसितुंशीलंयेषां ते॥१२॥ तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीयेनान्वयः। भयोद्विग्नाः भयहेतुभ्यो भीताः भयेन कंपमा
ना इति वा॥१३॥ न तद्विदंतीत्यतद्विदः॥१४॥ पशुवृत्तयः आतिवत्सलाः॥१५॥ कातरान्भीतान्॥१६॥ ॥ ॥
दौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवंतं लक्षयंति यानि तैः सूचितया पदव्या मार्गेण ॥१७॥ पदे मार्गज्ञानप्रकारमाह त इति विश्पतेः श्रीकृष्णस्य अन्येषां पदानां अंतरांतरे मध्ये मध्ये तत्तद्योहेन गवां श्रुतीनां मार्गे सत्वरा अप्रमत्ता योगिनस्तु दुष्प्राप्यपदं यथा परं ततं मृगयंति तद्वदिति भावः ॥१८॥

तेन्वेषमाणा दयितं कृष्णं सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटं ॥१७॥ ते तत्र तत्राब्जयवांकुशाशनि
ध्वजोपपन्नानि पदानि विश्पतेः ॥ मार्गे गवामन्यपदांतरांतरे निरीक्षमाणा ययुरंग सत्वराः ॥१८॥ अंतर्ह्रदे भु
जगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते ॥ गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंदतः परमकश्मल
मापुरार्त्ताः ॥१९॥ गोप्यो नुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः ॥ ग्रस्तेहिना प्रियतमे भृशदुः
खतप्ताः ॥ शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं ॥२०॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः
स्रवंत्यः ॥ तास्ता व्रजप्रियकथाः कथयंत्य आसन् कृष्णाननेर्पितदृशो मृतकप्रतीकाः ॥२१॥ कृष्णप्राणान्निर्विशतो
नंदादीन्वीक्ष्य तं ह्रदं ॥ प्रत्यषेधत्स भगवान् रामः कृष्णानुभाववित् ॥२२॥ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्री
कुमारमतिदुःखितमात्महेतोः ॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् ॥२३॥ ॥

ततश्च सर्पशरीरवेष्टितं कृष्णं ह्रदे निरीक्ष्य गोपाश्च पशूंश्च तथा निरीक्ष्यार्त्ताः परं मोहं प्रापुः ॥१९॥ प्रियेण श्रीकृष्णेन विरहितं त्रैलोक्यं ददृशुः ॥२०॥२१॥२२॥ अनन्यगतिमानं इत्थं निरीक्ष्य आत्मन एवात्महेतोः स्वगोकुलमतिदुःखितं आज्ञाय उरंगबंधादुदतिष्ठदित्यन्वयः ॥२३॥

द॰ पू॰ ५७ तस्य प्रध्यमानेन वपुषा व्यथितात्मा शरीरो भुजंगः कुंजलीभुम्नुच्यतं यस्मा कुपितः। स्वफणानुन्नमय्य श्वसन्केवलमीक्षमाणस्तस्यो
कथंभूतः श्वसनरंध्रेषु नासाविवरेषु विषं यस्य। तथा च रोषं मंडकषाभाजनं तद्ध्वसंतप्तानि स्तब्धानि ईक्षणानि यस्य। तयोल्मुकानि
मुखेषु यस्य स च स च॥२४॥ हरिश्च क्रीडस्तम मुंसर्थं परिससार परितो बभ्राम ज्वातिकरालाविषाग्निकणा दृष्टिर्यस्य तं। जिह्वया द्विशिख
येति प्रति प्रति मुखं॥२५॥ एवं परिभ्रमणे वहतमोजो यस्य तं उन्नातावसो यस्य तं। तस्य मूर्द्धसु येरत्ननिकरास्तेषां स्पर्शेनातरुणं पदं।

तत्प्रध्यमानवपुषा व्यथितात्मा भ्रमस्यस्कोन्नमय्य कुपितः स्वफरणान्भुजंगः॥ तस्थौ श्वसन्श्वसनरंध्रविषांबरीषस्त
ब्धेक्षणो ल्मुकमुखो हरिमीक्षमाणः॥२४॥ तं जिह्वया द्विशिखया परिलेलिहानं द्वेसृक्किणी घृतिकरालविषाग्निदृष्टिं॥
क्रीडन्नमुं परिससार यथा खगेंद्रो बभ्राम सोप्यवसरं प्रसमीक्षमाणः॥२५॥ एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृ
थुशिरः स्वधिरूढ आद्यः॥ तन्मूर्द्धरत्ननिकरस्पर्शातिताम्रपादांबुजो खिलकलादिगुरुर्ननर्त्त॥२६॥ तं नर्त्तुमुद्यतमवे
क्ष्य तदा तदीयगंधर्वसिद्धमुनिचारणदेववध्वः॥ प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसे
दुः॥२७॥ यद्यच्छिरो न नमतेंग शतैकशीर्ष्णस्तत्तन्ममर्द खलदंडधरांघ्रिपातैः॥ क्षीणायुषो भ्रमत उल्बणमास्यतोसृ
ङ्॥ नस्तो वमन्परमकश्मलमाप नागः॥२८॥
बुजं यस्य सः। न नु कथं च चलेषु शिरः सु ननर्त्त आह। अखिलकलानामादिगुरुः॥२६॥ शतैकशीर्ष्णः शतएकानि मुख्यानि शीर्षाणि यस्य
तस्य क्षीणायुषोपि पुनर्भ्रमतः यद्यच्छिरो न नमेत्तत्स्वतो न जहाति। न स खले नांघ्रिपातैस्तत्तन्ममर्द॥ तदा च आस्यतो मुखेभ्यः नस्तो
नासाविवरेभ्यश्चासृक् वमन्॥२८॥ ५७

पुनरपि रुषा उच्चैर्निःश्वसतो यद्यत्समुत्पतितसदाघातेनानुनमयन्नुद्दहावसरे हृष्टैर्गंधर्वादिभिः शेषासनः पुराणः पुरुष इव सपशो
दानंदनः पुष्पैः पूजितः। यद्वा तदा गंधर्वादिभिः पुष्पैः संपूजितो गोषैः पुराणः पुमानिव इति॥ यद्वा पुष्पैः सुपूजित इव प्रसन्नः सन्नूरम
यां बभूव हितं कृतवानित्यर्थः॥२९॥ अरणं शरणं॥३०॥ गर्भं जगंति यस्य तस्य तिभरेण अवसन्नमाक्रांतं पार्ष्णिः पादप्रहारं। आद्यं श्रीलक्ष्मं
श्लथं तौ विस्रस्तं समानावसनादयो यासां ताः॥३१॥ शरणंप्रपन्नाः सत्यस्तं प्रणेमुः सुविग्नमनसः विह्वलचित्ताः। भुर्वंति तास्मिन्नस्या

तस्याक्षिभिर्गरलमुद्धमतः शिरःसु यद्यत्समुन्नमति तानिः श्वसतो रुषोच्चैः॥ तत्तत्पदानुनमयन्दृष्टपयां बभूव पुष्पैः
सुपूजित इवेह पुमान्पुराणः॥२९॥ तार्क्ष्ये त्रतोऽववविरुग्णफणातपत्रो रक्तैर्मुखैः रुधिरमन्नपभग्नगात्रः॥ स्मृत्वा चराचर
गुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम॥३०॥ कृष्णस्य गर्भजगतीतति भरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणा
त्न्य
तपत्रं॥ दृष्ट्वाहिमाद्यमुपसेदुरमुष्य पत्न्यः पत्न्यः श्लेथद्वसनभूषणकेशबंधाः॥३१॥ तौस्तं सुविग्नमनसोथ पुरस्कृ
तार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः॥ साध्व्यः कृतांजलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः॥
॥३२॥ नागपत्न्य ऊचुः॥ न्याय्यो हि दंडः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय॥ रिपोः सुतानामपि तुल्यदृष्टेर्ध
त्से दमं फलमेवानुशंसन्॥३३॥

नेजलाधस्थाद्वातीरे वा। शमलस्य पापात्मनोऽपि भर्तुर्मोक्षेप्सवः भर्तुर्यद्यच्छमलं तस्य वा॥ भूतपतिं प्राणिनां त्रस्य पतिं शरणदमाश्रयप
दं॥३२॥ प्रथमं तावत्कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति न्याय्यो हीति। अत्र दंडानुमोदनं षड्भिर्दमनाय निग्रहे नीतिः।
प्रार्थनां पंचभिः श्लोकैस्ततः पन्नगयोषितां। न च निग्रहानुग्रहलक्षणं वैषम्यं तवास्तीत्याहुः॥ धत्से दममिति। अनुशंसन्नालोचयन्
॥३३॥

द०स्क० निग्रहोप्यनुग्रहायेत्युक्तं। इदानीमनुग्रह एवायं न निग्रह इत्याहुः अनुग्रह इति। नोऽस्माकं यस्माद्दमुष्य सर्पत्वं दृश्यते अतस्तन्मूल
५८ पापनिवर्त्तको दंडोऽनुग्रह एव क्रोधेनेन प्रतीयमानोपीत्यर्थः॥३४॥ अहो श्लाघ्य मनुग्रह इति तस्य पूर्वपुण्यमभिनंदंति। तप इति स्वयं
मानरहितेन अन्येभ्यो मानं देन न च सर्वजीवदयतीति सर्वजीवः॥३५॥ न तप आदिभिनिंते एष भाग्यादयः किं तर्हि संजवरूपा वैभवप्रिया
नुः। कस्यानुभाव इति श्लोकत्रयेण तप आदिना ब्रह्मादयोपि यस्याः श्रियः प्रसाद मिच्छंति। सा श्री र्ल लनापि रेव ललना उत्तमस्त्री। य

अनुग्रहोयं भवतः कृतो हि नो दंडोऽसतां ते खलु कल्मषापहः॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोपि तेऽनुग्रह एव सं
मतः॥३४॥ तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन॥ धर्मोथवा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजी
वः॥३५॥ कस्यानुभावोस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः॥ यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान्सुचिरं
धृतव्रता॥३६॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः प्र
पन्नाः॥३७॥ तदेष नाथाप दुरापमन्यैस्तमोजनिः क्रोधवशोप्यहीशः॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्वि
भवः समक्षः॥३८॥

स्य त्वदंघ्रिस्पर्शाधिकारस्य वांछया तप आदि आचरत् अस्य सर्पस्य स किं कृतवानिति को वेत्तीत्यर्थः॥३६॥ यत्तव पादरजः प्रपन्नाः॥ प्राप्ताः ५८
पारमेष्ठ्यं ब्रह्मपदं तुच्छं मन्यते॥३७॥ अहो तदेव अप्य लोत एव प्रापान्यैः श्रियादिभिरपि। पुनः कथंभूतं पादरजन्यदिच्छतः सेव्यं प
भव इति प्रार्थयत एव समक्षं अस्य क्षत एव विभवः अपेक्षितार्थं संपद्यते॥३८॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तुभ्यं भगवते अचिंत्यैश्वर्यादिगुणाय। तदुपादनाय दशभिः श्लोकैः विशेषणानि। पुरुषाय पूर्वं तर्यामिरूपेण वर्त्तमानाय। महात्म
ने एवमपि अपरिच्छिन्नायाकुतः भूतावासाय आकाशाद्याश्रयाय। तदपि कुतः भूताय पूर्वमपि सते। कुतः पराय कारणाय। किंच प
रमात्मने कारणातीताय॥३९॥ कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः। ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिः। उभयो
र्निधये ताभ्यां पूर्णाय किंच तथात्वं अत उक्तं ब्रह्मणे ऽनंतशक्तये ब्रह्मणे कथंभूताय अगुणाय अविकाराय। पुनः कथंभूताय अनं
तशक्तये प्राकृताय प्रकृतिप्रवर्त्तकाय। अप्राकृतायेति वा। अप्राकृतीनंतशक्तियुक्ताय अयमर्थः। अगुणत्वादविकारं ब्रह्म तथापि

नमोस्तुभ्यं भगवते पुरुषाय महात्मने॥ भूतावासाय भूताय पराय परमात्मने॥३९॥ ज्ञानविज्ञाननिधये
ब्रह्मणे ऽनंतशक्तये॥ अगुणायाविकाराय नमस्ते प्राकृताय च॥४०॥ कालाय कालनाभाय कालावयवसाक्षि
णे॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे॥४१॥ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने॥ त्रिगुणेनाभिमा
नेन गूढस्वात्मानुभूतये॥४२॥

मात्रत्वा कारणातीतं प्रकृतिप्रवर्त्तको ऽनंतशक्तिः॥ विज्ञाननिधित्वादीश्वरः कारणं तदुभयात्मनेनमहति॥४०॥ अनंतशक्तित्वात्कालत्र्या
क्या विश्वस्रष्टृत्वादिरूपेण नमस्यंति। कालस्वरूपाय कालेनाभाय कालशक्त्याश्रयाय। कालावयवानां सूक्ष्मादिसमयानां साक्षिणे।
ततश्च विश्वरूपाय। तर्हि किं जडोहं नहि तदुपद्रष्ट्रे। न च द्रष्टृमात्रम् किंतु तत्कर्त्रे। न च कर्तृमात्राय विश्वहेतवे सर्वकारकरूपाय॥४१॥
तदेवाहुः। भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने॥ आशयश्चित्तं भूतादिरूपाय। अतः सर्वकारकरूपायेति। अहंकारात्मत्वया नमस्यं
ति। त्रिगुणेनेति एवं सकार्येयस्त्रिगुणो अभिमानस्तेन गूढस्वाशभूत्वानामात्मने मनुतिर्ये नतस्मै॥४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू० ५९ वंतु अहंकारानावृतइति। नमोनंताय। अहंकारापरिछेदात॥ अतसूक्ष्माय अदृश्यत्वात्। अतएवकूटस्थाय उपाधिस्थत्वाविकाराभा
वात। अतएवविपश्चितेसर्वज्ञाय। एवंवस्तुतः स्तुत्वामचिंत्यमायत्वेन स्तुवंति। नानावादानुरोधाय। आस्तिनास्तिसर्वज्ञकिंचिज्ज्ञः बद्ध
मुक्तः। अनेकः एक इत्यादीन्नानावादाननुरुणद्धिमायया अनुवर्त्ततेयस्तस्मै। किंच। वाच्यवाचकशक्तये अभिधानाभिधेयशक्तिभेदादपि
नानात्वेनप्रतीतायेत्यर्थः॥४३॥ अनावृतत्वेप्येवहेतुंतरेण पिसूचयंत्यः स्तुवंति। नमः प्रमाणमूलाय चक्षुरादीनां चक्षुरादिरूपाय।
अतएवकवयेतन्निरपेक्षज्ञानाय कुतः शास्त्रयोनये वेदात्मक निःश्वासाय। किंच। प्रवृत्तायनिवृत्तायनिगमायनमोनमः॥४४॥ किंचास्म
नावतीर्णैश्वर्यत्वादेवचतुर्मूर्त्तिरूपेण सर्वोपास्यत्वेन नमंति। नमः कृष्णायेतिश्लोकेन। रामाय संकर्षणाय। वसुदेवसुताय वसुदेवशब्दितशुद्ध

नमोनंताय सूक्ष्माय कूटस्थाय विपश्चिते॥ नानावादानुरोधाय वाच्यवाचकशक्तये॥४३॥ नमः प्रमाणमूलाय
कवये शास्त्रयोनये॥ प्रवृत्तायनिवृत्तायनिगमाय नमोनमः॥४४॥ नमः कृष्णायरामाय वसुदेवसुताय च॥ प्रद्यु
म्नायनिरुद्धाय सात्वतांपतये नमः॥४५॥ नमोगुणप्रदीपायगुणात्मछादनाय च॥ गुणवृत्युपलक्ष्यायगुण
द्रष्ट्रे स्वसंविदे॥४६॥

सत्वं तत्रप्रकाशमानायवासुदेवायेत्यर्थः॥ सात्वतांभक्तानांपतये सालोक्यादिनापालकाय। एवं चतुर्मूर्त्तये कृष्णायतुभ्यंनमइति
४५॥ केचित् चतुर्मूर्त्तिरितिनदाहुः। नमोगुणप्रदीपायेति गुणाअंतःकरणानितानि प्रदीपयति प्रकाशयति तथातस्मै चित्ताधिष्टात्रे ५९
नचतुर्मूर्त्तिरित्यर्थः। ननुतर्ह्येयेवकथंनत्वा तु छंदंमत आहुः। गुणात्मछादनाय तैरवगुणैरूपासकानांफलवैचित्र्याय आत्मानमपो
ह्य नानात्वेनप्रतीतायेत्यर्थः। ननुकथंतर्हिप्रतीतिरतउक्तं गुणवृत्युपलक्ष्याय चित्रादीनांचेतनांचेतनाध्यवसायादिवृत्तिभि
रूपलक्ष्याय। उपलक्षणमेवाहुः गुणद्रष्ट्रे तत्साक्षिणे कथंचिदुपलक्ष्यएवनज्ञेयइत्याहुः स्वसंविदे अगोचरायेत्यर्थः॥४६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगोचरत्वमुपलक्ष्यत्वं च दर्शयंत्यो नमंति। अव्याहतविहाराय अतर्क्यमहिम्न इत्यर्थः। सर्वव्याहृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहेतुत्वेनो
पलक्षणयोग्यायेत्यर्थः। उपलक्षणं तु रमाहुः। हृषीकेशाकरणप्रवर्तकाः किं विषयलिप्सया न। मुनये आत्मारामाय किं साधनवशेन। नहि
नहि नहि मौनशीलिने मौनमात्मारामतीत स्वभावाय॥४७॥ कुतः परावरगतिज्ञाय स्थूलसूक्ष्माणां गतिज्ञत्वेन क्वाप्यसक्तमनायेत्यर्थः।
अपि च सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे। कुत एतेन अविश्वाय अमिश्रणतन्निषेधावधये विश्वाय च तद्विवर्त्ताधिष्ठानायेत्यर्थः। किंच। तद्द्रष्ट्रे अध्या
सायवादस्साक्षिणे। अपि च अस्य च विवर्त्ताध्यासस्य तद्रूपवादस्य च अविद्याभ्यां हेतवे। यद्वा। अविश्वाय विश्वतैजसप्राज्ञावस्थारहिताय। विश्वा

अव्याहतविहाराय सर्वव्याहृतसिद्धये॥ हृषीकेश नमस्तेस्तु मुनये मौनशीलिने॥४७॥ परावरगतिज्ञाय
सर्वाध्यक्षाय ते नमः॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेस्य च हेतवे॥४८॥ त्वं ह्यस्य जन्मस्थितिसंयमान् प्रभो
गुणैरनीहोऽकृतकालशक्तिधृक्॥ तत्तत्स्वभावान् प्रतिबोधयन् सतः समीक्षयामोघविहार ईहसे॥४९॥ ॥

यप्राज्ञयास्वापाद्यवस्थास्तत्तदवस्थाय तद्द्रष्ट्रे तासामवस्थानां भावाभावसाक्षिणे। अन्यत्समानं तस्मात्सर्वगतिज्ञत्वसर्वाधिष्ठातृत्वात्मारामत्वा
दिभिः निरतिशयैश्वर्याय तुभ्यं नम इति॥४८॥ विशेषणैरसंकीर्णैः पंचपंचाशता नुतः। अहिस्त्रीभिः प्रसन्नोऽस्तु सापि च भवेद्धरिः॥१॥ एवं तावद्द्[illegible]
नुमोदनेन नमस्कारैश्च भगवत्प्रसादं दीनीं लब्धीना नागपत्नीनां कोपराध इत्याशय वयं प्रार्थयंते त्वं हीति। अस्य लोकस्य जन्मादि त्वमे
वाकृत अकरोः ततश्च तांस्तान्॥ संस्काररूपेण सतः स्वभावानुघोरत्वादीन् प्रतिबोधयन् ईहसे क्रीडसि यद्वा। अस्य जन्मादीं स्त्वमीह
स इत्यन्वयः कथंभूतः अनादिर्या कालशक्तिस्तां धारयतीति तथा। अन्यत्समानं॥४९॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू० अतस्तत्तवैवामूस्तनवः तन्यंत इति श्रीडोपस्कराः। तथापि तवाधुनाऽशांताः प्रियाः। कुतः सतां धर्मपरिपालनेच्छया ईहतः प्रवर्त्तमानस्य
६० अतस्तानवितुं स्थातुःस्थितस्य।।५०।। एवं च तवाप्रिया चरणाद्यपराधः तर्हि सोढव्य इति।।५१।।५२।। युष्मदनुग्रहे फोम्मुरे वेति चेत्त
त्रैसाहुः।। विधेहीति।। सेदाज्ञया प्राप्तिनो नाप्या प्रेतिभावः।।५३।।५४।।५५।। यदसद्ग्रह इति यतः स्वभावोसन्नु ग्रहरूपः। यद्वा। यतः

तस्यैव तेमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः।। शांताः प्रियास्ते ह्यधुनाऽवितुं सतां स्थातु
श्च ते धर्मपरीप्सयेहतः।।५०।। अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः।। क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजा प्रजाकृत
नतः।।५१।। अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः।। स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां।।
।।५२।। विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया।। यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात्।।५३।। श्रीशु
क उवाच।। इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः।। मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः।।५४।। प्र
तिलब्धेंद्रियप्राणः कालियः शनकैर्हरिं।। कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः।।५५।। कालिय उ
वाच।। वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः।। स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः।।५६।। त्व ६०
या सृष्टमिदं विश्वं धातर्गुणविसर्जनं।। नानास्वभाववीर्यौजोयोनिबीजाशयाकृति।।५७।। वयं च तत्र भ
गवन्सर्पा जात्युरुमन्यवः।। कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयं।।५८।। ।। ।। ।।
स्वभावादसति देहादौ योग्रहस्तं दुस्त्यज इति।।५६।। गुणैर्विविधतया सृष्टं सृजतीति गुणविसर्जनं। तत्रापि नानास्वभावादयो यस्य तत्।।५७।।
जात्या जन्मनैवोरुर्मन्युर्येषां ते वयं कथं त्यजाम इति।।५८।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हियस्य यस्यां तत्र तन्मायायोगे भवानेव कारणमित्यनुग्रहं विधेहि मम मा त्यायखा दंतीति। ईश्वरत्वान्निग्रहं वा विधेहीति॥५९॥ यतो गोभिः
नृभिश्च नदी भुज्यतामिति॥६०॥ नयुष्मत्तो भयमाप्नुयात्। तस्य युष्माभिः भयं नोत्पादनीयमित्याज्ञा॥६१॥ इतोपि त्वयानिर्गंतव्यमि

भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः॥५९॥ श्रीशुक उवाच॥ इ
त्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः॥ नात्र स्थेयं त्वया सर्प्प समुद्रं याहि माचिरं॥ स्वज्ञात्यपत्यदाराढ्यो गो पु
नृभिर्भुज्यतां नदी॥६०॥ यएतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात्॥
॥६१॥ योस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते॥६२॥ द्वीपं रमण
कं हित्वा ह्रदमेतमुपाश्रितः॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं॥६३॥ श्रीशुक उवाच॥ एवमुक्तो भगवता राजन्न
मुदा द्भुतकर्मणा॥ तं पूजयामास नागः पत्न्यश्च सादरं॥६४॥ दिव्यांबरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः॥ दिव्यगंधानु
लेपैश्च महत्योत्पलमालया॥६५॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजं॥ ततः प्रीतोभ्यनुज्ञातः परिक्रम्याभिवं
द्य तं॥ सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह॥६६॥ तदैव सामृतजला यमुना निर्विषाभवत्॥ अनुग्रहाद्भगव
तः क्रीडामानुषरूपिणः॥६७॥ इति श्रीभागवते दशमस्कंधे कालियनिर्यापणो नाम षोडशोध्यायः॥१६॥ छ॥ छ॥

त्याह। योस्मिन्निति त्वयि स्थिते तत्र संभवतीति भावः॥६२॥ न च तत्र गरुडभयं भवेदित्याह। द्वीपमिति॥६३॥६४॥६५॥६६॥६७॥ इति दशमे षोड
शोध्यायः॥१६॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६० क०
नागं सप्तदशो नागालयं तं निरयायत॥ बंधू नस्त्वदुः खतः श्रांतानस्तुष्टांस्तत्र देवादपात्॥१॥ अस्मभंजसं आप्रियं॥१॥ नपहार्य्यैः भक्ष्यैः

६१
सर्पजने सर्पाप त्तैर्जनैः वानस्पत्यः वनस्पतेमूलेदेयः नागानां नद्धाधापरिहारायय यो बलिर्निरूपितः उपकल्पितः॥२॥ ते च नागाः

स्वंस्वं तंभागं जनैर्दत्तं सुपर्णाय प्रयच्छंति। ततो भीताः गोपीथाय रक्षणाय॥३॥ विषवीर्याभ्यां योपदः ते नाविष्टः काद्रवेयः कद्रुपुत्रः

गरुडं कदर्थीकृत्ये त्राविगणय्ययद्धा। उपहार्य्यैः सुपर्णभक्ष्यैः सर्पा एव जनास्तैः। नागानां संबंधी। यस्मिन्नेकैको नागो दीयते तथा

राजोवाच॥ नागालयं रमणकं कस्मात्तत्याज कालियः॥ कृतं किं वा सुपर्णस्य तेनैकेनासमंजसं॥१॥

श्रीशुक उवाच॥ उपहार्य्यैः सर्प्पजनैर्मासि मासीह यो बलिः॥ वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः॥२॥ स्वंस्वं

भागं प्रयच्छंति नागाः पर्वणि पर्वणि॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु

कालियः॥ कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं॥४॥ तच्छ्रुत्वा कुपितो राजन्भगवान्भगवत्प्रियः॥ विजिघांसुर्महावे

गः कालियं समुपाद्रवत्॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्तकः॥ दद्भिः सुपर्णं व्यदशद्ददा

रिस्य युधः करालजिह्वोच्छ्वसितोग्रलोचनः॥६॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः॥ पक्षेण स

व्येन हिरण्यरोचिषा जघान कद्रुसुतमुग्रविक्रमः॥७॥

मतो यते तथाभूतो यो बलिः सुपर्णोपनिरूपितः। स्वंस्वं भागं सर्वे नागाः प्रयच्छंति कालियस्तु न प्रयच्छति किं त्वन्यैर्दत्तमपि तं बलिं स्वयमेव

बुभुजे॥४५॥ विषमेवायुधं यस्य सः प्रत्यभ्ययात् प्रत्युद्गंतुं प्रति जगाम। उत्थितानेकमस्तकः उन्नमितानेकफणः दद्भिः युधः दंता युधः करा

लजिह्वश्च। सोच्छ्वसितोग्रलोचनश्च उच्छ्वसिता निःउज्ज्वलिता निःउग्राणि लोचनानि यस्य सः॥६॥ तार्क्ष्यपुत्रः गरुडः मधुसूदनस्यासनं य ६१

तस्य गरुडस्यागम्यं। अगाधतयोऽन्यैर्दुरासदं॥८॥ तदगम्यत्वे कारणमाह तत्रेति निवारितोऽपि॥९॥१०॥११॥ लेलिहः सर्पः अत्र तस्मिन्नावात्सीत्
॥१२॥ जांबुनदं सुवर्णं तेनालंकृतं॥१३॥ असवः इंद्रियाणि प्रमोदनिभृतात्मनः आनंदपूर्णमनसः॥१४॥ लब्धेहाः लब्धचेष्टाः॥१५॥

सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः॥ ह्रदं विवेश कालिंद्यास्तदगम्यं दुरासदं॥८॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सि-
तं॥ निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत्॥९॥ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते॥ कृपया सौभरिः
प्राह तत्रत्यक्षेममाचरन्॥१०॥ अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति॥ सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं॥११॥
तं कालियः परं वेद नान्यः कश्चन लेलिहः॥ अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः॥१२॥ कृष्णं ह्रदाद्विनिःक्रांतं दिव्य-
स्रग्गंधवाससं॥ महामणिगणाकीर्णं जांबूनदपरिष्कृतं॥१३॥ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः॥ प्रमोदनि-
भृतात्मानो गोपाः प्रीत्याभिरेभिरे॥१४॥ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव॥ कृष्णं समेत्य लब्धेहा आसन्लब्धम-
नोरथाः॥१५॥ रामश्चाच्युतमालिंग्य जहासास्यानुभाववित्॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदं॥१६॥ नंदं विप्राः समा-
गत्य गुरवः सकलत्रकाः॥ ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः॥१७॥ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे॥ नं-
दः प्रीतमना राजन्गाः सुवर्णं तदादिशत्॥१८॥ यशोदापि महाभागा नष्टलब्धप्रजा सती॥ परिष्वज्यांकमारोप्य मुमोचाश्रु-
कलां मुहुः॥१९॥ तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः॥ ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः॥२०॥ ॥ ॥

नगाः वृक्षा अपि पूर्वं शुष्काः संतः सद्य एव विरूढा इत्यर्थः॥१६॥ ते विप्रा ऊचुः॥१७॥१८॥ नष्टलब्धप्रजा नष्टप्रायात्पुनर्लब्धा जाया यस्याः सा
॥१९॥ श्रमेण कर्षिताः उपकूलतः कूलप्रांते॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰ पू॰
६२

॥२१॥२२॥२३॥ कालोऽग्नेः मृत्युरूपादग्नेः नस्त्वयोः बिभीमः किंतु त्वच्चरणवियोगादित्याहुः॥ नशक्नुमइति॥२४॥२५॥ विप्रोहानहिदंडेन ततः स्वंश
रणंगतानां॥ गोपानपादनंतोसावनंतवनेवह्नितः॥२५॥ इतिदशमेसप्तदशोऽध्यायः॥१७॥ छ ॥ अष्टादशेततोग्रीष्मेवसंतगु
णलक्षिते॥ अघातयद्बलेनालंप्रलंबंलीलयाहरिः॥ हलान्तसंणाग्रेषुकालियस्यसकौतुकं॥ बलेप्रलंबतुंगासमारोहमदपित्रह॥१॥

तदाशुचिवनोद्भूतोदावाग्निःसर्वतोव्रजं॥ सुप्तेनिशीथआवृत्यप्रदग्धुमुपचक्रमे॥२१॥ ततउत्थायसंभ्रातादह्यमानाव्रजौकसः॥
मु कृष्णंययुस्तेशरणंमायामनुजमीश्वरं॥२२॥ कृष्णकृष्णमहाभागहेरामामितविक्रम॥ एषघोरतमोवह्निस्तावकान्ग्रसतेहिनः॥२३॥ सु स्तरो
दुस्तरान्नःस्वान्पाहिकालाग्नेःसुहृदःप्रभो॥ नशक्नुमस्त्वच्चरणंसंत्यक्तुमकुतोभयं॥२४॥ इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजग
म दीश्वरः॥ तमग्निमपिबत्तीव्रमनंतोनंतशक्तिधृक्॥२५॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकालीयदमनोनामसप्तदशो
ध्यायः॥१७॥ ॥छ॥ ॥श्रीशुकउवाच॥ अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः॥ अनुगीयमानोन्यविशद्व्रजंगोकुल
मंडितं॥१॥ व्रजेविक्रीडतोरेवंगोपालछद्ममायया॥ ग्रीष्मोनामर्तुरभवन्नातिप्रेयाञ्छरीरिणां॥२॥ सचवृंदावनगुणै भं
र्वसंतइवलक्षितः॥ यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः॥३॥ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं॥ शश्वत्तच्छीक
रर्जीषद्रुममंडलमंडितं॥४॥

गोपालछद्मयागोपालनमेवछद्मयस्यांतया॥२॥३॥ वसंतसाम्यमाहयदपित्रह॥१॥ गोपालछन्नतुभिः॥ यत्रग्रीष्मेपिनिर्झराणांनि ६२
र्ह्रादेनघोषेणनिवृत्तस्वनाःछन्नध्वनायाझिल्लिकाःतीव्रध्वनिसूक्ष्मकीटायस्मिंस्तथाभूतंवृंदावनंभवतिकिंच॥ शश्वत्तेषांनिर्झरा
णांशीकरैरंबुकणैःऋजीषाःस्निग्धायेद्रुमास्तेषांमंडलैर्मंडितं॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र ग्रीष्मे वने वा निदाघो ग्रीष्मः तेन तत्कालीनवह्न्यर्काभ्यां च भवतीति यो दवः तापः अति शाड्वले अतिहरिततृणाकीर्णे। यद्वा अतिक्रांत
शाड्वलेपि स्यानं॥५॥ ननु शाड्वले एव कुतः संतत्रोह। अगाधेति। अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिः पु
लिनैः सह द्रवत्पुरीषं पंको यस्यास्तस्या भुवः रसं शाड्वलितं शाड्वलरूपतां च विषवदुल्बणा अपि सूर्यरश्मयो न गृह्णते न हरंति॥६॥

सरित्सरः प्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा॥ न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोतिशाड्वले
॥५॥ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः॥ न यत्र चंडांशुकरा विषोल्बणा भुवो रसं शाड्वलितं च
गृह्णते॥६॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं॥ गायन्मयूरभ्रमरं कूजत्कोकिलसारसं॥७॥ क्रीडिष्यमाणस्तत्कृष्णो
भगवान्बलसंयुतः॥ वेणुं विरणयन्गोपैर्गोधनैः संवृतोविशत्॥८॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः॥ रामकृ
ष्णादयो गोपा ननृतुर्युयुधुर्जगुः॥९॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्॥ वेणुपाणितलैः शृंगैः प्रशशं
सुरेः॥१०॥ गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप॥११॥ भ्रामणैर्लंघनैः क्षे
पैरास्फोटनविकर्षणैः॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित्॥१२॥ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयं॥
शशंसतुर्महाराज साधु साध्विति वादिनौ॥१३॥

तद्वनं नदंतः चित्रा मृगा द्विजाश्च यस्मिन् गायंतो मयूरा भ्रमरा भ्रमराश्च यस्मिन्। कूजंतः कोकिलाः सारसाश्च यस्मिन्॥७॥ ततश्च
विशत्॥८॥९॥१०॥११॥ काकपक्षाः चूडाकारणात् प्राक्तनकेशाः। भ्रमणादिप्रकारैः नियुद्धेन बाहुयुद्धेन चिक्रीडतुः॥१२॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰स्कं॰पू॰ कुंभैः कुंभवृक्षफलैः अस्पृंश्यत्वं नेत्रबंधश्च तदाद्यैर्मार्गाणां खगानां च चेष्टया ॥१४॥ दुर्दुरप्लावैः मंडूकप्लुतिभिः स्पंदोलिकया दोलालेवनेन
६२ नृपाणामिवलीलया ॥१५॥ नद्यः अद्रिद्रोणयः कुंजानि च एतेषु ॥१६॥ चारयतोः सतोः तद्वने तस्मिन्वने तयोर्जिहीर्षया ॥१७॥१८॥ यथा

क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥१४॥ क्वचिच्च दर्दुरप्लावैर्विविधै
रुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥१५॥ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणि
कुंजेषु काननेषु सरःसु च ॥१६॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः ॥ गोपरूपी प्रलंबोगादसुरस्तज्जिहीर्षया ॥
॥१७॥ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥१८॥ तत्रोपाहूय गोपाला
न्कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथातथं ॥१९॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥ कृष्ण
संघट्टिनः केचिदासन्रामस्य चापरे ॥२०॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रारोहंति जेतारो वहंति च परा
जिताः ॥२१॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं ॥ भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥२२॥ रामसंघट्टिनो
यर्हि श्रीदामवृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥२३॥ उवाह कृष्णो भगवान्श्रीदामानं पराजि ६२
तः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं ॥२४॥ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः ॥ वहन्द्रुततरं प्रागादवरोहणतः प
राम रं ॥२५॥

तथं वयोबलाद्यनुरूपं द्वंद्वीभूय ॥१९॥ परिवृढौ नायकौ ॥ तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः ॥२०॥२१॥ वाह्यमानाः पृष्ठेनोह्यमा
नाः ॥२२॥२३॥२४॥ कृष्णदृष्टिवंचनाय अपरस्यतेस्मिन्नित्यवरोहणमर्यादा ततः परं दूरमागात् ॥२५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धराणि धरेंद्रवज्जोरवं यस्य तत् निजं आसुरं वपुरास्थितः पुरटपरिच्छदः सुवर्णालंकारः तडिद्द्युमान् विद्युद्दीप्तिमान् सालंकारोपमा
उडुपतिवाडिति रामोपमा उडुपतिं वहतीत्युडुपतिवाट् । यदि यथोचितस्थानेषु स्थिता विद्युत्तोयदो भवति उपरि चोडुपतिः तदा सोंबुदो य
थाभाति तद्वद्भावि स्यर्थः ॥२६॥ अलम्पति वेगेन । प्रदीप्ते दृशौ यस्मिन् तत् । भ्रुभ्रुकुटितटसंलग्ना उग्रा दंष्ट्रा यस्मिन् तत् प्रदीप्तदृ

तमुद्वहन् धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः । स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपति
वाडिवांबुदः ॥२६॥ निरीक्ष्य तद्वपुरलमंबरे चरत् प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ॥ ज्वलच्छिखं कटककिरीटकुंड
लत्विषाद्भुतं हलधर ईषदत्रसत् ॥२७॥ अथागतस्मृतिरभयो रिपुं बलो विहायसार्थमिव हरंतमात्मनः ॥ रुषाहनच्छि
रसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥२८॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन् रुधिरमपस्मृ
तोऽसुरः ॥ महारवं व्यसुरपतत् समीरयन् गिरिर्यथा मघवत आयुधाहतः ॥२९॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशा
लिना ॥ गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः ॥३०॥ आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणं ॥ प्रेत्यागत
मिवालिंग्य प्रेमविह्वलचेतसः ॥३१॥ पापे प्रलंबे निहते देवाः परमनिर्वृताः ॥ अभ्यवर्षन् बलं माल्यैः शशंसुः साधु
साध्विति ॥३२॥ इति श्रीभागवते महापुराणे दशमस्कंधे प्रलंबवधो नामाष्टादशोऽध्यायः ॥१८॥ ॥छ॥ ॥छ॥ ॥छ॥

भ्रुकुटीतटं यस्मिन् । उग्रा दंष्ट्रा यस्मिन् तच्च तच्चेति च ॥ ज्वलंत्यः शिखाः केशा यस्मिन् तत् ॥२७॥ आगतस्मृतिरभयश्च । आत्मनः सार्थं गो
पसमूहं विहाय हरंतं रिपुं अहनत् । यद्वा यसा आकाशमार्गेण आत्मनः आसंग्यर्थमिव हरंतमिति । वज्ररंहसा वज्रवेगेन मुष्टिना ॥२८॥ अ
पस्मृतः स्मृतिः महारवं समीरयन् ॥२९॥३०॥ तदर्हणं प्रशंसार्हं ॥३१॥३२॥ इति दशमे अष्टादशोऽध्यायः ॥१८॥ ॥छ॥ ॥छ॥ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशे॰ पू॰ ६४

डुन विवेशो निविष्टं तु गोपगोकुलमच्युतः॥ मुंजारण्यमरण्याग्नेरररक्षत्तन्निपातेनः॥१॥ दूरचारिण्यः॥१॥ वनाद्वनांतरं निर्विशंत्यो दावेन तर्षिताः
तृषिताः क्रंदंत्य ईषीकाटवीं मुंजाटवीं तद्घनतृणविशेषारण्यं निविविशुः॥२॥ कृष्णरामौ आदिर्येषां ते न स्तुतौ॥३॥ तैर्गवां खुरैः दच्छिन्नैः

श्रीशुक उवाच॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः॥ स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं॥१॥ अजा गावो
महिष्यश्च निर्विशंत्यो वनाद्वनं॥ ईषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः॥२॥ तेऽपश्यंतः पशून् गोपाः कृ
ष्णरामादयस्तदा॥ जातानुतापा न विदुर्विचिन्वंतो गवां गतिं॥३॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां॥ मार्ग
मन्वगमन्सर्वे नष्टाजीवा विचेतसः॥४॥ मुंजाटव्यां भ्रष्टमार्गं क्रंदमानं स्वगोधनं॥ संप्राप्य तृषिताः श्रांतास्ततस्ते
संन्यवर्तयन्॥५॥ ता आहूता भगवता मेघगंभीरया गिरा॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः॥६॥
ततः समंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसां॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थि
रजंगमान्महान्॥७॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा
हरिं मृत्युभयार्दिता जनाः॥८॥ कृष्ण कृष्ण महावीर्य हे रामामितविक्रम॥ दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्ह
थः॥९॥ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः॥१०॥ श्रीशुक उवाच
वचो निशम्य कृपणं बंधूनां भगवान्हरिः॥ निमीलयत माभैष्ट लोचनानीत्यभाषत॥११॥ तथेति मीलिताक्षेषु भगवान
ग्निमुल्बणं॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत्॥१२॥

नैस्तृणैः गोष्पदैरंकितैश्च भूप्रदेशैः गवां मार्गमन्वगमन्॥ नष्टाजीव्याः गतजीविकासाधनाः॥४॥ मुंजाटव्यामपि सैव॥५॥६॥ गोपानां ना
शहेतुर्वनवह्निः सर्वतः प्रादुरभूत् सारथिना वायुना॥७॥८॥९॥१०॥११॥ कृच्छ्रात् गह्वरप्रवेशात् तद्भ्रमादिजनिता ततत्क्षणमेव भाडीरा

॥१९॥ ६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणेनैव भांडीरं प्रापिताः तत्र च क्षिण्यु न्मील्य विस्मिताः ॥१३॥१४॥१५॥१६॥१७॥१८॥ श्रीदामादिसखगोपानां स्वागमा रूरुक्ष्यतां। स्वैश्वर्य्यप्र विष्करेण दुनवन्हि निपान्ततः ॥ इति दशमे एकोनविंशतितमः ॥१९॥ ॥ विंशे प्रावृट् शरत्शोभावर्णनिन्क्यनेनाचिताः ॥ प्रावृट्क्रीडानिरू प्यते गोपरामयुजो हरेः ॥१॥ हेयोपादेयोपपादनेन प्रावृट्शरदृत्व्रियोः ॥ वर्णनं तद्वैश्वर्य्य कृष्णलीलाविवक्षये ॥ तत्र प्रावृड्वर्णनं

ततश्च ते क्षिण्यु न्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मितान्यासन्नात्मानं गाश्च मोचिताः ॥१२॥ कृष्णस्य योगवीर्य्यं तद्योग

मे मायानुभावितं। दावाग्नेरात्मनः क्षेमं वीक्ष्य ते निरेऽमरं ॥१४॥ गाः संनिवर्त्य सायान्हे सहरामो जनार्दनः। वेणुं विरणयन्गो

त. ष्ठमगाद्गोपैरभिष्टुतः ॥१५॥ गोपीनां परमानंद आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विनाभवत् ॥१६॥ तयोस्तद

द्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥१७॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ॥

मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥१८॥ इति श्रीभागवते महापुराणे दशमस्कंधे दावाग्निशमनो नामैकोनविंशतितमोऽध्या

यः ॥१९॥ ॥ श्रीशुक उवाच ॥ ततः प्रावर्त्तत प्रावृट् सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥१॥ सां

द्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराछिन्नं ब्रह्मेव सगुणं बभौ ॥२॥ अष्टौ मासान्निपीतं यद्भूम्याश्चो

दमयं वसु ॥ स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥३॥ ॥ ॥ ॥ ॥

ततश्चादिद्धाविंशसा ॥ सर्वेषां प्राणिनां समुद्भवउत्पत्तितो जीवनतश्च यस्यां सा प्रावृट्। विद्योतमानाः परिवेशादिशोभायस्यां सा विस्फू

र्जितं संक्षुभितं नभस्तलं च यस्यां सा ॥१॥ सांद्रैर्निविडैः निलांबुदैः विद्युद्भिः र्जितसहितैराछन्नं। सगुणं गुणैराछन्नं जीवारव्यं। विद्युत्स्त

जिंतांबुदानां सत्वरजस्तमोभिरूपमा ॥२॥ पर्जन्यः सूर्यः स्वगोभिः रश्मिभिः। काले यथोचितसमये। अत्र राजोपमा करादानतः स

स्फूर्जितनभस्तलं यस्यां सा ॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्रे २

द॰र॰प॰ अस्य विश्वस्य प्राणनमाप्यायनकरं जीवनमुदकं मुमुक्षुः। कृपालवो यथा तप्तं निरीक्ष्यानुकंपमाना नीः तदा प्राप्य नायस्व जीवनमपि सृजंति। तद्
६५ नमहां तो मेघास्तडिन्नेत्रैस्तप्तं निरीक्ष्य विश्ववायुभिर्वेपिता जीवनं मुमुक्षुरिति॥४॥ तपसी ग्रीष्मेण कृशा देवभी दापर्जन्यासिका मितसेवनेधातुः
वर्षीयसी उग्रानापुष्टा काम्यं तयोयस्य तनुः कृपानुसंप्राप्य यथेति॥५॥६॥ निसर्गप्रवासा नेत्राचार्य जिनदं श्रुत्वा तच्छिष्या यथा अधीयेते

तडिद्दंतो महामेघाः श्वसनवेपिताः॥ प्राणनं जीवनं ह्यस्य मुमुक्षुः करुणा इव॥४॥ तपः कृशा देवभीदा आसीद्वर्षीयसी
स॰ मही। येथैव काम्यतपस्तनुः संप्राप्य तत्फलं॥५॥ निशामुखेषु खद्योता स्तमसा भांति नग्रहाः॥ यथा पापेन पाषंडा न
हि वेदाः कलौ युगे॥६॥ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन् गिरः॥ तूष्णीं शयानाः प्राग्यद्वद्ब्राह्मणा नियमात्यये॥७॥ आ
सन्नुत्पथवाहिन्यः क्षुद्रनद्योनुशुष्यतीः॥ पुंसो यथास्वतंत्रस्य देहद्रविणसंपदः॥८॥ हरिता हरिभिः शष्पैरिंद्रगोपै
श्च लोहिता॥ उच्छिलींध्रकृतच्छाया नृणां श्रीरिव भूरभूत्॥ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां ददं मुदं॥ धनिनामुपता
पं दैवाधीनमजानतां॥१०॥

तद्वदिति॥७॥ अनुशुष्यंतीः अनुशुष्यंत्यः अस्वतंत्रस्य इंद्रियपरतंत्रस्य निरंकुशस्येति वा॥८॥ हरितैः नीलैः पुष्पैर्वा लतृणैः नीलवर्णा क्व शा॰६५
चिदिंद्रगोपैः कीटविशेषैर्लोहिता आरक्ता। तत्र तत्र उच्छिलींध्रैः छत्राकारैः कृतच्छाया॥ नृणां राज्ञां श्रीः सेना संपदिव॥९॥ क्षेत्राणी
ति तदा हि वृष्टेरविच्छेदे लसंतः प्रियंवादयो मुदं दरिति विघ्नदेष्णुष्यं तेऽनुतापं चेति॥१०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविभ्रत् अविभरुः पथा हरिनिषेवयेति। हरिसेवायां प्रवृत्ता हि सद्य एव सर्वे रूचिरा भवंति तस्याः परमधर्मत्वात् परमसुखत्वाच्च। तद्वदि
ति॥११॥ कामाक्तं कामवासनायुक्तमपि इव तेनोर्मिसाम्यं गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यं॥१२॥ अधोक्षजे एव चेतो येषां ते॥१३॥
असंस्कृता अक्षुण्णाः नाभ्यस्यमानाः इत्यसंस्कृतसाम्यं कालेन वाहता इति तृणाच्छादनसाम्यं॥१४॥ यथा कामिन्यः पुंश्चल्यः॥१५॥ नि

जलस्य लोकसः सर्वे नववारिनिषेवया॥ अविभ्रद्रुचिरं रूपं यथा हरिनिषेवया॥११॥ सरिद्भिः संगतः सिंधुः चुक्षुभे
श्वसनोर्मिमान्॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा॥१२॥ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः॥ अभि
भूयमाना व्यसनैर्यथाधोक्षजचेतसः॥१३॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः॥ नाभ्यस्यमानाः श्रु
तयो द्विजैः कालहता इव॥१४॥ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्वि
व॥१५॥ धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात्॥ व्यक्ते गुणव्यतिकरे गुणवान्पुरुषो यथा॥१६॥ न रराजोडुपः छ
न्नः स्वज्योत्स्नाराजितैर्घनैः॥ अहंमत्या भासितया स्वभासा पुरुषो यथा॥१७॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदच्छिखंडि
नः॥ गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे॥१८॥ पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः॥ प्राक्क्षा
मास्तपसा श्रांता यथा कामानुसेवया॥१९॥

र्गुणं ज्यारहितमपि गुणिनि निगर्जित शब्दवति अभात् असौ भत। गुणव्यतिकरात्मके व्यक्ते प्रपंचे अगुणवान् निर्गुणः पुरुषो यथेति॥१६॥
स्वभासा भासितया अहंमत्या तिस्वचैतन्ये नैव प्रकाशितेनाहंकारेणच्छन्नो जीवो यथा यद्वा अहं विद्वान् दानी वेत्यास्थ इति प्रतीसेवा
रोपितयेति॥१७॥ मेघागमेनोत्सवो येषां अतो हृष्टाः॥१८॥ नानात्ममूर्तयः अनेकरूपदेहाः॥१९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा० पू०
६६

स्रशांता निर्पंककंटकादियुक्ता निरोधांसि तदा नियेबं तेष्वपि मूषुः नितरामवसन्सारसाः चक्रवाकाश्च आशांता विघोराणाअनुप
रता निवाह्रसा नियेषु तेष्वपि गृहेषु ॥२०॥ ईश्वरे इंद्रो ॥२१॥ तुष्टाः प्रेरिताः आत्मीयः कामान् विश्यतयो रसान्तानः वाल्गिजोयतयो वादि
जेरिताः पुरोहितैरुक्ताः ॥२२॥ प्रावृषि हरितो क्रीडां वर्णयति। एवं वनं विविक्तं सश्मभिः वर्षिभं सुमहत् ॥२३॥ वनौकसः पुलिंदीः प्रमुदिताः प्र

सरःस्वच्छांतरोधः सुन्यपुरंगा पिसारसाः ॥ गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः ॥२०॥ जलौघैर्निरभिद्यंत सेतवो
वर्षतीश्वरे ॥ पाषंडिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥२१॥ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्यो थामृतं घनाः ॥ यथाशिषो
विश्पतयः काले काले द्विजेरिताः ॥२२॥ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतो रंतुं सबलः प्राविशद्ध
रिः ॥२३॥ धेनवो मंदगामिन्य ऊधोभारेण भूयसा ॥ ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनाः ॥२४॥ वनौकसः प्र
मुदिता वनराजीर्मधुच्युताः ॥ जलधारा गिरेर्नादान्नासन्ना ददृशे गुहाः ॥२५॥ क्वचिद्वनस्पतिक्रोडे गुहायां चाभि
वर्षति ॥ निर्विश्य भगवान्रेमे कंदमूलफलाशनः ॥२६॥ दध्योदनमुपानीतं शिलायां सलिलांतिके ॥ संभोजनी
यैर्बुभुजे गोपैः संकर्षणान्वितः ॥२७॥ शाड्वलोपरि संविश्य चर्वतो मीलितेक्षणान् ॥ तृप्तान्वृषान्वत्सतरान्गाश्च
स्वोधोभरश्रमाः ॥२८॥ प्रावृट्श्रियं च तां वीक्ष्य सर्वकालसुखावहां ॥ भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहितां ॥२९॥

गुवान् ददृशे। तथा वनराजीर्मधुच्युतः मधुस्रावाः ददृशे। गिरेः सकाशात् जलधाराश्च तासां जनादान्। आसन्ना निकटवर्तिनी ६६
गुहाश्च। यद्वा वनौकसः प्रमुदिता आसन्। तथा वनराजयो वनपंक्तयः मधुच्युतश्च आसन्। गिरेर्जलधारा आसन्। तान्नेवंभूता
न् आददर्श सर्वतो ददर्श भगवान्। तत्र जलधारणां नादान् गुहाश्चेति ॥२५॥२६॥२७॥२८॥२९॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शारदं वर्णयति। एवं निवसतोरित्यष्टादशभिः। विगतानि अभ्राणि यस्यां सा स्वच्छा निर्भ्रं वृ नियस्यां सा अपरुषः शांतोऽनिलो यस्यां सा चस
वा॥२०॥ नीरजानां उत्पलानि यया तया शारदाहृतानीरजानां मुख्यश्रोदा॥२१॥ व्योम्नोब्दं इति व्योमादीनां च तुर्णां चतुरो मलान् शरदहरत्। श्रा
श्रमिणां च तुर्णां हृत्स्थे जाता भक्तिर्यथा अशुभम असुखं हरति। तथा निर्मलत्वादिणो गुर्वर्थी दकाहरणं कुंभय यथा भक्ति हरति तया पर्णस्पृते नानुपयो
गात् गुरुरुधिरपिहतोऽर्थस्य तस्यानियोगात्। एवं व्योम्नो ब्दं शारे जहार यथा चन्द्रहिणो अपसादिसां कर्ष्ये भक्ति हरति विवित्के वासरु

एवं निवसतोस्तस्मिन् रामके शावयोर्व्रजे॥ शरत्समभवद्व्यभ्रा स्वच्छांबु परुषानिला॥२०॥ शारदी नीरजोत्सस्या नीरा
णि प्रकृतिं ययुः॥ भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया॥२१॥ व्योम्नोब्दं भूतशाबल्यं भुवः पंकमपोमलं॥ शरज्जहा
राश्रमिणां कृष्णे भक्तिर्यथाऽशुभं॥२२॥ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः॥ यथा त्यक्तैषणाः शांता मुनयो मुक्त
किल्बिषाः॥२३॥ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवं॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा॥२४॥ नैवाविद
न्क्षीयमाणं जलं गाधजलेचराः॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः॥२५॥ ॥ ॥

मुमुक्षोः। तथाभूतानां शाबल्यं सो कर्ष्ये शरत् वर्षाकुला। न दृष्टि प्रियासंकुलानि वसंति। यथा च वानप्रस्थस्य मलधीरणक्लेशं भक्ति
हरति। एवं भुवः पंकं शरत्। यथा च यती कामादिवासनामलं श्रीहृत्स्थ भक्ति हरति। एवमलं शरदिति॥२२॥ त्यक्तैषणाः सक्ताः पुत्रवि
त्ते लोकैषणापेत्ते॥२३॥ गिरय इति अयं भावः। तत्सुपादाय्याः कर्मविद्याविवज्ञानिनो ज्ञानामृतं सर्वतो वितरंति। अपितु क्वचित् क्वचिदे
व। एवं गिरः शिवं निर्मलं तोयं क्वचिन्मुमुचुः क्वचिन्न। न पुनः प्रावृषीव सर्वत्र हरति॥२४॥२५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
६७

गाधे क्षुद्रे जले चरंतीति तथा ते मीनादयः अविंदन् लेभिरे ॥३६॥ शनैः शनैरिति तत्र ममतापि च पंकं अहंतापि वामतां अपक्वतां जहुरिति
॥३७॥ आत्मन्युपरते यज्ञक्रियामुनिश्चलांबुः स एव व्युपरतागमः निरुत्तवेदघोष इव तूष्णीं बभूवेति ॥३८॥ केदारेभ्यो बद्धसेतुशालिक्षेत्रे
भ्यो दृढैः सेतुभिरपो गृण्हन् संग्रहं कृतवंतः । ततः परं स्रवत्यभावात् । प्राणैरिंद्रियैः तन्निरोधेन इंद्रियप्रत्याहारेण ॥३९॥ देहाभिमानजं बोध
इव व्रजयोषितां मुकुंद इव चेत्यर्थः ॥४०॥ शरद्विमलतारकास्मिन् तत् । शब्दब्रह्मणो वेदस्यार्थान् पूर्वोत्तरमीमांसानिर्णीतान् दर्शं

गाधवारिचरास्तापमविंदंछरदर्कजं ॥ यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः ॥३६॥ शनैः शनैर्जहुः पंकं स्थला
न्यामं च वीरुधः ॥ यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥३७॥ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे ॥ आत्म
न्युपरते सम्यङ् मुनिर्व्युपरतागमः ॥३८॥ केदारेभ्यस्त्वपोगृण्हन् कर्षका दृढसेतुभिः ॥ यथा प्राणैः स्रवज्ज्ञानं
तन्निरोधेन योगिनः ॥३९॥ शरदर्कांशुजांस्तापान् भूतानामुडुपोहरत् ॥ देहाभिमानजं बोधो मुकुंदो व्रजयोषितां
॥४०॥ खमशोभत निर्मेघं शरद्विमलतारकं ॥ सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ॥४१॥ अखंडमंडलो व्यो
म्नि रराजोडुगणैः शशी ॥ यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥४२॥ आश्लिष्य समशीतोष्णं प्रसूनवनमा
रुतं ॥ जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥४३॥ गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाभवन् ॥ अन्वीयमानाः
स्ववृषैः फलैरीशक्रिया इव ॥ ६७

यतीति तथा तादृक् ॥४१॥४२॥ समः अन्यूनाधिकः शीतोष्णो यस्य तं । न तु गोप्यः कृष्णापहृतचेतस्त्वेन तासां सुदुःसहत्वादिति । यद्वा नकारस्तुपर
पार्थः । तदा कृष्णहृतचेतस इति चेतसा कृष्णमाश्लिष्य आलिंग्य यथेत्यर्थः ॥४३॥ पुष्पिण्यो गर्भिण्यः अन्वीयमानाः स्ववृषैः स्वपतिभिर
र्निछयोपि बलादनुगम्यमानाः ईश्वराराधनार्थाः क्रियाः बलात्फलैरनुगम्यमानाः सामस्त्येनाभोगार्थाय यथेति ॥४४॥ ॥

गो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमुत् कुमुदं कुत्सिते मुत् यस्य इति स्फुटमर्थं ॥४५॥ आग्रयणैः नवान्नप्राशनार्थैः वैदिकैः ऐष्टिकैः ऐंद्रियार्थैः लौकिकैश्च महोत्सवैः फलाभ्यां रा
मकृष्णाभ्यां रामकृष्णाभ्यां दत्तैर्नानाविध महोत्सवाभ्यां ॥४६॥ वणिजो यतयो नृपाः स्नाताः काश्यादेशाभ्यां वर्षरुद्धाः संतो निर्गम्यार्थान्नु वाणिज्य
स्वाच्छंद्य दिग्विजयविद्यादीन् प्रपेदिरे प्रापेद्यंते। यथा मंत्रयोगादिसिद्धा आयुष्मद्रुद्धाः काले आगते स्वपिंडान् योगादि प्राप्योन् देवा
दिदेहानिति ॥४७॥ इति दशमे विंशतितमः ॥२०॥ ॥एकविंशे शरदम्य रंदावनगाते हरौ। तद्वेणुस्वरमाकर्ण्य गोपीभिर्गीतमीर्यते ॥१॥

उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना। राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ॥४५॥ पुरग्रामेष्वाग्रयणैरैंद्रियैश्च महो
त्सवैः ॥ बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥४६॥ वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्व
नृ पिंडान् काल आगते ॥४७॥ इति श्रीभागवते महापुराणे दशमस्कंधे शरदृतुवर्णनं नाम विंशतितमोऽध्यायः ॥२०॥ ॥श्रीशु
नी कउवाच ॥ इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना ॥ न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः ॥१॥ कुसुमितवनराजिशुष्मिभृं
गद्विजकुलघुष्टसरःसरिन्महीध्रं। मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुं ॥२॥ तद्व्रजस्त्रिय आश्रुत्य
वेणुगीतं स्मरोदयं ॥ काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥३॥ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं ॥
नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥४॥

इत्थमेवं भूतं च वतं देवाह। शरदा स्वच्छानि जलानि विजलानि यस्मिंस्तत्। वायुना वातं अनुगतं वनं तद्देवं व्याप्तमित्यर्थः ॥१॥ ततश्च कुसुमित
वनराजिषु शुष्मिणो मत्ताः भृंगाः द्विजाश्च तेषां कुलानि तैर्घुष्टाः सरांसि सरितः महीध्राश्च यस्मिंस्तद्वनं कृष्णो अवगाह्य प्रविश्य वेणुमवा
दयत् ॥२॥ तत्कृष्णस्य वेणुगीतं स्मरस्य उदयो यस्मात् तत् आश्रुत्य परोक्षं यथा भवति व्रजे स्थितत्वात् ॥३॥ विक्षिप्तमनसः व्याकुलचित्ताः
॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०१० याद्दकूलस्य स्मरणं तासां मनसः क्षोभकं जातं तदाह बर्हापीडमिति। नटवत्वरं वपुर्बिभ्रत् वृंदावनं प्राविशत् कथंभूतं वनं स्वपदैरंकि
६८ तैरमणं रतिजनकं गोपवृंदैर्गीतकीर्त्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रत् बर्हमापीडो यस्मिन्निति वपुषो विशेषणं वा। वेणुवाद
नतुल्लेख्यतो रंध्रान्वेणोरिति। अतो नूनं अधरसुधैव पूर्णा वेणोर्ध्वलंती गीतवत् प्रसर्पितुमर्हतीति भावः॥५॥ अभिरे वर्णयंत्यः सपदे प
रमानंदमूर्त्तिलसंपरिरब्धवत्यः॥६॥ अनुवर्णनमेवाह। अक्षण्वतामिति त्रयोदशभिः। अक्षण्वतां चक्षुष्मतां तावदिदमेव फलं। प्रियद

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनकपिशं वैजयंतीं च मालां॥ रंध्रान्वेणोरधरसुधयापूरयन्गोप
वृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्त्तिः॥५॥ इति वेणुरवं राजन्सर्वभूतमनोहरं॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयं
त्योभिरेभिरे॥६॥ गोप्य ऊचुः॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः॥ वक्त्रं व्रजेशसुतयो
ये रनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षं॥७॥ चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ॥
रेजतु मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ॥८॥

॥ ९ ॥ ॥

र्शनं परं अन्यन्न विदामः न विद्मः इत्यर्थः तदेव फलं सखिभिः सह पशूननु वनं प्रवेशयतो रामकृष्णयोर्वक्त्रं यैर्निपीतं तैरेव जुष्टं सेवितं नान्यै
६८ रित्यर्थः। कथंभूतं वक्त्रं अनुरेणु वेणुमनुवर्त्तमानं तं वादयत्। तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गं अथवा यैर्निपीतं ६८
तेषां वक्त्रं तैरेव तुष्टं इत्येवाक्षण्वतामक्ष्णोः फलमिति॥७॥ अन्याश्चाहुः। चूतेति चूतप्रवालादीनां विचित्राभिर्मालाभिः अनुपृ
क्ते ईषद्दंतुरां तरतः संयुक्ते परिधाने नीलपीतचीरे ताभ्यां विचित्रौ वेषौ ययोस्तौ। क्व च कदाचित् पशुपालगोष्ठ्यां गोपालसभायां म
ध्ये अलमत्यर्थं विरेजतुः। अहो गोपालानां पुण्यमिति भावः॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्या ऊचुः। हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत्। कृतवान् कथं यस्मात् गोपिकानामेव भोग्यां सतीमपि दामोदराधरसुधां स्वयं स्वा
तंत्र्येण यथेष्टं भुंक्ते कथं अवशिष्टरसं केवलमवशिष्टं रसमात्रं यथा भवति तथा। यतः यासां पयसा पुष्टः ताः मातृतुल्याः ह्रदिन्यः हृष्यत्
त्वचः विकसितकमलवनमिषेण रोमांचिता लक्ष्यते। येषां वंशो जातः तस्ते तरवो मधुधारामिषेण आनंदाश्रु मुमुचुः। यथा आर्याः कुले वृ
द्धाः स्ववंशे भगवत्सेवनकं दृष्ट्वा हृष्यतो अश्रु मुंचंति तद्वदिति॥९॥ काश्चिदाहुः। हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषात् तनोति कथं
भूतं यत् देवकीसुतस्य पदांबुजाभ्यां लब्धा लक्ष्मीः शोभा संपत् येन तत्। किंच। गोविंदस्य वेणुं अनु वेणुनिनादं श्रुत्वा अनंतरं मंदं गजि

गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानां॥ भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्
त्वचोऽश्रु मुमुचुस्तरवो यथार्याः॥९॥ वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि॥ गोविंदवे
णुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्वं॥१०॥ धन्याः स्म मूढमतयोऽपि हरिण्य एता यां नंदनंदनमु
पात्तविचित्रवेषं॥ आकर्ण्य वेणुरणितं सहकृष्णसारैः पूजां दधुर्विरचितां प्रणयावलोकैः॥११॥ ॥ ॥

तं नीलमेघं मत्वा ये मयूरास्तेषां नृत्यं प्रेक्ष्य सघनाः तत्र तत्र अद्रिसानुषु अवरता निवृत्ता परा तत्क्रिया येषां अन्यानि समस्तानि सत्वानि यस्मिं
स्तत् नैतदन्येषु लोकेषु विद्यते अतो भुवः कीर्तिं वितनोतीत्यर्थः॥१०॥ अपरा आहुः हे सखि मूढमतयः तिर्यग्जाता अपि एता हरिण्यो
धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नंदनंदनं प्रणयसहितैरवलोकनैर्विरचितां पूजां संमानं दधुः कृतवत्यः। किंच। कृ
ष्णसारैः स्वपतिभिः सहिता एव दधुः अस्मत्पतयस्तु गोपाः क्रूराः सम्यक् तत्र न सहंत इति भावः॥११॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८० पू०
६९

अन्या ऊचुः। हे गोप्यः आश्चर्यं शृणुत। वनितानां मुत्सवो यस्मात् तत् तत् रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य ते वेणोः रसं क्वणितं गीतं च श्रुत्वा
विमानैर्गच्छंत्यो देवानां मंकेषु स्थिता अपि स्मरेण नुन्नः सारः परिक्षिप्तधैर्या मुमुहुः। मोहे लिंगमाह। भ्रश्यत्प्रसूनाः कबरा श्च ऊपा
सीता विगता नीवी यासां ताः। अत्र सर्वत्र वक्ष्यमाणानां तीव्रसंगतिर्वक्तव्या॥१२॥ क्षरणशंकयैवोत्तभितैरुत्तंभितैः कर्णपुटैः पिबंत्यः
स्नुतं तथा शावाश्च वत्साः स्तनपाने प्रवृत्ताः समनंतरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तंभितकर्णपुटैः पिबंतः स्नुतस्तनपयः कवलाः
केवलं स्तनेभ्यः क्षरितक्षीरग्रासा मुखेषु येषां ते तस्थुः। विस्मृतक्रिया बभूवुरित्यर्थः। तत्र हेतुः। गोविंदं दृशा मार्गेण आत्मनि नासि

कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्र
श्यत्प्रसूनकबरा मुमुहुर्विनीव्यः॥१२॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः॥ शा
नि वाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः॥१३॥ प्रायो बताब विहगा मुनयो वने
ऽस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतं॥ आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् शृण्वंत्यमीलितदृशो विगतान्यवाचः॥१४॥

स्पृशंत्यः आलिंगंत्यः अत एव अश्रूणां कला लेशा लोचनयोः संति ताः गावः ते च शावाः॥१३॥ भो अंब मातः अस्मिन् वने ये विहगाः पक्षिणः
ते प्रायेण मुनयो भवितुमर्हंति। कुतः कृष्णेक्षितं कृष्णस्य दर्शनं पुष्पफलाद्यंतरं विना यथा भवति तथा रुचिराः प्रवाला येषां तान् द्रुमभुजान् वृ
क्षाणां शाखा आरुह्य ते न श्रीकृष्णेन उदितं प्रकटितं कलवेणुगीतं केनापि सुखेन अमीलितदृशः सक्तान्यवाचश्च संतो ये शृण्वंतीति त ६९
थाहि। मुनयः श्रीकृष्णदर्शनं यथा भवति तथा वेदोक्तकर्मफलपरित्यागे न वेदद्रुमशाखारूढा रुचिरप्रवालस्था॥ नीयानिकर्माण्येवोपाददा
नाः सुखेन संतः श्रीकृष्णगीतमेव शृण्वंति। अतस्त एवैते भवितुमर्हंतीति भावः। येन भवसीतं भागवतं शृण्वंतीते वासुदेवरूपा भवितुमर्हंतीत्यर्थः
॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्तां चेतनानां कथा नद्योपि आवर्त्तैः परिभ्रमैर्लक्षितेन स्फाचितेन मनोभवेन कामेन भग्नो वेगो यासां ताः आलिंगनेन स्थगितं आच्छादितं यथा भवति तथा ऊर्मय एव भुजास्तैः कमलोपहाराः कमलान्युपहरंत्यः मुरारेः पादयुगलं गृहंति धारयंति ॥१५॥ लोकार्त्तिहरणशीलत्वादिसाम्यात् सख्युः श्रीकृष्णस्य अंबुदस्तदुपरि उदितः पुनः प्रेम्णा प्रवृद्धः सन् कुसुमावलीभिः पुष्पसमूहैः तत्तुल्यैः स्वशीकरैर्वा स्ववपुषा छत्रं विहितवान् ॥१६॥ साहंकारमाहुः । पूर्णाः कृतार्थाः पुलिंद्यः शबरांगनाः कथमित्यत आहुः प्रथमं दपितानां स्त-

नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्त्तलक्षितमनोभवभग्नवेगाः ॥ आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंति पादयुगलं कमलोपहाराः ॥१५॥ दृष्ट्वाऽतपे व्रजपशून्सहरामगोपैः संचारयंतमनु वेणुमुदीरयंतं ॥ प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषांबुद आतपत्रं ॥१६॥ पूर्णाः पुलिंद्य उरुगायपदाब्जराग श्रीकुंकुमेन दयितास्तनमंडितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिं ॥१७॥ ॥

प

नेषु मंडितेन अनुलिप्तेन पुनः रतिसमये उरुगायस्य श्रीकृष्णस्य पदाब्जयोः रागेण आरुण्येन श्रीः कांतिर्यस्य तेन कुंकुमेन पुनः तत्तस्य वनस्य लीषु चंक्रमणेषु रूषितेन लग्नेन तद्दर्शनेन स्मररुजा तास्तथाभूताः ताः तेन कुंकुमेन आननेषु कुचेषु च कामतप्तेषु लिंपंत्यः तदाधिं कामव्यथां जहुः अतस्ताः कृतार्थाः । धिगन्यामदृश्यः सा एवं मतेम्याधिशमनं न लता इति ॥१७॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०पू०
८०

हंतेति हर्षे हे सख्यः अयमद्रिर्गोवर्द्धनो। धन्यः वं हरिदासेषु श्रेष्ठः। कुतः इत्यत आह। यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः। तृणाङ्कु
रमिषेण रोमहर्षदर्शनात्। किंच। यत् मानं तनोति सह गोभिर्गणेन सखिवर्गेण च वर्त्तमानयोस्तयोः केः पानीयैः सुयवसैः शो
भनतृणैः कंदरैः कंदमूलैश्च यथोचितं। अतोयमतिधन्य इत्यर्थः॥१८॥ हे सख्यः इदं त्वतिविचित्रं गोपैः सह गाः वने संचारयतोस्तयो
रामकृष्णयोः मधुरपदैः महावेणुनादैः शरीरिषु ये गतिमंतस्तेषामस्पंदनं स्थावरधर्मः तरूणां पुलकः जंगमधर्म इति विपर्ययं तेग

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः॥ मानं तनोति सहगोगणयोस्तयोर्यत्पानीय
सूयवसकंदरकंदमूलैः॥१८॥ गागोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः॥ अस्पंद
त नं गतिमतां पुलकस्तरूणां नियोगपाशकृतलक्षणयोर्विचित्रं॥१९॥ एवंविधा भगवतो या वृंदावनचारिणः॥
वर्णयंत्योमिथो गोप्यः क्रीडास्तन्मयतां ययुः॥२०॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकविंशतितमो
ध्यायः॥२१॥ ॥श्रीशुक उवाच॥ हेमंते प्रथमे मासि नंदव्रजकुमारिकाः॥ चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतं॥
वृक्षाभिरिति नियोगापादबंधनरज्जव आधुपगवीकर्षणार्थाः पाशाश्च तैः कृते लक्षणे चिन्हं ययोः शिरसि नियोगवेष्टनेन स्कंध
चे स्थपाशेन गोपपरिष्ट श्रिया विराजमानयोरित्यर्थः॥१९॥२०॥ गोपीनां कामातः कृष्णे निःसीमप्रेतसंगमः॥ कात्यायन्यर्चनोद्भू ८०
त तत्प्रसादमहोदयः॥ इति दशमे एकविंशतितमः॥२१॥ ॥द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया॥ वरं ददौ गतं कृष्णो यज्ञ
शालामितीर्यते॥१॥ प्रथमे मासि मार्गशीर्षे॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥३॥ महामाये इत्यादि संबोधनैस्त्वत्किंचिदशक्यमिति सूचयंत्यः प्रत्येकं प्रार्थयंते॥४॥ कृष्णचेतस्त्वमेवाह। भूयान्नंदसुतः पतिरित्याशंसंत्यो नर्चुरिति॥५॥ व्रतस्य पूर्वांगमाह। उषसीति। गोत्रैर्नामभिः। अन्योन्याबद्धबाहवः परस्परं गृहीतपाणयः॥६॥७॥ योगेश्वराणामीश्वर इति प्रत्येकं

आप्लुत्यांभसि कालिंद्या जलांते चोदितेऽरुणे। कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीं॥२॥ गंधैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः। उच्चावचैश्चोपहारैः प्रवालफलतंदुलैः॥३॥ कात्यायनि महामाये महायोगिन्यधीश्वरि। नंदगोपसुतं देवि पतिं मे कुरु ते नमः॥ इति मंत्रं जपंत्यस्ताः पूजां चक्रुः कुमारिकाः॥४॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः। भद्रकालीं समानर्चुर्भूयान्नंदसुतः पतिः॥५॥ उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः। कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहं॥६॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत्। वासांसि कृष्णं गायंत्यो विजह्रुः सलिले मुदा॥७॥ भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः। वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये॥८॥ तासां वासांस्युपादाय नीपमारुह्य सत्वरः। हसद्भिः प्रहसन्बालैः परिहासमुवाच ह॥९॥ अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यतां। सत्यं ब्रुवाणि नो नर्म यद्यूयं व्रतकर्शिताः॥१०॥ न मयोदितपूर्वं वा अनृतं तदिमे विदुः। एकैकशः प्रतीच्छध्वं सहैवेति सुमध्यमाः॥११॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः। व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः॥१२॥

तादृक्मनोरथपूरणसामर्थ्यं दर्शयति तासां कर्मणः सिद्धये फलदानायेति॥८॥ नीपकदंबं बालैः सह॥९॥ हे अबलाः नो नर्म परिहासः यस्माद्यूयं व्रतकर्शिताः॥१०॥ एकैकशो वा आगत्य स्वीकुरुत सहैव वा न तत्रास्माकमाग्रह इत्यर्थः॥११॥ क्ष्वेलितं परिहासं प्रेमपरिप्लुताः प्रेमरसमग्नाः॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शे०पू० ॥१३॥ तत्रमुग्धा ऊचुः। श्रीकृष्णमनयमन्याय्यं प्राहुः स्मः॥१४॥ प्रौढा ऊचुः। नो चेद्राजेनं दायकं साय वा ब्रुवाहे कृष्णेति॥१५॥१६॥ प्रोत्तेरुः
७१ निर्जिताः॥१७॥ आहताः ईषद्दक्षतयो नीवीक्ष्य॥१८॥ ध्रुव व्रताः सत्यो विवस्त्रा अपो व्यगाहत अच्युतस्त्रीता इतिप्रत्ते देतत् एव देवहेलनं
अपराधए वेत्यर्थः। प्रतवैगुण्यभीता नो प्राय श्चित्तमपि वाह। अस्योहसः पापस्य निरवनयेन्। दिक्षु अंजलिं बध्वा अयो नमः प्रणामं कु

एवं ब्रुवति गोविंदे नर्मणाक्षिप्तचेतसः॥ आकंठमग्नाः शीतोदे वेपमानास्तमब्रुवन्॥१३॥ मा ऽनयं भोः कृतास्त्वां तु नंदगो
सुतं प्रियं पौ॥ जानीमों ग व्रजश्लाघ्यं देहि वासांसि वेपिताः॥१४॥ श्यामसुंदर ते दास्यः करवाम तवोदितं। देहि वासांसि धर्मज्ञ नो चेद्रा
ज्ञे ब्रुवामहे॥१५॥ श्रीभगवानुवाच॥ भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ॥ अत्रागत्य स्ववासांसि प्रतीच्छंतु शुचिस्मि
ताः॥१६॥ ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः॥ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः॥१७॥ भगवा
नाहता वीक्ष्य शुद्धभावप्रसादितः॥ स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितं॥१८॥ यूयं विवस्त्रा यदपो धृतव्रता व्य
गाहतैतत्तदु देवहेलनं॥ बध्वांजलिं मूर्ध्न्यपनुत्तयेंहसः कृत्वा नमो धो वसनं प्रगृह्यतां॥१९॥ एकेन पाणिना नेमुरेके
नाच्छाद्य चांगनाः॥ ता वीक्ष्योवाच भगवान् ह्युपोषोर्ध्वम्पिदं वचः॥२०॥ एकेन पाणिना यो सौ प्रणामे द्वेव मच्युतं॥ त
स्य दंडः करच्छेद इति धर्मविदो विदुः॥२१॥ इत्युक्तास्ते नाभिहितं ब्रजाबलाऽवेमत्वा विवस्त्राप्लवनं व्रतच्युतिं॥ तत्पूर्तिका ७१
मास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः॥२२॥ तास्तथावनता दृष्ट्वा भगवान्देवकीसुतः॥ वासांसि ताभ्यः प्रायच्छत्
लेति॥१९॥ इति दोषसेन अच्युतेनाभिहितं विवस्त्राप्लवनव्रतस्य च्युतिहेतुं मत्वा तस्य पूर्तिकामाः तदशेषकर्मणां तस्य व्रतस्य अन्येषां मेशे
षकर्मणां च साक्षात्कृतफलं इतं तमेव नेमुः। यतः स एवावद्यमृक्पापमार्जः॥२०॥२१॥२२॥२३॥ ॥ ॥ ॥

दृढमत्यर्थं प्रलब्धा वंचिताः पूर्वं विवस्त्रा इत्यादिना त्रपया लज्जया च हापिताः स्त्याजिताः अत्रागत्य स्ववासांसीत्याग्रहेण प्रस्तोभिता उपहासिताः सत्यं ब्रुवाणि नो नर्मेत्यादिना। क्रीडनवच्च कारिताः अञ्जलिं मिलितमित्यादि प्रायश्चित्तच्छलेन नाभ्यसूयन् दोषदृष्ट्या नापश्यन् ॥२२॥ प्रेष्ठसंगमेन सज्जिताः वशीकृताः अतो गृहीतचित्ताः सत्यो नो चेलुः गृहीतचित्तत्वमाह। तस्मिन्कृष्णे लज्जायितेक्षणाः लज्जाविलसितमीक्षणं यासां ताः इत्यर्थः॥२३॥ दामोदर इति भक्तवात्सल्यं द्योतयति। अबलाः प्रति॥२४॥ भोः साध्व्यो भवतीनां मदर्चनमेव संकल्पो मनोरथः

दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन् प्रियसंगनिर्वृताः॥२२॥ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः॥ गृहीतचित्ता नो चेलुस्तस्मिँल्लज्जायितेक्षणाः॥२३॥ तासां विज्ञाय भगवान्स्वपादस्पर्शकाम्यया॥ धृतव्रतानां संकल्पमाह दामोदरोऽबलाः॥२४॥ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनं॥ मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति॥२५॥ न मय्यावेशितधियां कामः कामाय कल्पते॥ भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते॥२६॥ याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः॥ यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः॥२७॥

सलज्जया युष्माभिरकथितोऽपि मया विदितः समया अनुमोदितः अतः सत्यो भवितुमर्हति। अर्हतीति संभावे नो अन्यथा आत्यंतिको न भविष्यतीति सूचितं॥२५॥ तत्कुत इत्यत आह नमय्यीति कामाय पुनः पुनः कामभोगाय विषयप्रहिमाका मस्यापि शांतिहेतुत्वादिति भावः। कामाप्रवृत्तेर्दृष्टांतः। भर्जिता दग्धा क्वथिता पक्वा धाना यवादिबीजाय पुनरंकुरोद्गमाय प्राय इति स्वेच्छया पुनः प्ररोहमपि सूचयति॥२६॥ सिद्धाः पूर्णमनोरथाः तदाह। इमा आगामिनी रात्रीर्मया रंस्यथेति। आर्यां कात्यायनीं। सतीः सत्यः॥२७॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू०
७२

भक्त्या त्वं कस्य कन्यास्ता स्त्विद्विवर्जितयज्वनां॥ पत्न्यनुग्रहतस्तेषामहन्कर्म महामदं॥ २२॥ २१॥ ३०॥ ३१॥ द्विजभार्यास्या अनुग्रहाय यज्ञवाट
गच्छन्ते विप्राणां काठिन्यमपि प्रेसतेभ्यो पिहुमाः श्रेरूरू इति तानभिनंदयति चतुर्भिः पश्यतेति। हेस्तोककृष्ण हे अंशो गोपाः एतानुमान्यपश्य

श्रीशुक उवाच॥ इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः॥ ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजं॥ २८॥ अथ गोपैः परि
वृतो भगवान्देवकीसुतः॥ वृंदावनाद्गतो दूरं चारयन्गाः सहाग्रजः॥ २९॥ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः
आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः॥ ३०॥ हे स्तोककृष्ण हे अंशो श्रीदामन्सुबलार्जुन॥ विशालर्षभ तेजस्विन्
देवप्रस्थ वरूथप॥ ३१॥ पश्यैतान्महाभागान्परार्थैकांतजीवितान्॥ वातवर्षातपहिमान्सहंतो वारयंति नः॥ ३२॥ अ
हो एषां वरं जन्म सर्वप्राण्युपजीविनं॥ सुजनस्येव येषां वै विमुखा यांति नार्थिनः॥ ३३॥ पत्रपुष्पफलच्छाया मूलवल्कल
दारुभिः॥ गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते॥ ३४॥ एतावज्जन्मसाफल्यं देहिनामिह देहिषु॥ प्राणैरर्थैर्धि
या वाचा श्रेय एवाचरेत्सदा॥ ३५॥ इति प्रवालस्तबकफलपुष्पदलोत्करैः॥ तरूणां नम्रशाखानां मध्ये न यमुनां गतः॥
॥ ३६॥ तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः॥ ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलं॥ ३७॥ तस्या उपवने का
मं चारयंतः पशून्नृप॥ कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन्॥ ३८॥ इति श्रीभागवते महापुराणे दशमस्कंधे द्वाविंश

तपरार्थमेकांतेन जीवितं येषां तान्॥ तरहाहा वातवर्षादीन्स्वयं सहमाना अस्मान्वारयंति॥ ३२॥ सुजनस्य कृपालोरर्थिन इव॥ ३३॥ नि
र्यासो घनरसः तोक्माः पल्लवाद्यंकुराः॥ ३४॥ ३५॥ इत्यभिनंदयन्प्रवालादिसमूहैर्नतशाखानां तरूणां मध्यतो यमुनां प्राप्तः॥ ३६॥
॥ ३७॥ कुमारिकाभ्यः पूर्वमेव तत्रर्मा कुलतया अगृहीतभोज्यपानादिनिर्गमात् क्षुधार्ता इत्युक्तं॥ ३८॥ इति दशमे द्वाविंशतमः॥ २२॥ छ॥ ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयोविंशे तु तो गोपैरन्नयांञ्चापदेशतः॥ तत्पत्नीरनुग्रह्णात्कृष्णो दीक्षितानन्वतापयेत्॥१॥ भक्ताया इत्येकवचनं सर्वासां फलतोऽन्याभि
प्रायेण॥२॥३॥ अस्मद्विसर्जिताः आवाभ्यां प्रेहिताः संतो याचध्वं यद्यप्याकर्का तत्र लंज्जा। ननु तथाप्यपात्रत्वादस्मभ्यं किमिति दास्यं
तीति चेत्तत्राह कीर्त्तयत इति॥४॥५॥६॥ अविदूरे वर्त्तमानौ सतौ वो ओदनं तल्लषतः अभिलषतः इच्छतं वः ओदनं श्रद्धा च यद्यस्ति

गोपा ऊचुः॥ राम राम महावीर्य कृष्ण दुष्टनिबर्हण॥ एषा वै बाधते क्षुन्नस्तच्छांतिं कर्त्तुमर्हथः॥१॥ श्रीशुक उवाच॥
इति विज्ञापितो गोपैर्भगवान्देवकीसुतः॥ भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत्॥२॥ प्रयात देवयजनं ब्राह्म
णा ब्रह्मवादिनः॥ सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया॥३॥ तत्र गत्वौदनं गोपा याचत तास्मद्विसर्जिताः॥ की
र्त्तयंतो भगवत आर्यस्य मम चाभिधां॥४॥ इत्यादिष्टा भगवता गत्वायाचंत ते तथा॥ कृतांजलिपुटा विप्रान् दंडव त
त्पतिता भुवि॥५॥ हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः॥ प्राप्तान् जानीत भद्रं वो गोपान्नो रामचोदितान्॥
॥६॥ गाश्चारयंतावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ॥ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो च
यच्छत धर्मवित्तमाः॥७॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः॥ अन्यत्र दीक्षितस्यापि नान्नमश्नन्
हि दुष्यति॥८॥ इति ते भगवद्याच्ञां शृण्वंतोपि न शुश्रुवुः॥ क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः॥९॥ ॥

तर्हि यच्छतेति॥७॥ दीक्षिता वयमभोज्यान्ना इति चेदप्यन्नं तीति स्वयमेवाशंक्याहुः। दीक्षाया इति दीक्षायाः आरभ्याग्नीषोमीयपश्वालं
भात्पूर्वं दोषः न ततोऽन्यत्र तथा सौत्रामण्याश्चान्यत्र अन्यदा॥८॥ क्षुद्रे स्वर्गादावाशा मात्रं येषां ते। भूरीणि कृशाधिककर्माणि येषां ते।

श्रीभा॰ टी॰ ३ द॰ स्कं॰ ...

द०पू० ननुकर्मक्रममुल्लंघ्यादेशकाले अन्नार्थमत्रमन्यस्यैव कथं देयं अत्राह देश इति। पृथक् सपुरोडाशादि द्रव्यं। तंत्रं प्रयोगः धर्मो अपूर्वं ॥१०॥ मनु
७३ ष्योयमिति दृष्ट्या मर्त्यात्मानो अत्मानो लक्षणा वयं महांत इति मन्यमानाः ॥११॥१२॥ लौकिकीं गतिं नहि कार्यार्थिनो निर्विद्यंते को न परा भूयत इत्यादिलो

देशः कालः पृथक् द्रव्यं मंत्रतंत्रर्त्विजोग्नयः। देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥१०॥ तं ब्रह्मपरमं
साक्षात् भगवंतमधोक्षजं। मनुष्यदृष्ट्या दुःप्रज्ञा मर्त्यात्मानो नमेनिरे ॥११॥ नतेयदोमितिप्रोचुर्न नेति च
परंतप ॥ गोपा निराशाः प्रत्येत तथोचुः कृष्णरामयोः ॥१२॥ तदुपाकर्ण्य भगवान् प्रहस्य जगदीश्वरः ॥ व्याज
हार पुनर्गोपान् दर्शयन् लौकिकीं गतिं ॥१३॥ मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतं ॥ दास्यंति काममन्नं वः
स्निग्धा मय्युषिता धिया ॥१४॥ गत्वाथ पत्नीशालायां दृष्ट्वासीनाः स्वलंकृताः ॥ नत्वा द्विजसतीर्गोपाः प्रश्रि
ता इदमब्रुवन् ॥१५॥ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः ॥ इतो विदूरे चरता कृष्णेनेहेषिता वयं ॥१६॥
गाश्चारयन्स गोपालैः सरामो दूरमागतः ॥ बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयतां ॥१७॥ श्रुत्वाऽ
च्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥१८॥ ॥ ॥

कास्थितिं दर्शयन् ॥१३॥ केवलं देहेन गृहे वसंति धिया तु मय्येवोषिताः। यतो मयि स्निग्धाः अतो दास्यंतीति ॥१४॥१५॥ इषिताः प्रेषिताः ॥१६॥ ७३
सः कृष्णो गोपालैः सह ॥१७॥ तत्कथाक्षिप्तमनास्तत्र दर्शनोत्सुकाः अत एवमुपागतं श्रुत्वा जातसंभ्रमा बभूवुरिति ॥१८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौरभ्यादयो यस्मिन् तत्। भाजनैः अमत्रैः भाण्डैर्वा पुत्रादिभि
र्वार्यमाणा अपि प्रियं श्रीकृष्णं अभिसस्रुः आभिजग्मुः अप्रतिघ[illegible]र्यः समुद्रं निम्नगा नद्य इवेति॥१९॥ अत्र हेतुः भगवतीति। दीर्घं
बहुकालं श्रुतेन श्रवणेन धृतः आशयो याभिस्ताः॥२०॥ तथागताः सत्यो ददृशुः॥२१॥ हिरण्यवत्परिधिः परिधानं यस्य तं पीताम्बरमित्य
र्थः। वनमाल्यैर्बर्हैः धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं। अनुव्रतस्य सख्युः अंसे विन्यस्तो निहितो हस्तो येन तं। इतरेण हस्तेन लीलया अ
ब्जं धुनानं भ्रामयन्तं। कर्णयोरुत्पले यस्य। अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं चेति च॥२२॥ दन्तैरपि लयेन सामस्त्य

चतुर्विधं बहुगुणमन्नमादाय भाजनैः। अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः॥१९॥ निषिध्यमानाः पतिभिर्भ्रातृ
भिर्बन्धुभिः सुतैः। भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः॥२०॥ यमुनोपवनेऽशोकनवपल्लवमण्डिते। विचरन्तं वृ
तं गोपैः साग्रजं ददृशुः स्त्रियः॥२१॥ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे। विन्यस्तह
स्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं॥२२॥ प्रायःश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्न
मनसस्तमथाक्षिरंध्रैः। अन्तःप्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेन्द्र॥२३॥ तास्तथा त्यक्त
सर्वाशाः प्राप्ता आत्मदिदृक्षया। विज्ञायाखिलदृग्द्रष्टा प्राहप्रहसिताननः॥२४॥ श्री॥ ॥ ॥ ॥

प्राह प्राय इति। बहुशः श्रुतो यः प्रियतमस्य उदयः उत्कर्षः त एव कर्णपूराः कर्णौ पूरयन्तीति तथा तैः कुर्वन्तीति तथा तैः कर्णाभरणैरिति वा।
यस्मिन् श्रीकृष्णे निमग्नमनसः आविष्टचेतसः। तं लोचनद्वारै रंध्रैः अन्तः प्रवेश्य सुचिरमुपगुह्य तापं जहुः। अभिमतयो ऽहंवृत्तयः प्राज्ञं सुसु
प्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथेति॥२३॥ अखिलदृक् सर्वबुद्धिसाक्षी। तास्तथा प्राप्ता विज्ञाय अपि तथैवेति तद्वि
वृणोति। त्यक्तसर्वाशाः सर्वा आशा याभिस्ताः केवलं मामात्मनः स्वस्यैव दिदृक्षयेति॥२४॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰पू॰
७४

हे महाभागाः स्वागतं शुभमागमनं न तो देवाह। यन्नु यस्मात् प्रतिबंधं तिरस्कारेण अस्मान् दिदृक्षया प्राप्ता इति इदं वः उपपन्नं युक्तमिति वा
॥२५॥ युक्तत्वे पाह नन्विति। आत्मप्रिये आत्मा च प्रियश्च तस्मिन् मयि कुशलाः विवेकिनो अत एव स्वस्यात्मनोर्थं पश्यंति ये ते यथा वद्धक्तिं कु
र्वंति यथा तथैवाह। अद्धा साक्षात्। अत्र हेतुः अहैतुकी अव्यवहितां फलाभिसंधिरहितां फलाभिसंधिरहितां अत एव अव्यवहितां निरंत
रां॥२६॥ आत्मानः सर्वतः प्रेष्ठत्वमुपपादयति। र बोंत्तातयः आत्मा देहः एते सर्वे यत्संपर्कात् तपस्याध्यासेन उपकरणत्वेन वा॥२७॥ तत्तस्मा

स्वागतं वो महाभागा आस्यतां करवाम किं॥ यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः॥२५॥ नन्वद्धा मयि कुर्वंति कुशलाः कुर्वंति
स्वार्थदर्शिनः॥ अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा॥२६॥ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः॥ यत्सं
पर्कात् प्रिया आसन् ततः को न्वपरः प्रियः॥२७॥ तद्यात देवयजनं पतयो वो द्विजातयः॥ स्वसत्रं पारयिष्यंति युष्माभि
र्गृहमेधिनः॥२८॥ पत्न्य ऊचुः॥ मैवं विभोर्हति भवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं॥ प्राप्ता वयं
तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून्॥२९॥ गृण्हंति नो न पतयः पितरौ सुता वा न भ्रातृबंधु
सुहृदः कुत एव चान्ये॥ तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिंदम तद्विधेहि॥३०॥ ॥ ॥

त् कृतार्थ्यो यूयं यात देवयजनं यज्ञवाटं गच्छत। कृतार्थाः किमिति यास्याम इति चेत् अत आह पतय इति। पारयिष्यंति समापयिष्यंति प ७४
तीनामनुग्रहाय इत्यर्थः॥२८॥ नृशंसं निष्ठुरं निगमं प्रतिज्ञां न मे भक्तः प्रणश्यतीति वेदं वा न स पुनरावर्त्तेत इति दावसृष्टं अवहे
लया पदं त्वं बहुमानेन केशैर्निवोढुं दासीभवितुं॥२९॥ किंच न [illegible] न् हे अरिंदम कामलोभपापादिदमन। भवतः पा
दाग्रयोः पतितदेहानां अन्या स्वर्गादिगतिरपि न भवेन्मा भूत् नो नस्तत् दास्यमेव विधेहीति॥३०॥ ॥ ॥ ॥

नौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मया उपेता अनुज्ञाताः प्रत्यक्षं देवान् प्रदर्श्याह देवा अपीति ॥३१॥ तथापि तत् नसंतुं शंक्य इति चेत्तत्राह नेति नृणां मद्भक्तानां प्रीतये सुखाय ॥

अनुरागाय स्नेह हृदये । अंग संगः अंगाभ्यां संगः ॥३२॥ [illegible] इत्यर्थः ॥३३॥ देहमिति तदीयं देहं तत्र विहाय चैतन्ये

न भगवंतं प्रापेत्यर्थः ॥३४॥३५॥ अनुशीलयन् अनुकुर्वन् गोगोपगोपीनामिति कर्मणि षष्ठी रूपवाक्कृतैः रूपेण वाचा कृतैश्च

इति ईश्वरयोः नृ तान् रमाविडुरेम इत्यर्थः ॥३६॥ अनुस्मृति प्रकारमाह ॥ नरानुकरणवतोर्वतो विश्वेश्वरयोः याच्ञा यत् । अहन्म

श्रीभगवानुवाच ॥ पतयो नाभ्यसूयेरन् पितृभ्रातृसुतादयः ॥ लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ॥३१॥ नप्रीतये

नुरागाय ह्यंगसंगो नृणामिह ॥ तन्मनो मयि युंजाना अचिरान्माम् अवाप्स्यथ ॥३२॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनु

कीर्त्तनात् ॥ न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥३३॥ श्रीशुक उवाच ॥ इत्युक्ता द्विजपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ ते चा

नसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥३४॥ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतं ॥ हृदोपगुह्य विजहौ देहं कर्मानुबं

धनं ॥३५॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् ॥ चतुर्विप्रास्ते अन्वतप्यन् कृतागसः ॥३८॥ यद्विश्वेश्वरयोर्याच्ञा

भनु ६ महंनृविडंबयोः ॥ विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ॥३६॥ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगो

पीनां रमयन् रूपवाक्कृतैः ॥३७॥ अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृवि

डंबयोः ॥३८॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीं ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥३९॥ धिग्ज

न्म नस्त्रिवृद्विद्यां धिग्व्रतं धिग्बहुज्ञतां ॥ धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥४०॥

हतवंतः तत्कृतागसो वयमित्यनुस्मरयेति ॥३७॥ तदा च भार्याः गुरून् इव वयं तो भगवद्भक्तिरहितमात्मानं व्यानिंदन्नित्याहुः । दृष्ट्वेति । अलौ

किकीं लोकातीतां ॥ त्रिवृत् त्रैशौक्रं सावित्रं दैक्षमिति त्रिगुणितं जन्म । ब्रह्मचर्यं क्रियाः कर्माणि दाक्ष्यं नैपुण्यादप्यपि सैकं वा पदं धिगित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४०॥ योविध्येत्। अच्छिन्नत् ततं दुरंतं भावं भक्तिं पश्यतेति संस्कार उपन॥४१॥ द्विजाति संस्कार उपनयनं तत्क्रियाः संध्योपासनाद्यः॥४२॥
॥४३॥४४॥४५॥ स्वात्मदोषापवर्गेण चाचल्यगर्वादित्यागेन॥४६॥४७॥ इत्यश्च राम एवं सर्वत्र श्रुतं तो व यं हितथा
सृतं भगवतो माया योगिनामपि मोहिनी॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः॥४०॥ अहोपश्यत नारीणामपि कृ
ष्णे जगद्गुरौ॥ दुरंतभावं योविध्यन्मृत्युपाशान्गृहाभिधान्॥४१॥ नासां द्विजातिसंस्कारो न निवासो गुरावपि॥ न तपो
नात्ममीमांसा न शौचं न क्रियाः शुभाः॥४२॥ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे॥ भक्तिर्दृढा न चास्माकं संस्का
रादिमतामपि॥४३॥ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया॥ अहो नः स्मारयामास गोपवाक्यैः सतां गतिः॥४४॥ अ
न्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः॥ ईशितव्यैः किमस्माभिरीशस्यैतद्विडंबनं॥४५॥ हित्वान्यान्भजते यं श्रीः
पादस्पर्शाशयासकृत्॥ स्वात्मदोषापवर्गेण तद्याच्ञा जनमोहिनी॥४६॥ देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोग्नयः
देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः॥४७॥ स एव भगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः॥ जातो यदुष्वित्याशृण्म ह्य
पि मूढा न विद्महे॥४८॥ अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः॥ भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ॥४९॥
नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे॥ यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु॥५०॥ स वै न आद्यः पुरुषः स्वमाया
मोहितात्मनां॥ अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमं॥५१॥ इति स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः॥ दिदृक्षवोप्यच्यु
तयोः कंसाद्भीता न चाचलन्॥५२॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रयोविंशोऽध्यायः॥२३॥ ७५
प्रीति॥४८॥४९॥५०॥५१॥ न चाचलन् तयोः दर्शनाय न जग्मुः॥५२॥ इति दशमे त्रयोविंशोध्यायः॥२३॥ श्रीरामसमर्थ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विंशोध्याये हेंद्रस्य मखं व्यावर्त्य हेतुभिः ॥ कृष्णः प्रवर्त्तयामास गोवर्द्धनम[illegible]वं ॥ भूसुराणां क्रियागर्वं निरस्य स्वःसुरेषु च ॥ मघवन्मदभंगा
य तन्मखं समवारयत् ॥ ब्राह्मणाः कृसाद्भीताः स्वाश्रमस्था एवमस्था एवं भगवंतमभजन् ॥ भगवानपि तत्रैव निवसन्निंद्रयागं हत्वा घ
पानुगोपानपश्यदिति संबंधः ॥१॥२॥ वृथा संभ्रमो न भवति मखो यमिति एवं चेत्किमत्र फलं कादेवता केनाधिकारिणा केन वा साध
नेवा साधनेन साध्यते ॥३॥ एतत् ब्रूहि महान् कामो मम मशुश्रवणे वमहान् कामो दृश्यत इति तूष्णींस्थितं प्रत्याह नोति । सर्वात्मनां सर्वत्र
समनां सर्वत्र समदृष्टीनां । अत एव न विद्यते स्वः पर इति दृष्टिर्येषां । पर इति द्वेष्यभावादेव तद्भेदा मित्रादयोपि येषां न संतीत्याह । अपि

श्रीशुक उवाच ॥ भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् ॥१॥ तदभिज्ञोपि
भगवान् सर्वात्मा सर्वदर्शनः ॥ प्रश्रयावनतोपृच्छद्वृद्धान्नंदपुरोगमान् ॥ कथ्यतां मे पितः कोयं संभ्रमो व उपागतः ॥२॥
द्व किंफलं कस्य चोद्देशः केन वा साध्यते मखः ॥ एतत् ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः ॥३॥ नहि गोप्यं हि साधूनां
म कृत्यं सर्वात्मनामिह ॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां ॥४॥ उदासीनोरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥५॥
ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥६॥ तत्र तावत्क्रियायोगो
भवतां किं विचारितः ॥ अथवा लौकिकस्तन्मे पृच्छतः साधु भण्यतां ॥७॥ ॥ ॥ ॥

त्रेति । नामित्रे उदास्तः उदासीनो विद्विट् येषां तेषां कृत्यं सर्वं कर्म न गोपनीयं किंचिदस्तीत्यर्थः ॥४॥ सत्यपि भेददर्शने उदासीनः शत्रुव
द्वर्ज्यः । आत्मतुल्यत्वात्सुहृन्मित्रेषु न वर्जनीय इत्याह । उदासीन इति ॥५॥ किंच सुहृद्भिर्विचार्य ज्ञात्वैव कर्म कर्त्तव्यं न तु गतानुगतिकमा
त्रेणेत्याह । ज्ञात्वेति । अज्ञात्वा च । तत्र विदुषो यथावत्कर्मफलं स्यात्तथा नाविदुषः ॥६॥ भवता मयं क्रियायोगः शास्त्रतो विचारितः प्रवृत्तः
लौकिकः आचारप्राप्तो वेति । साधुसोपपत्तिकं एव्यतां कथ्यतामिति ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शं०टी०
७६

श्याचारप्राप्तएवेतिसहेतुकमाह पर्जन्य इति। आत्मस्मूर्त्तयः प्रियामूर्त्तयः॥८॥ ततः किमतआह। तमिंद्रं वो मुंचां मेघानां तद्रेतसा तद्वृष्टि
यसा॥९॥ उपजीवंति जीवंतिजीविकां कल्पयंति धर्मार्थकामसिद्धये न न नु कृष्यादिभिः जीवंति किं मिंद्रेण तत्राह पुंसामिति। फलसाधकः पर्ज
न्य विना कृष्यादिवैफल्यादि स्यर्थः॥१०॥११॥ इंद्राय मन्युं जनयन्निति कोपजनन द्वारा गर्वतादि इमवतारश्यि तु देवतानिराकरणं लयमेवा

नंद उवाच॥ पर्जन्योभगवानिंद्रो मेघास्तस्यात्ममूर्त्तयः॥ तेभिवर्षंति भूतानां प्राणनं जीवनं पयः॥८॥ तंतात वयमन्येच
वार्मुचांपतिमीश्वरं॥ द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः॥९॥ तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे॥ पुंसां पुरुषका
राणां पर्जन्यः फलभावनः॥१०॥ य एवं विसृजेद्धर्मं पारंपर्यागतं नरः॥ कामाल्लोभाद्भयाद्द्वेषात्सवै नाप्नोति शोभनं॥
॥११॥ श्रीशुक उवाच॥ वचो निशम्य नंदस्य तथान्येषां व्रजौकसां॥ इंद्राय मन्युं जनयन्पितरं प्राह केशवः॥१२॥ श्रीभग
वानुवाच॥ कर्मणा जायते जंतुः कर्मणैव विलीयते॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते॥१३॥ अस्ति चेदीश्वरः
कश्चित्फलरूप्यन्यकर्मणां॥ कर्त्तारं भजते सोपि नह्यकर्तुः प्रभुर्हि सः॥१४॥ ॥ ॥ ॥

मित्यभिप्राय इत्यर्थः॥१२॥ प्रथमं तावत्कर्मवादेन देवनिराकर्मणं निनुजड कर्मणः केवलात्कथं कर्मफलासिद्धिः स्यात्। अहो श्रशीलितमी
मांसानां स्वमतिविलसितं श्रद्धायतः कर्मणां फलकारणत्वे न तो ऽवगतेर्किं न तो ऽनुपपन्नं नाम॥१३॥ केचित्तु नरातिसाहसभी
ताः कर्मपरं तं त्रमीश्वरं मन्यंते तन्मतमनूद्य निराकरोति। अस्ति चेदि[illegible]यं कर्मभिराल[illegible]सो ऽन्येषां जीवानां कर्मणां फलरूपी फलदा

[illegible]॥१४॥ ७६

अतः कर्मणं एवं फलसिद्धेस्तत्सारतं अजागलस्तनतुल्यं तान्ने देवतान्तरमित्याह किमिंद्रेणेति। ननु कर्मणामपि प्रवृत्तिरर्थाभ्युपेक्षैवकृ
थं सर्वथा देवताया अनुपयोग इत्याशंक्याह स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेण विहितं यत्कर्म तदन्यथा कर्तुमनीशो
न ॥१५॥ एतद्विवृणोति स्वभाववंतत्र इति। प्रवृत्तेः संस्काराधीनत्वात् किं मंतर्यामिणेत्यर्थः ॥१६॥ तस्मात्स्वभावतो ॥ निष्पन्नस्य कर्मण एवं सर्व
कारणत्वात्कर्मैव पूज्यमित्याह देहानिति सार्द्धेन ॥१७॥ संपूजयेत् संमानयेद्वा ननु देवते देहो नद्रव्यत्यागात्मकत्वात्कर्मणः कथं देव

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्त्तिनां॥ अनीशेनान्यथा कर्तुं स्वभावविहितं नृणां ॥१५॥ स्वभाववर्त्तिनो हि जनः स्व
भावमनुवर्त्तते॥ स्वभाववस्थमिदं सर्वं सदेवासुरमानुषं ॥१६॥ देहानुच्चावचान्जंतुः प्राप्नोति स्वजातिकर्मणा ॥ शत्रुर्मि
त्रमुदासीनः कर्मैव गुरुरीश्वरः ॥१७॥ तस्मात्संपूजयेत् कर्म स्वभावस्थः स्वकर्मकृत्॥ अंजसा येन वर्त्तेत तदेवास्य
हि दैवतं ॥१८॥ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति॥ न तस्माद्विंदते क्षेमं जारं नार्यसती यथा ॥१९॥ वर्त्तेत ब्रह्मणा
विप्रो राजन्यो रक्षया भुवः॥ वैश्यस्तु वार्त्तया जीवेत् शूद्रस्तु द्विजसेवया ॥२०॥ कृषिवाणिज्यगोरक्षा कुसीदं तुर्यमु
च्यते॥ वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोनिशं ॥२१॥

तावितिं सिद्धिरित्याशंक्य कर्मभागमात्रं देवतेति पक्षमुपसंहरन्निव हेतुवादमाश्रित्यात्मानमेव देवतां समर्थयते अंजसेति ॥१८॥ हेतु
वले नैव विपक्षे दोषमाह आजीव्येति। उपजीवति सेवते ॥१९॥ स्ववृत्तिविकुं दृष्टांततेन वर्णानां वृत्तिभेदमाह वर्त्तेतेति ॥ ब्राह्मणो वेदा
ध्यायनादिना ॥२०॥ वैश्यवृत्तेश्चातुर्विध्यमाह। कृषीति कृषिवाणिज्यसहिता गोरक्षा एवं त्रयं। कुसीदं वृद्धिजीवनं चतुर्थं ॥२१॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०४
७७

ननु गवामपि राज्ञोऽर्महेंद्राधीनैवेत्याशंक्य निरीश्वरसांख्यमताश्रयेण निराकरोति स त्वमिति श्लोकद्वयेन। अन्योन्यं पुरुषस्त्रीयोगेन॥२२॥
सर्वमिति समुद्र शिलोच्चरादिष्वपि वृष्टिदर्शनात्प्रेक्षावत्पूर्वकत्वं नेत्यस्तीति भावः॥ तेऽदेवमेघैरेव सिध्यंति जीवंति॥२३॥ तथापि योगक्षेमा
र्थं देवतापेक्षेति चेदत आह। ननः पुर इति। पुरः पत्तनानि। जनपदा देशाः अस्माकं योगक्षेमहेतुर्वनशैलादय एवेति भावः॥२४॥ ब्राह्मणा

स त्वं रजस्तम इति स्थितिसृष्टिसंहारहेतवः॥ रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत्॥२२॥ रजसा चोदिता मेघा वर्षंत्यंबू
नि सर्वतः॥ प्रजास्तैरेव सिध्यंति महेंद्रः किं करिष्यति॥२३॥ न नः पुरो जनपदा न ग्रामा न गृहा वयं॥ वनौकसस्तात नि
त्यं वनशैलनिवासिनः॥२४॥ तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः॥ य इंद्रयागसंभारास्तैरयं साध्यतां मखः॥
॥२५॥ पच्यंतां विविधाः पाकाः सूपांताः पायसादयः॥ संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यतां॥२६॥ हूयंतामग्नयः
सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः॥ अन्नं बहुविधं तेभ्यो देयं वो धेनुदक्षिणाः॥२७॥ अन्येभ्यश्चाश्वचांडालपतितेभ्यो य
थार्हतः॥ यवसं च गवां दत्वा गिरये दीयतां बलिः॥ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः सुवाससः॥ प्रदक्षिणं च कुरुत गो
विप्रानलपर्वतान्॥२९॥

नापि संगृह्णन्निगमयति। तस्मादिति। स्वयमेव प्रभुप्रेक्षित यागकल्पनमाह। य इंद्र मखसंभारा इति सार्धैर्पंचभिः संभाराः साधनानि
॥२५॥ सूपं मौक्तं पायसं केवलं पयसि पक्वं। संयावादयो गोधूमादिविक्रियाः। क्रमश्च स्वरूपयायसयोः श्रुत्या दोहस्य अर्थतो ऽन्येषां
पाठतः॥२६॥ यागशोभार्थं स्वाद्वन्नादनार्थं चाह हूयंतामिति। धेनुदक्षिणाः धेनुसहिता दक्षिणाः। ता एव वा दक्षिणा वः पुष्माभिः॥२७
यवसं तृणं॥२८॥२९॥ ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वानुविरः कंपेनानुमादयन्नाह। गोब्राह्मणादीनामपीति। मखं मम च॥३०॥३१॥ ततद्रव्येण महेंद्रमखद्रव्येण गिरिं द्विजान्प्रति यथायथं॥३२॥
बलीनुपहृत्य आदृता आदृताः सादराः॥३३॥ अनडुद्युक्तानि उक्षभिर्युक्तानि स्वलंकृताः। शिषः द्विजानां आशीर्भिः सहिताः॥३४॥ गोपविश्रं
भणं गोपानां विश्वासजनकं रूपं गतः प्राप्तः सन् बलिमुपहारं आदद् अभक्षयत्॥३५॥ तस्मै आत्मने आत्मना स्वयं व्रजजनैः सहन

एतन्मम मतं तात क्रियतां यदि रोचते॥ अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः॥३०॥ श्रीशुक उवाच॥ कालात्मना
भगवता शक्रदर्पं जिघांसता॥ प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्वचः॥३१॥ तथा च व्यदधुः सर्वं यथाह मधुसूद
नः॥ वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिं द्विजान्॥३२॥ उपहृत्य बलीन्सर्वानादृता यवसं गवां॥ गोधनानि पुरस्कृत्य गि
रिं चक्रुः प्रदक्षिणं॥३३॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः॥ गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः॥
॥३४॥ कृष्णस्त्वन्यतमं रूपं गोपविश्रंभणं गतः॥ शैलोस्मीति ब्रुवन्भूरि बलिमादद्बृहद्वपुः॥३५॥ तस्मै नमो व्रजजनैः सह च ४२
क्रे त्मनात्मने॥ अहो पश्यत शैलोसौ रूपी नो नुग्रहं व्यधात्॥३६॥ एषोवजानतो मर्त्यान्कामरूपी वनौकसः॥ हंति
ह्यस्मै नमस्यामः शर्मणे आत्मनो गवां॥३७॥ इत्यद्रिगोद्विजमखं वासुदेवप्रचोदिताः॥ यथा विधाय ते गोपाः सहकृ
ष्णा व्रजं गताः॥३८॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्विंशतितमोध्यायः॥२४॥ ॥ ॥

मश्चक्रे अहो इति सार्द्धश्लोकं पठन्॥३६॥ कामरूपी सर्पादिरूपः अस्मै अद्रये शर्मणे क्षेमाय॥३७॥ कर्मैवालं प्राकृत्स्वभावो गुणो वा तद्
द्वेषादिमहेशः वा त्वीकृ श्रीदेवतेतीयमुक्तादेवबुद्धा भेदात्पती न तमीष्टा॥३८॥ इति दशमे चतुर्विंशोध्यायः॥२४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
७८

ग

पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति॥ उद्धृत्य गिरिमासाद्य रक्षद्गोकुलं प्रभुः॥ कृष्णो नाथो येषां तेभ्यः॥१॥ क्रुद्धश्च सन्निंद्रः सांवर्त्तकं नाम
संवर्त्तः प्रलयः तत्कर्त्तारं मेघानां प्रसिद्धं गणं प्राचोदयत्॥ प्रेषयामास। ननु कथं कृष्णनाथानां घाते प्रवृत्त इत्याशंक्य तत्संभावनयोनि
रस्त विवेकत्वादित्याशयेनाह वाक्यं चाहेत्यादि पंचभिः। ईशमानी अहमेवेश्वर इति गर्ववान्॥२॥ देवहेलनं देवस्य ममावज्ञा॥३॥ अदृढैर
समर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अत एव नामनौनिभैः नाममात्रेण या नौ वहति यत्र हि यं ते तत्सदृशैः॥ आन्वीक्षिकीं आत्मानुस्मृतिरूपां॥४॥

श्रीशुक उवाच॥ इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप॥ गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः॥१॥ गणं सांवर्त्त
तृ कं नाम मेघानां चांतकारिणां॥ इंद्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेशमान्युत॥२॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां
कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं॥३॥ यथाऽदृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः॥ विद्यामान्वीक्षिकीं हित्वा तिती
र्षंति भवार्णवं॥४॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं॥५॥ एषां
श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां॥ धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं॥६॥ ॥ ॥ ॥

नं

तथा वाचालं बहुभाषिणं बालिशं शिशुप्रायं तथापि पंडितमानिनं पंडितंमन्यं अतः स्तब्धं अविनीतमिति निंदायां योजितापी द्रव्य भारती श्रीकृ ७८
ष्णस्तौति। तथा हि वाचालं शास्त्रयोनिं। बालिशं एवमपि शिशुवत्क्रीडंतमिति। स्तब्धं अन्यस्य वंद्यस्याभावादनम्रं॥ अज्ञं नास्ति ज्ञो
यस्मात्तं सर्वविदित्यर्थः। पंडितमानिनं ब्रह्मविदां बहुमाननीयं कृष्णं सदानंदरूपं परंब्रह्म न मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्र
तीयमानमिति॥५॥ श्रियावलिप्तानां मत्तानां ध्मापितात्मनां दर्पितदेहानां धुनुत अपनयत। श्रीमदेन यस्तंभो गर्वस्तं॥६॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभ्यतः तान्प्रत्याह। अहंति। अनु व्रजे अनंतरमेवागमिमह इंद्रैर्देवगणैः सह॥७॥ मघवता इंद्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण
बद्धा आसन्। तदा निर्मुक्तं बंधनाः संतः आसारैः धारासंपातैः पीडयामासुः॥८॥ स्तनयित्नुभिः शब्दितैः स्तनंतः गर्जंतः मरुद्गणैः
आवाहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः जलशर्कराः जलोपलान्॥९॥ स्थूणावत् स्थूलाः अभ्रेषु मुंचत्सु सत्सु नतोन्नतं नतं नतंनि
म्नं उन्नतं तद्विपरीतं यथा भवति तथा भूर्नो दृश्यत॥१०॥ जातवेपनाः जातकंपाः॥११॥ तत्र पशूनां यानं विशिष्ट स्थिर इति॥१२॥ गोप

अहं चैरावतं नाग मारूढो नुव्रजे॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया॥७॥ ऋषिरुवाच॥ इत्थं मघवताज्ञप्ता मेघा निर्मु
क्तबंधनाः॥ नंदगोकुलमासारैः पीडयामासुरोजसा॥८॥ विद्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः॥ तीव्रैर्मरुद्गणैर्नु
न्ना ववृषुर्जलशर्कराः॥९॥ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं॥
॥१०॥ अत्यासारातिवातेन पशवो जातवेपनाः॥ गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः॥११॥ शिरः सुतांश्च कायेन प्र
च्छाद्यासारपीडिताः॥ वेपमाना भगवतः पादमूलमुपाययुः॥१२॥ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो॥ त्रातुमर्ह
सि देवान्नः कुपिताद्भक्तवत्सल॥१३॥ शिलावर्षनिपातेन हन्यमानमचेतनं॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः॥१४॥
अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं॥ स्वयागे विहतेस्माभिरिंद्रो नाशाय वर्षति॥१५॥ तत्र प्रतिविधिं सम्यगात्मयोगेन सा
ध्ये॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः॥१६॥
गोपीनां प्रार्थनामाह कृष्णेति त्वमेव नाथो यस्य तत् गोकुलं गोकुलं वंशो नः अस्माकं देवादिंद्रात् त्रातुं रक्षितुमर्हसि॥१३॥ विलापनाहृ
र्षमेव कुपितेंद्रेण कृतं तद्वर्षं मेने॥१४॥ कथं मेने तदाह। अपर्त्विति। अपगत ऋतुर्यस्य तद्वर्षं अतिशयितो वातो यस्मिन् तत्। अतिवातं। शिलो
मयं शिलाप्रचुरं॥१५॥ तत्र प्रतिज्ञापूर्वं गोवर्द्धनोद्धरणमाह। प्रतिविधिं प्रतीकारं स्वसामर्थ्येन साधयिष्यामि इति न च मौढ्यात् लोकेशमानिनां

ष्या

[illegible]

रा

द० पु० ७८ पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति ।। उद्धृत्य गिरिमासाद ररक्ष द्रो कुलं प्रभुः ।। कृष्णो नाथो येषां तेभ्यः ।।१।। क्रुद्धः सन्निंद्रः सांवर्त्तकं नाम
संवर्त्तः प्रलयः तत्कर्त्तारं मेघानां प्रसिद्धं गणं प्राचोदयत् ।। प्रेषयामास । ननु कथं कृष्णनाथानां घाते प्रवृत्त ईश्वरो शंक्या तमसं भावनयोनि
रस्त विवेकत्वादि सोऽशयेनाह वाक्यं चाहेत्यादि पंचभिः । ईशमानी अहमेवेश्वर इति गर्ववान् ।।२।। देवहेलनं देवस्य ममावज्ञा ।।३।। अदृढैर
समर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अत एव नामनौनिभैः नाममात्रेण यानानि वर्त्तते यत्र हि यं ते तत्सदृशैः ।। आन्वीक्षिकीं आत्मानुस्मृतिरूपां ।।

श्रीशुक उवाच ।। इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ।। गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः ।।१।। गणं सांवर्त्त
त. कं नाम मेघानां चांतकारिणां ।। इंद्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेशमान्युत ।।२।। अहो श्रीमदमाहात्म्यं गोपानां काननौकसां
कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ।।३।। यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ।। विद्यामान्वीक्षिकीं हित्वा तितीर्षंति
भवार्णवं ।।४।। वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं ।। कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ।।५।। एषां
श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां ।। धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं ।।६।। ।। ।। ।।

नं

तथा वाचालं बहुभाषिणं बालिशं शिशुपालिनं तमानिनं पंडितंमन्यं अतः स्तब्धं अविनीतमिति निंदायां योजितापि उद्दिश्य भारती श्रीकृ ७८
ष्णं स्तौति । तथाहि वाचालं शास्त्रयोनिं । बालिशं एवमपि शिशुवच्चरितविमानितं । स्तब्धं अन्यस्य वंद्यस्याभावादनम्रं ।। अतएव नास्ति ज्ञो
यस्मात् सर्वविदित्यर्थः । पंडितमानिनं ब्रह्मविदां बहुमानीयं कृष्णं सदानंदरूपं परं ब्रह्म नमर्त्यं तथापि भक्तवात्सल्येन मनुष्यतयाप्र
तीयमानमिति ।।५।। श्रियावलिप्तानां मत्तानां ध्मापितात्मनां दहितदेहानां धुनुत अपनयत । श्रीमदेन यस्तंभो गर्वस्तं ।।६।। ।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभ्यतः तान्प्रत्याह। अहंतीति। अनुव्रजे अनंतरमेवागमिष्यामि महद्भिर्देवगणैः सह॥७॥ मघवता इंद्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण
बद्धा आसन्। तदा निर्मुक्तं बंधनाः संतः आसारैः धारासंपातैः पीडयामासुः॥८॥ स्तनयित्नुभिर्गर्जद्भिः स्तनंतः गर्जंतः मरुद्गणैः
आवाहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः जलशर्कराः जलोपलान्॥९॥ स्थूणावत् स्थूलाः अभ्रेषु मुंचत्सु सत्सु नतोन्नतं नतं उन्नतं नि
म्नं उन्नतं तद्विपरीतं यथा भवति तथा भूर्नादृश्यत॥१०॥ जातवेपनाः जातकंपाः॥११॥ तत्र पशूनां यानं विना नष्टि शिर इति॥१२॥ गोप

अहं चैरावतं नागमारुह्यानुव्रजे॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया॥७॥ ऋषिरुवाच॥ इत्थं मघवताज्ञप्ता मेघा निर्मु
क्तबंधनाः॥ नंदगोकुलमासारैः पीडयामासुरोजसा॥८॥ विद्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः॥ तीव्रैर्मरुद्गणैर्नु
न्ना ववृषुर्जलशर्कराः॥९॥ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं॥
॥१०॥ अत्यासारातिवातेन पशवो जातवेपनाः॥ गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः॥११॥ शिरः सुतांश्च कायेन प्र
च्छाद्यासारपीडिताः॥ वेपमाना भगवतः पादमूलमुपाययुः॥१२॥ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो॥ त्रातुमर्ह
सि देवान्नः कुपिताद्भक्तवत्सल॥१३॥ शिलावर्षनिपातेन हन्यमानमचेतनं॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः॥१४॥
अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं॥ स्वयागे विहतेऽस्माभिरिंद्रो नाशाय वर्षति॥१५॥ तत्र प्रतिविधिं सम्यगात्मयोगेन सा
धये॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः॥१६॥

गोपीनां प्रार्थनामाह कृष्णेति त्वमेव नाथो यस्य तद्गोकुलं [illegible]लं वं त्रा। नः अस्मान् कं देवादिंद्रात् त्रातुं रक्षितुमर्हसि॥१३॥ विज्ञापनामाह
र्षमेव कुपितेंद्रेण कृतं तद्वर्षं मेने॥१४॥ कथं मेने तदाह। अपर्त्विति। अपगत ऋतुर्यस्य तद्वर्षं अतिशापितो वातो यस्मिन् तत्। अतिवातं। शिलो
मयं शिलाप्रचुरं॥१५॥ तत्र प्रतिज्ञापूर्वं गोवर्द्धनोद्धरणमाह। प्रतिविधिप्रतीकारं स्वसामर्थ्येन साधयिष्यामीति न च मौढ्यात् लोकेशमानिनां

ढ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०पू
७९

ननु देवाः सात्विकाः तत्कथं अकृत तेषां तमस्तत्राह नहीति। सद्भावः सत्वं भक्तिर्वा तद्युक्तानां सुराणामीशा वयमिति विस्मयोगर्वो हि यस्मा
न्मत्कृते असतो सितस्तो। किंच। तेषां मानभंगोऽनुग्रह एवेत्या[illegible]॥१७॥ गोपायेरक्षयिष्यामि। किंच। सोयं मेमया व्रतो नियमः संकल्पो।

नहि सद्भावयुक्तानां सुराणामीशविस्मयः॥ मत्तोऽसतां मानभंगः प्रशमायोपकल्पते॥१७॥ तस्मान्मच्छरणं गोष्टं मन्नाथं म
त्परिग्रहं॥ गोपाये स्वात्मयोगेन सोयं मे व्रत आहितः॥१८॥ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्द्धनाचलं॥ दधार लीलया कृष्णः
छत्राकमिव बालकः॥१९॥ अथाह भगवान्गोपान्हेंऽब तात व्रजौकसः॥ यथोपजोषं विशत गिरिगर्त्तं सगोधनाः॥२०॥
नत्रास इह वः कार्यो मद्धस्ताद्रिनिपातने॥ वातवर्षभयेनालं तत्त्राणं विहितं हि वः॥२१॥ तथा निर्विविशुर्गर्तं कृष्णाश्वा
सितमानसाः॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः॥२२॥ क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः॥
वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत्पदात्॥२३॥ कृष्णयोगानुभावं तं निशाम्येंद्रोतिविस्मितः॥ निःस्तंभो भ्रष्टसंकल्पः
स्वान्मेघान्संन्यवारयत्॥२४॥ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणं॥ निशाम्योपरतं गोवर्द्धनधरो ब्रवीत्॥२५॥ निर्या
त त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः॥ उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः॥२६॥ ॥ ॥ ॥

गोपान्

वा आहितः धृत इत्यर्थः॥१८॥ कृत्वा उत्खन्य छत्राकं उच्छिलीध्रं यथा॥१९॥ यथोपजोषं यथासुखं॥२०॥२१॥ संव्रजाः शकटमंडली
सहिताः सोपजीविनः। भृत्यपुरोहिताद्भिः सहिताः॥२२॥ पदात्स्थानात्॥२३॥२४॥२५॥ व्युदप्राया विगतोदकप्रायाः स्वल्पजलाइत्यर्थः
॥२६॥

७९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शकटो टोपकरणं शकटैस्तदुपकरणं यथा भवति तथा ॥२७॥२८॥ निर्वृताः पूर्णाः यथा यथोचितं परिरंभणादिभिः समीयुः उपजग्मुः सदाशिषः
श्रेष्ठा नाशीर्वादान् ॥२९॥३०॥३१॥३२॥ ततो गोवर्धनस्यानीत । अस्य श्रीकृष्णस्य तथाविधानि गोवर्धनोद्धरणादिरूपाणि कृतानि कर्माणि गोपा
यं यः ईयुः ययुः कथंभूताः एवं प्रेमणा हृदि स्पृशंतीति हृदिस्पृशः ताः यद्वा कथंभूतस्य प्रेष्ठेन तासां हृदिस्पृक् तस्य ॥३३॥ इति दशमे पंचविं

ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं ॥ शकटोपकरणं स्त्रीबालस्थविराः शनैः ॥२७॥ भगवानपि तं शैलं स्वस्थाने पूर्ववत्
प्रभुः ॥ पश्यतां सर्वभूतानां स्थापयामास लीलया ॥२८॥ तं प्रेमवेगान्निर्भृता व्रजौकसो यथा समीयुः परिरंभणादिभिः ॥ गो
प्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥२९॥ यशोदा रोहिणी नंदो रामश्च बलिनां वरः ॥ कृष्णमालिंग्य
युयुजुराशिषः स्नेहकातराः ॥३०॥ दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः ॥ तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ॥३१॥
शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः ॥ जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ॥३२॥ ततोनुरक्तैः पशुपैः परिश्रितो राजन्स्वगो
ष्ठं सबलोव्रजद्धरिः ॥ तथाविधान्यस्य कृतानि गोपिका गायंत्यः संयुर्मुदिता हृदिस्पृशः ॥३३॥ इति श्रीभागवते महापुराणे दश
मस्कंधे पंचविंशतितमोध्यायः ॥२५॥ ॥श्रीशुक उवाच॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते ॥ अतद्वीर्यवि
दः प्रोचुः समभ्येत्य सुविस्मिताः ॥१॥ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं ॥२॥

शतितमोध्यायः ॥२५॥ ॥षड्विंशे विस्मितान्गोपान्कृष्णस्य कर्मभिः ॥ नंदो गर्गोक्तमाश्राव्यत ऐश्वर्यमवर्णयत ॥ समभ्येत्य नंदमभि
गम्य ॥१॥ यदूचुस्तदाह। बालकस्येति यत् यस्मात् अद्भुत[illegible]नि तस्मात् ग्राम्येषु कथं जन्मार्हति । आत्मजुगुप्सितं आत्मानर्हं ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
८०

अच्युतानि कर्माण्याहुर्हादशाभिः यसप्तहायन इति। कथंचि[illegible]स्येत इति। पुष्करं पस्पंगजराट् महागजइव॥२॥ महौजसः महाबलायाः
तः नैर्वयः आद्यः यौवनं काले यथापीयते तद्वत्। कथमित्यनुवर्त्तते॥१॥ मनसः अधः शयाने स्वमासात्त्रयः कपरिच्छेदको यस्य॥ उद
कृउर्द्धं चरणौ हिन्वतश्चालयतः प्रपदेन पादाग्रेण हतं विपर्यस्तं अनः कथमपतत्॥५॥ योदैत्येन ह्रियमाणः सतं तत्क्षणावर्त्तं दैत्यं कथ

यः सप्तहायनो बालः करेणैकेन लीलया॥ कथं विभ्रद्गिरिवरं पुष्करं गजराडिव॥२॥ तोकेनामीलिताक्षेण पूतनाया महौ
जसः॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः॥४॥ हिन्वतोधः शयानस्य मास्यस्य चरणावुदक्॥ अनोपतद्विपर्यस्तं रुदतः
प्रपदाहतं॥५॥ एकहायन आसीनो ह्रियमाणो विहायसा॥ दैत्येन यस्तृणावर्त्तं महकंठग्रहातुरं॥६॥ क्वचिद्धैयंगवस्तैन्ये मा
त्रा बद्ध उलूखले॥ गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत्॥७॥ वने संचारयन्वत्सान् सरामो बालकैर्वृतः॥ हंतुकामं ब
द कं दोर्भ्यां मुखतोरिमपाटयत्॥८॥ वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया॥ हत्वा न्यपातयत्तेन कपित्थानि च लीलया
रा ॥९॥ हत्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः॥ चक्रे तालवनं क्षेमं परि[illegible]फलान्वितं॥१०॥ प्रलंबं घातयित्वोग्रं बलेन ब
लशालिना॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवान्हितः॥११॥ आशीविषतमाहींद्रं दमित्वा विमदं ह्रदात्॥ प्र
सह्योद्वास्य यमुनां चक्रे सो निर्विषोदकां॥१२॥ दुस्त्यजश्चानुरागोस्मिन् सर्वेषां नो व्रजौकसां॥ नंद ते तनयेस्मासु तस्या
प्यौत्सत्तिकः कथं॥१३॥
महत्रिरस्यर्थः॥६॥ हैयंगवस्तैन्ये नवनीतचौर्ये। बाहुभ्यां गच्छन् रिंगन्नित्यर्थः॥७॥ मुखतो हंतुकामो यस्य तं बकवेषमरिं बाहुभ्यां मु
खतः कथमपाटयत्॥८॥९॥१०॥११॥ आशीविषतमः अतिक्रूरविषः आसीवहीद्रश्च तं॥१२॥ औत्सत्तिकः स्वाभाविकः कथमिति किं
सर्वेषां अस्मास्या दितिशंका॥१३॥

उक्तमपि अतिविस्मयेनाभिनयेन वदंति क्व सप्तहायन इति ॥१४॥ प्राक् अग्रे एव गर्गाचार्येणायं तत्तद्चरितपरिशीलनेन निरूढाः संभावनस्य
नंदस्य कृष्णस्य तत्त्वावबोधकं जातं । स इदानीं तेनैव वाक्येन गोपाननुपादिशति ॥ श्रूयतामिति ॥१५॥ १६॥१७॥१८॥१९॥२०॥२१॥ तस्मा

क्व सप्तहायनो बालः क्व महाद्रिविधारणं ॥ ततो नो जायते शंका व्रजनाथ तवात्मजे ॥१४॥ नंद उवाच ॥ श्रूयतां मे वचो गोपा व्ये
तु शंका च वोर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥१५॥ वर्णास्त्रयः किलास्यासन् गृह्णतो नुयुगं तनूः ॥ शुक्लो रक्त
स्तथा पीत इदानीं कृष्णतां गतः ॥१६॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥
॥१७॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥१८॥ एष वः श्रेय आधास्यद्गो
पगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥१९॥ पुरानेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके र
क्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥२०॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोभिभवंत्येतान्विष्णुपक्षानि
वासुराः ॥२१॥ तस्मान्नंद कुमारोयं नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥२२॥ इत्यद्धा मां स
मादिश्य गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं ॥२३॥ इति नंदवचः श्रुत्वा गर्गगीतं तं व्रजौक
सः ॥ मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः ॥२४॥ ॥ ॥ ॥ ॥

स्य कर्मसु विस्मयो नास्तीति नंदस्योक्तिः ॥२२॥ इति अद्धा साक्षात् मां प्रति समादिश्य गर्गो स्वगृहं गते सति । तदानीं तथा अमन्यमानो
पि इदानीं कृष्णं नारायणस्यांशं मन्ये । अत्र हेतुः अक्लिष्टकारिणमिति ॥२३॥२४॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०टी०
८१
गोवर्द्धनोद्धरणं संपरिकरमनुस्मरन् प्रकाटितैश्वर्य्यस्य प्रीतिं प्रार्थयते देव इति यज्ञविप्लवेन यारुट्तया देवे इंद्रे वर्षति सति। वज्राश्मप
रुषानिलैः अश्मानि जलशर्करा तीव्रवायुभिः। सीदत्पालपशुस्त्रि सीदंतः पालाः पशवः स्त्रियश्च यास्मिन् तत्तथा॥ आत्मशरणपेव शर
णं यस्य तत् गोष्टं दृष्ट्वा अनुकंपी उत्स्मयन् हसन् प्रौढिमा विष्कुर्वन् च॥ शैलमुत्पाट्य अवलोवालोलीलो यथोच्छिलींध्रं यथा तथा एक
केन करेण बिभ्रत् दधत् गोष्टमपात् पालितवान्। एवं महेंद्रमदभित् गवामिंद्र इत्यत्र राज्याभिषेकार्थं चस्मरति। स एवं भूतः श्रीकृष्णो
नः प्रीयात् प्रीयतामिति षड्विंशोदशमे व्यक्तः षड्विंशो दशमो हरिः॥ अथ न कुपंचविंशं पंचविंशतितः पृथक्॥२५॥ इति दशमे
देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपरुषानिलैः सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वानुकंप्युत्स्मयन्॥ उत्पाट्यैककक
रेण शैलमबलो लीलोच्छिलींध्रं यथा बिभ्रद्गोष्टमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवां॥२५॥ इति श्रीभागवते महापुरा न
णे दशमस्कंधे षड्विंशोध्यायः॥२६॥ ॥श्रीशुक उवाच॥ गोवर्धने धृते शैले आसाराद्रक्षिते व्रजे॥ गोलोकादा
व्रजत्कृष्णं सुरभिः शक्र एव च॥१॥ विविक्त उपसंगम्य व्रीडितः कृतहेलनः॥ पस्पर्श पादयोरेनं किरिटेनार्कवर्चसा
॥२॥ दृष्टश्रुतानुभावोस्य कृष्णस्यामिततेजसः॥ नष्टत्रिलोकेशमद इदमाह कृतांजलिः॥३॥ ॥ ॥
षड्विंशः॥२६॥ ॥सप्तविंशोतरलक्ष्यकृष्णस्य प्राभवं परं॥ वर्ण्यते सुरभीशाभ्यामभिषेकमहोत्सवः॥ गोवर्द्धने धृते शैल इति ८१
शक्रस्य भयेनागमने हेतुः। आसाराद्रक्षिते व्रज इति सुरभेर्हर्षेणागमनं॥१॥ तत्रेंद्र आगत्य किं कृतवान् तदाह॥ विविक्त उपसं
गम्येत्यादिना अथाह सुरभिरित्यतः प्राक्तनेन ग्रंथेन विविक्ते एकांते पादयोः पस्पर्श नमश्चकार॥२॥ अस्य श्रीकृष्णस्य कृत
श्वासावनुभावश्च श्रुतोनुभावः दृष्टः कृतानुभावो येन स दृष्टः। नष्टः त्रिलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र ममापराधं क्षमस्वेति वक्तुं तव तावत्स्वपराधो नास्त्येव त्वया अनुग्रह एव कृत इत्याह चतुर्भिः। विशुद्धसत्त्वमिति। धाम स्वरूपं शांतं एकरूपं
अतश्च ते योऽयं प्रचुरज्ञानं सर्वज्ञमित्यर्थः। कुतः ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन्। अत एवायं अस्मदादिपुरु
मान: मायाकार्यरूपः गुणसंप्रवाहः गुणैः संप्रोह्यत इति तथा संसार इत्यर्थः स ते तव न विद्यते। यतः अयं अग्रहणेनाज्ञानेनानुबध्यत इति तथा
सर्वज्ञस्य ते नास्तीत्यर्थः। अज्ञानसंबंधो वा॥४॥ यदा अज्ञानतत्कृते देहसंबंधौ न स्तः तदा तत्कृतानां लोभादीनां का वार्तेत्याह कुतो न्विति।
तत्कृता देहसंबंधे कृताः तद्धेतवः पुनरन्यस्य देहस्य हेतवः। ननु ज्ञानिनामपि ते दृश्यंते अत आह। अबुधलिंगभावाः अज्ञानिनां गमकाः
यावद्धर्मादिमलं तावत् ज्ञानित्वं तावत् ज्ञानित्वमेव नासिद्धमित्यर्थः। लोभाद्यभावेऽपि मानभगो दंडार्थमित्याह। तथापीति॥५॥ ननु त्वं द

इंद्र उवाच॥ विशुद्धसत्त्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं॥ मायामयोऽयं गुणसंप्रवाहो न विद्यते तेऽग्रहणानुबंधः॥४॥
कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः॥ तथापि दंडं भगवान्बिभर्त्ति धर्मस्य गुप्त्यै खलनिग्रहाय॥५॥ पिता गुरु नू
स्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः॥ हिताय चेच्छातनुभिः समीहसे मानं विधु[न्वन्] जगदीशमानिनां॥६॥ ये मद्विधा न्वनू
ज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदं॥ हित्वार्यमार्गं प्रभजंत्यपस्मया ईहा खलानामपि तेऽनुशासनं॥७॥
स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावं॥ क्षंतुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती॥८॥ ॥

डं धत्से अतो मम गोपपुत्रस्य का शक्तिः किंच कारणं को वा दंडो मया कृत इत्यत आह पितेति। जगतां त्वं पिता जनकः गुरुरुपदेष्टा अधीशः नियंता इति दंड
धारणे हेतुत्रयं। काले त्वात् सामर्थ्यः। तस्मादुपात्तदंडो लीलावतारैः समीहसे। तव समीहा चेष्टैव जगदीशमानिनामस्माकं मानधूननमित्यर्थः
॥६॥ कथमेतदित्यत आह य इति। मद्विधा अश्च ते। अतो जगदीशमानिनः कालेभयकालेऽपि यथा अधुनैवातिवृष्टौ तामभयं भयमनेन यं तं वा
दृष्ट्वा अनु तन्मदं गर्वं हित्वा इति मदं हित्वा विगतविगतगर्वाः संतः आर्यमार्गं भक्तिलक्षणं भजंतीति अतस्तव ईहैव खलानामनुशासनं दंड इ
त्यर्थः॥७॥ एवं भगवत्स्वरूपं प्रतिपाद्य चानुवर्ण्य क्षमां प्रार्थयते स त्वमिति। एवंभूता असती मतिर्मे पुनर्मा भूदिति प्रार्थनांतरं॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
८२

महानयमपराधः कथं क्षंतव्य इति चेत् अत आह तवेति। स्वयंभराणां पुनश्च उरुभारजन्मनां बहूनां भाराणां जन्म येभ्यस्तेषामभवाय ना-
शाय। युष्मच्चरणसेविनां प्रभवाय। अतो मम त्वत्सेवकत्वाद् यं तापराधिनो पि क्षंतव्य इति भावः॥९॥ क्षमापयन्नमस्करोति नमइति।
तुभ्यं भगवते कृष्णाय नमः पुरुषाय सर्वांतर्यामिणे। महात्मने अनंतस्य तेप्यपरिच्छिन्नायाकुतः वासुदेवाय सर्वनिवासाय सात्वतां या-
दवानां पतये॥१०॥ तर्हि किं महं याद्रवः। स्वच्छंदोपात्तदेहाय स्वेर्भक्तानां छंदेनेच्छया स्वीकृतदेहाय तत्रापि विशुद्धज्ञानमू-
र्त्तिर्यस्य तस्मै कुतः सर्वस्य बीजाय कारणाय। अत एव सर्वभूतात्मने नमइति॥११॥ कृतागस्त्वं इत्येनोक्तमपराधं निवेदयति म-

भवायदेव तवावतारोयमधोक्षजेह स्वयंभराणामुरुभारजन्मनां॥ चमूपतीनामभवाय युष्मच्चरणानुवर्त्तिनां॥९॥ नमस्तुभ्यं भग-
वते पुरुषाय महात्मने॥ वासुदेवाय कृष्णाय सात्वतां पतये नमः॥१०॥ स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्त्तये॥ सर्वस्मै सर्व-
बीजाय सर्वभूतात्मने नमः॥११॥ मयेदं भगवन् गोष्ठनाशायासारवायुभिः॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना॥
॥१२॥ त्वयेशानुगृहीतोस्मि ध्वस्तस्तंभो हतो मृषः॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः॥१३॥ श्रीशुक उवाच॥
एवं संकीर्त्तितः कृष्णो मघोना भगवानमुं॥ मेघगंभीरया वाचा प्रहसन्निदमब्रवीत्॥१४॥ श्रीभगवानुवाच॥ मया
तेकारि मघवन् मखभंगोनुगृह्णता॥ मदनुस्मृतये नित्यं मत्तस्येंद्रश्रियाभृशं॥१५॥ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्य-
ति॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं॥१६॥ गम्यतां शक्र भद्रं वः क्रियतां मेनुशासनं॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभ-

यदमिति। आसारवायुभिः गोष्ठनाशाय मयेदं अहंकृतं विचेष्टितं कृतं॥१२॥ तथापि भो ईश त्वया अनुगृहीतोस्मि। अनुग्रहं दर्शयति। ध्वस्तस्तंभ इ-
ति। हतो मृष इति च॥१३॥१४॥ इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैव सत्यमिति। इंद्रश्रियादेवराजोहं॥१५॥१६॥ वः युष्माभिः बहुवचनं वरुणाद्यपेक्षं
प्रायेणाक्रमं तव्यस्वर्गोपि तेवैव ईश्वरत्वादिति चेत्तत्राह क्रियतामिति। मदनुशासनेन यथापूर्वं तत्रस्थीयतामिति संपिंडितार्थः। युक्तैः अप्रमत्तैः स्तंभवर्जि- ८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रेण हता अपि भवता सनाथा वयं रक्षिता इत्यर्थः॥१९॥ त्वं नः परमं दैवतं देवता अ
स्वसंतानैर्गोभिः सह पामंत्र्य। कृष्णकृष्णेत्यादि संबोध्य॥१८॥
तः हे जगत्पते। गोविप्रदेवानां चयं ये साधवस्तेषां भवायाभ्युदयाय त्वमेव इंद्रो भव॥२०॥ कुतो भवतीमिंद्रोसीति चेदत आह। इंद्रमिति। अलंपुरंदरस्य
द्रतये सर्थः। ननु देव इंद्रो भवति कथमहं भवेयमिति चेदत आह। अवतीर्णोसीति॥२१॥ सुरभिरा त्वं नः पयसा आप्यषिंचत। इंद्रश्चाकाशगंगा
याः जलैरभ्यषिंचत्॥२२॥ देवमातृभिरदितिसादिभिश्चेति वा। गाः पशून्। गाः स्वर्गं वा। इंद्रस्त्वेनं विंदतीति कृत्वा गोविंद इत्यभ्यधात् नाम कृतवानि

अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी॥ स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरं॥१८॥ सुरभिरुवाच॥ कृष्ण कृष्ण महायोगिन् विश्वा
त्मन्विश्वसंभव॥ भवता लोकनाथेन सनाथा वयमच्युत॥१९॥ त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते॥ भवाय भव गोविप्रदेवानां ये च
साधवः॥२०॥ इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयं॥ अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये॥२१॥ एवं कृष्णमुपागम्य
सुरभिः पयसात्मनः॥ जलैश्चाकाशगंगाया ऐरावतकरोद्धृतैः॥२२॥ इंद्रः सुरर्षिभिः साकं चोदितो देवमातृभिः॥ अभ्यषिंचत
दाशार्हं गोविंद इति चाभ्यधात्॥२३॥ तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरचारणाः॥ जगुर्यशो लोकमलापहं हरेः सुरांगनाः
संननृतुर्मुदान्विताः॥२४॥ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्त
दा गामनयन् पयसा द्रुतां॥२५॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः॥ अकृष्टपच्यौषधयो गिरयोऽबिभ्रदुन्मणीन्॥२६॥

सर्थः॥२३॥२४॥ देवनिकायेषु केतवइव दर्शनीयाः मुख्या इत्यर्थः। गावः गां पृथिवीं पयोभिः द्रुतां आर्द्रामनयन् अकुर्वन्नित्यर्थः॥२५॥ ना
नारसौघाः रसप्रवाहा येषु। अकृष्टपच्याः कर्षणं विनैव पच्यमाना ओषधयो व्रीह्यादय आसन्। यद्वा अकृष्टपच्या ओषधयो येषु ते गिर
यः। उन्मणीन् उद्गतान्मणीन् उत्कटान् बहिः प्रकटान् अबिभ्रत् अबिभरुः॥२६॥२७॥ ॥ ॥ ॥ ॥

सिद्ध पार ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
८३

इद्र स्त्वमसिमसि देवानां त्वं गवामिंद्रतां गतः। गोविंद इतिलोके त्वां गास्यंतिभुवि मानवाः॥२८॥ इतिदशमेसप्तविंशः॥२७॥ ॥अष्टाविंशेत
तो नंदानयनं वरुणालयात्॥ वैकुंठदर्शनंचाथ गोपानामनुवर्ण्यते॥१॥ गोवर्द्धनं समुद्धृत्य वंशे कृत्वामरेश्वरं॥ नंदानयनतः कृष्णो वरुणं
चवशेनयत्॥२॥१॥ कलामात्रायां द्वादश्यां पारणादराभिनिवेशेनासुरीं वेलामविज्ञाय अरुणोदयात्पूर्वमेव स्नानार्थं जलेन निषिद्धउद
कं प्रविष्टं। तदनभिज्ञोपवरुणस्य भृत्योऽनयदितितथा चैतत्सूत्रं। कला द्वादशी दृष्ट्वा निशीथारंभमेवहि। आमध्याह्नक्रि
याः सर्वाः कर्त्तव्याः शंभुशासनादिति। वक्ष्यति च वरुणः॥ अजानता मामकेनेति भगवद्धर्मं मजानं तत्स्यार्थः॥२॥ स्वानां भगवद्धर्मपरा
इति गोगोकुलपतिंगोविंदमभिषिच्यसः॥ अनुज्ञातोययौशक्रो वृतोदेवादिभिर्दिवं॥२८॥ इतिश्रीभागवतेमहापुराणेदशम
स्कंधे इंद्रस्तुतिर्नामसप्तविंशोध्यायः॥२७॥ ॥श्रीशुकउवाच॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनं॥ स्ना
तुंनंदस्तु कालिंद्यां द्वादश्यां जलमाविशत्॥१॥ तंगृहीत्वाऽनयद्भृत्यो वरुणस्यासुरोंतिकं॥ अविज्ञायासुरीं वेलां प्रविष्ट
मुदकंनिशि॥२॥ चुक्रुशुस्तमपश्यंतः कृष्णरामेतिगोपकाः॥२॥ भगवांस्तदुपश्रुत्य पितरं वरुणाहृतं॥ तदंतिकं गतोरा
जन्स्वानामभयदोविभुः॥३॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया॥ महत्या पूजयित्वाह तद्दर्शनमहोत्सवः॥४॥
वरुण उवाच॥ अद्यमेनिभृतो देहोऽद्यैवार्थोऽधिगतः प्रभो॥ त्वत्पादभाजो भगवन्नवापुः पारमध्वनः॥५॥ नमस्तुभ्यंभ
गवते ब्रह्मणे परमात्मने॥ नयत्र श्रूयते माया लोकसृष्टिविकल्पना॥६॥
णां अभयदः। मामैरेयभयं देहत्॥३॥ सपर्यया अर्हणेन॥४॥ अद्येदानीमेव मयादेहो निभृतः धृतः। यतः त्वद्दर्शनं जातं तदेवसाफल्य
प्राप्तमित्यर्थः। यद्वा निभृतः पूर्णमनोरथ इत्यर्थः। किंच। अद्यैवार्थोऽधिगतः सर्वइलोकस्यपतिनापि इतः पूर्वं नैवं विधोर्थः प्राप्त इत्य
र्थः। किंच। संसारोपिनिस्तरामेवेत्याह। ये नाहत्वत्पादभाज इति। अध्वनः संसारपारंभेजुः॥५॥ भगवतेनिरतिशयैश्वर्याय। ब्रह्मणेपरिय
ब्रह्मणे पूर्णाय परमात्मने सर्वजीवनियंत्रे तत्र हेतुः। नयत्र यैतिलोकसृष्टिविकल्पयति यामायासायत्र नश्रूयते अविद्यमानैवतिष्ठ

८३

अज्ञानतमद्भृत्येन त्वपित्रा हरणं यत्कृतं तदिति नंदं विमुच्य समर्पयति गोविंदेति॥७॥ ८॥ ९॥ अतीन्द्रियं अदृष्टपूर्वं लोकपालस्य महोदयमै
श्वर्यं॥१०॥ औत्सुक्यसकर्माधीर्येषां ते अपि किं स्वगतिसंस्थानं सूक्ष्मां ब्रह्मलोकाख्यां उपाधास्यत् उपाधास्यति नः अस्मान् प्रापयिष्यती
ति संकल्पितवंत इत्यर्थः॥११॥ इति एवंभूतं स्वानां स्वेषां संकल्पं अखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया एतद्वक्ष्यमा
णमचिंतयत्॥१२॥ अविद्या देहाद्यहंबुद्धिः। ततः कामः ततः कर्म तत उच्चावचासु देवतिर्यगादिषु जन्मसु स्वीयां गतिं न वेद॥१३॥ स्वब्र

अजानता मामकेन मूढेनाकार्यवेदिना॥ आनीतोयं तव पिता तद्भवान् क्षंतुमर्हति॥७॥ गोविंद नीयतामेष पिता ते
पितृवत्सल॥ ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक्॥८॥ श्रीशुक उवाच॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः॥ आ
दायागात्स्वपितरं बंधूनां चावहन्मुदं॥९॥ नंदस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयं॥ कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मि
तो ब्रवीत्॥१०॥ ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः॥११॥ इति
स्वानां स भगवान् विज्ञायाखिलदृक् स्वयं॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत्॥१२॥ जनो वै लोक एतस्मिन्नवि
द्याकामकर्मभिः॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन्॥१३॥ इति संचिंत्य भगवान् महाकारुणिको हरिः॥ दर्शया
मास लोकं स्वं गोपानां तमसः परं॥१४॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनं॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः॥१५

[illegible]स्वरूपं लोकं वैकुंठाख्यं च। तमसः परं तमसः प्रकृतेः परं॥१४॥ देहादिपिहितानां दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्व
[illegible] दर्शयामास स एवाह सत्यमिति सत्यं अबाध्यं। ज्ञानं अजडं अनंतं अपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं नाशरहितं तत्सिद्धं गु
णापाये गुणापोहे ज्ञानिनो यत्पश्यंति तद्रूपमेव दर्शयामास॥१५॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰रू॰पू॰ एवं ब्रह्मह्रदं अलैव ह्रद इव ह्रदः। तत्र निमग्नस्य विशेषविज्ञानाभावात्। तं ब्रह्मह्रदं ते तु नीताः प्रापिताः तस्मिन्निमग्नाश्च तु शब्दोक्तं विशेषमाह।
८४ कृष्णेनोद्धृताः समाधेरिवोत्थापिताः संतो ब्रह्मणस्तस्यैव लोकं वैकुंठाख्यं ददृशुरिति। ननु ब्रह्मनिमग्ना नो पुनर्लोकदर्शनमघटितमिति
शंक्याह यत्रेति यत्र यस्मिन्काले निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान्। शुकपरीक्षित्संवादात्प्राक्तन तोद्भूतनिर्देशः। न ह्यतत्कथै
श्वर्ये भगवति किंचिदप्यसंभावितमिति भावः। अथवा। अक्रूरो यत्र दृष्टवान् तस्य यमुनाह्रदस्य ब्रह्मह्रद इति नाम तं ह्रदं नीताः संतो ब्रह्म
णो लोकं ददृशुः। पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुरिति व्यवहितान्वयोऽप्रसिद्धकल्पनाच्चसोढव्येति।।१६।।१७।। इति द

ते तु ब्रह्मह्रदं नीता मग्नाः कृष्णेन चोद्धृताः।। ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा।।१६।। नंदादयस्तु तं दृष्ट्वा परमानंद
निर्वृताः।। कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः।।१७।। इति श्रीभागवते महापुराणे दशमस्कंधे।। द्वा-य-गो
-ब्रह्मलोकदर्शनो नामाष्टाविंशोऽध्यायः।।२८।। ।।श्रीशुक उवाच।। भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः
वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः।।१।।

शमेष्टविंशोऽध्यायः।।२८।। ।।अथ त्रिंशे तु रासार्थं मुक्तिप्रस्तुतये हरेः।। गोपीभी रासः संरेभे तस्य चांतर्द्धिकौतुकात्।। ब्रह्मादिजयसं ८४
रूढदर्पकंदर्पदर्पहा।। जयति श्रीपतिर्गोपीरासमंडलमंडनः।। ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रतीतेः। मैवं योग
मायामुपाश्रितः।। आत्मारामोऽप्यरीरमत्। साक्षान्मन्मथमन्मथः। आत्मन्यवरुद्धसौरतस्याद्विषु स्वातंत्र्याभिधानात्। तस्मा
द्रासक्रीडाविडंबनं कामविजयख्यापनायेत्येव तात्वं किंच। शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्ती करिष्या
मः। ता रात्रीरिति पातालं ध्वजं सिद्धमयेयमारंस्यथरूपा इति च प्रतिश्रुता इत्यर्थः।।१।। ।। ।। ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजश्चंद्र उदगात् उदितः । किंवत् वर्न् दीर्घकाले न दर्शनं यस्य सः स्वप्रियायाःमुखमरुणेनकुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभः दिशः मुखं शंतमैः करैः रश्मिभिः अरुणे नउदयरागेण विलिंपन्नेरुणीकुर्वन्निर्यर्थः सः प्रसिद्धः उडुराजः । तथा चर्षणीनां जनानां शुचस्तापग्लानीः मृजन् अपनयन् ॥ २ ॥ कुमुत् कुमुदं विकसनीयं विघतेयस्य तं कुमुद्वंतं तं रवंडं मंडलं यस्य रमायाः आननस्याभवे आभायस्य तं नवकुंकुममिवारुणं दृष्ट्वा । तथा वनं च तस्य कोमलैर्गोभिः रश्मिभिः रंजितं द

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः ॥ स चर्षणीनामुदगाच्छुचो मृजन्प्रियः प्रियाया इ न
व दीर्घदर्शनः ॥ २ ॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं ॥ वनं च तत्कोमलगोभिरंजितं जगौकलं
वामदृशां मनोहरं ॥ ३ ॥ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ॥ आजग्मुरन्योन्यमलक्षि
तोद्यमाः स यत्र कांतो जवलोलकुंडलाः ॥ ४ ॥ दुहंत्यो भियुयुः काश्चिद्दोहं हित्वा समुत्सुकाः ॥ पयोधिश्रित्संया
वमनुद्वास्यापरा ययुः ॥ ५ ॥ परिवेषंयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः ॥ शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योपास्य भोजनं
॥ ६ ॥
ह्वा कलं मधुरं जगौ आगायत कथं वामामनोहरा दृशौ यासां तासां मनोहरं यथा ॥ ३ ॥ असा पत्यभ्यो न्योन्य लक्षितः न ज्ञापित उद्यमो
यत्र विस्ताः सः कांतो यत्र तत्र गीतध्वनिमार्गेण जग्मुः । जंवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ताः ॥ ४ ॥ श्रीकृष्णस्य च कशब्द
रूपं नत स्ववण चित्तानां तत्क्षणमेव त्रैवर्गिक कर्म निवृत्तिं द्योतयंत्य इवाह दीवासितं कर्म विहाय ययुः । तदाह दुहंत्य इति पयः स्थालीस्थं
चुल्ल्यामधिश्रियेत तत्काथमप्रतीक्षमाणाः काश्चिद्ययुः संयावं गोधूमकणान्नं पक्वमनुद्वास्य अनवतार्य ॥ ५ ॥ ६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० पू०
८५

अन्याः प्रमृजंत्यः अंगोद्वर्तनादि कुर्वंत्यः काश्च काश्चित्तु। कृष्णं तत्पार्श्वं कर्मांतरासक्तमानसा मन्यथा कृतमपि फलत्येवेति द्योतयन्नाह व्य
त्यस्तेति। स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्यप्राप्तानि वस्त्राभरणानि यासां ताः॥ ७॥ न च कृष्णा कृष्णमनसां विघ्नाः प्रभवंतीत्याह। ता
वार्यमाणा इति॥ ८॥ न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्ता सदा नितरां दध्युरित्यर्थः॥ ९॥ किंच तदानीमेव तं परमात्मानं
श्रीकृष्णं ध्यानेन प्राप्तास्सत्यो गुणमयं देहं जहुरित्याह श्लोकद्वयेन दुःसहेति। ननु कथं जहुः परमात्मेति ज्ञानाभावादित्याशंक्याह जारबु
द्ध्यापीति॥ नहि वस्तुशक्तिः बुद्धिमपेक्षते। अन्यथा मत्वापि पीतामृतवदिति भावः। ननु तथापि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह।

लिंपंत्यः प्रमृजंत्योन्या अंजंत्यः काश्च लोचने॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः॥ ७॥ ता वार्यमाणाः पतिभिः
पितृभिर्भ्रातृबंधुभिः॥ गोविंदापहृतात्मानो न न्यवर्त्तंत मोहिताः॥ ८॥ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः॥ ९॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृ
त्या क्षीणमंगलाः॥ १०॥ तमेव परमात्मानं जारबुद्ध्यापि संगताः॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः॥ ११॥ ॥

सद्यः प्रक्षीणबंधना इति ननु कथं भोगमंतरेण प्रारब्धकर्मक्षीणमित्यर्थः। तथा ध्यानेन प्राप्ता अर्णं भोगेनैव सद्यः क्षीणमित्याह। दुःस
हेति। दुःसहो यः प्रेष्ठस्य विरहस्तेन यस्तीव्रतापस्तेन धुतानि गतान्यशुभानि यासां ताः तदप्राप्तिपरमदुःसहो यः प्रेष्ठवस्यो विरहस्ते ८५
न यस्तीव्रतापस्तेन भोगेन पापं क्षीणमित्यर्थः। तथा ध्यानेन प्राप्ता अच्युतस्याश्लेषेण या निर्वृतिः परमसुखभोगः तया क्षीणमं
गलं पुण्यबंधनं यासां ताः। अतो ध्यानेन परमात्मप्राप्तेः तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयात्तद्गुणमयं देहं जहुरिति॥ १०॥ ११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेऽपि न तद्बुद्ध्या भजनान्मोक्षः तथा बुद्ध्यभावात् । एवं कृष्णेऽपि ब्रह्मबुद्ध्यभावेन तत्संगतिः कथं मोक्षहेतुः
इति शंकते कृष्णं विदुरिति परं केवलं कान्तं कमनीयं ॥१२॥ परिहारस्तु उक्तमिति । अयं भावः जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य हृषीकेशत्वादना-
वृतं ततो न तत्र बुद्ध्यपेक्षेति भावः ॥१३॥ ननु देही कथमनावृतः स्यादत आह नृणामिति । गुणात्मनः गुणनियन्तुः भगवत एवंरूपा

राजोवाच ॥ कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने । गुणप्रवाहोपरमस्तासां गुणधियां कथं ॥१२॥ श्रीशुक उ-
वाच ॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥१३॥ नृणां निःश्रे-
यसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥१४॥ कामं क्रोधं भयं स्नेहमैक्यं सौहृ-
दमेव च ॥ नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥१५॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे
कृष्णे यत एतद्विमुच्यते ॥१६॥ ता दृष्ट्वान्तिकमायाता भगवान्व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमो-
हयन् ॥१७॥ श्रीभगवानुवाच ॥ स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद्ब्रूतागमनका-
रणं ॥१८॥ रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥१९॥ ॥

अभिव्यक्तिः रन्तो न देहि सा दृश्यं अत एव कर्तुं युज्यत इति भावः ॥१४॥ अतो यथा कथंचित्तदासक्तिः कारणमित्याह काममिति । ऐक्यं संबंधं
सौहृदं भक्तिं ॥१५॥ न च भागवतोऽयं प्रतिभार इत्याह न चैवमिति । यतः श्रीकृष्णादेतत्स्थावरादिकमपि मुच्यते ॥१६॥ प्रस्तुतमाह ।
ता दृष्ट्वेति वाचः पेशैः वाग्विलासैः ॥१७॥ सर्वाः ससंभ्रमागमने [illegible] भयमिवाह । व्रजस्येति ॥१८॥ लज्जया मंदहसितमालक्ष्याहर-
जन्येषेति ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द० स्क०
८६

किंच मातर इति। विचिन्वंति मृगयंते बंधूनां साध्वसभयं मा कृढ्वं मा कुरुतेत्यर्थः॥२०॥ ईषत्क्षणयत्कोपेनान्यतो विलोकयंतीः प्रत्याह दृष्टमि
ति एकेशस्य पूर्णचंद्रस्य करै रंजितं। यमुनास्पर्शिनोऽनिलस्य लीलामंदगतिः तया एजंतः कंपमानाः तरुपल्लवास्तैः शोभितं॥२१॥
सतीः हे सत्यः॥२२॥ संरंभक्षुभितदृष्टीः प्रत्याह अथवेति। यंत्रिताशयाः वशीकृतचित्ताः। उपपन्नं युक्तं प्रीयंते प्रीता भवंति॥२३॥ दृष्टा
दृष्टभयप्रदर्शनेन निवर्तयति भर्तुरित्यादि श्लोकत्रयेण॥२४॥२५॥ फल्गु तुच्छं कृच्छ्रं दुःसंपाद्यं औपपत्यं जारसौख्यं॥२६॥ किंच।

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः॥ विचिन्वंति ह्यपश्यंतो मा कृढ्वं बंधुसाध्वसं॥२०॥ दृष्टं वनं कुसुमितं राकेशकररंजितं॥
यमुनानिललीलैजत्तरुपल्लवशोभितं॥२१॥ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः॥ क्रंदंति वत्सा बालाश्च तान्पाययत
दुह्यत॥२२॥ अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः॥ आगता ह्युपपन्नं वः प्रीयंते मयि जंतवः॥२३॥ भर्त्तुः शुश्रूषणं स्त्री
णां परो धर्मो ह्यमायया॥ तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणं॥२४॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोपि वा॥ प
तिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥२५॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं। जुगुप्सितं च सर्वत्र औपपत्यं कु
लस्त्रियाः॥२६॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनुकीर्तनात्। न तथा संनिकर्षेण प्रतियात ततो गृहान्॥२७॥ श्रीशुक उ
वाच॥ इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितं॥ विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां॥२८॥ कृत्वा मुखान्यव शुचः ८६
श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः॥ अस्रैरुपात्तमषिभिः कुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीं॥२९॥

श्रवणादिति॥२७॥२८॥ चिंतां प्राप्तानां स्थितिमाह कृत्वेति शुचः शोकाद्धेतोर्न श्वसनेन शुष्यंतो बिंबफलसदृशा अधरा येषु मुखेषु तानि
अवनम्राणि विलक्षा तथांगुष्ठेन महीं लिखंत्यः। तथा गृहीतकज्जलैरश्रुभिः कुचकुंकुमानि क्षालयंत्यः तूष्णीं स्थिताः यत उरुदुःखभ
रोपासीताः॥२९॥

कुन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। प्रेष्ठमिति। किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ताः अब्रुवत तस्मात्संरंभे कारणं प्रेष्ठमित्यादि। प्रियेतरमिव प्रतिभाषमाणं अप्रिया
चक्षाणे॥३०॥ नृशंसे क्रूरं। दुरवग्रहं स्वच्छंद पादमूलं भक्ताः सेवितवतीः अस्मान् भज अस्मान् मा त्यजेति॥३१॥ अपि च यदुक्तं पतिसपर्येत्यादि त
या धर्मविदेति सोपहासं। एवमेतदुपदेशानां पदे विषये त्वय्येवास्तु उपदेशपदत्वे हेतुः ईशे इति विविदिषावाक्यानां सर्वोपदेशानां ईशप
रत्वावगमादिति भावः। ईशत्वे हेतुः आत्मा किल वानिति भोग्यस्याहि सर्वस्य भोक्ता त्वमेवेशोसीति। अतः प्रेष्ठो बंधुश्च भवानेवेति सर्वं बंधुकर

प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः॥ नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरो
ब्रुवतानुरक्ताः॥३०॥ गोप्य ऊचुः॥ मैवं विभोर्हति भवान् गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं॥ भक्ता भजस्व दु
रवग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून्॥३१॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति ध
र्मविदा त्वयोक्तं॥ अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा॥३२॥ ॥ ॥ ॥

णीयं त्वय्येवास्तीत्यर्थः। अथवा धर्मोपदेशानां उपदेश्यानां धर्मोपदेष्टरि त्वयि सति। अस्माकं तु च धर्मजिज्ञासमानानां सुसतीषु त्वया धर्म
विदा यदुक्तं एवमेतदस्तु। ननु त्वं धर्मोपदेष्टा किं तु भवानालोतेति अथवा यदुक्तं एतदुपदेशपदे त्वयीशे परपुरुषे स्तनाम त्वपि तु ईशो त्वामिति
सति एवं काक्षा नैवमित्यर्थः। यतस्त्वं तनुभृतां त्वमात्मा फलरूपश्चेति। यद्वा यदुक्तं पत्यादिशुश्रूषणं धर्म इत्येवमेतत्त्वय्येवास्तु। कुतः
उपदेशपदे शुश्रूषणीये त्वे नोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने। कुतः ईशे ईश्वरमधिष्ठाने विना कोपि पतिपुत्रादिर्नास्तीति।
अन्यत्समानं अलं प्राति विस्तरेण॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रा० प्र
८७

एतत्सदाचारेण दृष्टयंत्यः प्रार्थयंते कुर्वंति हीति। कुशलाः शास्त्रनिपुणाः। तथा च शास्त्रं। किं प्रजया करिष्यामो येषां नोयमात्मा लोक इत्यादि
॥३३॥ किं च। प्रतियोते तियदुक्तं तद्वाक्यं तयैव चित्ताद्दीनामपहृतत्वादेसाहुः चित्तपिति। यदस्माकं चित्तमपेताः वंतं कालं सुरवेनगृहेषु निर्विशाति
तत्त्वयापहृतं॥ करावपि योगृहस्रेय निर्विशतः तावपि। सुरवालना त्वयेति वा॥३४॥ अतः अंग हे हस्त्वनोऽस्माकं त वा धरामृतपूरकेण त
वैव हाससाहितेनावलोकेन कलगीतेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निस्तं सिंच। नो चेदयं तावदेकाग्निस्तथा विरहाज्जानिष्प

कुर्वंति हि त्वयि रतिं कुशलाः स्वत्म्रालन्नियं प्रियेपतिसुतादिभिरार्त्तिदैः किं॥ तन्नप्रसीद परमेश्वर मास्मछिंद्या आशां
धृतां त्वयि चिरादरविंदनेत्र॥३३॥ चित्तं सुरवेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये॥ पादौ पदं न
चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा॥३४॥ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगी
तजहृच्छयाग्निं॥ नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते॥३५॥ यर्ह्यंबुजाक्ष तव पादतलं
रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंगस्थातुं त्वयाभिरमिता बत पारयामः॥
॥३६॥
ते योग्निस्तेन चोपयुक्तदेहाः दग्धशरीरा योगीन इव ते पदवीमेंतिकं ध्यानेन यामः॥३५॥ ननु स्वपतीन वोपगछत त एनमग्निं सिंचे ८७
युरिति तत्राहुः। यर्हीति रमायाः। लक्ष्म्या दत्तक्षणं दत्तोत्सवं दत्तावसरं वा तदपि क्वचिदेव न सर्वदा॥ अरण्यजनाः प्रिया यस्य तव। अ
रण्यजनप्रियत्वादरण्ये कचित् यर्हि अस्प्राक्ष्म स्पृष्टवत्यो वयं। तत्र च त्वया अभिरमिता आनंदिताः सत्यः तदारभ्य अन्यसमक्षं स्था
तुमपि न पारयामः तुच्छास्ते नरोचंत इत्यर्थः॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वसादसौभाग्यं त्वतिचित्तलिप्स्याहुः। श्रीरिति वक्षसि असपत्नं स्थानं लब्ध्वापि यस्याः सपत्न्या सह तव पदांबुजरजः कामयते स्म भृ
त्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः। यस्याः स्ववीक्षणे श्रीरामने विलोक ति से तदर्थं अन्येषां ब्रह्मादीनां तयोश्रि प्रयासः सा तद्र
जः तद्वत् वयमपि प्रपन्ना इति॥३७॥ हे वृजिनार्दन दुःखहंतः त्वदुपासने त्वदङ्गसङ्ग एवाशा यासां ताः वयं वसतीर्गृहान् विसृज्य ते अंघ्रि
मूलं प्राप्ताः तव सुंदरस्मितविलसितनिरीक्षणेन यस्तीव्रः कामस्तेन तप्तात्मनां नः हे पुरुषभूषण दास्यं देहि॥३८॥ ननु गृहस्वामित्वं विहा
य दास्यं किमिति प्रार्थ्यते अत आहुः। वीक्ष्येति। अलकावृतं पुरवं केशैः तैरावृतं मुखं तथा कुंडलयोः॥ श्रीर्ययोस्ते गंडस्थले यस्मिन्। अ

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टं। यस्याः स्ववीक्षणकृतेन्यसुरप्रयासस्तद्वद्वयं
च तव पादरजः प्रपन्नाः॥३७॥ तन्नः प्रसीद वृजिनार्दन तेंघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः॥ त्वत्सुंदरस्मितनिरी
क्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यं॥३८॥ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं।
दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः॥३९॥ कास्त्र्यंग ते कलपदायतवेणुगीतसंमोहितार्यच
रितान्न चलेत्त्रिलोक्यां॥ त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्॥४०॥ ॥ ॥

धरे सुधा यस्मिन् तत् तच्च तच्च मुखं वीक्ष्य दत्ताभयं भुजदंडयुग्मं च। वक्षश्च श्रिया एकमेव रमणं रंजनकं वीक्ष्य दास्य एव भवामेति॥३९॥
ननु कुलस्त्रियस्तमोपपत्न्य मिलितुं कं तत्राहुः कास्त्रीति। अंग हे कृष्ण कलानि विपदानि यस्मिन् तदायतं दीर्घं मूर्छितं स्वरालापभेदस्तेन पाटीते
के कलपदायतमयं वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचरितान्निजधर्मान्न चलेत। यन्मोहिताः पुरुषाः। अपि चलिताः किंच त्रैलो
क्यसौभगमितियत्। यतः अबिभ्रन् अबिभरुः। तथा तत्कृष्णशब्दश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्तः किं पुनस्त्वदनुभवेनेति भावः
॥४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०पू०
८८

व्यर्त्तं निश्चितं ॥४१॥ विकुंबितं परवद्दयप्रलपितं गोपीररीरमत्ररमयामास ॥४२॥ प्रियस्य क्षणेनोत्फुल्लानि मुखानि यासां ताभिः उदारहास
श्च तेषु कुंदकुसुमवद्दीधितिर्यस्य सः ॥ एणांकश्चंद्रः ॥४३॥४४॥४५॥ बाहुप्रसारश्च परिरंभश्च करादीनामालभनेनं स्पर्शश्च नर्मपरिहा
सश्च नखाग्रपाताश्च तैः क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च कामं तासामुद्दीपयन्नताः रमयामास ॥४६॥ महात्मनो विमुक्तचित्ता

व्यक्तं भवान् व्रजभयार्त्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता ॥ तन्नो निधेहि करपंकजमार्त्तबंधो तप्तस्तनेषु च शिरःसु
च किंकरीणां ॥४१॥ श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं गोपीरात्मारामोप्यरीरमत् ॥४२॥ ता
भिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥ दु
॥४३॥ उपगीयमान उद्गायन् वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं ॥४४॥ नद्याः पुलिनमाविश्य गोपीभि
र्हिमवालुकं ॥ रेमे तत्तरलानंदिकुमुदामोदवायुना ॥४५॥ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्र
ति पातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन् रतिपतिं रमयांचकार ॥४६॥ एवं भगवतः कृष्णात् लब्धमाना महात्मनः
आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ॥४७॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतर
धीयत ॥४८॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनत्रिंशोध्यायः ॥२९॥ ॥ श्रीशुक उवाच ॥ अंतर्हिते भगव
ति सहसैव व्रजांगनाः ॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं ॥१॥ ॥ ॥ ॥ ८८

त् ॥४७॥ तत्सौभगमदं अस्वाधीनतां मानं गर्वं केशवः कृष्ण ईशश्च केशौ [illegible]व शमयति इति तथा सः ॥४८॥ इति दशमे एकोनत्रिंशो
त्तमोध्यायः ॥२९॥ ॥ विरहस्तत्र गोपीभिः कृष्णमार्गणं ॥ उन्मत्तवन्नियत[illegible]तं ताभिर्वने वने ॥१॥ अचक्षाणाः अपश्यंत्यः ॥१॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

गत्या च अनुरागस्मितानि भ्रूविभ्रमेक्षितानि सविलासनिरीक्षितानि तैश्च। मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमाः अन्ये च विलासाः तैश्च। रमापतेर्गत्यादिभिरेतैराक्षिप्तान्याकृष्टानि चित्तानि यासां ताः अतः तस्मिन्नेव आत्मा यासां ताः तस्य विविधाश्चेष्टा जगृहुः। तदनुकरणेनाक्रीडन्॥२॥ अपि च गतिस्मितेति। प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णविहारविभ्रमाः क्रीडाविलासा यासां ताः अहमेव कृष्ण इति परस्परं निवेदितवत्यः॥३॥ किंच। गायंत्य इति वनाद्वनांतरं गच्छंत्यो विचिक्युः अमुं गायन्त्यः। उन्मत्ततुल्यत्वमाह। वनस्पतीन्प्रपच्छुः भूतेषु अं

गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः
॥२॥ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्र
माः॥३॥ गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं। पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन्॥४॥
दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः॥ नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः॥५॥ कच्चित्कुरबकाशोकनागपुन्ना
गचंपकाः॥ रामानुजो मानिनीनां यातो दर्पहरस्मितः॥६॥ कच्चित्तुलसि कल्याणि गोविंदचरणप्रिये॥ सह त्वालिकु
लैर्बिभ्रद्दृष्टस्तेतिप्रियो च्युतः॥७॥

तरं मध्ये से तं पुरुषं बहिश्च संतमिति॥४॥ तत्प्रपंचयति नवभिः। तत्र महत्त्वादेते पश्येयुरित्याशया अश्वत्थादीन्पृच्छंति। दृष्ट इति प्रेमहासविलसितैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतः युष्माभिः किं दृष्ट इति॥५॥ महांतः स्वपुष्पैर्बहूपकारिणश्चेति कुरबकादीन्पृच्छंति कच्चिदिति। हे कुरबकादयः दर्पहरं स्मितं यस्य सः इतो गतः कच्चित् दृष्ट इति॥६॥ आलिकुलैः सह त्वां बिभ्रत् नवातिप्रियस्त्वया किं दृष्ट इति॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श० टी०
८९

गुणातिरेकेपि नम्रत्वादिमाः पश्येयुरिति पृच्छेतिमालतीति। हेमालति मल्लिके जातिपूथिके वः युष्माभिः किं अदर्शि दृष्टः करस्पर्शेन वः प्रीतिं जनयन् किं यातइति। अत्र मालती जात्योरवांतरविशेषाद्भेदव्यः॥८॥ फलादिभिः सर्वप्राणिसंतर्पका एते पश्येयुरिति पृच्छंति हलतेति। हलतांम्रयोरवांतरजातिभेदः। नीपकदंबयोश्च हे कृतादयः हे अन्येये च परार्थभाविकाः परार्थमेवभवो जन्मयेषां ते। यमुनायमुनोपकूलाः तस्याः कूलसमीपे वर्त्तमानाः तीर्थवासिन इत्यर्थः। ते भवंतः रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य मार्गं शंसंतु कथयंतु॥९॥ हे क्षिति हे क्षिते त्वया किं तपः कृतं यात्वं केशवांघ्रिस्पर्शोत्सवा। केशवस्यांघ्रिस्पर्शो नोत्सवो यस्याः सा कुतः अंगरुहैः खलु लक्षिता रोमांचिता विभा

मालस दर्शि वः कच्चिन्मल्लिके जातिपूथिके॥ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः॥८॥ चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः॥ येन्ये परार्थभविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः॥९॥ किं ते कृतं क्षितितपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि॥ अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन॥१०॥ अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः॥ कांतांगसंगकुचकुंकुमरंजितायाः

कुंदस्रजः कुलपतेरिह वाति गंधः॥११॥

सि शोभसे। तत्र विशेषं पृच्छंति। अपि किं मयमुत्सवः अधुना तवैकदेशांघ्रिस्पर्शसंभवः। यद्वा नैतावत् किंतु उरुक्रम विक्रमात् पूर्वमेव त्रिविक्रमस्य पदाक्रमणात्। आहो अथवा नैतावदेव अपितु ततोपि पूर्वं वराहस्य वपुषः परिरंभणे नेति अतस्त्वया नूनं दृष्टस्तं दर्शये ति॥१०॥ हरिण्या दृष्टिप्रसत्त्या कृष्णदर्शनं संभाव्याहुः। अपीति हे सखि एणपत्नि अपि किं उपगतः समीपं गतः गात्रैः सुंदरैः सुखवाक्यादिभिः प्रियया सहेति यदुक्तं तत्र द्योतके कांताया अंगसंगः तेन तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य व ॥९॥ ८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलभारेण नतांस्तरून् लतां च दृष्ट्वा प्रणता इति मत्वा प्रियया सहितस्य गतिविलासं भावयंत्यः पृच्छंति। बाहुमिति। तुलसिकाया अलिकुलैः
अनुवर्त्यमानो मदांधैरन्वीयमानः अनुगम्यमान इह चरन्निति॥१२॥ काश्चिदाहुः। हे सख्यः इमा लताः कृष्णसंगता नूनमत इमाः पृ
च्छत। ननु स्वपतिसंगतौ तत्संगतिर्दुर्घटा। न वनस्पतेः पत्युर्बाहुनाश्लिष्टा अपि अहो भाग्यं नूनं तत्करजैः स्पृष्टाः यत उत्पुलकानि
बिभ्रति। न हि स्वपतिसंगतौ ईदृक् ईदृक् पुलकसंभव इति भावः॥१३॥ उन्मत्तकवदपृच्छन्नित्येतत्प्रपंचितं। इदानीं रमापतेस्ता

बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः॥ अन्वीयमान इह वस्तरवः प्रणामं किं
वाभिनंदति चरन् प्रणयावलोकैः॥१२॥ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः॥ नूनं तत्करजस्पृष्टा
बिभ्रत्युत्पुलकान्यहो॥१३॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदा
त्मिकाः॥१४॥ कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं॥ तोकायित्वा रुदत्यन्या पदाहन् शकटायतीं॥१५॥ दैत्या
हा यित्वा जहारान्यामेको कृष्णार्भभावनां॥ रिंगयामास काप्यंघ्री कर्षती घोषनिस्वनैः॥१६॥ कृष्णरामायिते द्वे तु गोपा
यंत्यश्च काश्चन॥ वत्सायतीं हंति चान्या तत्रैका तु बकायतीं॥१७॥ ॥ ॥ ॥ ॥

स्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति। इतीति उन्मत्तवचो गोप्यः उन्मत्तवचसश्च ताः गोप्यश्च कृष्णान्वेषणे न कातरा अति
विह्वलाः अनुचक्रुरनुकृतवत्यः॥१४॥ कस्याश्चिदित्यादि चतुर्भिरनुकरणं प्रपंच्यते। ततश्चतुर्भिस्तन्मयत्वं पुनरेकेनानुकरणमिति
विवेकः। पूतनायंत्याः पूतनावदाचरंत्याः कृष्णवदाचरंती स्तनमपिबत्। तोकोपि सा तोकवद्बालानंदला॥१५॥ दैत्यापि सा दैत्यवत्तृ
णावर्तवदाचरंती कृष्णार्भभावनां कृष्णस्यार्भबाल्यं भावयति या तामन्यां जहार॥१६॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं० पू० हरगः हरेर्वर्त्तमानाः गाः यद्वत् यथा कृष्णः तथा आन्हयतं कृष्णमनुवर्त्ततीं अनुवर्त्तमानां अनुकुर्वतीमिति वा पाठः ॥१८॥ १९॥ यतंतीय
९० त्नं कुर्वतीति । अंबरं उत्तरीयवस्त्रं उन्निदधे ऊर्ध्वं धृतवती ॥२०॥२१॥ आपिदध्वं निमीलय ॥२२॥ सुदृक् सुनयना आस्यं पिधाय मुखं ढक्

आन्हयद्वद् गा यद्वत् कृष्णस्तमनुवर्त्ततीं ॥ वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति ॥१८॥ कस्यांचित् स्वभुजं न्य
स्य चलंत्याहापरा ननु ॥ कृष्णोहं पश्यत गतिं ललितामिति तन्मनाः ॥१९॥ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥
इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंबरं ॥२०॥ आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप ॥ दुष्टाहे गच्छ जातोहं खलानां
ननु दंडकृत् ॥२१॥ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणं ॥ चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा ॥२२॥ बद्धान्य
या स्रजा काचित्तन्वी तत्र उलूखले ॥ भीता सुदृक् पिधायास्यं भेजे भीतिविडंबनं ॥२३॥ एवं कृष्णं पृच्छमाना वृंदावनलता
स्तरून् ॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥२४॥ पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः ॥ लक्ष्यंते हि ध्वजांभो
जवज्रांकुशयवादिभिः ॥२५॥ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योग्रतोबलाः ॥ वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः स
मब्रुवन् ॥२६॥ कस्याः पदानि चैतानि यातायानंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥२७॥ अ
नयाराधितो नूनं भगवान् हरिरीश्वरः ॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः ॥२८॥ ॥ ॥ ९०

वराक्षीति वा भीतिविडंबनं भयानुकरणं ॥२३॥ एवं पुनरपि वृंदावने लतास्तरूंश्च पृच्छंत्यः ॥ वनोद्देशे व्यचक्षत अपश्यन् ॥२४॥२५॥ सु
पृक्तानि संमिश्राणि ॥२६॥ तेन अंसे न्यस्तः प्रकोष्ठो यस्याः करेणोः हस्तिन्याः ॥२७॥ रहः एकांतस्थानं ॥२८॥ ॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे आल्यः सख्यः अहो धन्या अति पुण्याः गोविंदांघ्र्यब्जरेणवः। तत्र हेतुः। यानिति। अस्याभिरप्येतद्रेणवभिषेकेण तथैव कृतः प्राप्तुं शक्यत इति भावः॥२९॥ अन्या आहुः तस्या इति। गोपीनां सर्वस्वं। अयं भावः। भवेदेयदि तस्याः पदानि नभवेयुः तानि तु नोऽद्य खं कुर्वंति॥३०॥ तदसह एका नु केवल कमलपादरेणु नेव विविच्यंत्यस्ता दृष्ट्वा पुनरंस्ये तंसमतयनूत दाह श्लोकत्रयेण न लक्ष्यंत इति। खिद्यतीसु जाते सुकुमारे। आंघ्रितलयस्यास्तां उन्निन्ये स्कंधमारोपितान्॥३१॥ प्रपदाभ्यां आक्रमणे क्षोणीसंपर्क जंघयोः अतएवासकले पदे प

धन्या अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः॥ यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये॥२९॥ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत्॥ यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरं॥३०॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः॥३१॥ इमान्यधिकमग्नानि पदानि वहतो वधूं॥ गोप्यः पश्यत कामस्य भाराक्रांतस्य का

मिनः॥ अत्रावरोपिता कांता पुष्पहेतोर्महात्मना॥ अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः॥ प्रपदाक्रमणे एते पश्यतासकले पदे॥३२॥ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं॥ तानि चूडयता कांतामुपविष्टमिह ध्रुवं॥३३॥ रेमे तया चात्मरत आत्मारामोऽप्यखंडितः॥ कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां॥३४॥ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः॥ यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने॥३५॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोषितां॥ हित्वा गोपीः कामयाना मामसौ भ

श्यतेति॥३२॥ तस्याः कुसुमजान्वृंतरूपविषयाश्चिन्हदृष्ट्वाहुः। केशप्रसाधनमिति। कांतामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकारेण धृता इह ध्रुवमुपविष्टं॥३३॥ रेमे इत्यादि युक्तिभिः। आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखंडितः स्त्रीविभ्रमैरनाकृष्टोऽपि। तथापि वेत्थंभितिरमेतत्राह। कामिनामिति॥३४॥३५॥ स्त्रीणां दुरात्मतामाह। सा चेति द्वाभ्यां। कामो यानमागमनसाधनं यासां ताः गोपीर्हित्वा मां भजते

४ तामिका

द.स्कं.१० ॥३७॥ कामिनीं दैन्यं दर्शयति। एवमुक्त इति। अरंववि तत्वमाह। ततश्चेति। तस्यां स्कंधारोहे उद्यतायामंतर्हित इत्यर्थः॥३८॥ अनुतापमाह।
९१ हा नाथेति॥३९॥ अन्विच्छंत्यः मृगयमाणाः अविहरतः समीपे॥४०॥४१॥ ततस्तयापि सहिताः। कृष्णान्वेषणाय वनमविशन्। ततो
हरेरन्वेषणान्निवृत्ताः॥४२॥ एवं तमप्राप्ताः अपि स्वगृहान् नैव स्मरंत्यः। तदात्मिकाः स एव आत्मा यासां ताः तन्मय इत्यर्थः॥४३॥ दिं

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत्॥ न पारयेहं चलितुं नय मां यत्र ते मनः॥३७॥ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति।
ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत॥३८॥ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज॥ दास्यास्ते कृपणाया मे सखे दर्शय संनि
धिं॥३९॥ अन्विच्छंत्यो भगवतो मार्गं गोप्योऽविदूरतः॥ ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीं॥४०॥ तया कथितमाक
र्ण्य मानप्राप्तिं च माधवात्॥ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः॥४१॥ ततोऽविशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते
तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः॥४२॥ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः॥ तद्गुणानेव गायंत्यो नात्मागा
राणि सस्मरुः॥४३॥ पुनः पुलिनमागत्य कालिंद्याः कृष्णभावनाः॥ समवेता जगुः कृष्णं तदागमनकांक्षिताः॥४४॥ इति
श्रीभागवते महापुराणे दशमस्कंधे कृष्णविश्लेषव्याकुलगोपीकृतकृष्णान्वेषणं नाम त्रिंशोऽध्यायः॥३०॥ ॥७॥ ॥ ९१

तु पूर्वं यत्र श्रीकृष्णेन संगता आसीत्तत्रादेव कालिंद्याः पुलिनमागत्य कृष्णभावयंतीति तथा ताः। कृष्णस्यागमनं कांक्षितं यासां ताः
मिलिताः सत्यः कृष्णमेव जगुरिति॥४४॥ इति दशमे त्रिंशोऽध्यायः॥३०॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः ॥ कृष्णमेवानुगायन्त्यः प्रार्थयन्ते तदागमं ॥१॥ जयतीति हे दयित। ते जन्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्त्तते यस्मात् तत्र जातस्तस्मात् इंदिरा लक्ष्मीरत्र हि श्रयते अत्र जन्मफलं हि सेयं वर्त्तते एवं व्रजे सर्वस्मिन्नप्युदमाने अ स्मत्ता तावकास्त्वदीया गोपीजनाः त्वयि तदर्थमेव धृताः धृता असवो यैस्ते त्वां विचिन्वते। अतस्त्वया दृश्यतां प्रत्यक्षीभूयता मिति यद्वा अस्माभिः भवान् दृश्यतां। यद्वा वयं त्वया दृश्यते इति ते विचिन्वत इति। अत्र स्वतंत्राणां बहूनां वतद्वृत्तावपरा आकुतिस्सर्वसर्व श्लोकेषु वतारणा तथापि संगतिरूह्यते ॥१॥ तत्र विचिन्वंतु मम किमिति चेत्तत्राहुः शरदिति शरदुदाशये शरत्काले नैसरसि साधुजातसत्स रसिजोदरश्रीमुषा साधु जातं सम्यक् जातं यत्सरसिजं सुविकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तया तया दृशा नेत्रेण।

गोप्य ऊचुः ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि॥ दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥१॥
शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा॥ सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥२॥ विषजला
प्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात्। वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥३॥ ॥ ॥

हे सुरतनाथ संभोगपते। वरद अभीष्टप्रद। अशुल्कदासिकाः अविमूल्यदासीः निघ्नतो मारयतस्ते तव त्वया क्रियमाणः इह लोके अयं वधो न भवति किं किं शस्त्रेणैव वधो वधः। किं दृशा वधो न भवति किंतु भवत्येव। अतस्त्वदृशा अपहृतप्राणा प्रत्यर्पणाय त्वया दृश्यतामिति यथासंभवं सर्वत्र वाक्यशेषः ॥२॥ किं च बहुभ्यो मृत्युभ्यः त्वया रक्षिताः किमितीदानीं दृष्टापेक्षसे यद्वा तयसीया हु चविषेति हे ऋषभ श्रेष्ठ विषजलमयात् कालियादाप्ययो नाशस्तस्मात्। तथा व्यालराक्षसादघासुरात् वर्षान्मारुतात् वैद्युतानलात् अत्र दावाग्नि योतात् वज्रपातात्। वृषोऽरिष्टस्तस्मात्। मयात्मजाद्व्योमात् विश्वतः अन्यस्मादपि सर्वतो भयाच्च कालियदमनात् रक्षिताः किमिदानीं

द॰श॰पू॰
९९

अपि च विश्वपालनायावतीर्णस्य तव भक्तो येष्वप्रयंतचित्ते सात्त्वता येनाहुः। न खल्विति हे सखे भवान् खलु निश्चितं यशोदासुतो न भवति
किं तु प्राणिनां बुद्धिसाक्षी न तु सर्व्वैः दृश्यो भवति तत्राहुः विखनसा ब्रह्मणा विश्वपालनाय प्रार्थितः सन् सात्वतां कुले उदेयिवान्
उद्भूत इति॥४॥ तस्मात्त्वं ह्यस्माकं एतत्प्रार्थनाचतुष्टयं संपादयेत्याहुः विरचिताभयमित्यादि चतुर्भिः हे वृष्णिधुर्य संसृतेर्भ
यात्ते चरणमीयुषां शरणं प्राप्तानां प्राप्तिवतां। विरचितं दत्तमभयं येन तं तथा। हे कामदेव वरदं। तथा श्रियः करं गृह्णातीति तथा त
त्भवत्करसरोरुहं नः शिरसि धेहि॥५॥ हे व्रजजनार्तिहन् हे वीर निजजनानां यः स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य तेन तया।

न खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक्॥ विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले॥४॥ विर
चिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात्॥ करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहं॥५॥ व्रजजनार्तिह
न्वीर योषितां निजजनस्मयध्वंसनस्मित॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय॥६॥ प्रणतदेहिनां पा
पकर्षणं तृणचरानुगं श्रीनिकेतनं॥ फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयं॥७॥ मधुरया गिरा वल्गुवाक्य
या बुधमनोज्ञया पुष्करेक्षण॥ विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः॥८॥ ॥ ॥ ॥

भक्त हे सखे। भवत्किंकरीः नः अस्मान् भज अस्माकं यस्त्वास्मेति निश्चितं प्रथमं तावज्जलरुहाननं चारु योषितां नो दर्शय॥६॥ अविशेषे ९९
ण प्रणतानां देहिनां पापकर्षणं पापहंतृ। तृणचराननुपशून् अनुगच्छतीति पश्येतितथा सौभाग्ये न श्रिये निकेतनं वीर्यातिरेकेण
फणिनः फणास्वर्पितं ते पदांबुजं नः कुचेषु कृणु कुरु किमर्थं। हृच्छयं कामं छिंधि॥७॥ हे पुष्करेक्षण तवैव मधुरया गिरा
वल्गूनि यस्यां तया बुधानां मनोज्ञया हृदयंगमगंभीरयेत्यर्थः। मुह्यतीरिमा नः विधिकरीरधरसीधुना आप्याययस्व संजीवयेति
॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। अस्माकं त्वद्विरहे प्राणमेव मरणं किंतु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्दत्तं चितप्रियसासु हुः। तदेवेति। कथ्ये वामृतं। अत्रहेतुः तप्तजीवनं प्र
सिद्धा द्यमृता तु कैर्षमाहुः कविभिर्ब्रह्मविद्भिरपीडितं स्तातां देवभोग्यं त्वमृतं तैस्तु छौल्यं। किंच। कल्मषापहं कामकर्मविरसवं तत्त्वम
तन्नैवंमृतं। किंच। श्रवणमंगलं श्रवणमात्रेण मात्रेण मंगलप्रदं तत्तु अनुष्ठानापेक्षं। किंच। श्रीमत् सुशांतं। तत्तु मादकं। एवंभूतं त्वत्कथामृ
तं श्रीतते यथा भवति तथा भुवि ये गृणंति निरूपयंति ते जनाः भूरिदाः बहुदातारः जीवितं ददतीत्यर्थः। यद्वा एवं त्वत्कथामृतं ये भुविगृ
णंति ते भूरिदाः पूर्वजन्म सुबहुदत्तवंतः सुकृतिन इत्यर्थः। एतदुक्तं भवति सर्वत्र ये केवलं कथामृतं गृणंति ते पिता वदति धन्याः किं
पुनः ये त्वां पश्यंति। अतः प्रार्थयामहे त्वयादृश्यतामिति॥९॥ ननु मत्कथाश्रवणे नैव निर्वृता भवंतु। किं मद्दर्शनेन त्वद्विलास स्मृतिनाव

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं॥ श्रवणमंगलं श्रीमदाततं भुवि गृणंति ये भूरिदा जनाः॥९॥ प्रहसितं प्रिय
प्रेमवीक्षणं विहरणं च ते ध्यानमंगलं॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि॥१०॥ चलसि यद्व्रजाच्चार
यन्पशून्नलिनसुंदरं नाथ ते पदं॥ शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति॥११॥ दिनपरिक्षये नीलकुंत
लैर्वनरुहाननं बिभ्रदावृतं॥ घनरजः स्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीरयच्छसि॥१२॥ ॥ ॥ ॥

यं तत्रापि शांतिं न विंदाम इत्याहुः। प्रहसितमिति। हे प्रिय कुहक कपट। संविदः संकेत नर्मोक्तयः॥१०॥ किंच। त्वयि वयमति प्रेमार्द्रचित्ताः
त्वं पुनरस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्वयेन चलसीति। हे नाथ कांत यद्यदा व्रजाच्चलसि पशूश्चारयन् तदा तत्र न
सुंदरं कोमलं ते पदं शिलैः कणिशैः तृणैरंकुरैश्च सीदति क्लिश्यते इति नो मनः कलिलतां अस्वास्थ्यं गच्छति प्राप्नोति एवंभूता स्त्वदुःख
शंकितचित्ता वयं॥११॥ त्वं तु दिनपरिक्षये सायंकाले नीलकुंतलैरावृतं घनरजः स्वालं गोरजः छुरितं वनरूहाननं आलिमालाकुलपरा
गगच्छुरितापमतुल्यमाननं बिभ्रत् तच्च मुहुः दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि। न तु संगं ददासीति कपट इति भावः॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०पू० ९३ अतोधुना कपटं विहायैवं कुर्विति प्रार्थयंते श्लोकद्वयेन। प्रणतकामदमिति हे आधिहन् हे रमण पद्मजेनार्चितं। आपदि ध्यानमात्रेणापन्निवर्त
कं शंतमं च सेवासमये चापि सुखतमं तव चरणपंकजं कामतापदं नीतये नस्तेन स्तने धेयं येति॥१३॥ अपि च हे वीर ते अधरामृतं नो वितर देहि।
स्वरितेन नादितेव वेणुना सुष्ठु चुंबितमिति। नादामृतवासितमिति भावः॥ इतररागविस्मारणं इतरेषु सर्वभौमादिसुखेषु रागमिच्छां वि
स्मारयति विलापयतीति तथा ततं॥१४॥ किंच क्षणमपि तव दर्शने दुःखं। दर्शने सुखं दृष्ट्वा सर्वसंगपरित्यागेन यद्भवंतं वयं त्वामुपागताः
त्वं तु यमस्मांस्त्यक्तुमुत्सह इति सकरुणमुत्तुः अटतीति द्वयेन। यत् यदा भवान् काननं वृंदावनं प्रति अटति गच्छति। तदा त्वामपश्यतां प्राणि

प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि। चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन्॥१३॥ सुरतवर्द्धनं
शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं॥ इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतं॥१४॥ अटति यद्भवानह्नि का
ननं त्रुटिर्युगायते त्वामपश्यतां॥ कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां॥१५॥ पतिसुतान्वयभ्रातृबांधवा
नतिविलंघ्य तेंत्यच्युतागताः॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि॥१६॥ ॥ ॥ ॥

नां त्रुटिः क्षणार्धमपि युगवद्भवति एवमदर्शने दुःखमुक्तं॥ पुनश्च कथंचिद्दिनांते ते तव श्रीमन्मुखं उत्तु उच्चैर्निरीक्ष्यमाणानां तेषां दृ ९३
शां पक्ष्मकृत् ब्रह्मा जडो मंद एव निमेषमात्रमप्यंतरमसह्यं। इति दर्शने सुखमुक्तं॥१५॥ तस्मात् हे अच्युत यन्नीवक्षुतान् अन्व
यान् तत्संबंधिनश्च तत्र बांधवांश्च अतिविलंघ्य तव समीपमागता वयं कथंभूताः तस्य गतिविदः अस्मदागमनं जानतः गीतगती
वीजानतः। गतिविदो वयं वा रव उच्चैरितेन उच्चैर्गीतेन मोहिताः हे कितव शठ। एवंभूता योषितो निशि रवयमागताः सा प्रते कस्त्य
जेत् न कोपीत्यर्थः॥१६॥

स्मितस्तया यत्कौतुकमस्माकं प्राक्तनं तदद्य नितिरां तस्य तत्संगसैव विदितं तावद्विसाहुः। हृदयेन रहसीति। श्रियो धाम तेरहद्विरालं उरश्च विश्व श्रीतीस्पृह। भवतितथा च मुहुर्मुहुः मनो मुह्यति॥१७॥ तव व्यक्तिं रमिं केः व्रजेवनौकसां सर्वेषां स्मविशेषेण वृजिनं हंत्रीदुःखनि हसनी। विश्वमंगलं सर्वमंगलरूपा च स्मितस्पृहारूढं मनसीनः मनाक्ईषत किमपि त्यजमुंच। कार्पण्यमकुर्वन्नदेहीत्यर्थः। किंतत्स्व जनहृद्रोगाणां यदिति गोप्यं निष्पूदनं विवर्तकं मौषधं तत्त्वमेव वेत्सीति गूढाभिप्रायं॥५॥ अतिप्रेमधर्षिता स्वं सस्मुहुः यदितिपञ्चेत

रहसि संविदं हृच्छयोदयं प्रहसितानं प्रेमवीक्षणं॥ वृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः॥१७॥
व्रजवनौकसां व्यक्तिरंगते वृजिनहंत्र्यलं विश्वमंगलं॥ त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं॥१८॥
यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु॥ तेनाटवीमटसि तद्व्यथते न किंस्वित् कूर्पादिभि
र्भ्रमति धीर्भवदायुषां नः॥१९॥ इति श्रीभागवते महापुराणे दशमस्कंधे एकत्रिंशोध्यायः॥३१॥ ॥ श्रीशुकउ
वाच॥ इतिगोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा॥ रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः॥१॥ ॥

वस्तु कुमारं पदांबुजं कठिनेषु कुचेषु मदर्शीन शंकिताः शनैः शनैः दधीमहि धारयेव वयं तेनाटवीमटसि नसीति पाठे पभ्रून्वा कांचिद
न्यां वा स्मालानम्र वव नयसि प्रापयसि। ते तत्तः तत्पदांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्नव्यथते कथं नु नाम न व्यथेतेति
भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति॥१९॥ इति दशमे एकत्रिंशोध्यायः॥३१॥ ॥ द्वात्रिंशे विरहालापविक्लिन्न
हृदयो हरिः॥ तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन्॥१॥ सप्रेमामृतकल्लोलविह्वलीकृतचेतसः॥ स दर्शनं ददौ गोपीस्तुष्टिनं नंदनः
॥२॥ इतिगोप्य इति। एवं प्रभृति चित्रधा अनेकधा सुस्वरं उच्चैः कृष्णदर्शने लालसा अतिस्पृहायासां ताः॥१॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शी०पू०
९४

साक्षान्मन्मथमन्मथः जगन्मोहनस्य कामस्यापि मनसि उद्भूतः कामः साक्षात्तस्यापि मोहक इत्यर्थः ॥२॥ तन्वः करचरणादयः ॥३॥ अंजलि
ना संहतहस्तद्वयेन ॥४॥५॥ भ्रुकुटिं भ्रुवमावध्य कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला विवशा दृष्टा घ्नतीव कटाक्षैः कटाक्षाः
तैर्य आक्षेपाः परिभवास्तैस्ताडयंतीव ऐक्षत ॥६॥ अनिमिषतीभ्यां दृग्भ्यां आपीतमपि सम्यग्दृष्टमपि पुनः पुनः जुषाणा नातृप्यत

तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२॥ तं विलोक्यागतं प्रेष्ठं
प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ॥३॥ काचित्करांबुजं शौरेर्जगृहेंऽजलिना मुदा ॥
काचिद्दधार तद्बाहुमंसे चंदनरूषितं ॥४॥ काचिदंजलिनागृह्णात्तन्वी तांबूलचर्वितं ॥ एका तदंघ्रिकमलं
संतप्ता स्तनयोरधात् ॥५॥ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥६॥
अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥७॥ तं काचिन्नेत्ररंध्रे
ण हृदि कृत्य निमील्य च ॥ पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ॥८॥ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥९॥ ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोचताधिकं तात
पुरुषः शक्तिभिर्यथा ॥१०॥ ताः समादाय कालिंद्या निर्विश्य पुलिनं विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ॥११॥ ॥

॥७॥ हृदि कृत्य हृदयं नीत्वेत्यर्थः ॥८॥ प्राज्ञं ईश्वरं प्राप्य यथा मुमुक्षवो जनाः ॥ यद्वा प्राज्ञं प्रेत्य ह प्राप्य यथा संसारिणः । यद्वा प्राज्ञं सौषुप्त प्रा
प्य यथा विश्वतैजसावस्था जीवाः ॥९॥ पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा ॥ यद्वा उपासकः पुरुषः ज्ञानवीर्यबलादिभिः । यद्वा पु
रुषो अनुशायी प्रकृत्याद्युपाधिभिः वृतो यथा विरोचते इति ॥१०॥ विकसत्कुं[illegible]हारैः सुरभिः यः अनिलस्तस्मात् षट्पदा यस्मिन् तत् ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरच्चंद्रांशूनां संदोहैः समूहैर्ध्वस्तं दोषातमः रात्रिगतं तमो यस्मिन् तं। अतः शिवं सुखकरं। हस्तारूपैस्तरलैस्तरंगैराचिता आस्तृता याः को-
मलावालुका यस्मिन्। एवंभूतं पुलिनं ताः समागत्य निर्भयं तत्र ताभिः वृतो ऽर्च्यकं व्यरोचतेति पूर्वेणान्वयः॥१२॥ ताश्च मनोरथानामंतं
ययुः पूर्णकामा बभूवुः। श्रुतयो यथेति। अयमर्थः। यथा कर्मकांडे श्रुतयः परमेश्वरमपश्यंत्यस्तत्क्लेमानुबंधैरपूर्णा इव भवंति। ज्ञान
कांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामानुबंधं जहतीति तद्वदिति। आसनकामा अपि प्रेम्णा तमभजन्नि साहस्वैरिति। अचीकॢपन् तत्स्वया

शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं॥ कृष्णाया हस्ततरलाचितकोमलवालुकं॥१२॥ तद्दर्शनाल्हादविधूतहृद्रु-
जो मनोरथांतं श्रुतयो यथा ययुः॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीकॢपन्नासनमात्मबंधवे॥१३॥ तत्रोपविष्टो भ-
गवान् स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः॥ चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्॥१४॥
सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा॥ संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपि-
ता बभाषिरे॥१५॥ गोपिका ऊचुः॥ भजतोऽनुभजंत्येक एक एतद्विपर्ययं॥ नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भो॥१६॥

मास्तुः। आत्मबंधवेऽन्तर्यामिणे॥१३॥ गोपीसभागतस्ताभिः संभावितः सन् चकास शुशुभे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव प-
दं स्थानं तद्वपुर्दधत् दर्शयन्॥१४॥ सहाससलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः संस्पर्शनेन संमर्द्दनेन॥१५॥
अथ भगवता ऽस्त्रज्ञं तां तद्वचनेनैवापादयितुकामाः गूढाभिप्रायालोकवर्त्तीतमपि वस्तु पृच्छंति भजत इति। भजतः प्राणिनः अनुभ-
जंतं केचित्तद्भजनानुसारेण भजंति केचिदेतद्विपर्ययं यथा भवति तथा तद्भजनानपेक्षमभजतोपि भजंति। अन्ये तूभयानिति
॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰शं॰पू॰
९५

विदिताभिप्राय उत्तरमाह मिथइति। हेसख्यः उपकारतयाये मिथोभजंतेते अन्यं नभजंति किंतात्मानमेव कुतः हियस्मात् स्वार्थ एवैकांतः
उद्यमोयेषांते। तत्र च नसौहृदं। अतेन सुखं। नचधर्मः इष्टोदेहा। क्षेमहिष्यादिभजनवदिदं स्वार्थः॥१७॥ येतुअभजतोभजंतिते द्विविध
रः करुणाः स्निग्धाश्च। तत्रतुयथा करुणं धर्मकामोभवतिरसाह भजतंस्यभजेतइति॥१८॥ तृतीयप्रश्नस्योत्तरं भजतोपीति। अयमर्थः॥ ते
चतुर्विधाः एके आत्मारामाः अपराग्दृशः केचिदाप्तकामाः विषयदर्शिनोपि पूर्णकामत्वेन भोगेच्छारहिताः॥ अकृतज्ञाः संमूढाः। अ

श्रीभगवानुवाच॥ मिथोभजंतियेसख्यः स्वार्थैकांतोद्यमाहिते॥ नतत्रसौहृदं धर्मः स्वार्थार्थं तद्धिनान्यथा।१७॥
भजंत्यभजतोयेवैकरुणाः पितरोयथा॥ धर्मोनिरपवादोत्रसौहृदं च सुमध्यमाः॥१८॥ भजतोपि नवैकेचिद्भज
त्यभजतः कुतः॥ आत्मारामाह्याप्तकामा अकृतज्ञागुरुद्रुहः॥१९॥ नाहंतुसख्योभजतोपिजंतून्भजाम्यमीषा
मनुवृत्तिवृत्तये॥ यथाऽधनोलब्धधनेविनष्टे तच्चिंतयाऽन्यन्निभृतोनवेद॥२०॥ ॥ ॥ ॥

न्ये गुरुद्रुहः। अतिकठिनाः सपितायस्त्वयोपकइतिन्यायादुपकर्त्तागुरुस्तुल्यः तस्मैद्रुह्यंतीतितथाते॥१९॥ अत्र चरमकोटिगत ९५
मात्मानंमत्वो आक्षिसंन्निकोचैः परस्परगूढस्मितमुखीस्ताहस्वाऽह। नाहंत्विति। हेसख्यः अहंतेषांमध्येनकोपि किंतुपरमकारुणि
कः परमसुहृच्च। कथं अमीषां भजतामनुवृत्तिवृत्तये निरंतरंध्यानप्रवृत्त्यर्थं तान्नभजामि। एतत्सदृष्टांतमाह यथेति तस्यधनस्यै
वचिंतयानिभृतः पूर्णो व्याप्तइतियावत् अन्यत् क्षुत्पिपासादिकमपि नवेद॥२०॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंमदर्थोज्झितलोकवेदस्वानां। मदर्थेउज्झिताः लोकः युक्तेफक्ता प्रतीक्षणात् वेदस्य धर्माधर्मप्रतीक्षणात् तस्याः ज्ञातभयश्च स्नेहत्यागात् तया
मिस्त्रासांवोयुष्माकंपरोक्षमदर्शनंयथाभवतितथाभजताय फथाहेमालोपात् श्रण्वतेदतिरोहितमं तर्धानेनास्थितं ततस्मात् हे अबलाः
हेप्रियाः मामं आस्पयितुदोषारोपणं द्रष्टं रूपं मार्हथ नयोग्याः स्थ॥२१॥ आस्तामिदं परमार्थंतु शृणुतेत्याह नेति। निरवद्यसंयुजां नि
रवद्यासंफकूसंयोगोयासांतासांवः विबुधायुषापिचिरकालेनापि स्वीयंसाधुकृत्यंप्रत्युपकारं कर्तुंनपारयेनशक्नोमि। कृथम्भूता
नांयामाभवसादुर्जराः अजराः याः गृहशृंखलाः ताः संवृश्च्यातिः च्छित्वा मांअभजन्तासांमच्चित्तं तुबहुषुप्रेमयुक्तं तयानैक

एवंमदर्थोज्झितलोकवेदस्वानांहिवोमय्यनुवृत्तयेऽबलाः॥ मयापरोक्षंभजतातिरोहितंमाऽसूयितुंमार्हथतत्प्रियंप्रि
याः॥२१॥ नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यंविबुधायुषापिवः॥ यामाऽभजन्दुर्जरगेहशृंखलाः संवृश्च्यतद्वः
प्रतियातुसाधुना॥२२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वात्रिंशोऽध्यायः॥३२॥ ॥श्रीशुकउवाच॥ इ
त्थंभगवतोगोप्यः श्रुत्वावाचः सुपेशलाः॥ जहुर्विरहजंतापं तदंगोपचिताशिषः॥१॥ तत्रारभतगोविंदोरासक्रीडा
मनुव्रतैः॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः॥२॥ ॥ ॥ ॥ ॥

निष्टं तस्माद्वः फथाकमेवसाधुनासाधुकृत्येनततप्रत्युपकारसाधुकृत्यं प्रतियातुप्रतिकृतंनभवतुफथासौशील्येनैवममानृण्यंनतुमा
कृतप्रत्युपकारेणेत्यर्थः॥२२॥ इतिदशमेद्वात्रिंशः॥३२॥ ॥ त्रयस्त्रिंशेततोगोपीमंडलीमध्यगोहरिः॥ प्रियास्ताः रमयामास
ह्लादिनीनवकेलिः॥१॥ ततः। अंगहेराजन्यद्वातस्यभगवतोंगेनवपुषाकरचरणाद्यवयवैर्वाउपचिताः समृद्धाः आशिषोयासां
ताः॥१॥ रासक्रीडांरासोनामबहुनर्तकीयुक्तोनृत्यविशेषःतांक्रीडां। अन्योन्यंआबद्धासंग्रथितावोयैस्तैः॥२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्साहित्यमभिनयेन दर्शयति। रामो सवर्द्धरसस्तत्तुष्ट्याधिके नसोद्दीन। तासां मंडलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कृष्णेन गृ-
हीतानां उभयत आलिंगितानां कथंभूतेनयं संरो: स्त्रियः स्वस्व निकटं मामेवाश्लिष्य वो नितिमन्येरन्तेन। एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेने-
त्यर्थः। नन्वेकस्य कथं तथा प्रवेशः सर्वसंनिहितत्वेवा कुतः स्वैकनिकट लाभिमानस्तासामित्यत उक्तं योगेश्वरेणेति अचिन्त्यशक्तिनेत्यर्थः॥
३॥ यावत् तत्क्षणमेव अस्यौत्सुक्य व्याप्तमानसो सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो वभूव॥४॥ ॥ सप्रियाणां हृल्लसहि-
तानां तुमुलः संकीर्णः॥६॥ महामारकतेनालमणिरिव हैमानां मणीनां मध्ये ताभिराश्लिष्टाभिः शुशुभे गोपी हृष्यत्यभिप्रायेणैव वा विने

रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः। योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः। प्रविष्टेन गृहीतानां कंठे स्वनिकटं
स्त्रियः॥३॥ यमन्येरन्नभस्तावद्विमानशतसंकुलं। दिवौकसां सदाराणामौत्सुक्यभृतात्मनां॥४॥ ततो दुंदुभयो ने-
दुर्निपेतुः पुष्पवृष्टयः। जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलं॥५॥ वलयानां नूपुराणां किंकिणीनां च योषितां।
सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले॥६॥ तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः। मध्ये मणीनां हैमानां महा-
मरकतो यथा॥७॥ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः। स्वि-
द्यन्मुख्यः कबररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः॥८॥ ॥ ॥ ॥

व मध्ये यद्वा तत्तिमेकवचनं॥७॥ स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह। पादन्यासैरिति। भुजविधुतिभिः करचालनैः भ- ९६
ज्यमानैर्मध्यैश्चलद्भिः कुचैश्च पटैश्च गंडलोलैः गंडेषु चंचलैः। स्विद्यंति स्वेदयुक्तानि मुखानि यासां ताः कबरे पुरशनाश्च दृढा
ग्रंथयो यासां ताः। यद्वा ते पुता सु च अग्रंथयः शिथिलग्रंथयः इत्यर्थः। तत्र नानामूर्तिः कृष्णो मेघचक्रमिव। तास्तु बहुविधास्तडित
इव स्वेदस्तु पारस्व गीतं गर्जितमिव चेतियथा संभवमूह्यं॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृत्यमानाः नर्त्तयंत्यः । रक्तकंठ्यः नानारागैरनुरंजितकंठाः कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः । इदं विश्वं ॥९॥ मुकुंदेन सह स्वरस्वरजा
तीः षड्जादिस्वरालापगतीः अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः । प्रीयमाणेन संमानिता । तज्ज्ञात्वा कृष्णस्तु नयनमवधेवं ध्रुवाख्यतालविशे
षं लक्ष्मीत्रिन्ये उन्नीतवती ॥१०॥ एवं नृत्यगीतादिना श्रीकृष्णसंमानितानां तासां मतिप्रीतिचिह्नसीनेयं नतानाह । काचिदिति ॥ श्लथंतिवल

उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ॥९॥ काचित्समं मुकुंदेन स्व
रजातीरमिश्रिताः ॥ उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ॥ तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥१०॥
काचिद्रासपरिश्रांता पार्श्वस्थस्य गदाभृतः ॥ जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ॥११॥ तत्रैकांसगतं बाहुं
कृष्णस्योत्पलसौरभं ॥ चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥१२॥ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं ॥
गंडं गंडे संदधत्याः प्रादात्तांबूलचर्वितं ॥१३॥ नृत्यती गायती काचित् कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्यु
तहस्ताब्जं श्रांताधात्स्तनयोः शिवं ॥१४॥ गोप्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्लभं ॥ गृहीतकंठ्यस्तद्दोर्भ्यां
गायंत्यस्तं विजह्रिरे ॥१५॥

यानि मल्लिकाश्च यस्याः सा ॥११॥ उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुं ॥१२॥ नाट्येन नर्त्येन विक्षिप्तयोः कुंडलयोः त्विषा मंडितं गंडे कपोलं
तथाभूते स्वगंडे संदधत्याः संयोजयंत्याः ॥१३॥ कूजंती नूपुरमेखला च यस्याः सा ॥१४॥ तदेवमन्यास्वपि गोप्यो यथायथं नानाविभ्रमै
र्विजह्रुरित्याह गोप्य इति ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०शा०१० तत्रवादकेषु गायकेषु च सत्सु स्त्रीकेषु गंधर्वकिंनरादिपुरस्सावेशेन मुसस्तु न्रत्यस्तु चान्यामेघवाद्यादिसंपत्तिं दर्शयन्रासरसंभ्रममाह। कर्णोत्पले
२७ ति। कर्णोत्पलैश्च अलकविटंकैरलंकालंकृतैः कपोलैश्च वक्त्रेषु श्रीः शोभा यासां ताः घोषाः किंकिण्याः वलयनूपुरघोषैः वाद्यैः वादि
त्रैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः॥ एतेन तालगतिसंतुष्टाः केशाः सशिरःकंपपादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितं। भगवतास
ह ननृतुः भ्रमरा एव गायका यस्यां रासगोष्ठ्यां॥१६॥ यथा गोप्यो नानाविभ्रमैः भगवता सह विजह्रुः। एवं भगवानपि स्वविलासैस्ता
भिः सह रेमे इत्याह। एवमिति। तद्विलासानभिहत्यैव रतौ दृष्टांतः। यथार्भक इति। स्वप्रति। स्वप्रतिबिंबैः विभ्रमः क्रीडा यस्य स इव। अनेनैतद्

कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः। गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्र
प जो भ्रमरगायकरासगोष्ठ्यां॥१६॥ एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः॥ रेमे रमेशो व्रजसुं
दरीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः॥१७॥ तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा॥ नांजः
यो प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह॥१८॥ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः॥ कामार्दि
ताः शशांकश्च सगणो विस्मितोऽभवत्॥१९॥

र्शितं स्वीयमेव कलंकोशलं सौगंध्यलावण्यमाधुर्यादि...ता सुखं चार्प्य ताभिः सह रेमे। यथार्भकः स्वप्रतिबिंबैरिति॥१७॥ तास्तु भगवद्विला
सैराकुला बभूवुरित्याह। तदंगसंगेति। तस्यांगसंगेन प्रमोदस्तत्प्रीतिस्तया व्याकुलान्यवशानींद्रियाणि यासां ताः विश्लेषयत् बंधान्केशा २७
दीन् अंजसा प्रतिव्योढुं यथापूर्वं कर्तुं नालं न समर्था बभूवुः॥ विस्रस्ता माला आभरणानि च यासां ताः॥१८॥ न केवलं ता एवाकुलेंद्रियाः किंतु दे
व्योपीत्याह। कृष्णविक्रीडितमिति। किंच। शशांकश्चेति। अनेनैतत्सूचितं। शशांकेन विस्मितेन गतौ...यां ततः प्राकृतनाः सर्वेपि ग्रहाः
तत्र तत्रैव तस्थुः ततश्चातिदीर्घासु रात्रिषु यथा सुखं विजह्रुरिति॥१९॥

किंच कृत्वेति। अयं भावः। कामायनिग्रहोपायो महायोगिन्यधीश्वरि॥ नंदगोपसुतं देवि पतिं मे कुरु ते नमः इति प्रार्थितं ...भिः प्रार्थनात्। भगवतापि
याः प्रिया तावलाव्रजं सिद्धा मयेमा रंस्यथ क्षपा इति तथैव प्रतिश्रुतत्वात्। तावं तमात्मानं कृत्वा रेमे इति यावत्॥२०॥ कृपातिशयमाह। तासा
मिति॥२१॥ ततोऽतिहृष्टानां गोपीनां चारित्रमाह। गोप्य इति स्फुरतां स्वर्णकुंडलानां कुंतलानां च त्विषा गंडयुः श्रीस्तया सुधितेन अमृ
तायितेन हाससहितेन निरीक्षणेन च ऋषभस्य पत्युः कृष्णस्य मानं दधत्यः शृंगारं कुर्वत्यः तत्कर्माणि जगुः तस्य कररुहैर्नखैः स्पर्शेन
प्रमोदो यासां ताः॥२२॥ अथ जलकेलिमाह। ताभिरिति। सा अंगसंगेन घृष्टा संमर्दिता या स्रक् तस्याः अत एव तासां कुचकुंकुमेन

कृत्वा तावंतमात्मानं यावतीर्व्रजयोषितः॥ रेमे स भगवांस्ताभिरात्मारामोपि लीलया॥२०॥ तासामतिविहारेण श्रांतानां वदना
निसः॥ प्रामृज्यत्करुणः प्रेम्णा शंतमेनांग पाणिना॥२१॥ गोप्यः स्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रिया सुधितहासनिरी
क्षणेन॥ मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः॥२२॥ ताभिर्युतः श्रममपोहितुमंगसंगघृ
ष्टस्रजः स्वकुचकुंकुमरंजितायाः॥ गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः॥२३॥ सोंभ
स्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग॥ वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्व
रतिरत्र गजेंद्रलीलः॥२४॥ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे॥ चचार भृंगप्रमदागणावृतो यथा
मदच्युत् द्विरदः करेणुभिः॥२५॥

रंजितायाः संबंधिभिर्गंधर्वपालिभिः गंधर्वपाः गंधर्वयतयः इव गायंतो ये अलयः तैरनुद्रुतः अनुगतः सन् कृष्णः वाः उदकं आविशत् भिन्न
सेतुः विदारितवप्रः स्वयं च अतिक्रांतलोकवेदमर्यादः॥२३॥ स्वरतिः आत्मारामोपि अत्र गोपीमंडले अंभसि वा॥२४॥ स्थलजलक्रीडां दर्शि
ता। वनक्रीडां दर्शयति॥ ततश्चेति। यमुनाया उपवने जलस्थले प्रसूनानां गंधो यस्मिन् तेनानिलेन जुष्टानि दिशां तटानि अंतानि यस्मिन् पद्मा
दिशाश्वतटं स्थलं च यस्मिन् वने तेषु भृंगाणां प्रमदानां च गणैरावृतः॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०पू०
९८

रासक्रीडानिगमनं एवमिति सत्यकामः सत्यसंकल्पः अनुरागिस्त्रीकदंबस्थः। एवं स सर्वा निशाः सेवितवान् शरत्काव्यकथारसाश्रयाः। शरदि भ
वाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः। यद्वा। निशा इति द्वितीया। स तत्संयोगे शृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्ये
षु याः कथास्ताः सिषेव इति। एवमप्यात्मन्येवावरुद्धसौरतः चरमधातुः न तु स्खलितो यस्येति कामजयोक्तिः॥२५॥२६॥ प्रतीपं प्रतिकूलं य
धर्मम् इत्यर्थः। आचरत् कृतवान्। न वेदं धर्ममात्रं कलंकलक्षणाद् इव तत्। किं तु महासाहसमित्याह। परदाराभिमर्शनमिति॥२८॥ आप्तकाम
स्य नायमधर्मः इति चेत्। यद्येवं कामाभावात् निंदितं केनाभिप्रायेण कृतवानिति पृच्छति। आप्तकाम इति॥२९॥ परमेश्वरे केमुसन्यायेन

एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्र
याः॥२६॥ राजोवाच॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः॥२७॥ स कथं धर्मसेतूनां
वक्ता कर्ताभिरक्षिता॥ प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनं॥२८॥ आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं॥ किमभिप्राय ए
तन्नः संशयं छिंधि सुव्रत॥२९॥ श्रीशुक उवाच॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं॥ तेजीयसां न दोषाय वह्नेः सर्वभु
जो यथा॥३०॥ नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः॥ विनश्यत्याचरन्मौढ्याद्यथाऽरुद्रोऽब्धिजं विषं॥३१॥ ईश्वराणां वचः
सत्यं तथैवाचरितं क्वचित्॥ तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत्॥३२॥ ॥ ॥ ॥

परिहर्तुं सामान्यतो महतां चरितमाह धर्मव्यतिक्रमो दृष्टः। साहसं च ब्रह्मप्रजापतींद्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न
भवतीति॥३०॥ तर्हि यथा सदाचरति श्रेष्ठ इति न्यायेनान्योऽपि कुर्यादित्याशंक्याह। नैतदिति। अनीश्वरः देहादिपरतंत्रः यथा रुद्रव्यतिरि
क्तो विषमाचरन् भक्षयन्॥३१॥ कथं तर्हि सदाचारस्य प्रामाण्यं अत आह ईश्वराणामिति। तेषां वचः सत्यं। अतस्तदुक्तमाचरेद्देवमाच
रितं तु क्वचित्सत्यं अतः स्ववचोयुक्तं तदेव चसायतयुक्तं परूढ़ं तत्तदेवाचरेत्॥३२॥ ॥

ब्रह्मादीनां दुहितृकामनादेः धर्मव्यतिक्रमः॥ अजिगर्तस्य पुत्रविक्रियः विश्वामित्रस्य मांसभक्षणं॥ सप्तर्षीणां वा न्याव भक्षणं॥ परशुरामस्य मातृ
बधः॥ इत्यादि धर्मव्यतिक्रमः॥ न दोषाय तथा श्रीकृष्णस्येति॥३०॥ शोधः॥ ९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि तेपि किमेवं साहसमाचरंतितत्राह कुशलेति। प्रारब्धकर्मक्षपणमात्रमेवतेषां कृत्यं नान्यदित्यर्थः॥३३॥ प्रस्तुतमाह। किमुतेति कु
शलान्वयो न विद्यत इति किं पुनर्वक्तव्यमित्यर्थः॥३४॥ एतदेव स्फुटी करोति यस्य पादपंकजपरागस्य निषेवणेन तृप्ताः यद्वा यस्य पा
दपंकजपरागे निषेवा येषां ते तथा तेभ्यत्वत् (?) ... ति भक्ता इत्यर्थः। तथा ज्ञानिनश्च न नह्यमानाः बंधनमप्राप्नुवंतः॥३५॥ परदारसंगोपीनां
प्रसंगी ... स्य परिहृतं इदानीं भगवतः सर्वांतर्यामित्वेन परदारसेवा नाम न काचिदित्याह। गोपीनामिति। यः ... अंतश्चरति अध्यक्षः बुद्धि

कुशलाचरितैरेषामिह स्वार्थो न विद्यते॥ विपर्ययेण वानर्थो निरहंकारिणां प्रभो॥३३॥ किमुताखिलसत्वानां तिर्यङ्मर्त्य
दिवौकसां॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः॥३४॥ यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिल
कर्मबंधाः॥ स्वैरं चरंति मुनयोपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः॥३५॥ गोपीनां तत्पतीनां च सर्वेषामेव दे
हिनां॥ योंतश्चरति सोध्यक्षः क्रीडनेनेह देहभाक्॥३६॥ अनुग्रहाय भक्तानां मानुषं देहमास्थितः॥ भजते तादृशीः क्रीडा यः
श्रुत्वा तत्परो भवेत्॥३७॥ नासूयन् खलु कृष्णाय मोहितास्तस्य मायया॥ मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः
॥३८॥ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः॥ अनिच्छंत्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः॥३९॥ ॥ ॥

दिसाक्षी स एव क्रीडनेन देहभाक्। न तु अस्मदादितुल्यः येन दोषः स्यादिति॥३६॥ नन्वेवं चेत् आप्तकामस्य निंदिते कुतः प्रवृत्तिरित्यत
आह अनुग्रहायेति शृंगाररसाकृष्टचेतसः अतिबहिर्मुखानपि स्वपरान्कर्तुमिति भावः॥३७॥ नन्वन्येपि मित्राचाराः स्वचेष्टितमे
वमेवेति वदंतितत्राह नासूयन्निति एवंभूतैश्वर्याभावे तथा कुर्वतः पापाः ज्ञेया इति भावः॥३८॥ ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते॥३९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स्कं०
९९

भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह। विक्रीडितमिति आचिरेण धीरः सन् हृद्रोगं कामं आशु अपहितोति
परित्यजतीति॥४०॥ सेयं श्रीपरमानंदसेवि श्रीधरनिर्मिता॥ श्रीभागवतभावार्थदीपिका दशमाश्रया॥ इति दशमे त्रयस्त्रिंशोध्यायः
॥३३॥ ॥ चतुस्त्रिंशेऽहिनाग्रस्तं नंदं हरिरमूमुचत्॥ विद्याधरं चांगिरसः शापात् शंखचूडं तथावधीत्॥ एतस्मादेशतः कामं कि
रीटस्य कामतः॥ अनुगृण्हन् वशं निन्ये तथा विद्याधरोऽपि यं॥ तदेवं कामान्तुयह मुखेन कामजयं प्रतिपाद्येतथैव विद्याधरः ज
विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद्यः॥ भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमा
श्वपहिनोत्यचिरेण धीरः॥४०॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्रयस्त्रिंशोध्यायः॥ ॥श्रीशुक उवा
च॥ एकदा देवयात्रायां गोपाला जातकौतुकाः॥ अनोभिरनडुद्युक्तैः प्रययुस्तेंबिकावनं॥१॥ तत्र स्नात्वा सरस्वत्यां
देवं पशुपतिं विभुं॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंबिकां॥२॥ गावो हिरण्यं वासांसि मधुमध्वन्नमादृताः॥
ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति॥३॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः॥ रजनीं तां महाभागा नं
दसुनंदकादयः॥४॥ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः॥ यदृच्छयागतो नंदं शयानमुरगोग्रसीत्॥५॥
स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय॥६॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः॥७॥ तैर्दह्यमानोपि नामुंचत्तमुरंगमः॥ तमस्पृशत्
यं प्रतिपादयितुं तत्प्रसंगं दर्शयति। एकदेति॥१॥२॥ गावः गाः मधु मधुरं मध्वन्नं मधुना सहितमन्नं॥३॥ जलमात्रं प्राश्य उपोषितास्तां
निशां तत्र ऊषुः न्यवसन्॥४॥ महानहिरजगरः उरसा गच्छतीति अलक्षित उल्मुकैः। अग्रसीत् जग्रास॥५॥६॥ विव्यधुस्ताडयामासुः उल्मु

तथा ९९

विद्याधरेषु अर्चितं पूजितं ॥९॥ गोपेषु आत्मसात् नतेश्वर्य्यप्रकाशः पितुर्मविह्वानिवतमप्रष्टस् तदीप्यमानेन वपुषा समवस्थितं ॥१०॥ यः परया शो
भया प्रकाशी ते सभग्वान् करोति ॥११॥१२॥ प्राहसं उपहसितवानस्मि । प्रलब्धैः उपहासितैः मदीयेनैव पापेन निमित्तेन ॥१३॥ यत् यतः शा

स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितं ॥९॥ तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं ॥ दी
प्यमानेन वपुषा पुरुषं हेममालिनं ॥१०॥ को भवान्परया लक्ष्म्या रोचते ऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोवशः ॥
॥११॥ सर्प उवाच ॥ अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनाचरन्दिशः ॥१२॥ ऋषीन्विरू
पांगिरसः प्राहसं रूपदर्पितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥१३॥ शापो मेनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ य
दहं लोकगुरुणा पदा स्पृष्टो हताशुभः ॥१४॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवह
न् ॥१५॥ प्रपन्नोस्मि महायोगिन् महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥१६॥ ब्रह्मदंडाद्विमुक्तो हं सद्यस्ते
ऽच्युतदर्शनात् ॥ यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१७॥ इत्यनुज्ञाप्य दा
शार्हं परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥१८॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मित
चेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥१९॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥
विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां ॥२०॥

पातु ॥१४॥ आपृच्छे स्वलोकं गंतुं अनुज्ञां याचे । अमीवहन् दुःखनाशन ॥१५॥१६॥१७॥१८॥१९॥ अहिदेहं निहत्येवं प्राग्वत्सुदर्शनं ।
तद्वदुन्मादिनं शंखः शंखचूडमताडयत् । तत्प्रसंगमाह कदाचिदिति ॥२०॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०श०पु० विरजोंबराविति। विरजसी निर्मले अंबरे ययोस्तौ॥२१॥ किंच। निशा... मकुर्वं तौ उदितउडुपः तारकश्च यस्मिन् तत्। मल्लिकागंधेनम
१०० त्ता अलयो यस्मिन्॥२२॥ अनिबद्धत्वादन्येषु युगपत्कल्पयितुमशक्यमपि तौ स्वरमंडलमूर्छितं युगपत्कल्पयंतौ मनःश्रवणयोर्मंगलं य
था भवति तथा जगतुः। अगायतामिति॥२३॥ मूर्छिताः तन्मीतलीनचित्ताः। स्रंसत् भ्रश्यत् दुकूलं यस्मात् तमात्मानं देहं॥ स्रस्ताः केशे

उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः॥ स्वालंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ॥२१॥ निशामुखं मानयंतावुदि
तोडुपतारकं॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना॥२२॥ जगतुः सर्वभूतानां मनःश्रवणमंगलं॥ तौ कल्पयंतौ युगप
त्स्वरमंडलमूर्छितं॥२३॥ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः॥२४॥ एवं
वि विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत्॥ शंखचूडेति विख्यातो धनदानुचरोभ्यगात्॥२५॥ तयोर्निरीक्षतो राजंस्तन्नाथं
प्रमदाजनं॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः॥२६॥ क्रोशंतं कृष्णरामेति विलोक्य स्वपरिग्रहं॥ यथा गा दस्यु
नाग्रस्ता भ्रातरावन्वधावतां॥२७॥ मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं॥२८

भ्यः स्रजो यस्य तं च तदा नाविदन्॥२४॥२५॥ निरीक्षतोः निरीक्षमाणयोः तौ नाथौ यस्य तं॥ कालयामास हृतवान् प्रेरयामास॥२६॥ १००
दस्युना चौरेण॥२७॥ मैष्ट भयं मा प्राप्नुवते त्यभयवाचौ॥२८॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥३०॥ शिरसा सह चूडामणिं जहारेत्यर्थः॥३१॥३२॥ इति दशमे चतुस्त्रिंशोऽध्यायः॥३४॥ ॥ पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः।
युग्मश्लोकैरनुगीतेन निन्युर्दुःखेन वासरान्॥१॥ एवं रात्रिषु कृष्णेन स्वैरं अभिरमिता नो दिवा तद्विरहिता नामनुगीतेन दिनं निन्युस्तान्प्र
कारमाह। गोप्य इति। दुःखेन कष्टेन वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुगलानीति॥१॥ हे गोप्यः वा हे तत्मूले कृतः अर्पितो वामः कपो
लो येन सः। वलितेन वर्तितो भ्रुवौ येन स वलितभ्रूः मुकुंदः अधरे अर्पितं वेणुं कोमलाभिरंगुलीभिः आश्रिता मार्गाः सप्तस्वरच्छिद्राणि य

संवीक्ष्य तावदनुप्राहैव कालमत्यूह्य वो द्विजान्॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया॥२९॥ तमन्वधावद्गोविंदो यत्र य
त्र स धावति॥ जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः॥३०॥ आविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः॥ जहार मुष्टिनै
वांग सहचूडामणिं विभुः॥३१॥ शंखचूडं निहत्यैवं मणिमादाय भास्वरं॥ अग्रजायाददात्प्रीत्या पश्यंतीनां च योषितां॥
॥३२॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुस्त्रिंशोऽध्यायः॥३४॥ ॥ श्रीशुक उवाच॥ गोप्यः कृष्णे वनं याते त
मनुद्रुतचेतसः॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान्॥१॥ गोप्य ऊचुः॥ वामबाहुकृतवामकपोलो वलितभ्रु
रधरार्पितवेणुं॥ कोमलांगुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः॥२॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदु
पधार्य सलज्जाः॥ काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः॥३॥ ॥ ॥ ॥

स्य तं यत्र यदा ईरयति वादयति॥२॥ तदा व्योमयाना नासिद्धानां वनिताः सिद्धैः स्वपतिभिः सहवर्तमाना अपि तद्वेणुवीरणमुप
धार्य्याकर्ण्य प्रथमं विस्मिताः ततः काममार्गणैः समर्पितानि [illegible] याभिस्ताः तस्य वक्षणा इत्यर्थः। सलज्जाः सत्यः कश्मलं मोहं
ययुः। अत्र लिंग। अपस्मृता विस्मृता नीव्यो याभिरिति। अतएवं [illegible] स्य लक्ष्मस्य विरहं कथं सहाम इति सर्ववाक्यशेषः॥३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दश॰ पू॰
१०१

अंतहे अबलाः इदं चित्रं शृणुत। हारहासः हारवद्विशदो हासो यस्य सः। यद्वा वेणुवादनेनेनाधो वने नहसतः हारेषु स्फुरन् हासो यस्य हार
वद्वा वक्षसि रेणाभमानो हासो यस्य यद्वा हाराणां हास इव विशदास्फुर्त्तिर्यीस्मिन्नुरसीति। उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः। यर्हि यदा
कूजितवेणुर्भवति॥४॥ तदा व्रजे ये वृषा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते। आरात् दूरादेव दंतैः दष्टाः कवला ग्रासा यैः।
तेध्वताउत्तकर्णा यैस्ते निद्रिता इवालिखिते। चित्रमिवचासन्। आविदुषांतिरश्चामिदमतिचित्रमित्यर्थः॥५॥ किंचाअचेतनास्तु सरित्तु

हंताचित्रमबलाः शृणुतेदं हारहासउरसि स्थिरविद्युत॥ नंदसूनुरयमार्त्तजनानां नर्मदो यर्हि कूजितवेणुः॥४॥ वृंदशोव्र
ज वृषा मृगगावो वेणुवाद्यहृतचेतस आरात्॥ दंतदष्टकवलाध्धृतकर्णा निद्रिता लिखितचित्रमिवासन्॥५॥ बर्हिणस्तवक
धातुपलाशैर्वद्धमल्लपरिवर्हविडंबः॥ कर्हिचित्सबलआलि सगोपैर्गाः समाह्वयति यत्र मुकुंदः॥६॥ तर्हि भग्नगतयः सरस
रितो वेतसरांबुजरजोनिलनीतं॥ स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः॥७॥ ॥ ॥

तद्दतीवचित्तमित्याहुः हे आलिसखि। बार्हिणो मयूरस्य स्तवकामयूरपिच्छाः। धातवो गैरिकादयः पलाशानि पल्लवास्तैर्वद्धश्चासौ मल्लाना १०१
नां परि वर्हः परिकरैस्तं विडंबयति अनुकरोतीति तथा स मुकुंदो गोपैः सह वेणुनेरूपरितनं अत्रापि ज्ञातध्वयस्त्रय द्रागाः समाह्व
यति॥६॥ तर्हि तदा तद्ध्वनिश्रवणादनिलेनानीतं तं तस्य पदांबुजस्पृहं यंत्य इव भग्नगतयः सरितः वेतोभिश्चितं तदधिवता आपि अवहु
पुण्याः मत्तो न प्राप्नुवंति केवलं प्रेमणा वेपिताः भुजास्तरंगा यासां ताः। स्तिमिता निश्चला आपो यासां ताः। गोप्यो पिलोचनयोः स्तिमित [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थावरे इष्यति चित्रं इहयत इत्साहुः ॥ अनुचरैर्गोपैः ईश्वादिभिर्वा ॥ मुग्धानां वाक्यं आदिपुरुषइवेति । अचलभृतिः निश्चलश्रीः वेणुना तत्रागमागा
नेन ॥७॥ तदा प्रणतामारेण विटपाः शाखा यासां ता वनगता लताः स्वस्मिन् विष्णुं प्रकाशमानं स्तवयंत्य इव मधुधाराः प्रववृषुः ॥ स्मेतिवि
स्मये तथा तसुती नामपि तयैवानंद इति भवः ॥ एतानि विष्णुभक्तिलक्षणानि ॥८॥ किंच । सरसि कमलेव नेषु विहरतां पक्षिणामपि मन आ
कर्षणं तद्गीतं किंपुनरन्येषामित्साहुः ॥ दर्शनीयतिलक इति । दर्शनीयस्तिलको यस्य । दर्शनीयानां सुंदराणां मध्ये मुख्य इतिवा । वनमा

अनुचरैः समनुवर्णितवीर्य आदिपुरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंती वेणुनाह्वयति गाः सयदा हि ॥७॥ गिरितटे
वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः ॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म
॥८॥ दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हि संधित
वेणुः ॥९॥ सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥१०॥
सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥ हर्षयन्यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वं ॥११॥

ला सु या दिव्यगंधा तुलसी तस्याः मधुना मत्तैरलिकुलैरलघु उच्चैर्गीतमभीष्टमनुकूलं गीतं आद्रियन् आदरेण गृह्णन् यर्हि अधरे संधि
तवेणुर्भवति ॥९॥ तर्हि ये सरसि स्थाः सारसा हंसाः अन्ये च विहंगाः । चारुणा गीतेन हृतचेतस एत्य तत आगत्य हरिमुपासत भजन् । तत्समी
पे उपविश्य विनुर्वीहं तेतिष विषादे ॥१०॥ ये घोषि हरिं सेवंत इत्साहुः ॥ सहबल इति । भो व्रजदेव्यो गोप्यः सहबलः सरामः ... । स्रग्भि
र्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य पद्ममुक्ताफले स्रगापीडे न विलासो यस्येति वा क्षितिभृतः सानुषु गिरिस्तटेषु व
र्तमानः स्वयं जातहर्षो विश्वं हर्षयन् यदा वेणुरवेणोपरंभवति निनादयति नादेनापूरयतीत्यर्थः ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰श॰१० तस्मा मेघः महतः श्रीकृष्णस्यातिक्रमणे शंकितं चेतो यस्य सः न पुनरूपरि तो याति न चोच्चैर्गर्जति किंतु तत्रैवास्थितः सन् वेणुरवं अनुमंद
१०२ मंदं गर्जति किंच। सुहृदे विरवानिर्हरणादिसाम्यात् सुहृते कृष्णस्य सुमनोभिरभ्यवर्षत् अदृश्यैः देवैः क्रियमाणं कुसुमवर्षं मेघे कल्प
यित्वोक्तं। तुषारो वा कुसुमतया कल्पितः स एव वा देवतारूपोऽभ्यवर्षदिति प्रतपाद्यातपत्रं घनेन तत् छायया कुर्वन्नि

महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः॥ सुहृदमभ्यवर्षत् सुमनोभिः छायया च विदधत् प्रतप
गा त्रं॥१३॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः॥ तव सुतः सति यदाधरबिंबे दत्तवेणु
रनयत् स्वरजातीः॥१४॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः॥ कवय आनतकंधरचित्ताः
कश्मलं ययुरनिश्चिततत्त्वाः॥१५॥ कनय

ति॥१३॥ अपि च महदे तदाश्चर्यमपि साहुः विविधेति हे सति यशोदे तव सुतो नाना गोपक्रीडासु विदग्धो निजाः निपुणः वेणुवाद्ये
विषये निजैव शिक्षा यासु ताः स्वोत्प्रेक्षिताः न त्वन्यतः श्रुता इत्यर्थः। स्वरजातीः निषादर्षभादिस्वरालापभेदान् अनयत् उन्नी १०२
तवान्॥१४॥ तन्नीताः स्वरजातीः सवनशः मंद्रमतारभेदेन यतो गीतध्वनि रागतः तत्र आनतकंधराश्चित्तं च येषां ते। उपधा
र्य सम्यगाकर्ण्य कवयः कोविदा अपि ते न निश्चितं तत्त्वं तद्धेतुर्यैस्ते कश्मलं मोहं ययुरिति॥१५॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माकं तुभ्यो हे किं ब्रूमहे सखे॥ निजपदाब्जदलैरिति ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतो दरखुरान् क्रमेण यथा शमयन् वर्ष्माणां धुर्यो गजेन्द्रः तद्वद्गतिर्यस्य सः ईदृशो वादितवेणुः सन्॥१६॥ यदुजतितेनेति नितरां सविलासवीक्षणेन अर्पितो मनोभववेगो याभ्यस्ता अवयं कुजगा वृक्षा इव अगा गमिता विदितागा इन्द्रा गतिः सम्मोहिता न विदाम॥ कबरं वा वसनं चेति॥१७॥ किं चामणिधरो मणीन् ग्रथितो वनमालाया मार्थधर तातेन मणिधरः कृविदिरोते पाणिमिर्गाः असे मताः गणयन् तस्मादर्पित गन्धाय तुलसी तस्यो

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः॥ व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः॥१६

व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा॥१७॥ क

मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः॥ प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र॥१८॥ मु

क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः॥ गुणगणार्णमनुगम्य हरिण्यो गोपिका इव विमुक्तगृहाशाः॥

मालया सह वर्तमानं प्रणयिनः प्रियस्यानुचरस्य अंसे भुजं प्रक्षिपन् यत्र यः कदाचित् अगायत तदा॥१८॥ तत्र क्वणितस्य वेणोरवेण वंचितानि अपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्याः गुणगणार्णं गुणगतास्समुद्रं कृष्णमनुगम्य प्राप्य ताः कृष्णमेवान्वसत नान्यवर्त्तत इत्यर्थः कुतः यतो विमुक्तगृहाशाः यथा गोपिका इव ता अपि हि विमेवस्थ...सतेति॥१९॥ ॥

दश०पू०
१०३

तदेवं वृंदावनप्रवेशे पुक्रीडितासायाह्ने गोधनानिपरावर्त्य यमुनायां क्रीडतस्य सौभाग्यमनुवर्णयंति कुंददामकृतकौतुकवेषः इतिगोपी
नामुत्सवाय कुंददामभिः कृतकौतुकेन उत्सवेन वेषो ... नंदस्य सूनुः कृष्णः यद्वा सहैव वदेत्यः
कृथयंत्यः कश्चित्तव वत्सइति कश्चिन्नंदसूनुरित्याहुः। नर्मदः हर्षदः ... विजहार क्रीडितस्म॥२०॥ तदामलयजस्पर्शेन मलयजस्य
चंदनस्येव सुरभिः शीतश्चयः स्पर्शः तेनतं कृष्णं मानयन्ननुकूलं यथा उपवातिवीजयति। यद्वा मलयजो दक्षिणोवायुः यद्वा मल
यकृष्णेनस्वांगे ... तस्य स्पर्शं मानयन्निति। किंचवंदितइति। तोवकाः संतः गंधर्वादिगणाः वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः प

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम्॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार॥२०॥ मंद
वायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन॥ वंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः॥२१॥ वत्सलो व्रज
गवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः॥ कृत्स्नगोधनमुपोह्य दिनांते वेणुरनुगेडितकीर्तिः॥२२॥ उत्सवं श्रमरुचापि गीत
दृशीनामुन्नयन् खुररजःछुरितस्रक्॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः॥२३॥ ॥ श्री॥ ॥

रितउपासत॥२१॥ अथ यांतमालोक्य हृष्टाः परस्परमूचुः। वत्सलइति। व्रजस्य गवां च यद्वानांगवां अनुकंप्या नामस्माकमित्यर्थः।
वत्सलो हितकृत्। कुतः ... यस्मादगध्रः ... धरतीतिगोवर्द्धनोद्धरणः बहुशो रक्षणस्योपलक्षणमेतत्। वृद्धैः ब्रह्मादिभिः पथी १०३
तिवंद्यमानचरणइत्यर्थः। सायंदीर्घमागतुनंदृति। उपोह्यापकीकृत्यगीतयुक्तो वेणुर्यस्य सः॥२२॥ श्रमयुक्तापापिका सा नेत्राणांह
र्षंउन्नयन्नुद्धवैः प्रापयन् खुररजे ... सात्रजोयस्य सुहृदामस्माकमाशिषोमनोरथस्य दित्सया दातुमिच्छया देवक्याजे
ठरेभवतीति तथा सएवउडुराजः चंद्रनिरतिहेतुत्वेनसएषएतिइति॥२३॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिसंभ्रमेण काश्चित्समीपमायातं कथयंति। ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः। बदरपांडुवदनः ईषत्पक्वबदरव
त्पांडुरं वदनं यस्य सः अत्र हेतुः कनककुंडलयोर्लक्ष्म्या कांत्या महत्कोमलौ गंडौ यस्मिंस्तत् वदनं मंडयन् कोमलगंडस्थलं शोभय
न्निति वा॥२४॥ यदुपतिर्देवकीजठरभूरिति प्रागयं वसुदेवस्य क्वचिज्जातस्तत्पात्मज इत्यादिगर्गवाक्यप्रसिद्धेः। कंपद्य। सखउ
देयि वानूसालतां कुलेत्नति वत्सतालाकां। द्विरदं तीतिगजेंद्रस्येव गतिश्चंद्र इव प्रसन्नवक्त्रो व्रजगवामस्माकमनं तद्दिनतापं च।

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली॥ बदरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या॥२४॥
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते॥ मुदितवक्त्र उपयाति दुरंतं मोचयन् व्रजगवां दिनतापं॥२५॥
श्रीशुक उवाच॥ एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः॥ रेमिरेऽहः सु तच्चित्तास्तन्मनस्का महोदयाः॥२६॥
इति श्रीभागवते महापुराणे दशमस्कंधे वृंदावनक्रीडायां गोपीगीतं नाम पंचत्रिंशोऽध्यायः॥३५॥ ॥श्री
शुक उवाच॥ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः॥ महीं महाककुत्कायः कंपयन्खुरविक्षतां॥१॥ ॥ रवु

शमयन्प्रगुणः स्निपयातिएवसमीपमायातीति॥२५॥ एवं विरहदुःखेनापि नु अहो। कृष्णलीला एव गायंत्यः तास्मिन्नुचित्तं चेतना
जीवितं यासां ताः तस्मिन्नेव मनः संकल्परूपं यासां ताः अतो महानुदय उत्सवो यासां ताः अहःस्वपि रेमिरे॥२६॥ इति दशमे पं
चत्रिंशः॥३५॥ ॥षट्त्रिंशे निहतेरिष्टे नारदोत्तयाखलान्‌ तौ वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरमथादिशत्‌। गोपीरासो
तरायातं श्रीरवचूडं निहंसः। अह गोपीमहासहसु ... एवं देवगंधर्वादिगीतनृत्यवाद्यकुतूहलमवर्णो दिपिः कृष्णस्य
प्रेष्ठस्य व्रजस्य परमोत्सवे वर्त्तमाने तद्विरुद्धार्थोनराधिकारः प्रमथ्यासुरः तर्हि तदा वृषभाकृति खुरः तं वर्णयति सार्द्धत्रयेण।

प्रविष्टाति वक्षस्सः इत्युक्तिरीति तां महीं कंपयन्‌॥१॥

रंभमाणः वृषभध्वनिं शब्दं कुर्वन्। विलिखन् विदारयन्। उद्यम्य ऊर्ध्वं कृत्वा॥ वप्राणि तटानि उल्लिखन् उद्धृत्य किंचित् किंचित् छकृत् मध्ये ईषत्पुरीषं मुंच
न्। तथा मूत्रं मुत्सृजन्। स्तब्धलोचनः अनिमेषलोचनः॥२॥ यस्य ध्वनिना गवां नारीणां च। तत्र अपि च तुर्थो द्वेधा स्त्रावः पातः पंचमे षष्ठे यो॥
अतः ऊर्ध्वं घस्रः तिः स्यादिति भागः॥ ३॥ ककुदि गलप्रस्थे शृंगे॥४॥ कृष्ण कृष्ण रक्षेरते॥५॥६॥७॥ इत्येवं वदन्। आस्फो घ करतले न बाहुमा

रंभमाणः खरतरं यथा च विलिखन् महीं॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन्॥ किंचित् किंचित् छकृन्मुत्रं मूत्रयन्
स्तब्धलोचनः॥२॥ यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै॥ ३॥ निर्विशंति
घना यस्य ककुद्यचलशंकया॥ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः॥४॥ पशवो दुद्रुवुर्भीता राजन् संत्यज्य गोकुलं
कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः॥५॥ (पशवो दुद्रुवुर्भीता राजन् संत्यज्य गोकुलं) भगवानपि तद्वीक्ष्य गोकुलं भ
यविद्रुतं। मा भैष्टेति गिराश्वास्य वृषासुरमुपाकृयत्॥६॥ गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम॥ बलदर्पहाहं दुष्ट
नां त्वद्विधानां दुरात्मनां॥७॥ इत्यास्फोट्याच्युतो रिष्टं तलशब्देन कोपयन्॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो ह खु
रिः॥८॥ सोप्येवं कोपितो रिष्टः खुरेणावनिमुल्लिखन्॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत्॥९॥ अग्रन्यस्त
विषाणाग्रः स्तब्धासृग्लोचनोच्युतं॥ कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोशनिर्यथा॥१०॥ ॥ ॥ ॥ १०४

हस्तति न तलशब्देन कोपयन्। भुजाभोगं भुजाभुजः सए व भोगः सर्पदेहः तं सर्पदेहाकारं भुजमित्यर्थः। स्वयमच्युतः। अन्यान् दुःख
न् हरतीति हरिः॥८॥ उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो घा यस्मिन् सः॥९॥ अग्रे न्यस्तो विषाणाग्रे येन सः स्तब्धे असृक् तुल्ये लोचने
यस्य सः कटाक्षिप कटाक्षेण तिर्यक् निरीक्षः॥१०॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्ययो वा ह प्रति लोमं व्यनुदत् ॥११॥ अपविद्धः अपक्षिप्तः अपतत् आद्रवत् स्विन्नानि स्वेदयुक्तानि यस्य सः क्रोधमूर्छितः क्रोधेन व्याप्तः ॥१२॥
हत्वा । विषाणमुत्पाट्य तेनैव जघान । स च अपतत् ॥१३॥ मूत्रं शकृत् मूत्रं च शकृच्च एकवद्भावः तदुभयं समुत्सृजन् अनवस्थितार्थः । पादांश्च क्षिप
न् नृतस्ततः चालयन् । अनवस्थिते क्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम । अथ निरृतेर्यमस्य क्षयं निवासं जगाम । कृच्छ्रं यथा भवति तथा म
